# न्यायाचार्य श्रीयशोविजयजीकृत ग्रंथमाळा ॥

अध्यात्मसार, देवधर्मपरीक्षा, अध्यात्मोपनिषद्, अध्यात्मिकमत खंडन सटीक, यतिलक्षणसमुच्चय, नयरहस्य, नयप्रदीप, नयोपदेश सावचूरि, जैनतर्कपरिभाषा, ज्ञानबिंदु-आ दश ग्रंथोनो संग्रह.

श्रीभावनगरनिवासी गृहस्थ शा. आणंदजी पुरुषोत्तमदासनी सहायवडे छपावी प्रसिद्ध करनार

**श्रीजैनधर्मप्रसारक सभा.**

भावनगर.

तुकाराम जावजीना निर्णयसागर छापखाणामां बाळकृष्ण रामचंद्र घानेकरे छापी प्रसिद्ध कीधुं.

विक्रम संवत १९६५. वीर संवत २४३५.

# खास सूचना.

वाराणसीविबुधविजयावाप्त न्यायविशारदबिरुद न्यायसुधासुधादीधितिग्रंथशतीग्रंथेनावाप्त न्यायाचार्यपद श्रीमद्यशोविजय महामहोपाध्यायकृत आ ग्रंथमाळा संस्कृत प्राकृतना अन्यासी दरेक साधु साध्वीने तेमज दरेक पुस्तकभंडार माटे भेट आपवानी छे, तेथी तेना जीज्ञासुए मंगावी लेवा कृपा करवी. जैनलाइब्रेरीवाळाउए पोस्टेज मोकलीने मंगाववी.

श्रीजैनधर्मप्रसारक सभा.

भावनगर.

# प्रस्तावना.

आ ग्रंथमाळा एक एवा उत्तम अने महान् पुरुषनी करेली बहार पाडवामां आवी छे के जे पुरुषना वचनना प्रामाण्यता माटे दरेक विद्वानने घणोज उंचो मत छे. ए महापुरुषना समकालीन श्रीमानविजय उपाध्यायजीए श्रीधर्मसंग्रह नामनो अत्युपयोगी ग्रंथ स्वोपज्ञवृत्ति समेत सुमारे पंदरहजार श्लोक प्रमाण संवत १७३८ मां रच्यो छे. ते ग्रंथनी प्रशस्तिमां आ ग्रंथमाळाना कर्त्ता विषे तेओ साहेब लखे छे के-

सत्तर्ककर्कशधियाखिलदर्शनेषु, मूर्द्धन्यतामधिगतास्तपगच्छधुर्याः ।
काश्यां विजित्य परयूथिकपर्षदोऽग्र्या, विस्तारितप्रवरजैनमतप्रभावाः ॥
तर्कप्रमाणनयमुख्यविवेचनेन, प्रोद्बोधितादिममुनिश्रुतकेवलित्वाः ।
चक्रुर्यशोविजयवाचकराजिमुख्या, ग्रंथेऽत्र मय्युपकृतिं परिशोधनाद्यैः ॥
बाल इव मंदगतिरपि, सामाचारीविचारदुर्गम्ये । अत्राऽभूवं गतिमांस्तेषां हस्तावलंबेन ॥

" जेओ सत्य तर्कथी उत्पन्न थएली तीक्ष्ण बुद्धिवडे समग्र दर्शनोमां अग्रेसरपणुं पाम्या छे, जेओ तप गच्छमां मुख्य छे, जेमणे काशीमां अन्य दर्शनीओनी सभाओने जीतीने श्रेष्ठ जैनमतना प्रभावने विस्तार्यो छे अने जेओए

तर्क, प्रमाण अने नयादिकना विवेचनवडे प्राचीन मुनिओनुं श्रुतकेवळीपणुं ( आ काळमां ) प्रगट बतावी आप्युं छे ते वाचक समूहमां मुख्य श्रीयशोविजयजीए आ ग्रंथनुं परिशोधनादि करीने मारा उपर उपकार करेलो छे. सामाचारी विगेरेना विचारथी दुर्गम एवा आ ग्रंथमां हुं बाळकनी जेवो मंदगतिवाळो छतां पण तेओ ( श्रीयशोविजयजी ) नाज करकमळना अवलंबनथी गतिवाळो थयो छुं, अर्थात् तेमनाज प्रसादथी आ ग्रंथ रचवाने समर्थ थयो छुं. "

उपर प्रमाणे जे महापुरुषनी कीर्तिनो यशपटह तेमना समकालीन धुरंधर ग्रंथकर्त्ता वगाडी गया छे, तेनो यशवाद करवा माटे हवे अमारे कांइ पण विशेष कहेवानी जरुर नथी. ए महापुरुषना करेला अनेक ग्रंथो पैकी हालमां घणाज थोडा हस्तगत थाय छे. आगळ आपेला उपोद्घातमां जणावेली हकीकत उपरथी जाणी शकाशे के तेओ साहेबे रहस्य शब्दांकित १०८ ग्रंथो बनाव्या छे. आ हकीकत भाषारहस्य ग्रंथना प्रारंभमां तेओ साहेबेज जणावी छे अने न्यायना सो ग्रंथो बनाव्यानी हकीकत तेओ साहेबज प्रतिमाशतक ग्रंथनी प्रस्तावनामां लाव्या छे. आ बे समूह शिवाय बीजा पण अनेक ग्रंथो मागधी तेमज संस्कृत भाषामां तेओ साहेबे रच्या हशे एवुं अत्यारे लब्ध थता रहस्य शब्द विनाना अने न्यायना विषय विनाना अन्य ग्रंथोथी तेमज तेमणे साक्षी तरीके भलामण करेला घणा ग्रंथोथी पूरवार थाय छे. आ महापुरुषनुं बुद्धिकौशल्य कोइ एवा विचित्र प्रकारनुं हतुं के एओ न्यायखंडखाद्य जेवा दुर्घट ग्रंथ बनाववा शक्ति धरावता हता, तें साथे गुजराती भाषामां घणी सरल पद्यरचना पण करी शकता हता. एमणे 'जगजीवन जगवालहो' एवा आद्य पदवाळी चोवीशी घणीज सरल भाषामां बनावी छे. गुजराती भाषामां पण द्रव्यगुणपर्यायना रास जेवी दुर्घट रचना

बनाववाने तेउ शक्तिमान थया छे. एमनी शक्तिनो अनुभव करनारा आधुनिक विद्वानो एमने अपूर्व शक्ति धारण करनारा माने छे अने ते अक्षरशः सत्य छे.

आवा उत्तम महापुरुषनुं जन्मचरित्र आपवुं ते खास आवश्यकतावाळुं कार्य छे परंतु ते श्रेणिबंध उपलब्ध थतुं न होवाथी जे प्रकारनुं उपलब्ध थइ शक्युं छे ते प्रकारे आ प्रस्तावनाने अंते आपवामां आव्युं छे.

आवा महापुरुषोना ग्रंथो प्रकाशमां लाववाथी जैनशासननी अपूर्व प्रभानो अन्य मतवाळाउने पण भास थइ शके छे. आ सभाए ए कार्य बहु वर्षथी हाथ धर्युं छे. ते खाते महान् उपगार श्रीमन्मुनिराज महाराज श्रीवृद्धिचंदजीनो छे. तेउ साहेबनी खास प्रेरणाथी प्रथमं कळिकाळसर्वज्ञ श्री हेमचंद्राचार्यजीनी कृति बहार पाडवानी धारणा अमलमां मुकीने ते महात्मानुं करेलुं श्रीत्रिषष्टिशलाका पुरुष चरित्र बहार पाडवानुं शरु कर्युं. हालमां ते महाग्रंथ संपूर्ण थवा आव्यो छे. दरम्यानमां तेओ साहेबनो करेलो अभिधानचिंतामणि ग्रंथ अवचूरि तेमज शब्दोना अक्षरानुक्रम साथे बहार पाड्यो छे तेमज तेउ साहेबनीज प्रसादी तरीके श्रीविनयविजयजी उपाध्याये बनावेलुं लघु हैमप्रक्रिया व्याकरण बहार पाड्युं छे. हालमां श्रीहरिभद्र सूरि महाराज अने [1]श्रीसिद्धसेन दीवाकरजीनी कृति तरीके तेमना करेला त्रण त्रण ग्रंथोनी ग्रंथमाळा बहार पाडी छे अने उमास्वाती वाचक महाराजाने पण भूली जवामां आव्या नथी. एउ साहेबनी उत्तम कृतिवाळो प्रशमरति ग्रंथ अवचूरि तथा टीका सहित छपाववा माटे तैयार करवामां आवे छे.

---

१ श्रीसिद्धसेन दीवाकरजीकृत ग्रंथमाळा थोडा वखतमां बहार पडनार छे. छपाय छे.

धुरंधर पूर्वाचार्यो अपूर्व ग्रंथो रचीने आपणा उपर जे महान् उपकार करी गया छे तेनो परिपूर्ण लाभ तेमना रचेला ग्रंथो शुद्ध रीते, सुंदर टाइपथी, उंचा कागळ उपर छपावीने बहार पाड्या शिवाय जैनवर्ग के अन्य लइ शके एम नथी. तेथी जैनधर्मनी दरेक जाहेर संस्थाओनी खास अने प्रथम फरज एज छे के तेमणे आ कार्य उपाडी लेवुं. ते साथे श्रीमंत गृहस्थो के जेमने पूर्व भवे करेला पुण्योदयथी लक्ष्मी प्राप्त थइ छे तेमणे ते कार्यमां पूरती सहाय आपवी. ज्ञानदान ए सर्वोत्कृष्ट दान छे अने तेन माटे आ एक परम साधन छे. आवा ग्रंथो लखाववामां जे खर्च थाय छे ते करतां छपाववामां १/१६ करतां पण ओछो खर्च थाय छे. ते पण उंचा कागळ उपर ने सारा प्रेसमां छपावे त्यारे. तदुपरांत एक बीजो लाभ ए थाय छे के प्रतो लखवामां लहीयाओ अशुद्धतानी वृद्धि कर्या करे छे, जेथी तेनी लखेली दरेक प्रत शुद्ध करवी पडे छे, त्यारे छपाववा माटे एक वखत जो पूरतो प्रयास कर्यो होय छे तो पछी तेनापरथी जेटली नकलो काढवामां आवे तेमां फरीने तेवो प्रयास करवो पडतो नथी. जे श्रीमंतो आवा अति लाभकारी कार्यमां पोताना द्रव्यनो उपयोग करता नथी तेमनुं द्रव्य निष्फलताने पामे छे.

आ अने बीजी ग्रंथमाळाओ विगेरे प्रगट करवानो आ सभा तरफथी बे त्रण वर्षथी जे प्रयत्न शरु करवामां आव्यो छे तेमां खास प्रेरणा अने दरेक ग्रंथनी प्रतो मेळवी आपवानी तेमज तेनी प्रेसकोपी तपासी आपवा विगेरेनी दरेक प्रकारनी मदद पन्यासजी श्री आणंदसागरजी महाराजे आपी छे अने आपे छे तेमज आपवा कबुल कर्युं छे तेथी आ सभा ते खाते तेमना संपूर्ण आभार तळे छे.

આ સભા તરફથી પ્રગટ થતા ગ્રંથમાં જુદા જુદા ગૃહસ્થો તરફથી દ્રવ્ય સંબંધી સહાયો આપવામાં આવી છે તે પૈકી આ ગ્રંથમાળાની ૫૦૦ નકલો પ્રગટ કરવા માટે તમામ ખર્ચ શ્રીભાવનગરનિવાસી ગૃહસ્થ શા આણંદજી પુરુષોત્તમદાસ તરફથી આપવામાં આવેલ છે. તે સંબંધમાં પણ ઉપદેશાદિનો પ્રયાસ સદરહુ પન્યાસજી મહારાજેજ કરેલો છે.

આ ગ્રંથમાળામાં શ્રીમદ્યશોવિજયજી ઉપાધ્યાયવિરચિત અનેક ગ્રંથોપૈકી દશ ગ્રંથો પ્રગટ કરવામાં આવ્યા છે. તેમાં પ્રથમ આપેલા અધ્યાત્મસાર નામના ગ્રંથ ઉપર હાલમાં પન્યાસજી શ્રીગંભીરવિજયજી મહારાજે સુમારે ૭૦૦૦ શ્લોક પ્રમાણ ટીકા રચી છે, તે શિવાય બીજી કોઇ ટીકા નથી. ચોથો ગ્રંથ આધ્યાત્મિકમતપરીક્ષા નામનો સ્વોપજ્ઞ ટીકા સહિત આપેલો છે તેનું બીજું નામ આધ્યાત્મિકમતખંડન છે. એમાં કેવળીને કવળાહાર ન હોય એવી દિગંબરીની માન્યતાનું ખંડન છે. આજ નામનો આજ કર્ત્તાનો કરેલો બીજો મોટો ગ્રંથ છે તેનાપર પણ તેમણેજ પોતે ટીકા કરેલી છે. તેની અંદર દિગંબરોની કેવળી સંબંધી બીજી પણ માન્યતા વિગેરેનું ખંડન છે. આઠમો ગ્રંથ નયોપદેશ નામનો અવચૂરિ સહિત આપેલો છે, તે અવચૂરિ શ્રીભાવપ્રભસૂરિની બનાવેલી છે. આ ગ્રંથ ઉપર એમણે પોતેજ નયામૃતતરંગિણી નામની વિસ્તારવાળી ટીકા રચી છે, તેના ઉપરથીજ સંક્ષેપમાં આ અવચૂરિ બનાવવામાં આવી છે. આ ત્રણ ગ્રંથો શિવાય બાકીના સાત ગ્રંથો ઉપર ટીકા કે અવચૂરિ કાંઇ પણ બનેલ જાણવામાં નથી. આ દશ ગ્રંથોમાં પાંચમો ગ્રંથ યતિલક્ષણ સમુચ્ચય નામનો આપેલો છે તે માગધી ગાથાબંધ છે. બાકીના નવ ગ્રંથો સંસ્કૃત છે. તેમાં પણ અધ્યાત્મસાર, અધ્યાત્મોપનિષદ્, આધ્યાત્મિકમત

परीक्षा अने नयोपदेश ए चार पद्यबंध छे अने बाकीना पांच ग्रंथो (देवधर्मपरीक्षा, नयरहस्य, नयप्रदीप, जैनतर्क परिभाषा, ज्ञानबिंदु ) गद्यबंध छे. आ दशे ग्रंथो बहुज उपयोगी छे.

आ शिवाय आज ग्रंथकर्ताए बत्रीश बत्रीशी ( द्वात्रिंशत् द्वात्रिंशिका ) स्वोपज्ञ टीका सहित रचेली छे ते पण अमारा तरफथीज छपाववानुं शरु करवामां आवेलुं छे. आ ग्रंथकर्त्ताने लगभग बसें वर्ष थयां छे छतां तेमना ग्रंथोनो मोटो भाग अलभ्य थइ पड्यो छे तेनुं चोक्कस कारण कही शकातुं नथी तोपण जे कारण कल्पनामां आवी शक्युं छे ते आ साथे आपेला ए महापुरुषना जन्मचरित्रमां बताववामां आव्युं छे. एओना करेला ग्रंथोपैकी वर्त्तमानमां केटला ग्रंथो मळी शकेछे अने केटलानां नाम जाणवामां आव्यां छे तेनुं लीस्ट तेमना चरित्रने अंते आपवामां आव्युं छे. ते उपरांत कोइ पण ग्रंथ लभ्य के अलभ्य कोइ पण मुनिमहाराजना जाणवामां होय तो तेओ साहेबे ते ग्रंथनुं नाम विगरे अमने लखी मोकलवा कृपा करवी के जेथी एवी हकीकतनो संग्रह करीने जैनवर्गना जाणवामां आवे तेम प्रगट करशुं.

आटली हकीकत रोशन करीने प्रस्तावनानुं लंबाण न करतां हवे पछी ते महापुरुषनुं जन्मचरित्र तथा आ ग्रंथमाळामां आवेला दशे ग्रंथोमां शुं शुं हकीकत समावेली छे ते संबंधी पन्यासजी श्रीआणंदसागरजी महाराजे लखावेलो उपोद्घात् आपवामां आव्यो छे ते तरफ लक्ष आपवा वांचकवर्गने विनंति करीने प्रस्तावना समाप्त करवामां आवे छे.

संवत् १९६५.
कार्त्तिकशुदि पूर्णिमा.

श्रीजैनधर्मप्रसारक सभा.
भावनगर.

# न्यायविशारद न्यायाचार्य श्रीमद्यशोविजयजीनुं टुंक जन्मचरित्र.

आ महात्मानो जन्म क्यारे अने कया शहेरमां थयो? तेमना मातपिता कोण हता? अने कइ ज्ञातिना हता? ए कोइ पण साधनवडे चोक्कस थइ शकतुं नथी. श्रीमान् सुधर्मास्वामीथी चाल्या आवता मूळपाटे एओ थयेला न होवाथी तेमज जैनाचार्योमां पोतानां चरित्र लखवानी रुढी आत्मप्रशंसादि कारणोथी प्रचलित नहीं होवाथी ए संबंधमां विशेष हकीकत चोक्कसपणे मळी शकती नथी. जो मूळपाटे एओ थया होत तो पट्टावळी विगेरेमांथी केटलीक हकीकत नीकळी शकत, तेमज जो तेमना शिष्य कोइ पराक्रमी नीवड्या होत तो ते पोताना गुरुनुं चरित्र अवश्य लखत; कारणके एवी-रीते पोताना गुरुनुं चरित्र लखवानी प्रवृत्ति तो प्राचीनकालथी आपणामां चाली आवती देखाय छे. श्रीहीरसौभाग्य काव्य अने विजयप्रशस्ति काव्य इत्यादि अनेक चरित्रात्मक काव्यो तेनां साक्षीभूत छे. आ महात्माना चरित्र संबंधी कांइ कांइ हकीकत खाद्यखंडन, प्रतिमाशतक अने बत्तीसा बत्तीसीनी प्रशस्ति विगेरेमांथी मळी आवे छे परंतु ते एवी शृंखला बद्ध नथी के जेथी एमनुं आखुं चरित्र जोडी शकाय. तेमज तेमना करेला संख्याबंध ग्रंथोपैकी जे जे लभ्य छे ते सघळा एकठा करी तेनी प्रशस्ति तेमज रचना विगेरे तपासी कोइए पण एवी हकीकत संपूर्ण एकत्र करी नथी के जेथी आ चरित्र लखवामां ए सहायभूत थइ पडे तेमज कृतिमां पण पहेली कइ अने पछीनी कइ ते जाणी शकाय.

आ प्रमाणे छतां पण एटलुं तो चोक्कस कही शकाय छे के ए महात्मा अढारमा सैकाना पूर्वविभागमां विद्यमान हता, अने तेमनी केटलीक गुजराती पद्यरचनामां मारवाडी भाषाना शब्दो दृष्टिगत थता होवाथी तेओ साहेबनी जन्मभूमि मारवाडमां होय अथवा ते तरफ विशेष विहार होय एम पण जणाय छे. बीजां साधनो तपासतां एमनो विहार गुजरात अने काठीयावाडमां तो जरुर थयेलो छे, ए पण चोक्कस नीकळी आवे छे. श्रीशांतिदास शेठना आग्रहथी धर्मसंग्रह ग्रंथ श्रीमानविजयजी उपाध्याये रचेलो छे अने श्रीमद्यशोविजयजी महाराजे शोधी आप्यो छे. ते ग्रंथनी प्रशस्तिमां ए रचना अमदावादमां करेली होवानुं जणाव्युं छे तेथी ए वात सिद्ध थाय छे. वळी एक वखत श्रीपाटणमां श्रीमद्यशोविजयजी, मानविजयजी अने रामविजयजी एक साथे जुदे जुदे उपाश्रये चतुर्मास रह्या हता, तेमां उपाध्यायजीनुं व्याख्यान तो द्रव्यानुयोगगर्भित चालतुं होवाथी तेमना व्याख्यानमां श्रोतानी संख्या थोडी थती हती अने श्रीरामविजयजीनी व्याख्यानकळा जनमनरंजनकारी होवाथी त्यां श्रोताओनी भीड थती हती. एक दिवस तेमनी व्याख्यानकळा जोवा सारु उपाध्यायजी महाराज पोते त्यां पधार्या हता, इत्यादि चालती आवती दंतकथा उपरथी एओनो विहार गुजरातमां विशेष थयो छे एम पण पूरवार थइ शके छे.

श्रीमहावीर स्वामी भगवंते दीर्घायुष आदि कारणोथी श्रीसुधर्मास्वामीने गणनी अनुज्ञा आपी गच्छ सोंप्यो तेमनी एकसठमी पाटे श्रीविजयसिंह सूरि थया छे. तेमनी अनुज्ञाथी मुनिवर्गमां प्रवेश पामेली शिथिलता दूर करवा सारु श्रीसत्यविजयजी महाराजे क्रिया उद्धार कर्यो तेमनी साथे आ महापुरुष पण सहायक हता तेवो उल्लेख “जास हित

शीखथी मार्ग ए अनुसर्यो" इत्यादि वाक्योथी नीकळी शके छे. तेथी अने श्रीविजीयसिंहसूरि संवत १७०८ मां स्वर्गवास थयेला होवाथी सत्तरमा सैकाना प्रांतभागमां आ महापुरुषनो जन्म अने अढारमा सैकाना पूर्वार्धमां एमनो विहार होवानुं पुरवार थइ शके छे.

एमनी पट्टपरंपरा तपासवामाटे वधारे दूर जवानी जरुर रहेती नथी. कारणके एओ श्रीहीरविजयजीसूरिना संतानमांज थयेला छे. श्रीहीरविजयजीसूरिना शिष्य उपाध्याय श्रीकल्याणविजयगणि, तेमना मुख्यशिष्य पंडित श्रीलाभविजयगणि, तेमना मुख्यशिष्य पंडित श्रीजीतविजयगणि, तेमना गुरुभाइ पंडित श्रीनयविजयगणि अने तेमना चरणकिंकर महामहोपाध्याय श्रीयशोविजयजी थया छे. एओ साहेबे दीक्षा क्यारे लीधी अने एमने उपाध्यायपद क्यारे आपवामां आव्युं एनो संवत कोइ जग्याए मळी शकतो नथी. परंतु एमणे बाल्यावस्थामां ब्रह्मचारीपणेज चारित्र अंगीकार कर्युं हशे एवुं एमनी पुष्कळ चमत्कारवाळी कृति सूचवे छे.

एओ साहेब श्रीसत्यविजयगणि, श्रीविनयविजय उपाध्याय अने आनंदघनजी महाराजना समकालीन हता ए तो चोक्कस छे. श्रीविनयविजय उपाध्याय एमना काकागुरु थता हता. चारित्र लीधा बाद धर्मशास्त्रनुं ज्ञान मेळवतां संस्कृत भाषानो अने न्यायशास्त्रनो विशेष अभ्यास करवानी उत्कंठा थतां तेओ साहेब काशीमां अभ्यास करवा गया हता. ए हकीकत तो अनेक लेखो उपरथी नीकळी शके छे. ते वखते तेमनी साथे श्रीविनयविजय उपाध्याय हता एम केटलाक कहे छे अने केटलाक तेमना गुरुज साथे हता एम बतावे छे. आ बे हकीकतमां कइ हकीकत सत्य छे ते चोक्कस कही

शकातुं नथी. काशीमां अभ्यास करावनारा पंडितो ब्राह्मणजातिना हता अने तेउ जैनमति प्रत्ये द्वेषबुद्धि धरावता हता. छतां तीव्रबुद्धि, गुरुभक्ति तेमज विनयगुणनी प्राधान्यता विगेरे कारणोथी एमणे पोताना अध्यापकनी सारी प्रीति संपादन करी हती अने तेने परिणामेज एउ साहेब पूरतो अभ्यास करी शक्या हता. काशीमां प्रथम तेमने 'न्यायविशारद' एवुं बिरुद आपवामां आव्युं हतुं अने न्यायसंबंधी सो ग्रंथो रच्या बाद अन्य मतना सर्व विद्वानो तरफथी 'न्यायाचार्य' नुं बीरुद मळ्युं हतुं. आ हकीकत जैनतर्कपरिभाषा ग्रंथनी प्रशस्ति उपरथी स्पष्ट रीते नीकळी आवे छे.

काशीमां अभ्यास करीने आव्या बाद तेमणे धर्मशास्त्रनो अत्युत्कृष्ट अभ्यास कर्यो हतो परंतु तेमने अध्ययन करावनार धुरंधर गुरु कोण हता ते जाणी शकायुं नथी. खास करीने क्षयोपशमना बळवंतपणाथी तेमज विनयादि गुणना अतिशयपणाथी तेओनुं ज्ञान अत्यंत स्फुरायमान थयुं हतुं. तेमनी प्रबळ ज्ञानशक्तिना कारणथी जैनवर्गमां पण तेमनुं महत्व बहु वृद्धि पाम्युं हतुं, तेवा वखतमां काशीमां जेउनी पासे अभ्यास करेलो ते विद्यागुरु आर्थिक स्थितिनी मंदताना कारणथी खंभातमां तेमनी पासे आव्या हता ते वखते तेमनो बहु सत्कार करवा उपरांत तेमने एक सारी रकम (३६००० ) पण गुरुदक्षिणा तरीके श्रीसंघे आपी प्रसन्न कर्या हता.

आ वखतमां जिनप्रतिमाने नहि माननार ढुंढकमतनी स्थिति कांइक प्रबळ जणातां उपाध्यायजी महाराजे प्रतिमाशतक नामनो ग्रंथ स्वोपज्ञ टीकावाळो रची तेमना उपर प्रबळ असर करी हती, जेथी तेउ तेमनापर बहु गुस्से थया हता. उपाध्यायजी महाराजे तेमनाथी किंचित् पण डर न खातां लींबडीना रहीश शा मेघजी दोशी विगेरे गुजराती

भाषाना अभ्यासीओ माटे वीरस्तुतिरूप हंडीनुं स्तवन ( १५० गाथानुं ) बनाव्युं हतुं तेना उपर श्रीपद्मविजयजी महाराजे घणाज विस्तारथी बाळावबोध करेलो छे अने ते श्रीप्रकरणरत्नाकर भाग त्रीजामां छपायेल पण छे.

ढुंढकोनी प्रबळता साथे ए समयमां क्रियामार्गमां शिथिळ थयेला यतिओनी संख्या अने प्रबळता पण विशेष जणाय छे. एओ साहेबना दिलमां आथी बहुज खेद थयो जणाय छे अने तेथीज श्रीसीमंधर स्वामीनी स्तुतिरूप सवासो गाथानुं स्तवन बनावीने तेमणे पोताना हृदयनो उभरो बहार काढ्यो छे. साडात्रणसें गाथाना स्तवननो टबो श्रीज्ञानविमळसूरिए तेमज श्रीपद्मविजयजी महाराजे बंनेए पुरेलो छे. ते पैकी श्रीपद्मविजयजीवाळा टबा सहित ए स्तवन छपायेलुं छे. सवासो गाथानुं स्तवन पण अर्थ सहित छपायेल छे. शुद्ध मार्गना खपीने माटे ए स्तवन बहु वांचवा लायक छे.

श्रीसत्यविजयजी पन्यासनी साथे एओ साहेबे पण क्रियाउद्धार करेलो जणाय छे. यतिओनो समुदाय अने ढुंढक मतवाळाओ एमनापर एटला बधा अंतरद्वेष धरावनारा हता के तेओ कोइ पण प्रकारे तेमना महत्वनी वृद्धि जोइ शकता नहोता. एमने मात्र बसें वर्ष थयाँ छतां एओ साहेबना करेला संख्याबंध ग्रंथोमांथी बहु जुज ग्रंथोज हस्तगत थाय छे तेनुं कारण पण एमनो द्वेषज जणाय छे.

अध्यात्मरसना रसीया श्रीआनंदघनजी महाराज तेमना समकालीन हता एटलुंज नहीं पण तेमनाथी उपाध्यायजीने अध्यात्म संबंधी केटलोक लाभ पण मळ्यो हतो एम जणाय छे; अने तेथीज तेमनी कृति तरीके गणाती श्रीआनंदघनजीनी स्तुतिरूप अष्टपदी तेओ साहेबे रची हशे एम जणाय छे. आने माटे विशेष खात्री लायक हकीकत मळी शकती नथी.

आ महात्मा श्रीविनयविजय उपाध्यायना समकालीन हता तेनी पूरवारी तो श्रीविनयविजयजी महाराजे रचवा मांडेलो श्री श्रीपाळराजानो रास तेमना काळधर्म पामवाथी अपूर्ण रहेलो ते उपाध्यायजी महाराजे पूरो कर्यो छे, तेथी चोक्कस मळी आवे छे. श्रीविनयविजयजी महाराज पण प्रबळ विद्वान हता. तेमना करेला श्री लोकप्रकाश, शांत सुधारस, कल्पसूत्रनी सुखबोधिका टीका अने लघुहैम प्रक्रिया व्याकरण स्वोपज्ञ टीका (३५००० श्लोक प्रमाण) सहित विगेरे ग्रंथो दृष्टिगोचर थाय छे. गुजराती भाषामां पण तेमणे पुण्यप्रकाशनुं स्तवन अने उपर जणावेल श्रीपाळराजानो रास रचेलो छे.

उपाध्यायजी महाराजना रचेला ग्रंथो पैकी न्यायखंडखाद्य, न्यायालोक अने कम्मपयडीनी टीकानी प्रतो तेमना हाथनी लखेली मळी आवे छे. वैराग्य कल्पलतानी प्रत तेमणे हाथे सुधारेली मळी आवे छे, धर्मसंग्रह ग्रंथ श्री मानविजय उपाध्याये रचेलो तेमणे सुधारी आप्यो छे ते असल प्रत मळी शकी छे. श्री लोकप्रकाश ग्रंथनी प्रत नीकोराना भंडारमां हती ते तेमणे लखेली अथवा सुधारेली छे एम सांभळ्युं छे. ज्ञानसारना टबानो लेख पण एक जग्याए छे ते तेमना हाथनो लखेलो कहेवामां आवे छे. टुंकी जींदगीमां पण एमणे शासननो उपकार तो पारावार करेलो अनुभववामां आवे छे.

उपाध्यायजी महाराजनुं संस्कृत अने मागधी भाषानुं तेमज नय, निक्षेप, प्रमाण, सप्तभंगी विगेरेनुं धर्म संबंधी सूक्ष्म ज्ञान एटलुं बधुं उंचा प्रकारनुं हतुं के जेनी साक्षी तेमना रचेला अपूर्व ग्रंथोज आपे छे. जैनन्यायमां तो तेओ अद्वितीय प्रवीण हता. आवी रीते युगप्रधान तुल्य अपूर्व विद्वान होवाथीज तेमने श्रुतकेवळीनी उपमा आपवामां आवी छे, अने ते उपमा

वास्तविक छे एवुं तेमना ग्रंथना अभ्यासीओ अत्यारे पण कहे छे. व्यवहार अने निश्चयनुं स्वरूप एओ साहेबे पोताना ग्रंथमां बहुज सारी रीते स्पष्ट करेलुं छे. एमना रचेला ग्रंथोनी अंदर अपूर्व कवित्वशक्ति, वाक्पटुता, पदलालित्य, अर्थगौरव, रसपोषण, अलंकारनिरूपण तेमज परपक्षखंडन अने स्वपक्षमंडन स्थाने स्थाने दृष्टिगोचर थाय छे. एमनी तर्कशक्ति तेमज समाधान करवानी शक्ति अपूर्व जणाय छे. पूर्वाचार्यप्रणीत अनेक ग्रंथोमां तेमज सूत्र अने टीका विगेरेमां जुदी पडती अनेक बाबतोनां समाधान एमणे बहु युक्ति पूर्वक करेलां छे; तथा तेओए सिद्धांतनी शंकाओनुं समाधान करवा माटे 'सिद्धांत तर्क परिष्कार' ग्रंथ कर्यो कहेवाय छे अने एमनां वचन अत्यारे खास प्रमाणभूत मानवामां आवे छे.

अमदावाद, पाटण, सिद्धपुर, खंभात, रांदेर, भरुच, डभोइ विगरे स्थळोए एमणे विहार कर्यानी हकीकत मळी आवे छे. ए प्रमाणे सुमारे बे लाख श्लोकप्रमाण अनेक ग्रंथो रची, अनेक जीवोने प्रतिबोध पमाडी, अनेक परवादीओने जीती, जैनशासननो जयध्वज सर्वत्र फरकावी ए महात्मा संवत् १७४५ ना माघशुदि ५ वसंतपंचमीए श्रीडभोइमां स्वर्गवासी थया छे. एनी निशानी तरीके त्यां तेमनी चरणपादुका स्थापेली छे. हालमां तेनो जीर्णोद्धार पण कराववामां आव्यो छे. आवा जैनशासनमां स्तंभ तुल्य महात्मानी पादुका पण वंदन करवा लायक छे. जैनबंधुओए अवसर पामीने तेनो लाभ लेवो योग्य छे.

ए महात्माना रचेला ग्रंथो पैकी अत्यारे लभ्य तेमज अलभ्य जे जे ग्रंथोनां नामो जाणवामां आव्यां छे ते आ नीचे

बताव्यां छे. तेमां गुजराती भाषानी पद्यरचनावाळा जे स्तवनो सज्झायो विगेरे बताववामां आव्यांछे ते बधां लभ्यज छे, तेमज अन्य आचार्यकृत ग्रंथोपर तेउं साहेबे टीकाउं रची छे ते पण जे लभ्य छे तेज लखेल छे.

लभ्य ग्रंथो.

१ अध्यात्मसार २ अध्यात्मोपनिषद् ३ अध्यात्मिक मतखंडन सटीक ४ अध्यात्म मतपरीक्षा सटीक ५ नयरहस्य ६ नयप्रदीप, ७ नयोपदेश नयामृततरंगिणी टीका सहित ८ न्यायालोक ९ जैनतर्क परिभाषा १० ज्ञानबिंदु ११ न्याय खंडखाद्य (महावीरस्तवन प्रकरण) १२ मार्गपरिशुद्धि १३ उपदेशरहस्य सटीक १४ वैराग्यकल्पलता, १५ बत्रीश बत्रीशी सटीक १६ ज्ञानसार (अष्टक) १७ देवधर्मपरीक्षा १८ यतिलक्षण समुच्चय १९ गुरुतत्त्वनिर्णय सटीक २० समाचारी २१ प्रतिमाशतक सटीक २२ भाषारहस्य. आमां सात ग्रंथो स्वोपज्ञ (पोतानीज करेली) टीकायुक्त छे.

अन्याचार्यकृत ग्रंथोपर तेमनी करेली टीका.

१ शास्त्रवार्त्ता समुच्चयनी टीका २ कर्मप्रकृति (कम्मपयडी) नी टीका ३ षोडशकवृत्ति ४ अष्टसहस्री विवरण.

अलभ्य-दुर्लभ्य ग्रंथो.

१ अध्यात्मोपदेश २ स्याद्वादरहस्य ३ प्रमाणरहस्य ४ सिद्धांत तर्क परिष्कार ५ अनेकांत मतव्यवस्था ६ पातंजल योग-शास्त्र चतुर्थपादवृत्ति ७ आत्मख्याति ८ ज्ञानार्णव ९ विचारबिंदु १० त्रिसूत्र्यालोकविधि ११ मंगलवाद १२ शठप्रकरण.

## गुजराती भाषामां करेली रचनाओ.

१ श्रीपाळराजाना रासनो पाछलो भाग. २ दिग्पट चोराशी बोल (पद्यमां) ३ जंबूस्वामीनो रास. ४ द्रव्यगुणपर्यायनो रास ५ समाधिशतक. ६ समताशतक. ७ तत्त्वार्थनो टबो. ८ ज्ञानसारनो टबो. ९ जसविलास (पद ७५) १० आनंदघनजीनी स्तुतिरूप अष्टपदी. ११ सम्यक्शास्त्र विचारसार (पत्र).

## सज्झायो.

१ अढारपापस्थानकनी सज्झाय. २ आठदृष्टिनी सज्झाय. ३ प्रतिक्रमण गर्भ हेतुनी सज्झाय. ४ समकितना सडसठ बोलनी सज्झाय. ५ पांच कुगुरुनी सज्झाय. ६ अग्यार अंगनी सज्झाय. ७ पांच महाव्रतनी भावनानी सज्झाय. ८ अमृतवेलीनी सज्झाय ९ संयमश्रेणीनी सज्झाय १० चार आहारनी सज्झाय.

## स्तवनो.

१ श्री सीमंधरस्वामीनी स्तुतिरूप ३५० गाथानुं स्तवन. २ श्रीवीरस्तुतिरूप हुंडीनुं स्तवन (१५० गाथानुं). ३ सवासो गाथानुं स्तवन. ४ निश्चय व्यवहारनुं स्तवन (पांच ढाळनुं) ५ मौन एकादशीना दोढसो कल्याणकनुं स्तवन (१२ ढाळनुं) ६-७-८ वर्तमान चोवीश तीर्थंकरोनां स्तवनोनी चोवीशी ३ ९ विहरमान जिनस्तवन (वीशी).

आ शिवाय कोइ पण ग्रंथ कोइ पण मुनिमहाराजना के श्रावकभाइना जाणवामां होय अथवा जाणवामां आवे तो तेमणे अमने लखी मोकलवानी कृपा करवी.

# उपोद्घात.



आ महापुरुषे कया कया विषयना केटला ग्रंथो लख्या छे ते संबंधमां हजुसुधी चोक्कस निर्णय थयो नथी. तेमना पछीना सैकामां थयेली न्यायविद्याना अभ्यासनी हानिने लीधे फक्त कोइ कोइ जगोपर तेमना ग्रंथो उपलब्ध थाय छे, तेमां केटलाक ग्रंथो तेउश्रीना हस्ताक्षरना पण मळे छे अने केटलाक ग्रंथो लहीआउए जेम तेम उतारेला अने त्यार पछी अभ्यासमां नहि वपरायेला होवाथी कोइ पण प्रकारना संस्कार वगरना मळे छे. आम होवाथी आ ग्रंथमाळा छपावतां घणा ग्रंथोमां एक एक प्रत उपर पण आधार राखी काम लेवुं पड्युं छे. उपर जणावेलां कारणोथी बनती महेनते सुधारो करतां छतां पण अशुद्ध लागता पाठोने स्थले कौंसमां शुद्ध तरीके लागतां पद दाखल करवामां आव्यां छे. जे महाशयोने आ ग्रंथमाळा वांचतां जे जे अशुद्धि लागे ते अमने लखी जणाववानो अमे आग्रह करीए छीए के जेथी बीजी आवृत्ति वखते अथवा तेनी पहेलां पण पुस्तक लेनारनुं लीस्ट राखेल होवाथी तेना ग्राहकने शुद्धिपत्रक मोकलावी सुधारो करवानी गोठवण करवानो प्रसंग मळी शके.

तेउश्रीना बनावेला उपलब्ध ग्रंथोमांथी नाना अने उपयोगी ग्रंथोनो एक समुदाय आ ग्रंथमाळामां प्रगट करवानो हेतु ते सर्वने एक साथे जाळवी राखी तेनी उपयोगितामां वधारो करवानो छे. आ ग्रंथमाळामां नीचेना ग्रंथो प्रकट करवामां आव्या छे.

१ अध्यात्मसार. २ देवधर्मपरीक्षा. ३ अध्यात्म उपनिषद्.
४ अध्यात्मिक मतखंडन-सटीक. ५ यतिलक्षण समुच्चय. ६ नयरहस्य.
७ नयप्रदीप. ८ नयोपदेश (सावचूरि). ९ जैनतर्क परिभाषा. १० ज्ञानबिंदु.

आ ग्रंथोमां कया कया विषयो केवी रीते चर्चवामां आव्या छे तेनो ख्याल प्रथम आपवो बहु जरुरनो छे. तेथी प्रत्येक ग्रंथनो सार अनुक्रमे टुंकामां अहीं आपवामां आव्यो छे.

अध्यात्मसार–आ ग्रंथ व्युत्पत्ति करवानी इच्छावाळाउने अध्यात्म ज्ञाननी साथे काव्यनो पण घणोज सारो बोध करे तेवो छे, अने ते विद्वान् वांचनारने सहज मालूम पडे तेवुं छे. तेउश्री अध्यात्मना विषयमां केटला उंडा उतरेला हशे ते वात तेमना ग्रंथ उपरथी सारी रीते मालूम पडी शके तेम छे. शरुआतमां मंगळाचरण करीने अध्यात्मनी जरुर बतावतां अध्यात्म वगरनुं बीजुं ज्ञान, वगर सळेपाटवाला रस्तापर गति आपेला एन्जिन जेवुं छे. कहेवानुं तात्पर्य ए छे के ते साध्य वगरना कार्य जेवुं छे, एम बतावी अध्यात्मथी उत्पन्न थता लाभो जणावी, बीजा शृंगारादि रसो करतां अध्यात्ममां रहेली उत्तमता बहु श्रेष्ठ शब्दोमां बतावी छे, अने तेम करीने पहेलो माहात्म्य अधिकार पूर्ण कर्योछे. बीजा अध्यात्मस्वरूप अधिकारमां शिष्यद्वाराए प्रश्न उठो करी अध्यात्मनो अर्थ, अध्यात्मनुं स्वरूप, अध्यात्म विरुद्ध क्रिया, अध्यात्मने योग्य तथा अयोग्य माणसोनां लक्षणो अने तेना अनुक्रमने जणावी व्यवहार अने निश्चयथी अध्यात्मनुं निरूपण करी, ज्ञान अने क्रियानुं पंखीनी बे पांखनी माफक उपयोगीपणुं बताव्युं छे. आगळ अध्यात्मथी थती

अशुद्ध क्रियाओनुं पण कार्यसाधकपणुं जणावी विषयानुष्ठान, आत्मानुष्ठान अने अनुबंधानुष्ठाननुं निरूपण घणी सरळ रीते करवामां आव्युं छे. त्रीजा दंभत्याग अधिकारमां दंभत्यागना संबंधमां विस्तारथी विवेचन करवामां आव्युं छे, अने तेमां दंभरहितनेज अध्यात्म थइ शके एम स्पष्ट समजाववामां आव्युं छे. चोथा भवस्वरूप अधिकारमां संसारने समुद्र, दावानळ, कसाइखानुं, राक्षस, अटवी, फांसो ( पाश ), केदखानुं, स्मशान अने विषवृक्षनी उपमाथी वर्णवीने तेमां रहेता प्राणीओनी विचित्र स्थिति, सुखरहितपणुं देखाडी अध्यात्मीओनुं आध्यात्मिक कुटुंब अने मोह राजाना रंगमंरूपनुं वर्णन करी मोह राजाए करेलां नुकसानो अने मोहाधीन प्राणीओने अहोनिश चालती कल्पनाश्रेणीओ समजावी तेमांथी विरति करनारने थती आत्मरमणता समजाववामां आवी छे. अत्र प्रथम प्रबंध पूर्ण थाय छे.

पांचमा वैराग्य अधिकारमां वैराग्यनुं स्वरूप, तेनी जरूर, वैराग्य थवाना उपाय, तेनां गुणस्थानको, तेनाथी थती चित्तनी प्रसन्नता, सर्वत्र बंधरहितपणुं अने नामधारी वैरागीओनां लक्षणो जणाववामां आव्यां छे. छठा वैराग्य भेद अधिकारमां दुःखगर्भित वैराग्यवाळाओनो शुष्क त्याग, शुष्क अभ्यास अने तेनी इच्छाओ जणावी, बीजा मोहगर्भित वैराग्यनी उत्पत्तिनुं कारण, तेनी स्थिति, तेनुं हीनपणुं ने ते वैराग्यवाळानां लक्षणो जणाववामां आव्यां छे. पछी ज्ञानगर्भित वैराग्यना अधिकारी, तेओनी बुद्धि, सम्यक्त्वनी जरुरीयात, तेओनुं शुद्ध ज्ञान, द्रव्यपर्यायनो तेओनो विचार, ज्ञानगर्भवैराग्याभ्यासनुं स्वरूप, तेओनां लक्षणो विगेरे विषयो जणाववामां आव्या छे. सातमा वैराग्य विषय अधिकारमां विषयवैराग्य अने गुणवैराग्य, कोइ पण जातना शब्द, रूप, गंध, रस ने स्पर्श योगीओनां चित्तने चलायमान करतां नथी ते बाबतनुं निरूपण

અને જોગીઓની વિષયોને અંગે થતી દુર્દશા જણાવવા સાથે ક્ષયોપશમાદિથી થતી લબ્ધિઓના ગુણોમાં પણ વિરક્તતા જણાવવામાં આવી છે. અત્ર બીજો પ્રબંધ પૂર્ણ થાય છે.

આઠમા મમતા ત્યાગ અધિકારમાં તેની જરુર અને મમતાને રાક્ષસ, સ્ત્રી અને વ્યાધિની ઉપમા, તેને લીધે થતી આરંભાદિકમાં પ્રવૃત્તિ, જાત્યંધ કરતાં પણ તેનું સવિશેષપણું, મમતા કરનારની સ્ત્રીપુત્રાદિ સાથે ચેષ્ટાઓ, તેનું અપવિત્રને પવિત્ર માનવાપણું તથા દુનિયાના સંબંધમાં નિત્યનો ભ્રમ જણાવી, આત્મા અને પુદ્ગળો જુદા છે અને તેનો સંબંધ નાશ-વંત છે એ જાણવાથી મમતાનો નાશ થવાના કારણભૂત જિજ્ઞાસા ઉભી થાય છે અને તે મમતા જિજ્ઞાસા અને વિવેક બન્નેથીજ રોકી શકાય છે એ સમજાવ્યું છે. નવમા સમતા અધિકારમાં સમતાનું સ્વરૂપ, તે રાખવાની જરુર, તેની ઉંચી સ્થિતિ, તે વિના બીજી ક્રિયાઓનું નિષ્ફળપણું, તેનાથી ઇચ્છિતની પ્રાપ્તિ, અવગુણોનો નાશ, સામાન્ય લોકોનું તે વિષયમાં અજ્ઞાત હોવાથી ઇચ્છારહિતપણું, કર્મના નાશનું તે મુખ્ય કારણ ઇત્યાદિ બતાવી તેને ચારિત્રના પ્રાણ તરીકે ઓળખાવી અધ્યાત્મ પ્રસાદથી તેમાં થતી તલ્લીનતા જણાવવામાં આવી છે. દશમા સદનુષ્ઠાન નામના અધિકારમાં સદનુષ્ઠાનની સમતાથી પ્રાપ્તિ જણાવી તેના વિષ, ગરલ, અન્યોન્યાનુષ્ઠાન, તદ્ધેતુ અને અમૃત એવા પાંચ ભેદ જણાવ્યા છે. પાંચ પૈકી પ્રથમના ત્રણ અનુષ્ઠાન અસદ્ છે અને છેલ્લા બે સદ્ છે. જે અનુષ્ઠાનનો આદર કરવામાં પ્રીતિ, નિર્વિઘ્નતા, સંયોગ, તત્ત્વ-જિજ્ઞાસા અને પંડિતોની સેવા હોય તે સદનુષ્ઠાન કહેવાય. અગ્યારમા મનઃશુદ્ધિ અધિકારમાં મનઃશુદ્ધિવાળાને રાગદ્વેષ ન થાય એ સ્પષ્ટ સમજાવ્યું છે. ઇષ્ટ પદાર્થાદિ ન મળવાથી શોક અને મળવાથી આનંદ થાય છે તેનું કારણ મનની ચંચળતાજ

छे. चंचळ मनने वानर, अश्व, पवन, हाथी अने अग्निनी उपमा देवामां आवी छे. अनिग्रहित मन केवा केवा प्रकारनां माठां परिणामो निपजावे छे तेनो ख्याल आपी नियमित मन केवां सुंदर परिणाम निपजावे छे ते जणाववामां आव्युं छे. बारमा सम्यक्त्व अधिकारमां मनःशुद्धि फक्त सम्यक्त्व होय तेनेज थाय छे ए जणावी बाकीनी क्रियाओनुं मोक्षमां सहचारीपणुं बताव्युं छे. सर्व धर्मनो सार सम्यक्त्वज छे अने ते सम्यक्त्व नव तत्त्वनी श्रद्धाथीज थाय छे. अहिंसानी शुद्ध बुद्धि ए पण सम्यक्त्व छे, ते अहिंसा भागवत, पाशुपत, सांख्य, बौद्ध अने वैदिक विगेरेए पण मानेली छे, छतां तेओ सर्वना एकांतवाद प्रमाणे ते घटती नथी ते जणावीने स्याद्वाद सिद्धांत प्रमाणेज ते अहिंसा (दया) घटी शके छे अने सत्यादिनुं पालन तेने माटेज छे एम जणावी शमादिक लक्षणोवाळाने सम्यक्त्वनी स्थिरता थाय छे एम जणाववामां आव्युं छे. तेरमा मिथ्यात्वत्याग अधिकारमां आत्मा नथी, ते नित्य नथी, कर्ता नथी, भोक्ता नथी, मोक्ष जतो नथी अने मोक्ष जवाना उपाय नथी, ए मिथ्यात्वनां छ स्थानको द्वाराए नास्तिक, बौद्ध, सांख्य, मीमांसक विगेरेना मतोनुं खंडन जणावी ज्ञान अने क्रियाथी आत्मानो मोक्ष थवाना उपायो जणाव्या छे. चौदमा असद्ग्रहत्याग अधिकारमां कदाग्रहथी कर्मनो बंध अने धूर्तपणुं थाय छे एम जणावी ते कदाग्रहनी अमावास्यानी रात्रि साथे तुलना करी तेनुं त्याज्यपणुं अनेक रीते बहु युक्ति पूर्वक बताव्युं छे. पंदरमा योग अधिकारमां पुण्य रूपी कर्मयोग ने आत्मरमणता रूप ज्ञानयोग ए बंने जणावी कर्मयोगवाळाने ज्ञानयोगनी जरुर अने ज्ञानयोगवाळाने कर्मयोगनी जरुर बतावी छे, साथे यज्ञादि कर्मयोगनो निषेध करी, ज्ञान योगवाळानुं अलिप्तपणुं, रागद्वेषरहितपणुं, कर्म छेदवामां समर्थपणुं जणावी

निरंजन देवमां अभेदपणे तल्लालीन थवानो उपदेश करी योगनी रीति बतावी छे. सोळमा ध्यान अधिकारमां ध्याननुं लक्षण, तेना मुख्य भेदो तेमज अवांतर भेदो, तेनां लिंगो अने तेनां गुणस्थानको जणावी धर्मध्यान अने शुक्लध्याननां आलंबनो, ध्यान थवानी रीतिओ अने तेनाथी यावत् मोक्षप्राप्ति सुधीना थता लाभो जणाववामां आव्या छे. सत्तरमा ध्यानस्तुति अधिकारमां ध्याननुंज मोक्षदायकत्व, विषयवांछारहित्व, संतुष्टचित्तत्व, परमार्थहेतुत्व, कषायरहितत्व, अज्ञानरहितत्व, समतालीनत्व, सुखहेतुत्व अने अपूर्व आह्लादकत्व जणाववामां आव्युं छे. अढारमा आत्मज्ञान अधिकारमां आत्मज्ञानने माटे नवतत्त्वनुं जाणपणुं के जे निसर्ग अने उपदेशथी थाय छे तेनी जरुर बतावी, ज्ञान दर्शन अने चारित्रनुं आत्माथी अभिन्नपणुं साबीत करी, निश्चयथी आत्मानुं सिद्ध स्वरूपपणुं जणावी, कथंचित् तमाम आत्मानुं एकपणुं निरूपण करीने धर्मास्तिकायादिक द्रव्योथी आत्मानुं जुदा गुणोने लीधे भिन्नपणुं प्रतिपादन करी, पुण्य अने पापनुं निरूपण करतां नैगमादिक नयोनी अपेक्षाए आत्मानुं खरेखरुं स्वरूप विस्तारथी बताववामां आव्युं छे. त्यारपछी आश्रव अने संवर आत्माथी जुदा छे एम बतावी, व्यवहारथी ते बंनेनुं स्वरूप निरूपण करी, निर्जरा अने तप केवी रीते थाय ते देखारुवा पूर्वक बंध अने मोक्षनुं स्वरूप जणावतां द्रव्यलिंग अने भावलिंगनुं स्वरूप जणावीने व्यवहार अने निश्चय पूर्वक आत्मज्ञानमां तल्लालीन आत्मा साम्य पामे छे एम बताववामां आव्युं छे. ओगणीशमा जिनमत स्तुति अधिकारमां तेने समुद्र, कल्पवृक्ष, मेरु, सूर्य अने चंद्रनुं रूपक आपी, सर्व नयसहितपणुं जणावी जिनमत शिवाय बीजी कोइ पण जग्याए सर्व नयनुं गौरव नथी एम स्पष्ट करवामां आव्युं छे, ते जैनशासन सामान्य विशेषमय अने अर्पित

अनर्पितमय पदार्थोनुं ज्ञान करावे छे अने व्युत्पत्तिनुं कारण तेज छे. विद्वानो तेनो रस जाण्या पछी बीजी जगोपर रति करता नथी, अने ते जिनशासन अंगीकार करनारने आत्मकल्याणनी प्राप्ति थाय छे एम जणाववामां आव्युं छे. वीशमा अनुभव अधिकारमां क्षिप्त, मूढ, विक्षिप्त, एकाग्र अने निरुद्ध ए पांच प्रकारना चित्तनुं लक्षण बतावी योगने अंगे योग्यायोग्यपणानुं विवेचन करी निरालंबन ध्याननी उत्पत्तिमां सालंबन ध्याननुं कारणपणुं जणावी बाह्यात्मा अंतरात्मा अने परमात्मानुं स्वरूप निरूपण करी परमात्मपणाने प्राप्त थवानुं कारण ब्रह्माध्ययन जणावी योगीनी सेवाथी संसारसमुद्रनुं सुतरपणुं, भक्तिथी ते पदवीनी प्राप्ति, शुभानुबंधव्यापी यतना, शास्त्रनुं परम आलंबनपणुं अने विधिसेवना आदि भक्तिनुं लक्षण जणावी, बाह्य क्रियावाळानुं परिणतिरहितपणुं बतावी, बाल मध्यम अने बुधनुं लक्षण जणावतां गुणलेशपर रागधारण, लोकसंज्ञानो त्याग, श्रद्धा, हितग्रहण, पराशानो अनभिलाष, स्तुतिनिंदानुं समपणुं, स्थिरता, वैराग्य, दोष अने देहादिना स्वरूपनो विचार, भगवानमां भक्ति, एकांतस्थानसेवा, सम्यक्त्वमां स्थिरता, प्रमादरिपुमां अविश्वास, आत्मबोधनी पराकाष्ठा, आगमनुं प्रधानपणुं, विकल्पनो त्याग, वृद्धानुसारि वृत्ति अने तत्त्वनो साक्षात्कार ए सर्व अनुभव जाणवाना प्रकारो छे एम बताववामां आव्युं छे. एकवीशमा ग्रंथप्रशस्ति अधिकारमां आ ग्रंथनो महिमा, सज्जन दुर्जननो स्वभाव जणावी गुरुनी स्तुति करीने अध्यात्मरुचि जीवोने आनंद थाय ते सारु आ ग्रंथ तेओने अर्पण कर्यो छे. अत्र ग्रंथ अने तेनो त्रीजो प्रबंध पूर्ण थाय छे.

बीजा देवधर्मपरीक्षा ग्रंथमां प्रतिमाजीने पूज्य तरीके नहि माननाराओ प्रतिमानी पूजा करनार देवताओने पण अधर्मी

कही वगोवता हता, तेमने समजाववा माटे आ ग्रंथ रचतां उपाध्यायजीए दरेक जगोपर सूत्रोथी समर्थन आपवा साथे नीचेना मुद्दाउपर ग्रंथ लख्यो छे. १ देवताने असंयत कहेवा ते निष्ठुर छे. २ देवता श्रुतधर्मवाळा होवाथी पण तेंने अधर्मी न कहेवाय. ३ सूत्र अने अर्थ दरेक सम्यग्दृष्टिने होय तेथी श्रुतधर्म पण तेउने छेज. ४ तेउने अधर्मस्थित कहेवानुं तत्त्व एटलुंज छे के तेउ संयमधर्म अंगीकार करी शकता नथी. ५ बोधविशेष नहि होवानी अपेक्षाएज तेउने 'बाल' कहेवामां आवे छे. ६ सम्यक्त्वने पण एकलुं होय तो निष्फळ कहेवामां आव्युं छे, तेथी ते उपरनी माफक संयमनुं अपेक्षित वाक्य छे एम जणाव्युं छे. ७ नारकी अने देवताउनी लेश्याउ जुदी होइने सम्यग्दृष्टि देवताउने सारी लेश्याओ होय छे. ८ सम्यग्दृष्टि देवताउने साधु आदिकनो विनय (तपविशेष) करवापणुं होय छे. ९ तेउ साधु आदिनुं वैयावच्च करी भव सफळ करे छे. १० इंद्रमहाराज सम्यग्वादी छे अने तेउ निरवद्य भाषा बोलेछे एम जणाव्युं छे. ११ इंद्रमहाराज साधुउने अवग्रह दे छे. १२ चमरेंद्रादि इंद्रो अने तेना लोकपालो भगवानना अस्थिनी आशातनानो त्याग करी विनयरूप धर्म साचवे छे. १३ हरिकेशीनुं वैयावच्च यक्षोए कर्युं छे. १४ देवताउने सम्यक्त्व-रूप संवर होय छे. १५ सूर्याभ देवताए धर्मव्यवसाय ग्रहण करीने श्री जिनप्रतिमानी पूजा करी छे. १६ विजय देवताए पण तेमज कर्युं छे. १७ जन्माभिषेकनो पण तेवोज अधिकार छे. देवताउनी पूजा वास्तविक धर्म अने आगळ ने पछी कल्याण करवावाळी छे. १८ 'पछी' शब्दथी ते भवनो पाछलो भागज लेवो एम नहि पण परभव लेवो, केमके तपस्या-दिकथी तेवुंज फळ बताव्युं छे. १९ स्थिति पण धर्मज कहेवाय. २० ज्ञानीउनो लोकोपचार पण कर्म खपाववा माटेज

होय छे. २१ देवताओए करेल वंदनादि पण पूर्व अने पछी हितकारी कह्यां छे. २२ वंदनाधिकारमां पूजा अधिकार लइ तेने शुभ तरीके जणावेल छे. २३ भगवाने देवतानी वंदनाने अनुमोदन आप्युं छे. अन्य अशुभ कामोनी माफक नाटकनो निषेध न कर्यो तेज अनुमति छे. २४ नाटकने भक्ति तरीके जणावेल छे अने भक्तिथी दुर्गतिनो अटकाव थइ, सुगतिनो बंध थइ, पर्यंते सिद्धिगतिनी प्राप्ति थाय छे. २५ दानना उपदेश के निषेधनी पेठे जिनपूजानो उपदेश के निषेध न करवो एम नहि, कारणके ते अनुबंधहिंसा छेज नहि. २६ चैत्य के प्रतिमाने अंगे थती द्रव्यहिंसा अर्थ के अनर्थदंडमां गणवामां आवी नथी. २७ पूजा आदिमां धर्म अधर्म बन्ने थाय छे एम नहि, केमके तेनो उपदेश के तेने माटे काउसग्ग होय नहि. ए जणावी दया अने हिंसानुं खरेखरुं स्वरूप प्रतिपादन कर्युं छे. आ दरेके दरेक मुद्दा उपर मूळ सूत्रोनो आधार बतावया तेना आळावा टांकवामां आव्या छे.

त्रीजा अध्यात्मोपनिषद् ग्रंथमां अध्यात्मनी व्याख्या आपीने तेने योग्य माणस अने तेने योग्य मननुं स्वरूप जणावी तुच्छाग्रहीनी दुर्व्यवस्था जणावतां अतींद्रिय पदार्थोने जाणवा माटे शास्त्रनुं सामर्थ्य बताव्युं छे; अने ते शास्त्रनी परीक्षा माटे कष, छेद अने तापनुं स्वरूप बतावी, तेनी शुद्धि बहु विस्तारथी जणावी, एकांतवादीओ पण स्याद्वाद कइ रीते माने छे ते समजाव्युं छे. साथे साथे नयनी शुद्धि पण सारी रीते समजावी छे. पछी श्रुत, चिंता अने भावनामय ज्ञाननुं विवेचन करी, धर्मवादने लायक माणसनुं स्वरूप जणावी **शास्त्रयोगशुद्धि** नामनो अधिकार पूरो कर्यो छे. बीजा **ज्ञानयोग** अधिकारमां प्रातिभनुं स्वरूप, आत्मज्ञानी मुनिनी स्थिति, ब्रह्मनुं अनुभवथीज वेद्यपणुं अने ज्ञानीनुं निर्लेपपणुं जणावतां

व्रतादिक करीने चित्तनी शुद्धि जणावी व्यवहारथी अने निश्चयथी ज्ञानयोग समजाव्यो छे. त्रीजा क्रिया अधिकारमां क्रिया रहित ज्ञाननुं निष्फळपणुं बतावी, पतीतभावथी करेली क्रियाथी पण भावनी वृद्धि थाय छे एम जणावी, ज्ञानीने पण क्रियाथीज कर्मनो नाश करवानो छे ए समजावी, ते अधिकार पूर्ण कर्यो छे. चोथा साम्याधिकारमां समतावाळो प्राणी केवो होय छे ते जणावी, समता वगरना सामायिकने मायिक कहेतां समताथीज परमात्मतत्त्व मालूम पडे छे एम बताव्युं छे. समताथी भरतादि राजाओ केवलज्ञान पाम्या छे, अने क्रोधथी चंडकोशादिक साधुओए पण अशुभ गति प्राप्त करी छे. दमदंत ऋषि, नमिराजर्षि, स्कंदक सूरिना शिष्यो, मेतार्य मुनि, गजसुकुमाळ, अर्णिकापुत्र, दृढप्रहारी अने मरुदेवा माताना थयेला कल्याणमां जे समता साधन तरीके थयेली छे तेने कयो मुमुक्षु आदरशे नहि ? ए बतावी चतुर्थ अधिकार अने ग्रंथ पूर्ण कर्यो छे.

चोथा अध्यात्ममत खंडन अथवा अध्यात्ममत परीक्षा ग्रंथ लखवानो प्रसंग कर्ताने एक कारणथी प्राप्त थयो छे. दिगंबर लोकोनी मान्यता एवी छे के केवळज्ञानीने कवळाहार होय नहि. आ हकीकत खोटी छे, अने केवळज्ञान अने कवळाहारने कोइ पण प्रकारनो विरोध नथी ए हकीकतज मात्र आ आखा ग्रंथमां बतावी छे. आ ग्रंथनी टीका पण पोतेज रची छे के जे ग्रंथ साथे आपवामां आवी छे. जिनेश्वर महाराजना चोत्रीश अतिशयमां आहारनिहारनी विधिनुं अदृश्यपणुं ए पण एक अतिशय गणातो होवाथी केवळीओने आहारनी सिद्धि जणावी, कवळाहार व्यापक नथी एम घणा विकल्पोथी सिद्ध करी, शरीरधारणनी माफक पात्रधारण, ध्यान ते वखते न होवाथी तेना विघ्नो अभाव

अने क्षायिक गुणवाळा होवाथी मोहनो अभाव जणावी, परमौदारिक शरीर तेमने होय छे अने ते धातुरहित होय छे एवा कुविकल्पनुं खंडन करतां जन्मथीज एक शरीर होय छे ए सिद्ध वातमां शंकानो अनुद्भव जणावी, ध्यानवाळा सातमे गुणस्थानके आहार नहि होवाथी ध्यान विनाना तेरमे गुणस्थानके तेनो निषेध थतो नथी, तेमज शुक्ल लेश्याने लीधे आहाररहितपणुं कही शकाय नहि, केमके ते तो घणा जीवोने छे अने तत्त्वार्थमां केवलीने जे अगियार परीसह कहेला छे ते आहार वगर घटी शके नहि; आहारनी कथाथी साधुनुं प्रमादीपणुं छतां पण वेदनीनी उदीरणा ने उदयनी माफक भोजननुं कर्तापणुं मोह नथी एम जणावी, टीकामां दिगंबरोनी उत्पत्ति, रीति अने तेनुं उपकरणरहितपणुं थवानुं कारण जणावी ग्रंथ संपूर्ण कर्यो छे. टीका स्वोपज्ञ होवाथी नवीन न्यायपद्धति प्रमाणे तेमां तेमणे अपूर्व विद्वत्ता बतावी छे.

पांचमा **यतिलक्षणसमुच्चय** प्रकरणमां साधुओनां सात लक्षणोनुं विवेचन करवामां आव्युं छे; जे ग्रंथ ते वखतना साधुओना वर्तनना सुधारा माटे अने साधुधर्मनुं खरुं स्वरूप समजाववा माटे लखायेलो मनाय छे. १ मार्गने अनुसरती क्रिया. २ शिक्षा ग्रहण करवानी योग्यता. ३ उत्तम श्रद्धा. ४ क्रियामां प्रमादरहितपणुं. ५ शक्य क्रियानो आदर. ६ गुण उपर तीव्र राग अने ७ मन वचन कायाथी गुरुमहाराजनी आज्ञानुं आराधन आ सात लक्षणो समजाव्यां छे. पहेला **मार्ग** लक्षणमां मार्गनी व्याख्या करतां सिद्धान्तनी रीति अने आचरणानुं स्वरूप बतावी सत् अने असत् आचरणानुं सारी रीते विवेचन करी गुरुनी आज्ञा प्रमाणे वर्तनारनुं केवी रीते कल्याण थाय छे ते प्रतिपादन करेलुं छे. बीजा **शिक्षायोग्यत्व** (प्रज्ञापनीयत्व) लक्षणमां विधि, उद्यम, स्तुति, भय, उत्सर्ग, अपवाद अने उत्सर्गापवाद सूत्रोनुं

स्वरूप समजावी देशनानी रीति जणावेली छे. त्रीजा श्रद्धा लक्षणमां विधिनुं बहुमान, विधिनुं ज्ञान, पच्चखाण पाळवानी योग्यता, वध अने दयानी तारतम्यता विगेरे पर विवेचन करवामां आव्युं छे. चोथा **क्रियामां अप्रमाद** ए नामना लक्षणमां मोक्षना दरेक अनुष्ठाननी तीव्र अभिलाषा, उपदेश करवाने योग्य गुणो, दान, पात्र विगेरे विषयोपर पूरतो प्रकाश पाडवामां आव्यो छे. पांचमा **शक्य क्रिया आदर** लक्षणमां संघयणादिकनी हीनताथी कइ रीते अनुष्ठान करवुं, शुभ अध्यवसाय कइ रीते राखवा ए विषयपर सारी रीते विचार बताव्यो छे. छठा **गुणानुराग** लक्षणमां गुणवान्नी प्रशंसा कइ रीते करवी ए विषयपर विवेचन कर्युं छे. सातमा **गुरुआज्ञा आराधन** लक्षणमां गच्छवास केटलो आवश्यक छे तेनी विचारणा, एकाकी विहार करनारने लागतां दूषणो, विहारनी रीति, गुरु अने शिष्यना योग्य गुणो, सत्य प्ररूपकनी प्रशंसा, दुःषमा काळमां साधुओनुं अस्तित्व विगेरे विषयो सविस्तर जणाव्या छे.

छठा **नयरहस्य** ग्रंथमां नयोनो अधिकार विस्तारथी जणाव्यो छे. आ ग्रंथने अंगे एक हकीकत बहु जाणवा लायक छे. श्रीमद्यशोविजयजी महाराजे दरेक विषयना रहस्यभूत 'रहस्य' शब्दथी अंकित एकसो आठ ग्रंथ करवानो निश्चय कर्यो हतो, अने संप्रदायथी सांभळ्युं छे के तेओए ते प्रमाणे १०८ ग्रंथो बनाव्या पण हता. आ हकीकत तेमना पोतानाज शब्दोथी पण समजाय छे. तेओ भाषारहस्य नामना ग्रंथनी शरुआतमां लखे छे के **भाषाविशुद्ध्यर्थं रहस्यपदांकिततया चिकीर्षिताष्टोत्तरशतग्रंथान्तर्गतप्रमारहस्य स्याद्वादरहस्यादि सजातीयं प्रकरणमिदमारभ्यते ।** तेओश्रीनो आ निश्चय अत्र प्रगट थाय छे. कमनसीबे ते ग्रंथो पैकी हालमां मात्र नयरहस्य, भाषारहस्य अने उपदेशरहस्य ए

त्रणज ग्रंथो लभ्य थइ शके छे. तेओ पोते मुसलमानी जुलमना समय पछी थया छे, छतां तेओना ग्रंथोनी एकेक कोपी पण मेळववी मुश्केल थइ पडे छे; तेथी अनुमान थाय छे के तेओश्रीना कोइ द्वेषीए तेओना ग्रंथोनो नाश करवानो धंधो आदरेलो होवो जोइए.

आ ग्रंथमां नय शब्दनुं लक्षण बराबर जणावी तेना पर्यायो अने ते मानवानी जरुर जणाववा साथे नयोनुं अन्योन्य विरोधपणुं नथी ए वात बहु सारां दृष्टांतो अने हेतुयुक्तिथी सारी रीते बतावी छे. नयना बे भेदो पैकी दरेकनुं लक्षण बांधतां ऋजु सूत्र नयने जिनभद्रगणिक्षमाश्रमण विगेरे द्रव्यार्थिकना भेद तरीके अने सिद्धसेन दिवाकर पर्यायार्थिकना भेद तरीके जणावे छे तेनुं समाधान करी, सात प्रकारे नयनी व्याख्या करतां प्रदेश, प्रस्थक अने वसतिनां दृष्टांतो अन्योन्य शंकासमाधान सहित उत्तरोत्तर नयनी विशुद्धता दर्शाववा पूर्वक जणाव्या छे. पछी दरेक नयनां लक्षणो तत्त्वार्थ, अनुयोगद्वार अने विशेषावश्यकनी अंदर जणावेलां लक्षणोने अविरोधपणे जणावी दरेक नये मानेला निक्षेपा अने तेनां कारणो जणाव्यां छे, अने तेमां एक एक नयथी उत्पन्न थयेला मतोना अभिप्रायोनुं सारी रीते विवेचन करी सापेक्षपणुं साबीत कर्युं छे, अने ऋजुसूत्र नयनुं विवेचन करतां सप्तभंगीनुं स्वरूप बतावी ते मानवानी जरुर अने तेनुं शंकासमाधान सारी रीते जणाव्युं छे; तेमज ऋजुसूत्रना विवेचनमां 'जीव' शब्दनी सारी रीते नयने आश्रीने व्याख्या आपवामां आवी छे अने छेवटे निश्चय व्यवहारनी व्याख्या समजावी चरणगुणनी प्राप्तिने माटे प्रयत्न करवानो उपदेश देवा साथे ग्रंथ पूर्ण करवामां आव्यो छे.

સાતમા **નયપ્રદીપ** ગ્રંથમાં પહેલા **સપ્તભંગી સમર્થન** સર્ગમાં સપ્તભંગી કઇ રીતે બને, સ્યાદ્વાદ શી વસ્તુ છે, સ્યાત્ શબ્દ ન હોય તોપણ તેનો અધ્યાહાર કરવાનું કારણ સવિશેષપણે સમજાવી સાતજ ભાંગા બનવાનો હેતુ ગંભીર અને સીધાં વાક્યોમાં સારી રીતે સમજાવ્યો છે. બીજા **નયસમર્થન સર્ગમાં** નયની જરુર, નયની મર્યાદા, દ્રવ્યનું સ્વરૂપ સ્વભાવ અને વિભાવ પર્યાયો અને તેનું સ્વરૂપ, દ્રવ્યાર્થિકના દશ મુદ્દા જણાવવા સાથે દ્રવ્યાર્થિક નયનું સ્વરૂપ સારી રીતે નિરૂપણ કર્યું છે. આગળ પર્યાયાર્થિક નયની વ્યાખ્યા કરતાં પર્યાય અને ગુણોના ભેદો અને તેનું સ્વરૂપ બરાબર વ્યાખ્યા સાથે કહેવામાં આવ્યું છે, અને સામાન્ય તથા વિશેષ બન્નેનો સમાવેશ પણ તેમાંજ થાય છે એમ જણાવી, પહેલા **નૈગમ** નયનું સ્વરૂપ જણાવતાં ધર્મ, ધર્મી અને ધર્મધર્મી વિષે નૈગમ નય શું બોલે છે અને તે કેટલું યુક્તિવાળું છે તે બતાવી નૈગમાભાસનું સ્વરૂપ બતાવ્યું છે. બીજા **સંગ્રહ** નયનું વિવેચન કરતાં તેનું લક્ષણ, તેના ભેદો અને તે ભેદોનું પણ લક્ષણ અને તેના આભાસો જણાવ્યા છે. ત્રીજા **વ્યવહાર** નયનું સ્વરૂપ જણાવતાં સદ્ભૂત, શુદ્ધ સદ્ભૂત, ઉપચરિત સદ્ભૂત, અનુપચરિત સદ્ભૂત, અશુદ્ધ સદ્ભૂત, સ્વજાત્યસદ્ભૂત, વિજાત્યસદ્ભૂત, ઉભયાસદ્ભૂત, સ્વજાત્યુપચરિતાસદ્ભૂત, વિજાત્યુપચરિતાસદ્ભૂત, ઉભયોપચરિતાસદ્ભૂત, અસદ્ભૂત, ઉપચરિતાસદ્ભૂત, અનુપચરિતાસદ્ભૂત વ્યવહારો જણાવી, નવ પ્રકારના ઉપચારો અને સંબંધો જણાવવામાં આવ્યા છે. પર્યાયાર્થિક નયના ચાર ભેદમાં પ્રથમ **ઋજુસૂત્ર** નયનું લક્ષણ, તેના ભેદો, બીજા **શબ્દ** નયનું લક્ષણ તેમજ કાળ, કારક, પુરુષ, ઉપસર્ગ આદિકથી ભિન્નાર્થની વ્યવસ્થા જણાવી, ત્રીજા **સમભિરૂઢ** નયનું લક્ષણ કહેવા સાથે 'પર્યાય' શબ્દમાં રહેલા જુદા જુદા અર્થો સમજાવી એવંભૂત

नयनुं स्वरूप अने शब्दोनो वास्तविक अर्थ जणाव्यो छे. आगळ जतां नयोना भेदो केटला, केवी रीते बने ते सारी रीते जणावी बीजो सर्ग पूर्ण करी ग्रंथसंपूर्त्ति करेली छे.

आठमा **नयोपदेश** ग्रंथमां नयनुं लक्षण, दीर्घतादिनी पेठे तेनाथी थतो सापेक्षबोध जणावी, संशयादिक दूषणोनुं निराकरण करी नयना द्रव्यार्थिक अने पर्यायार्थिक ए बे भेद जणावी विस्तारथी सात भेद बतावतां ते दरेकनां लक्षणो, प्रदेश, प्रस्थक अने वसतिनां दृष्टांतो समजावीने नयो कइ रीते, क्यारे अने क्यां लगाडाय तेनुं स्वरूप बहु विस्तारथी समजाव्युं छे. आगळ चालतां दरेक नये मानेला निक्षेपानो विचार करतां प्रतिमा, प्रतिष्ठा विगेरेनो विचार ग्रंथकर्त्ताए विस्तारथी कर्यो छे. आगळ कया नयथी कया मतनी उत्पत्ति छे अने तेउए केटलो अंश ग्रहण कर्यो छे अने छोड्यो छे ते जणावी मिथ्यात्वनां छ स्थानकोमां कयां स्थानको धर्मी अंशमां नास्तिक अने कयां स्थानको धर्मी अंशमां नास्तिक छे ए समजावी क्रिया अने ज्ञान नयनी मंतव्यता दर्शावी सर्व नयनो सिद्धांत बताव्यो छे.

नवमा **जैनतर्क परिभाषा** ग्रंथमां पहेला **प्रमाण परिच्छेद**मां प्रमाणनुं लक्षण, प्रमाण अने तेना फळनो कथंचित् अभेद, प्रमाणना भेदो, प्रत्यक्षना सांव्यवहारिक अने पारमार्थिक एवा बे भेदो जणाववा साथे **मतिज्ञानना** स्वरूपमां चक्षु अने मनथी व्यंजनावग्रह नहि बनवानुं स्पष्ट रीते समजावी अवग्रह, इहा, अपाय अने धारणानुं स्वरूप निरूपण करी तेमां थती शंकाउनुं युक्ति पूर्वक समाधान बहु उत्तम रीते करी, दरेकना बार बार भेदो समजावी मतिज्ञाननो विस्तार बहु स्पष्ट रीते कर्यो छे. बीजा **श्रुतज्ञाननुं** निरूपण करतां संज्ञा, व्यंजन अने लब्धि एवा त्रण प्रकारना अक्ष-

रोनुं स्वरूप समजावी श्रुतज्ञानना चौद भेदो सारी रीते समजाव्या छे. पारमार्थिक प्रत्यक्षमां छ प्रकारना अवधि (अनुगामी, अननुगामी, वर्धमान, हीयमान, प्रतिपाती अने अप्रतिप्राती) नुं अने मनःपर्यायना ऋजुमति अने विपुलमति ए बे भेदोनुं स्वरूप जणावी, केवलज्ञाननुं स्वरूप समजावतां योगज धर्मथी थता ज्ञान करतां तेनुं जुदापणुं जणावी प्रत्यक्ष प्रमाणनुं स्वरूप सारी रीते निवेदन कर्युं छे. आगल परोक्षनुं लक्षण कही तेना स्मरण, प्रत्यभिज्ञा, तर्क, अनुमान अने आगम एवा पांच भेदोमां स्मरण प्रमाणभूत कइ रीते थइ शके, तेने मानवानी केटली जरुर छे ते समजावी, प्रत्यभिज्ञानुं लक्षण, तेने जुदुं मानवानी जरुर अने अनुमान आदिनो तेमां समावेश केवी रीते थाय छे ते सारी रीते समजाव्युं छे. त्रीजा तर्क नामना भेदनो अंगीकार व्याप्तिग्रहमां उपयोगी छे अने ते शिवाय सामान्य लक्षणा तेमज शब्दार्थनो वाच्यवाचक भावसंबंध मालूम पडे नहि, माटे तर्कनुं स्वतः प्रमाणपणुं छे एम जणाव्युं छे. आगल स्वार्थ अने परार्थ ए बे प्रकारना अनुमान अने हेतुनुं लक्षण जणावतां त्रिलक्षण आदि हेतु न बने एम जणावी साध्यनुं स्वरूप, पक्षनी सिद्धि विगेरे समजावी दृष्टांत आदिकनी जरुर मंदबुद्धिने माटे छे ते समजाव्युं छे. हेतुना विधिसाधक, प्रतिषेधसाधक, उपलब्धि अने अनुपलब्धिना भेदो बहु विस्तारपूर्वक समजावी असिद्ध, विरुद्ध अने अनेकांतिक एवा त्रण हेत्वाभासोनुं स्वरूप समजावतां बीजाउए मानेला तेथी अधिक हेत्वाभासोनुं खंडन कर्युं छे. आगमप्रमाणनुं निरूपण करतां अनुमानथी तेनुं जुदापणुं साबीत करी, सप्तभंगी, दरेकनुं स्वरूप, दरेकनुं पार्थक्य जणावी सकलादेश अने विक-

लादेशना हेतुभूत काल, आत्मरूप, अर्थ, संबंध, उपकार, गुणीदेश, संसर्ग अने शब्दनुं स्वरूप समजाव्युं छे. अत्र प्रथम प्रमाण परिच्छेद पूर्ण थाय छे.

बीजा नयपरिच्छेदमां नयनुं लक्षण अने तेना भेदो जणावतां शब्दनी पंचतयी प्रवृत्ति एवंभूत नयवालो केवी रीते मानतो नथी ते जणावी अर्पित, अनर्पित,व्यवहार,निश्चय,ज्ञानक्रिया आदि भेदो अने सर्व नयना भेदोना आभास जणावी आ परिछेद पूर्ण कर्यो छे.

त्रीजा निक्षेपपरिच्छेदमां नाम, स्थापना, द्रव्य अने भाव एवा चार भेद निक्षेपना जणावी चारेनुं स्वरूप, चारेनुं प्रयोजन, दरेक निक्षेपानुं मंतव्य अने चारे माटे सिद्धान्त जणावी कयो नय कया निक्षेपा माने छे, निक्षेपा कइ रीते थइ शके अने जीवना निक्षेपा कइ रीते थाय ते विस्तारथी बताव्युं छे. आ ग्रंथ तर्कना अभ्यासीओने प्राथमिक ग्रंथ तरीके बहु उपयोगी छे अने प्रवेशक ग्रंथ छे. प्रशस्तिमां तेओ लखे छे के आ ग्रंथ शिष्यनी प्रार्थनाथी तेओए बनाव्यो छे. आ प्रशस्तिथी एक बीजी पण हकीकत जणाय छे अने ते ए के तेओए न्यायना सो ग्रंथ बनाव्या त्यारे तेओने न्यायाचार्यनी पदवी मळी हती. आविषे प्रशस्तिमां नीचेप्रमाणे जणावेल छे—

पूर्वं न्यायविशारदत्वबिरुदं काश्यां प्रदत्तं बुधैर्न्यायाचार्यपदं ततः कृतशतग्रन्थस्य यस्यार्पितम् ॥



दशमा ज्ञानबिंदु ग्रंथमां ज्ञाननुं लक्षण अने तेमां देशघाती प्रकृतिनी अपेक्षाए मतिज्ञानादिकनुं छाद्मस्थिक गुणपणुं घणाज विस्तार अने युक्तिपूर्वक समजाव्युं छे. ज्ञानना मति, श्रुत, अवधि,मनःपर्याय अने केवल एवा पांच भेदो गणावी

मतिज्ञाननुं लक्षण, तेनुं श्रुतज्ञानथी जुदापणुं, श्रुतनिश्रित अश्रुतनिश्रित भेदो, पदार्थ, वाक्यार्थ, महावाक्यार्थ अने ऐदंपर्यार्थ रूपी बोधनुं श्रुतपणुं, ते चारे प्रकारना बोधनी घटना अने चौदपूर्वीना षट्स्थानपतित बोधनुं श्रुतपणुं जणाव्युं छे. आगल अवग्रहादिकना अनुक्रमनी जरुर, अवग्रहना भेदो, तेनुं स्वरूप, तेना प्रामाण्य अप्रामाण्यपणाना स्वतस्त्व परतस्त्वनो निर्णय, सम्यक्त्वने अंगे ज्ञाननी प्रामाण्यता, स्याद्वादने अंगे एक पदार्थना ज्ञानथी सर्व पदार्थनुं ज्ञान अने अवग्रहादिक भेदोमां ज्ञान दर्शननी व्यवस्था जणावी मतिज्ञाननुं स्वरूप अत्यंत गहन रीते सूक्ष्म बोध थाय तेम जणाव्युं-छे. श्रुतज्ञानना विवेचनमां तेनुं स्वरूप, मतिश्रुतनो तफावत अने महावादीना मते ते बन्नेनुं ऐक्य समजाववामां आव्युं छे. त्रीजा अवधिज्ञानना विषयमां तेनुं लक्षण अने परमावधिनो विषय सारी रीते समर्थन करी मनःपर्यायथी तेनी भिन्नता साबीत करी छे. चोथा मनःपर्याय ज्ञानना स्वरूपमां तेनुं लक्षण जणावी चिंतित अर्थ जाणवानी रीति तेमज मनःपर्यायमां दर्शननो अंगीकार अने अनंगीकार, तेमज मनःपर्यायथी जाणवा लायक मननुं स्वरूप समजाव्युं छे. पांचमा केवलज्ञानना विषयमां तेनुं लक्षण, सर्वज्ञतानी सिद्धि, तेनुं प्रमाणिकपणुं, केवलज्ञानावरणना नाशनी आवश्यकता, कर्मनुं आवारकपणुं, लोभादिकनी कफादिथी तेमज शुक्रादिथी उत्पत्ति माननाराओना मतनु खंडन, नैरात्म्यभाव माननार बौधना मतमां सर्वज्ञतानुं अव्यवस्थितपणुं, एकरस ब्रह्मज्ञानने केवलज्ञान तरीके माननारनुं निराकरण, परमार्थादिक त्रण शक्तिओनुं खंडन, दृष्टि सृष्टिवादनुं खंडन, ब्रह्मविषय अने ब्रह्माकार वृत्तिनुं खंडन, अध्यासनुं निराकरण, द्रव्यार्थिक पर्यायार्थिक नयनी अपेक्षाए सूक्ष्म विचारश्रेणी अने अज्ञान कल्पनाना निरासपर विस्तारथी विवेचन कर्युं

छे; अने छेवटे श्रीमल्लवादीजी, श्रीसिद्धसेन दिवाकरजी तथा श्रीजिनभद्रगणिक्षमाश्रमणजीना केवलज्ञान दर्शन अने तेना उपयोग संबंधी मतो जणावी संमति तर्कनी ते विषयनी गाथाओनुं सारी रीते विवेचन करी ते तमाम मतोनुं नय अपेक्षाए एकीकरण कर्युं छे.

आ प्रमाणेना रहस्योवाला दश ग्रंथोथी आ ग्रंथमाला पूर्ण करवामां आवी छे.

जोके आ दश ग्रंथोनो उपोद्घात संक्षेपथी जणाव्यो छे तो पण सामान्य रीते जेम बीजा सामान्य ग्रंथोना उपोद्घातथी समग्र ग्रंथनुं हार्द आपी शकाय छे तेम अहीं बनी शके तेवुं नथी, तेनुं कारण आ ग्रंथोनुं अतिशय गहनपणुंज छे. छतां तद्दन सामान्य बुद्धिना जीवोने कंइक उद्देश मात्र मालूम पडे माटे आ उपोद्घात लखवामां आव्यो छे बाकी तो श्रीमन्न्यायाचार्य महाराजनां अत्यंत गहन वाक्योनो टुंकाणथी बोध करवानो उद्यम हास्यने पात्र बनावे तेवुं छे. तो पण शक्ति प्रमाणे जे मनुष्य जेम बोध पामे तेम प्रयत्न करवानी जरूर जाणी आ उद्यम कर्यो छे.

केटलाक भव्यो तरफथी भाषान्तर साथे आ ग्रंथो बहार पाडवा सूचना थती हती पण वर्तमान समयमां न्यायविषयना ग्रंथोनो बोध भाषांतरो उपरथी असंभवित नहि तो अशक्य तो जरुर छे एम जाणवाथी ते तरफ उद्यम करवानो विचार कर्यो नथी, छतां मूल पुस्तको सारी रीते बहार आव्या पछी बीजी संस्थाओ तेनां भाषान्तरो करी बहार पाडशे ए पण संभवित छे एम धारी मूल ग्रंथनोज उद्धार करवानी अपेक्षा राखी आ ग्रंथोनुं मूलमात्र बहार पाडवामां आव्युं छे.

॥ १८ ॥

# ॥ न्यायाचार्य श्रीयशोविजयोपाध्यायकृत ॥

## ॥ अध्यात्मसारग्रंथ ॥

॥ ऐंद्रश्रेणिनतः श्रीमान्नंदतान्नाभिनंदनः ॥ उद्दधार युगादौ यो जगदज्ञानपंकतः ॥ १ ॥ श्रीशांतिस्तांतिभिद्भूयाद्भविनां मृगलांछनः ॥ गावः कुवलयोल्लासं कुर्वते यस्य निर्मलाः ॥ २ ॥ श्रीशैवेयं जिनं स्तौमि भुवनं यशसेव यः ॥ मारुतेन मुखोत्थेन पांचजन्यमपूपुरत् ॥ ३ ॥ जीयात् फणिफणप्रांतसंक्रांततनुरेकदा ॥ उद्धर्तुमिव विश्वानि श्रीपार्श्वो बहुरूपभाक् ॥ ४ ॥ जगदानंदनः स्वामी जयति ज्ञातनंदनः ॥ उपजीवंति यद्वाचमद्यापि विबुधाः सुधाम् ॥ ५ ॥ एतानन्यानपि जिनान्नमस्कृत्य गुरूनपि ॥ अध्यात्मसारमधुना प्रकटीकर्तुमुत्सहे ॥ ६ ॥ शास्त्रात्परिचितां सम्यक्संप्रदायाच्च धीमतां ॥ इहानुभवयोगाच्च प्रक्रियां कामपि ब्रुवे ॥ ७ ॥ योगिनां प्रीतये पद्यमध्यात्मरसपेशलं ॥ भोगिनां भामिनीगीतं संगीतकमयं यथा ॥ ८ ॥ कांताधरसुधास्वादाद्यूनां यज्जायते सुखम् ॥ बिंदुः पार्श्वे तदध्यात्मशास्त्रास्वादसुखोदधेः ॥ ९ ॥ अध्यात्मशास्त्रसंभूतसंतोषसुखशालिनः ॥ गणयंति न राजानं न श्रीदं नापि वासवम् ॥१०॥ यः किलाशिक्षिताध्यात्मशास्त्रः पांडित्यमिच्छति ॥ उत्क्षिपत्यंगुलीं पंगुः स स्वर्द्रुफललिप्सया ॥ ११ ॥ दंभपर्वतदंभोलिः सौहार्दांबुधिचंद्रमाः ॥ अध्यात्मशास्त्रमुत्तालमोह-

जालवनानलः ॥ १२ ॥ अध्वा धर्म्मस्य सुस्थः स्यात्पापचौरः पलायते ॥ अध्यात्मशास्त्रसौराज्ये न स्यात्कश्चिदुपप्लवः ॥ ॥ १३ ॥ येषामध्यात्मशास्त्रार्थतत्त्वं परिणतं हृदि ॥ कषायविषयावेशक्लेशास्तेषां न कर्हिचित् ॥ १४ ॥ निर्दयः कामचंडालः पण्डितानपि पीडयेत् ॥ यदि नाध्यात्मशास्त्रार्थबोधयोधकृपा भवेत् ॥ १५ ॥ विषवल्लिसमां तृष्णां वर्धमानां मनोवने ॥ अध्यात्मशास्त्रदात्रेण छिंदंति परमर्षयः ॥ १६ ॥ वने वेश्म धनं दौःस्थ्ये तेजो ध्वांते जलं मरौ ॥ दुरापमाप्यते धन्यैः कलावध्यात्मवाङ्मयम् ॥ १७ ॥ वेदान्यशास्त्रवित् क्लेशं रसमध्यात्मशास्त्रवित् ॥ भाग्यभृद्भोगमाप्नोति वहति चंदनं खरः ॥ १८ ॥ भुजास्फालनहस्तास्यविकाराभिनयाः परे ॥ अध्यात्मशास्त्रविज्ञास्तु वदंत्यविकृतेक्षणाः ॥ १९ ॥ अध्यात्मशास्त्रहेमाद्रिमथितादागमोदधेः ॥ भूयांसि गुणरत्नानि प्राप्यंते विबुधैर्न किम् ॥ २० ॥ रसो भोगावधिः कामे सद्भक्ष्ये भोजनावधिः ॥ अध्यात्मशास्त्रसेवायां रसो निरवधिः पुनः ॥ २१ ॥ कुतर्कग्रंथसर्वस्वगर्वज्वरविकारिणी ॥ एति दृग्निर्मलीभावमध्यात्मग्रंथभेषजात् ॥ २२ ॥ धनिनां पुत्रदारादि यथा संसारवृद्धये ॥ तथा पांडित्यदृप्तानां शास्त्रमध्यात्मवर्जितम् ॥ २३ ॥ अध्येतव्यं तदध्यात्मशास्त्रं भाव्यं पुनः पुनः ॥ अनुष्ठेयस्तदर्थश्च देयो योग्यस्य कस्यचित् ॥ २४ ॥

॥ इत्यध्यात्मसारे माहात्म्याधिकारः ॥ १ ॥

॥ भगवन् किं तदध्यात्मं यदित्थमुपवर्ण्यते ॥ शृणु वत्स यथाशास्त्रं वर्णयामि पुरस्तव ॥ १ ॥ गतमोहाधिकाराणामात्मा-
नमधिकृत्य या ॥ प्रवर्तते क्रिया शुद्धा तदध्यात्मं जगुर्जिनाः ॥ २ ॥ सामायिकं यथा सर्वचारित्रेष्वनुवृत्तिमत् ॥ अध्यात्मं ॥ १ ॥
सर्वयोगेषु तथानुगतमिष्यते ॥ ३ ॥ अपुनर्बंधकाद्यावद्गुणस्थानं चतुर्दशम् ॥ क्रमशुद्धिमती तावत् क्रियाध्यात्ममयी मता

॥ ४ ॥ आहारोपधिपूजर्द्धिगौरवप्रतिबंधतः ॥ भवाभिनंदी या कुर्यात् क्रियां साध्यात्मवैरिणी ॥ ५ ॥ क्षुद्रो लोभरति-
र्दीनो मत्सरी भयवान् शठः ॥ अज्ञो भवाभिनंदी स्यान्निष्फलारंभसंगतः ॥ ६ ॥ शांतो दांतः सदा गुप्तो मोक्षार्थी विश्व-
वत्सलः ॥ निर्दंभां यां क्रियां कुर्यात् साध्यात्मगुणवृद्धये ॥ ७ ॥ अत एव जनः पृच्छोत्पन्नसंज्ञः पिपृच्छिषुः ॥ साधुपार्श्वे
जिगमिषुर्धर्म्मं पृच्छन् क्रियास्थितः ॥ ८ ॥ प्रतिपित्सुः सृजन् पूर्वं प्रतिपन्नश्च दर्शनम् ॥ श्राद्धो यतिश्च त्रिविधोऽनंतांशक्षप-
कस्तथा ॥ ९ ॥ दृङ्मोहक्षपको मोहशमकः शांतमोहकः ॥ क्षपकः क्षीणमोहश्च जिनोऽयोगी च केवली ॥ १० ॥ यथा
क्रमममी प्रोक्ता असंख्यगुणनिर्जराः ॥ यतितव्यमतोध्यात्मवृद्धये कलयापि हि ॥ ११ ॥ ज्ञानं शुद्धं क्रिया शुद्धेत्यंशौ
द्वाविह संगतौ ॥ चक्रे महारथस्येव पक्षाविव पतत्रिणः ॥ १२ ॥ तत्पंचमगुणस्थानादारभ्यैवैतदिच्छति ॥ निश्चयो व्यव-
हारस्तु पूर्वमप्युपचारतः ॥ १३ ॥ चतुर्थेपि गुणस्थाने शुश्रूषाद्या क्रियोचिता ॥ अप्राप्तस्वर्णभूषाणां रजताभरणं यथा॥१४॥
अपुनर्बंधकस्यापि या क्रिया शमसंयुता ॥ चित्रा दर्शनभेदेन धर्म्मविघ्नक्षयाय सा ॥ १५ ॥ अशुद्धापि हि शुद्धायाः क्रिया
हेतुः सदाशयात् ॥ ताम्रं रसानुवेधेन स्वर्णत्वमधिगच्छति ॥ १६ ॥ अतो मार्गप्रवेशाय व्रतं मिथ्यादृशामपि ॥ द्रव्यसम्य-
क्त्वमारोप्य ददते धीरबुद्धयः ॥ १७ ॥ यो बुध्वा भवनैर्गुण्यं धीरः स्याद्व्रतपालने ॥ स योग्यो भावभेदस्तु दुर्लक्ष्यो नोप-
युज्यते ॥ १८ ॥ नोचेद्भावापरिज्ञानात्सिद्ध्यसिद्धिपराहतेः ॥ दीक्षाऽदानेन भव्यानां मार्गोच्छेदः प्रसज्यते ॥ १९ ॥ अशु-
द्धानादरेऽभ्यासायोगान्नो दर्शनाद्यपि ॥ सिध्येन्निसर्गजं मुक्त्वा तदप्याभ्यासिकं यतः ॥ २० ॥ शुद्धमार्गानुरागेणाशठानां
या तु शुद्धता ॥ गुणवत्परतंत्राणां सा न क्वापि विहन्यते ॥ २१ ॥ विषयात्मानुबंधैर्हि त्रिधा शुद्धं यथोत्तरं ॥ ब्रुवते कर्म्म

तत्राद्यं मुक्त्यर्थं पतनाद्यपि ॥ २२ ॥ अज्ञानिनां द्वितीयं तु लोकदृष्ट्या यमादिकम् ॥ तृतीयं शांतवृत्त्या तत्तत्त्वसंवेदनानुगम् ॥ २३ ॥ आद्यान्नाज्ञानबाहुल्यान्मोक्षबाधकबाधनं ॥ सद्भावाशयलेशेनोचितं जन्म परे जगुः ॥ २४ ॥ द्वितीयाद्दोषहानिःस्यात्काचिन्मंडूकचूर्णवत् ॥ आत्यंतिकी तृतीयात्तु गुरुलाघवचिंतया ॥ २५ ॥ अपि स्वरूपतः शुद्धा क्रिया तस्माद्विशुद्धिकृत् ॥ मौनींद्रव्यवहारेण मार्गबीजं दृढादरात् ॥ २६ ॥ गुर्वाज्ञापारतंत्र्येण द्रव्यदीक्षाग्रहादपि ॥ वीर्योल्लासक्रमात्प्राप्ता बहवः परमं पदम् ॥ २७ ॥ अध्यात्माभ्यासकालेपि क्रिया काप्येवमस्ति हि॥ शुभौघसंज्ञानुगतं ज्ञानमप्यस्ति किंचन ॥२८॥ अतोज्ञानक्रियारूपमध्यात्मं व्यवतिष्ठते ॥ एतत्प्रवर्द्धमानं स्यान्निर्दंभाचारशालिनाम् ॥ २९ ॥ ॥ ॥

॥ इत्यध्यात्मस्वरूपाधिकारः ॥ २ ॥

॥ दंभो मुक्तिलतावन्हिर्दंभो राहुः क्रियाविधौ ॥ दौर्भाग्यकारणं दंभो दंभोऽध्यात्मसुखार्गला ॥१॥ दंभो ज्ञानाद्रिदंभोलिर्दंभः कामानले हविः ॥ व्यसनानां सुहृद्दंभो दंभश्चौरो व्रतश्रियः ॥ २ ॥ दंभेन व्रतमास्थाय यो वांछति परं पदम् ॥ लोहनावं समारुह्य सोऽब्धेः पारं यियासति ॥ ३ ॥ किं व्रतेन तपोभिर्वा दंभश्चेन्न निराकृतः ॥ किमादर्शेन किं दीपैर्यद्यांध्यं न दृशोर्गतम् ॥ ४ ॥ केशलोचधराशय्याभिक्षाब्रह्मव्रतादिकम् ॥ दंभेन दुष्यते सर्वं त्रासेनेव महामणिः ॥५॥ सुत्यजं रसलांपट्यं सुत्यजं देहभूषणम् ॥ सुत्यजाः कामभोगाद्या दुस्त्यजं दंभसेवनम् ॥ ६ ॥ स्वदोषनिन्हवो लोकपूजा स्याद्गौरवं तथा ॥ इयतैव कदर्थ्यंते दंभेन बत बालिशाः ॥ ७ ॥ असतीनां यथा शीलमशीलस्यैव वृद्धये ॥ दंभेनाव्रतवृद्ध्यर्थं व्रतं वेषभृतां तथा ॥ ८ ॥ जानाना अपि दंभस्य स्फुरितं बालिशा जनाः ॥ तत्रैव धृतविश्वासाः प्रस्खलंति पदे पदे ॥ ९ ॥

अहो मोहस्य माहात्म्यं दीक्षां भागवतीमपि ॥ दंभेन यद्विलुंपंति कज्जलेनेव रूपकम् ॥ १० ॥ अब्जे हिमं तनौ रोगो वने
वन्हिर्दिने निशा ॥ ग्रंथे मौर्ख्यं कलिः सौख्ये धर्म्मे दंभ उपप्लवः ॥ ११ ॥ अत एव न यो धर्तुं मूलोत्तरगुणानलम् ॥
युक्ता सुश्राद्धता तस्य न तु दंभेन जीवनम् ॥ १२ ॥ परिहर्तुं न यो लिंगमप्यलं दृढरागवान् ॥ संविग्नपाक्षिकः स स्यान्नि-
र्दंभः साधुसेवकः ॥ १३ ॥ निर्दंभस्यावसन्नस्याप्यस्य शुद्धार्थभाषिणः ॥ निर्जरां यतना दत्ते स्वल्पापि गुणरागिणः ॥१४॥
व्रतभारासहत्वं ये विदंतोप्यात्मनः स्फुटम् ॥ दंभाद्यतित्वमाख्यांति तेषां नामापि पाप्मने ॥१५॥ कुर्वते ये न यतनां सम्य-
क्कालोचितामपि ॥ तैरहो यतिनाम्नैव दांभिकैर्वंच्यते जगत् ॥ १६ ॥ धर्मीतिख्यातिलोभेन प्रच्छादितनिजाश्रवः ॥ तृणाय
मन्यते विश्वं हीनोपि धृतकैतवः ॥ १७ ॥ आत्मोत्कर्षात्ततो दंभी परेषां चापवादतः ॥ बध्नाति कठिनं कर्म्म बाधकं योग-
जन्मनः ॥ १८ ॥ आत्मार्थिना ततस्त्याज्यो दंभोऽनर्थनिबंधनम् ॥ शुद्धिः स्यादृजुभूतस्येत्यागमे प्रतिपादितम् ॥१९॥ जिनै-
र्नानुमतं किंचिन्निषिद्धं वा न सर्वथा ॥ कार्ये भाव्यमदंभेनेत्येषाज्ञा पारमेश्वरी ॥ २० ॥ अध्यात्मरतचित्तानां दंभः स्वल्पो-
ऽपि नोचितः ॥ छिद्रलेशोऽपि पोतस्य सिंधुं लंघयतामिव ॥ २१ ॥ दंभलेशोपि मल्ल्यादेः स्त्रीत्वानर्थनिबंधनम् ॥ अतस्त-
त्परिहाराय यतितव्यं महात्मना ॥ २२ ॥ ॥ ॥ ॥ ॥ ॥

॥ इति दंभत्यागाधिकारः ॥ ३ ॥

॥ तदेवं निर्दंभाचरणपटुना चेतसि भव-स्वरूपं संचिंत्यं क्षणमपि समाधाय सुधिया॥इयं चिंताऽध्यात्मप्रसरसरसीनीरल-
हरी सतां वैराग्यास्थाप्रियपवनपीना सुखकृते ॥ १ ॥ इतः कामौर्वाग्निर्ज्वलति परितो दुःसह इतः पतंति ग्रावाणो विषय-

गिरिकूटाद्विघटिताः ॥ इतः क्रोधावर्तो विकृतितटिनीसंगमकृतः समुद्रे संसारे तदिह न भयं कस्य भवति ॥ २ ॥ प्रिया-
ज्वाला यत्रोद्वमति रतिसंतापतरला कटाक्षान् धूमौघान् कुवलयदलश्यामलरुचीन् ॥ अथांगान्यंगाराः कृतबहुविकाराश्च
विषया दहंत्यस्मिन्वह्नौ भववपुषि शर्म क्व सुलभम् ॥ ३ ॥ गले दत्वा पाशं तनयवनितास्नेहघटितं निपीड्यंते यत्र प्रकृति-
कृपणाः प्राणिपशवः ॥ नितांतं दुःखार्त्ता विषमविषयैर्घातकभटैर्भवः सूनास्थानं तदहह महासाध्वसकरम् ॥ ४ ॥ अविद्यायां
रात्रौ चरति वहते मूर्ध्नि विषमं कषायव्यालौघं क्षिपति विषयास्थीनि च गले ॥ महादोषान् दंतान् प्रकटयति वक्रस्मरमुखो
न विश्वासार्होऽयं भवति भवनक्तंचर इति ॥ ५ ॥ जना लब्ध्वा धर्म्मद्रविणलवभिक्षां कथमपि प्रयांतो वामाक्षीस्तनविष-
मदुर्गस्थितिकृता ॥ विलुप्यंते यस्यां कुसुमशरभिल्लेन बलिना भवाटव्यां नास्यामुचितमसहायस्य गमनम् ॥ ६ ॥ धनं मे गेहं
मे मम सुतकलत्रादिकमतो विपर्यासादासादितविततदुःखा अपि मुहुः ॥ जना यस्मिन् मिथ्यासुखमदभृतः कूटघटनाम-
योऽयं संसारस्तदिह न विवेकी प्रसजति ॥ ७ ॥ प्रियास्नेहो यस्मिन्निगडसदृशो यामिकभटोपमः स्वीयो वर्गो धनमभिनवं
बंधनमिव ॥ मदामेध्यापूर्णं व्यसनबिलसंसर्गविषमं भवः कारागेहं तदिह न रतिः क्वापि विदुषाम् ॥ ८ ॥ महाक्रोधो गृध्रो-
ऽनुपरतिशृगाली च चपला स्मरोलूको यत्र प्रकटकटुशब्दः प्रचरति ॥ प्रदीप्तः शोकाग्निस्ततमपयशोभस्म परितः स्मशानं
संसारस्तदभिरमणीयत्वमिह किम् ॥ ९ ॥ धनाशा यच्छायाप्यतिविषममूर्छाप्रणयिनी विलासो नारीणां गुरुविकृतये यत्सुम-
रसः ॥ फलास्वादो यस्य प्रसरनरकव्याधिनिवहस्तदास्था नो युक्ता भवविषतरावत्र सुधियाम् ॥ १० ॥ क्वचित् प्राज्यं राज्यं ॥ ३ ॥
क्वचन धनलेशोप्यसुलभः क्वचिज्जातिस्फातिः क्वचिदपि च नीचत्वकुयशः ॥ क्वचिल्लावण्यश्रीरतिशयवती क्वापि न वपुःस्व-

रूपं वैषम्यं रतिकरमिदं कस्य नु भवे ॥ ११ ॥ इहोद्दामः कामः खनति परिपंथी गुणमहीमविश्रामः पार्श्वस्थितकुपरिणामस्य कलहः ॥ बिलान्यंतःक्रामन्मदफणभृतां पामरमतं वदामः किं नाम प्रकटभवधामस्थितिसुखम् ॥ १२ ॥ तृषार्त्ताः खिद्यंते विषयविवशा यत्र भविनः करालक्रोधार्कोन्नमसरसि शोषं गतवति ॥ स्मरस्वेदक्लेदग्लपितगुणमेदस्यनुदिनं भवग्रीष्मे भीष्मे किमिह शरणं तापहरणम् ॥ १३ ॥ पिता माता भ्राताप्यभिलषितसिद्धावभिमतो गुणग्रामज्ञाता न खलु धनदाता च धनवान् ॥ जनाः स्वार्थस्फातावनिशमवदाताशयभृतः प्रमाता कः ख्याताविह भवसुखस्यास्तु रसिकः ॥ १४ ॥ पणैः प्राणैर्गृह्णात्यहह महति स्वार्थ इह यान् त्यजत्युच्चैर्लोकस्तृणवदघृणस्तानपरथा ॥ विषं स्वांते वक्त्रेऽमृतमिति च विश्वासहतिकृद्भवादित्युद्वेगो यदि न गदितैः किं तदधिकैः ॥ १५ ॥ दृशां प्रांतैः कांतैः कलयति मुदं कोपकलितैरमीभिः खिन्नः स्यादूघनधननिधीनामपि गुणी ॥ उपायैस्तुल्याद्यैरपनयति रोषं कथमपीत्यहो मोहस्येयं[1] भवभवनवैषम्यघटना ॥ १६ ॥ प्रिया प्रेक्षा पुत्रो विनय इह पुत्री गुणरतिर्विवेकाख्यस्तातः परिणतिरनिंद्या च जननी ॥ विशुद्धस्य स्वस्य स्फुरति हि कुटुंबं स्फुटमिदं भवे तन्नो दृष्टं तदपि बत संयोगसुखधीः ॥ १७ ॥ पुरा प्रेमारंभे तदनु तदविच्छेदघटने तदुच्छेदे दुःखान्यथ कठिनचेता विषहते ॥ विपाकादापाकाहितकलशवत्तापबहुलाजनोयस्मिन्नस्मिन्क्वचिदपि सुखं हंत न भवे ॥ १८ ॥ मृगाक्षीदृग्बाणैरिह हि निहतं धर्म्मकटकं विलिप्ता हृद्देशा इह च बहुलै रागरुधिरैः ॥ भ्रमंत्यूर्ध्वं क्रूरा व्यसनशतगृध्राश्च तदियं महामोहक्षोणीरमणरणभूमिः खलु भवः ॥ १९ ॥ हसंति क्रीडंति क्षणमथ च खिद्यंति बहुधा रुदंति क्रंदंति क्षण-

१ मोहस्यैवमिति पाठांतरम् ।

मपि विवादं विदधते ॥ पलायंते मोदं दधति परिनृत्यंति विवशा भवे मोहोन्मादं कमपि तनुभाजः परिगताः ॥ २० ॥
अपूर्णा विद्येव प्रकटखलमैत्रीव कुनयप्रणालीवास्थाने विधववनितायौवनमिव ॥ अनिष्णाते पत्यौ मृगदृश इव स्नेहलहरी
भवक्रीडाभीमा दहति हृदयं तात्त्विकदृशाम् ॥ २१ ॥ प्रभाते संजाते भवति वितथा स्वापकलना द्विचंद्रज्ञानं वा तिमिर-
विरहे निर्म्मलदृशाम् ॥ तथा मिथ्यारूपः स्फुरति विदिते तत्त्वविषये भवोऽयं साधूनामुपरतविकल्पस्थिरधियाम् ॥ २२ ॥
प्रियावाणीवीणाशयनतनुसंबाधनसुखैर्भवोयं पीयूषैर्घटित इति पूर्वं मतिरभूत् ॥ अकस्मादस्माकं परिकलिततत्त्वोपनिषदा-
मिदानीमेतस्मिन्न रतिरपि तु स्वात्मनि रतिः ॥ २३ ॥ दधानाः काठिन्यं निरवधिकमाविद्यकभवप्रपंचाः पांचालीकुचक-
लशवन्नातिरतिदाः ॥ गलत्यज्ञानाभ्रे प्रसृमररुचावात्मनि विधौ चिदानंदस्यंदः सहज इति तेऽन्योस्तु विरतिः ॥ २४ ॥ भवे
या राज्यश्रीर्गजतुरगगोसंग्रहकृता न सा ज्ञानध्यानप्रशमजनिता किं स्वमनसि ॥ बहिर्याः प्रेयस्यः किमु मनसि ता नात्म-
रतयस्ततः स्वाधीनं कस्त्यजति सुखमिच्छत्यथ परम् ॥ २५ ॥ पराधीनं शर्म्म क्षयि विषयकांक्षौघमलिनं भवे भीतेः स्थानं
तदपि कुमतिस्तत्र रमते ॥ बुधास्तु स्वाधीनेऽक्षयिणि करणौत्सुक्यरहिते निलीनास्तिष्ठंति प्रगलितभयाध्यात्मिकसुखे ॥२६॥
तदेतद्भाषंते जगदभयदानं खलु भवस्वरूपानुध्यानं शमसुखनिदानं कृतधियः ॥ स्थिरीभूते यस्मिन्विधुकिरणकर्पूरविमला
यशःश्रीः प्रौढा स्याज्जिनसमयतत्त्वस्थितिविदाम् ॥ २७ ॥ ॥ ॥ ॥ ॥

॥ इति भवस्वरूपचिंताधिकारः ॥ ४ ॥

इति श्रीनयविजयगणिशिष्यन्यायविशारदश्रीयशोविजयोपाध्यायविरचितेऽध्यात्मसारप्रकरणे प्रथमः प्रबंधः ॥

॥ भवस्वरूपविज्ञानाद्द्वेषान्नैर्गुण्यदृष्टिजात् ॥ तदिच्छोच्छेदरूपं प्राग् वैराग्यमुपजायते ॥ १ ॥ सिद्ध्या विषयसौख्यस्य वैराग्यं वर्णयंति ये ॥ मतं न युज्यते तेषां यावदर्थाप्रसिद्धितः ॥ २ ॥ अप्राप्तत्वभ्रमादुच्चैरवाप्तेष्वप्यनंतशः ॥ कामभोगेषु मूढानां समीहा नोपशाम्यति ॥ ३ ॥ विषयैः क्षीयते कामो नेंधनैरिव पावकः ॥ प्रत्युत प्रोल्लसच्छक्तिर्भूय एवोपवर्द्धते ॥ ४ ॥ सौम्यत्वमिव सिंहानां पन्नगानामिव क्षमा ॥ विषयेषु प्रवृत्तानां वैराग्यं खलु दुर्लभम्[1] ॥ ५ ॥ अकृत्वा विषयत्यागं यो वैराग्यं दिधीर्षति ॥ अपथ्यमपरित्यज्य स रोगोच्छेदमिच्छति ॥ ६ ॥ न चित्ते विषयासक्ते वैराग्यं स्थातुमप्यलम् ॥ अयोघन इवोत्तप्ते निपतन्बिंदुरंभसः ॥ ७ ॥ यदींदुः स्यात् कुहूरात्रौ फलं यद्यवकेशिनि ॥ तदा विषयसंसर्गिचित्ते वैराग्यसंक्रमः ॥ ८ ॥ भवहेतुषु तद्द्वेषाद्विषयेष्वप्रवृत्तितः ॥ वैराग्यं स्यान्निराबाधं भवनैर्गुण्यदर्शनात् ॥ ९ ॥ चतुर्थेपि गुणस्थाने नन्वेवं तत् प्रसज्यते ॥ युक्तं खलु प्रमातॄणां भवनैर्गुण्यदर्शनम् ॥ १० ॥ सत्यं चारित्रमोहस्य महिमा कोप्ययं खलु ॥ यदन्यहेतुयोगेऽपि फलायोगोऽत्र दृश्यते ॥ ११ ॥ दशाविशेषे तत्रापि नचेदं नास्ति सर्वथा ॥ स्वव्यापारहतासंगं तथा च स्तवभाषितं ॥१२॥ यदा मरुन्नरेंद्रश्रीस्त्वया नाथोपभुज्यते ॥ यत्र तत्र रतिर्नाम विरक्तत्वं तदापि ते ॥ १३ ॥ भवेच्छा यस्य विच्छिन्ना प्रवृत्तिः कर्म्मभावजा ॥ रतिस्तस्य विरक्तस्य सर्वत्र शुभवेद्यतः ॥ १४ ॥ अतश्चाक्षेपकज्ञानात् कांतायां भोगसन्निधौ ॥ न शुद्धिप्रक्षयो यस्माद्धारिभद्रमिदं वचः ॥१५॥ मायांभस्तत्त्वतः पश्यन्ननुद्विग्नस्ततो द्रुतम् ॥ तन्मध्येन प्रयात्येव यथा व्याघातवर्जितः ॥ १६ ॥ भोगान् स्वरूपतः पश्यंस्तथा मायोदकोपमान् ॥ भुंजानोपि ह्यसंगः सन् प्रयात्येव परं पदम् ॥ १७ ॥ भोगत-

१ दुर्वचमिति वा पाठः ।

स्त्वस्य तु पुनर्न भवोदधिलंघनम् ॥ मायोदकदृढावेशात्तेन यातीह कः पथा ॥ १८ ॥ स तत्रैव भवोद्विग्नो यथा तिष्ठत्यसंशयं ॥ मोक्षमार्गेपि हि तथा भोगजंबालमोहितः ॥ १९ ॥ धर्म्मशक्तिं न हंत्यत्र भोगयोगो बलीयसीं ॥ हंति दीपापहो वायुर्ज्वलंतं न दवानलम् ॥ २० ॥ बध्यते बाढमासक्तो यथा श्लेष्मणि मक्षिका ॥ शुष्कगोलवदश्लिष्टो विषयेभ्यो न बध्यते ॥ २१ ॥ बहुदोषनिरोधार्थमनिवृत्तिरपि क्वचित् ॥ निवृत्तिरिव नो दुष्टा योगानुभवशालिनाम् ॥२२॥ यस्मिन्निषेव्यमाणेपि यस्याशुद्धिः कदाचन ॥ तेनैव तस्य शुद्धिः स्यात् कदाचिदिति हि श्रुतिः ॥ २३ ॥ विषयाणां ततो बंधजनने नियमोस्ति न ॥ अज्ञानिनां ततो बंधो ज्ञानिनां तु न कर्हिचित् ॥ २४ ॥ सेवतेऽसेवमानोपि सेवमानो न सेवते ॥ कोपि पारजनो न स्याच्छ्रयन् परजनानपि ॥ २५ ॥ अतएव महापुण्यविपाकोपहितश्रियाम् ॥ गर्भादारभ्य वैराग्यं नोत्तमानां विहन्यते ॥२६॥ विषयेभ्यः प्रशांतानामश्रांतं विमुखीकृतैः ॥ करणैश्चारुवैराग्यमेष राजपथः किल ॥ २७ ॥ स्वयं निवर्त्तमानैस्तैरनुदीर्णैरयंत्रितैः ॥ तृप्तैर्ज्ञानवतां तत्स्यादसावेकपदी मता ॥ २८ ॥ बलेन प्रेर्यमाणानि करणानि वनेभवत् ॥ न जातु वशतां यांति प्रत्युतानर्थवृद्धये ॥ २९ ॥ पश्यंति लज्जया नीचैर्दुर्ध्यानं च प्रयुंजते ॥ आत्मानं धार्मिकाभासाः क्षिपंति नरकावटे ॥ ३० ॥ वंचनं करणानां तद्विरक्तः कर्तुमर्हति ॥ सद्भावविनियोगेन सदा स्वान्यविभागवित् ॥ ३१ ॥ प्रवृत्तेर्वानिवृत्तेर्वा न संकल्पो न च श्रमः ॥ विकारो हीयतेऽक्षाणामिति वैराग्यमद्भुतम् ॥ ३२ ॥ दारुयंत्रस्थपांचालीनृत्यतुल्याः प्रवृत्तयः ॥ योगिनो नैव बाधायै ज्ञानिनो लोकवर्तिनः ॥ ३३ ॥ इयं च योगमायेति प्रकटं गीयते परैः ॥ लोकानुग्रहहेतुत्वान्नास्यामपि च दूषणम्

॥ ३४ ॥ सिद्धांते श्रूयते चेयमपवादपदेष्वपि ॥ मृगपर्षत्परित्रासनिरासफलसंगता ॥ ३५ ॥ औदासीन्यफले ज्ञाने परिपाकमुपेयुषि ॥ चतुर्थेपि गुणस्थाने तद्वैराग्यं व्यवस्थितम् ॥ ३६ ॥

॥ इति वैराग्यसंभवाधिकारः ॥ ५ ॥

॥ तद्वैराग्यं स्मृतं दुःखमोहज्ञानान्वयात्रिधा ॥ तत्राद्यं विषयाप्राप्तेः संसारोद्वेगलक्षणम् ॥ १ ॥ अत्रांगमनसोः खेदो ज्ञानमाप्यायकं न यत् ॥ निजाभीप्सितलाभे च विनिपातोपि जायते ॥ २ ॥ दुःखाद्विरक्ताः प्रागेवेच्छंति प्रत्यागतेः पदम् ॥ अधीरा इव संग्रामे प्रविशंतो वनादिकम् ॥ ३ ॥ शुष्कतर्कादिकं किंचिद्वैद्यकादिकमप्यहो ॥ पठंति ते शमनदीं न तु सिद्धांतपद्धतिम् ॥ ४ ॥ ग्रंथपल्लवबोधेन गर्वोष्माणं च बिभ्रति ॥ तत्त्वं ते नैव गच्छंति प्रशमामृतनिर्झरं ॥ ५ ॥ वेषमात्रभृतोऽप्येते गृहस्थान्नातिशेरते ॥ न पूर्वोत्थायिनो यस्मान्नापि पश्चान्निपातिनः ॥ ६ ॥ गृहेऽन्नमात्रदौर्लभ्यं लभ्यंते मोदका व्रते ॥ वैराग्यस्यायमर्थो हि दुःखगर्भस्य लक्षणम् ॥ ७॥ कुशास्त्राभ्याससंभूतं भवनैर्गुण्यदर्शनात् ॥ मोहगर्भं तु वैराग्यं मतं बालतपस्विनाम् ॥ ८ ॥ सिद्धांतमुपजीव्यापि ये विरुद्धार्थभाषिणः ॥ तेषामप्येतदेवेष्टं कुर्वतामपि दुष्करं ॥९॥ संसारमोचकादीनामिवैतेषां न तात्त्विकः ॥ शुभोऽपि परिणामो यज्जाता नाज्ञारुचिस्थितिः ॥ १० ॥ अमीषां प्रशमोऽप्युच्चैर्दोषपोषाय केवलम् ॥ अंतर्निलीनविषमज्वरानुद्भवसन्निभः ॥ ११॥ कुशास्त्रार्थेषु दक्षत्वं शास्त्रार्थेषु विपर्ययः ॥ स्वच्छंदता कुतर्कश्च गुणवत्संस्तवोज्झनम् ॥ १२॥ आत्मोत्कर्षः परद्रोहः कलहो दंभजीवनम् ॥ आश्रवाच्छादनं शक्त्युल्लंघनेन क्रियादरः ॥१३॥ गुणानुरागवैधुर्यमुपकारस्य विस्मृतिः ॥ अनुबंधाद्यचिंता च प्रणिधानस्य विच्युतिः ॥ १४ ॥ श्रद्धामृदुत्वमौद्धत्यमधैर्य्यमविवेकि-

ता ॥ वैराग्यस्य द्वितीयस्य स्मृतेयं लक्षणावली ॥ १५ ॥ ज्ञानगर्भं तु वैराग्यं सम्यक्तत्त्वपरिच्छिदः ॥ स्याद्वादिनः शिवोपायस्पर्शिनस्तत्त्वदर्शिनः ॥ १६ ॥ मीमांसा मांसला यस्य स्वपरागमगोचरा ॥ बुद्धिः स्यात्तस्य वैराग्यं ज्ञानगर्भमुदंचति ॥ १७ ॥ न स्वान्यशास्त्रव्यापारे प्राधान्यं यस्य कर्मणि ॥ नासौ निश्चयसंशुद्धं सारं प्राप्नोति कर्म्मणः ॥ १८ ॥ सम्यक्त्वमौनयोः सूत्रे गतप्रत्यागते यतः ॥ नियमो दर्शितस्तस्मात् सारं सम्यक्त्वमेव हि ॥ १९ ॥ अनाश्रवफलं ज्ञानमव्युच्छानमनाश्रवः ॥ सम्यक्त्वं तदभिव्यक्तिरित्येकत्वविनिश्चयः ॥ २० ॥ बहिर्निर्वृत्तिमात्रं स्याच्चारित्राद्व्यावहारिकात् ॥ अंतःप्रवृत्तिसारं तु सम्यक्प्रज्ञानमेव हि ॥ २१ ॥ एकांतेन हि षट्कायश्रद्धानेऽपि न शुद्धता ॥ संपूर्णपर्ययालाभाद् यन्न याथात्म्यनिश्चयः ॥ २२ ॥ यावंतः पर्यया वाचां यावंतश्चार्थपर्ययाः ॥ साम्प्रतानागतातीतास्तावद्द्रव्यं किलैककम् ॥२३॥ स्यात्सर्वमयमित्येवं युक्तं स्वपरपर्ययैः ॥ अनुवृत्तिकृतं स्वत्वं परत्वं व्यतिरेकजम् ॥२४॥ ये नाम परपर्यायाः स्वास्तित्वायोगतो मताः ॥ स्वकीया अप्यमी त्यागस्वपर्यायविशेषणात् ॥ २५ ॥ अतादात्म्येपि संबंधव्यवहारोपयोगतः ॥ तेषां स्वत्वं धनस्येव व्यज्यते सूक्ष्मया धिया ॥ २६ ॥ पर्यायाः स्युर्मुनेर्ज्ञानदृष्टिचारित्रगोचराः ॥ यथा भिन्ना अपि तथोपयोगाद्वस्तुनो ह्यमी ॥ २७ ॥ नो चेद्भावसंबंधान्वेषणे का गतिर्भवेत् ॥ आधारप्रतियोगित्वे द्विष्ठे न हि पृथग् द्वयोः ॥ २८ ॥ स्वान्यपर्यायसंश्लेषात् सूत्रेप्येवं निदर्शितम् ॥ सर्वमेकं विदन्वेद सर्वं जानँस्तथैककम् ॥२९॥ आसक्तिपाटवाभ्यासस्वकार्यादिभिराश्रयन् ॥ पर्यायमेकमप्यर्थं वेत्ति भावाद् बुधोऽखिलम् ॥३०॥ अंतरा केवलज्ञानं प्रतिव्यक्तिर्न यद्यपि ॥ क्वापि ग्रहणमेकांशद्वारं चातिप्रसक्तिमत् ॥ ३१ ॥ अनेकांतागमश्रद्धा तथाप्यस्खलिता सदा ॥ सम्यग्दृशस्तयैव स्यात् संपूर्णार्थविवेचनम् ॥ ३२ ॥ आगमा-

र्थोपनयनाद् ज्ञानं प्राज्ञस्य सर्वगं ॥ कार्य्यादेर्व्यवहारस्तु नियतोल्लेखशेखरः ॥ ३३ ॥ तदेकांतेन यः कश्चिद्विरक्तस्यापि कुग्रहः ॥ शास्त्रार्थबाधनात्सोऽयं जैनाभासस्य पापकृत् ॥ ३४ ॥ उत्सर्गे वापवादे वा व्यवहारेऽथ निश्चये ॥ ज्ञाने कर्म्मणि वाऽयं चेन्न तदा ज्ञानगर्भता ॥ ३५ ॥ स्वागमेऽन्यागमार्थानां शतस्येव परार्ध्यके ॥ नावतारबुधत्वं चेन्न तदा ज्ञानगर्भता ॥ ३६ ॥ नयेषु स्वार्थसत्येषु मोघेषु परचालने ॥ माध्यस्थ्यं यदि नायातं न तदा ज्ञानगर्भता ॥३७॥ आज्ञयागमिकार्थानां यौक्तिकानां च युक्तितः ॥ न स्थाने योजकत्वं चेन्न तदा ज्ञानगर्भता ॥ ३८ ॥ गीतार्थस्यैव वैराग्यं ज्ञानगर्भं ततः स्थितम् ॥ उपचारादगीतस्याप्यभीष्टं तस्य निश्रया ॥ ३९ ॥ सूक्ष्मेक्षिका च माध्यस्थ्यं सर्वत्र हितचिंतनम् ॥ क्रियायामादरो भूयान् धर्मे लोकस्य योजनम् ॥ ४० ॥ चेष्टा परस्य वृत्तांते मूकांधबधिरोपमा ॥ उत्साहः स्वगुणाभ्यासे दुःस्थस्येव धनार्जने॥४१॥ मदनोन्मादवमनं मदसंमर्दमर्दनम् ॥ असूयातंतुविच्छेदः समतामृतमज्जनम् ॥ ४२ ॥ स्वभावान्नैव चलनं चिदानंदमयात्सदा ॥ वैराग्यस्य तृतीयस्य स्मृतेयं लक्षणावली ॥ ४३ ॥ ज्ञानगर्भमिहादेयं द्वयोस्तु स्वोपमर्दतः ॥ उपयोगः कदाचित् स्यान्निजाध्यात्मप्रसादतः ॥ ४४ ॥ ॥ ॥ ॥ ॥ ॥ ॥

॥ इति वैराग्यभेदाधिकारः ॥ ६ ॥

॥ विषयेषु गुणेषु च द्विधा भुवि वैराग्यमिदं प्रवर्त्तते ॥ अपरं प्रथमं प्रकीर्तितं परमध्यात्मबुधैर्द्वितीयकम् ॥ १ ॥ विषया उपलंभगोचरा अपि चानुश्रविका विकारिणः ॥ न भवंति विरक्तचेतसां विषधारेव सुधासु मज्जताम् ॥ २ ॥ सुविशालरसालमंजरीविचरत्कोकिलकाकलीभरैः ॥ किमु माद्यति योगिनां मनो निभृतानाहतनादसादरम् ॥ ३ ॥ रमणीमृदुपाणिकं

कणक्कणनाकर्णनपूर्णघूर्णनाः ॥ अनुभूतिनटीस्फुटीकृतप्रियसंगीतरता न योगिनः ॥ ४ ॥ स्खलनाय न शुद्धचेतसां लल-
नापंचमचारुघोलना ॥ यदियं समतापदावलीमधुरालापरतेर्न रोचते ॥ ५ ॥ सततं क्षयि शुक्रशोणितप्रभवं रूपमपि प्रियं न
हि ॥ अविनाशिनिसर्गनिर्म्मलप्रथमानस्वकरूपदर्शिनः ॥ ६ ॥ परदृश्यमपायसंकुलं विषयो यत्खलु चर्मचक्षुषः ॥ न हि
रूपमिदं मुदे यथा निरपायानुभवैकगोचरः ॥ ७ ॥ गतिविभ्रमहास्यचेष्टितैर्ललनानामिह मोदतेऽबुधः ॥ सुकृताङ्घ्रिपविष्व-
मीषु नो विरतानां प्रसरंति दृष्टयः ॥ ८ ॥ न मुदे मृगनाभिमल्लिकालवलीचंदनचंद्रसौरभम् ॥ विदुषां निरुपाधिबाधितस्मर-
शीलेन सुगंधिवर्ष्मणाम् ॥ ९ ॥ उपयोगमुपैति यच्चिरं हरते यन्न विभावमारुतः ॥ न ततः खलु शीलसौरभादपरस्मिन्निह
युज्यते रतिः ॥ १० ॥ मधुरैर्न रसैरधीरता क्वचनाध्यात्मसुधालिहां सताम् ॥ अरसैः कुसुमैरिवालिनां प्रसरत्पद्मपरागमो-
दिनाम् ॥ ११ ॥ विषमायतिभिर्नु किं रसैः स्फुटमापातसुखैर्विकारिभिः ॥ नवमेऽनवमे रसे मनो यदि मग्नं सतताविकारिणि
॥ १२ ॥ मधुरं रसमाप्य निष्पतेद्रसनातो रसलोभिनां जलम् ॥ परिभाव्य विपाकसाध्वसं विरतानां तु ततो दृशोर्जलम्
॥ १३ ॥ इह ये गुणपुष्पपूरिते धृतिपत्नीमुपगुह्य शेरते ॥ विमले सुविकल्पतल्पके क्व बहिःस्पर्शरता भवंतु ते ॥ १४ ॥
हृदि निर्वृतिमेव बिभ्रतां न मुदे चंदनलेपनाविधिः ॥ विमलत्वमुपेयुषां सदा सलिलस्नानकलापि निष्फला ॥ १५ ॥ गण-
यंति जनुः स्वमर्थवत्सुरतोल्लाससुखेन भोगिनः ॥ मदनाहिविषोग्रमूर्छनामयतुल्यं तु तदेव योगिनः ॥ १६ ॥ तदिमे विषयाः
किलैहिका न मुदे केऽपि विरक्तचेतसाम् ॥ परलोकसुखेऽपि निःस्पृहाः परमानंदरसालसा अमी ॥ १७ ॥ मदमोहविषाद-
मत्सरज्वरबाधाविधुराः सुरा अपि ॥ विषमिश्रितपायसान्नवत् सुखमेतेष्वपि नैति रम्यताम् ॥ १८ ॥ रमणीविरहेण वह्निना

बहुबाष्पानिलदीपितेन यत् ॥ त्रिदशैर्दिवि दुःखमाप्यते घटते तत्र कथं सुखस्थितिः ॥ १९ ॥ प्रथमानविमानसंपदां च्यवनस्यापि दिवो विचिंतनात् ॥ हृदयं न हि यद्विदीर्यते द्युसदां तत्कुलिशाणुनिर्मितम् ॥ २० ॥ विषयेषु रतिः शिवार्थिनो न गतिष्वस्ति किलाखिलास्वपि ॥ घननंदनचंदनार्थिनो गिरिभूमिष्वपरद्रुमेष्विव ॥ २१ ॥ इति शुद्धमतिस्थिरीकृताऽपरवैराग्यरसस्य योगिनः ॥ स्वगुणेषु वितृष्णतावहं परवैराग्यमपि प्रवर्त्तते ॥ २२ ॥ विपुलर्द्धिपुलाकचारणप्रबलाशीविषमुख्यलब्धयः ॥ न मदाय विरक्तचेतसामनुषंगोपनताः पलालवत् ॥ २३ ॥ कलितातिशयोऽपि कोऽपि नो विबुधानां मदकृद्गुणव्रजः ॥ अधिकं न विदंत्यमी यतो निजभावे समुदंचति स्वतः ॥ २४ ॥ हृदये न शिवेऽपि लुब्धता सदनुष्ठानमसंगमंगति ॥ पुरुषस्य दशेयमिष्यते सहजानंदतरंगसंगता ॥ २५ ॥ इति यस्य महामतेर्भवेदिह वैराग्यविलासभृन्मनः ॥ उपयंति वरीतुमुच्चकैस्तमुदारप्रकृतिं यशःश्रियः ॥ २६ ॥ ॥ ॥ ॥ ॥ ॥

॥ इति वैराग्यविषयाधिकारः ॥ ७ ॥

॥ इति श्रीनयविजयगणिशिष्यश्रीयशोविजयेन विरचितेऽध्यात्मसारप्रकरणे द्वितीयः प्रबंधः ॥

निर्ममस्यैव वैराग्यं स्थिरत्वमवगाहते ॥ परित्यजेत्ततः प्राज्ञो ममतामत्यनर्थदाम् ॥ १ ॥ विषयैः किं परित्यक्तैर्जागर्ति ममता यदि ॥ त्यागात्कंचुकमात्रस्य भुजंगो न हि निर्विषः ॥ २ ॥ कष्टेन हि गुणग्रामं प्रगुणीकुरुते मुनिः ॥ ममताराक्षसी सर्वं भक्षयत्येकहेलया ॥ ३ ॥ जंतुकांतं पशूकृत्य रागविद्यौषधिबलात् ॥ उपायैर्बहुभिः पत्नी ममता क्रीडयत्यहो ॥ ४ ॥ एकः परभवे याति जायते चैक एव हि ॥ ममतोद्रेकतः सर्वं संबंधं कल्पयत्यथ ॥ ५ ॥ व्याप्नोति महतीं भूमिं वटबीजा-

द्यथा वटः ॥ तथैकममताबीजात्प्रपंचस्यापि कल्पना ॥ ६ ॥ माता पिता मे भ्राता मे भगिनी वल्लभा च मे ॥ पुत्राः सुता मे मित्राणि ज्ञातयः संस्तुताश्च मे ॥ ७ ॥ इत्येवं ममताव्याधिं वर्द्धमानं प्रतिक्षणम् ॥ जनः शक्नोति नोच्छेत्तुं विना ज्ञानमहौषधम् ॥ ८ ॥ ममत्वेनैव निःशंकमारंभादौ प्रवर्त्तते ॥ कालाकालसमुच्चायी धनलोभेन धावति ॥ ९ ॥ स्वयं येषां च पोषाय खिद्यते ममतावशः ॥ इहामुत्र च ते न स्युस्त्राणाय शरणाय वा ॥ १० ॥ ममत्वेन बहून् लोकान् पुष्णात्येकोऽर्जितैर्धनैः ॥ सोढा नरकदुःखानां तीव्राणामेक एव तु ॥ ११ ॥ ममतांधो हि यन्नास्ति तत्पश्यति न पश्यति ॥ जात्यंधस्तु यदस्त्येतद्भेद इत्यनयोर्महान् ॥ १२ ॥ प्राणानभिन्नताध्यानात् प्रेमभूम्ना ततोऽधिकां ॥ प्राणापहां प्रियां मत्वा मोदते ममतावशः ॥ १३ ॥ कुंदान्यस्थीनि दशनान् मुखं श्लेष्मगृहं विधुं ॥ मांसग्रंथी कुचौ कुंभौ हेम्नो वेत्ति ममत्ववान् ॥ १४ ॥ मनस्यन्यद्वचस्यन्यत् क्रियायामन्यदेव च ॥ यस्यास्तामपि लोलाक्षीं साध्वीं वेत्ति ममत्ववान् ॥ १५ ॥ या रोपयत्यकार्येऽपि रागिणं प्राणसंशये ॥ दुर्वृत्तां स्त्रीं ममत्वांधस्तां मुग्धामेव मन्यते ॥ १६ ॥ चर्माच्छादितमांसास्थिविण्मूत्रपिठरीष्वपि ॥ वनितासु प्रियत्वं यत्तन्ममत्वविजृंभितम् ॥ १७ ॥ लालयन् बालकं तातेत्येवं ब्रूते ममत्ववान् ॥ वेत्ति च श्लेष्मणा पूर्णामंगुलीममृतांचिताम् ॥ १८ ॥ पंकार्द्रमपि निःशंका सुतमंकान्न मुंचति ॥ तदमेध्येऽपि मेध्यत्वं जानात्यंबा ममत्वतः ॥१९॥ मातापित्रादिसंबंधोऽनियतोऽपि ममत्वतः ॥ दृढभूमीभ्रमवतां नैयत्येनावभासते ॥ २० ॥ भिन्नाः प्रत्येकमात्मानो विभिन्नाः पुद्गला अपि ॥ शून्यः संसर्ग इत्येवं यः पश्यति स पश्यति ॥ २१ ॥ अहंताममते स्वत्वस्वीयत्वभ्रमहेतुके ॥ भेदज्ञानात्पलायेते रज्जुज्ञानादिवाहिभीः ॥ २२ ॥ किमेतदिति जिज्ञासा तत्त्वांतज्ञानसंमुखी ॥ व्यासंगमेव नोत्थातुं दत्ते क्व ममता-

स्थितिः ॥ २३ ॥ प्रियार्थिनः प्रियाप्राप्तिं विना क्वापि यथा रतिः ॥ न तथा तत्त्वजिज्ञासोस्तत्त्वप्राप्तिं विना क्वचित् ॥ २४ ॥ अत एव हि जिज्ञासां विष्टंभति ममत्वधीः ॥ विचित्राभिनयाक्रांतः संभ्रांत इव लक्ष्यते ॥ २५ ॥ धृतो योगो न ममता हता न समताऽऽदृता ॥ न च जिज्ञासितं तत्त्वं गतं जन्म निरर्थकम् ॥ २६ ॥ जिज्ञासा च विवेकश्च ममतानाशकावुभौ ॥ अतस्ताभ्यां निगृह्णीयादेनामध्यात्मवैरिणीम् ॥ २७ ॥ ॥ ॥ ॥ ॥ ॥

॥ इति ममतात्यागाधिकारः ॥ ८ ॥

॥ त्यक्तायां ममतायां च समता प्रथते स्वतः ॥ स्फटिके गलितोपाधौ यथा निर्मलतागुणः ॥ १ ॥ प्रियाप्रियत्वयोर्यार्थैर्व्यवहारस्य कल्पना ॥ निश्चयात्तद्व्युदासेन स्तैमित्यं समतोच्यते ॥ २ ॥ तेष्वेव द्विषतः पुंसस्तेष्वेवार्थेषु रज्यतः ॥ निश्चयात्किंचिदिष्टं वाऽनिष्टं वा नैव विद्यते ॥ ३ ॥ एकस्य विषयो यः स्यात्स्वाभिप्रायेण पुष्टिकृत् ॥ अन्यस्य द्वेष्यतामेति स एव मतिभेदतः ॥ ४ ॥ विकल्पकल्पितं तस्माद्द्वयमेतन्न तात्त्विकम् ॥ विकल्पोपरमे तस्य द्वित्वादिवदुपक्षयः ॥ ५ ॥ स्वप्रयोजनसंसिद्धिः स्वायत्ता भासते यदा ॥ बहिरर्थेषु संकल्पसमुत्थानं तदा हतं ॥ ६ ॥ लब्धे स्वभावे कंठस्थस्वर्णन्यायाद्भ्रमक्षये ॥ रागद्वेषानुपस्थानात् समता स्यादनाहता ॥ ७ ॥ जगज्जीवेषु नो भाति द्वैविध्यं कर्मनिर्मितम् ॥ यदा शुद्धनयस्थित्या तदा साम्यमनाहतम् ॥ ८ ॥ स्वगुणेभ्योपि कौटस्थ्यादेकत्वाध्यवसायतः ॥ आत्मारामं मनो यस्य तस्य साम्यमनुत्तरम् ॥ ९ ॥ समतापरिपाके स्याद्विषयग्रहशून्यता ॥ यया विशदयोगानां वासीचंदनतुल्यता ॥ १० ॥ किं स्तुमः समतां साधो या स्वार्थप्रगुणीकृता ॥ वैराणि नित्यवैराणामपि हंत्युपतस्थुषाम् ॥ ११ ॥ किं दानेन तपोभिर्वा यमैश्च नियमैश्च किम् ॥

एकैव समता सेव्या तरिः संसारवारिधौ ॥ १२ ॥ दूरे स्वर्गसुखं मुक्तिपदवी सा दवीयसी ॥ मनःसंनिहितं दृष्टं स्पष्टं तु समतासुखम् ॥ १३ ॥ दृशोः स्मरविषं शुष्येत् क्रोधतापः क्षयं व्रजेत् ॥ औद्धत्यमलनाशः स्यात् समतामृतमज्जनात्॥१४॥ जरामरणदावाग्निज्वलिते भवकानने ॥ सुखाय समतैकैव पीयूषघनवृष्टिवत् ॥ १५ ॥ आश्रित्य समतामेकां निर्वृता भरतादयः ॥ न हि कष्टमनुष्ठानमभूत्तेषां तु किंचन ॥ १६ ॥ अर्गला नरकद्वारे मोक्षमार्गस्य दीपिका ॥ समता गुणरत्नानां संग्रहे रोहणावनिः ॥ १७ ॥ मोहाच्छादितनेत्राणामात्मरूपमपश्यताम् ॥ दिव्यांजनशलाकेव समता दोषनाशकृत् ॥ १८ ॥ क्षणं चेतः समाकृष्य समता यदि सेव्यते ॥ स्यात्तदा सुखमन्यस्य यद्वक्तुं नैव पार्यते ॥ १ए ॥ कुमारी न यथा वेत्ति सुखं दयितभोगजम् ॥ न जानाति तथा लोको योगिनां समतासुखम् ॥ २० ॥ नतिस्तुत्यादिकाशंसाशरस्तीव्रः स्वमर्म्मभित् ॥ समतावर्मगुप्तानां नार्त्तिकृत्सोपि जायते ॥ २१ ॥ प्रचितान्यपि कर्म्माणि जन्मनां कोटिकोटिभिः ॥ तमांसीव प्रभा भानोः क्षिणोति समता क्षणात् ॥ २२ ॥ अन्यलिंगादिसिद्धानामाधारः समतैव हि ॥ रत्नत्रयफलप्राप्तेर्यया स्याद्भावजैनता ॥२३॥ [1]ज्ञानस्यफलमेषैव नयस्थानावतारिणः ॥ चंदनं वह्निरेव स्यात् कुग्रहेण तु भस्म तत् ॥ २४ ॥ चारित्रपुरुषप्राणाः समताख्या गता यदि ॥ जनानुधावनावेशस्तदा तन्मरणोत्सवः ॥ २५ ॥ संत्यज्य समतामेकां स्याद्यत्कष्टमनुष्ठितम् ॥ तदीप्सितकरं नैव बीजमुप्तमिवोषरे ॥ २६ ॥ उपायः समतैवैका मुक्तेरन्यः क्रियाभरः ॥ तत्तत्पुरुषभेदेन तस्या एव प्रसिद्धये ॥२७॥

---

१ ज्ञानसाफल्यमेषैव इति पाठांतरम् ।

दिङ्मात्रदर्शने शास्त्रव्यापारः स्यान्न दूरगः ॥ अस्याः स्वानुभवः पारं सामर्थ्याख्योऽवगाहते ॥ २८ ॥ परस्मात् परमेषा यन्निगूढं तत्त्वमात्मनः ॥ तदध्यात्मप्रसादेन कार्योऽस्यामेव निर्भरः ॥ २९ ॥ ॥ ॥ ॥

॥ इति समताधिकारः ॥ ९ ॥

॥ परिशुद्धमनुष्ठानं जायते समतान्वयात् ॥ कतकक्षोदसंक्रांतेः कलुषं सलिलं यथा ॥ १ ॥ विषं गरोऽननुष्ठानं तद्धेतुरमृतं परम् ॥ गुरुसेवाद्यनुष्ठानमिति पंचविधं जगुः ॥ २ ॥ आहारोपधिपूजर्द्धिप्रभृत्याशंसया कृतम् ॥ शीघ्रं सच्चित्तहंतृत्वाद्विषानुष्ठानमुच्यते ॥ ३ ॥ स्थावरं जंगमं चापि तत्क्षणं भक्षितं विषम् ॥ यथा हंति तथेदं सच्चित्तमैहिकभोगतः ॥४॥ दिव्यभोगाभिलाषेण कालांतरपरिक्षयात् ॥ स्वादृष्टफलसंपूर्त्तेर्गरानुष्ठानमुच्यते ॥ ५ ॥ यथा कुद्रव्यसंयोगजनितं गरसंज्ञितम् ॥ विषं कालांतरे हंति तथेदमपि तत्त्वतः ॥ ६ ॥ निषेधायानयोरेव विचित्रानर्थदायिनोः ॥ सर्वत्रैवानिदानत्वं जिनेंद्रैः प्रतिपादितम् ॥ ७ ॥ प्रणिधानाद्यभावेन कर्म्मानध्यवसायिनः ॥ संमूर्छिमप्रवृत्त्याभमननुष्ठानमुच्यते ॥ ८ ॥ ओघसंज्ञात्र सामान्यज्ञानरूपा निबंधनम् ॥ लोकसंज्ञा च निर्दोषसूत्रमार्गानुपेक्षिणी ॥ ९ ॥ न लोकं नापि सूत्रं नो गुरुवाचमपेक्षते ॥ अनध्यवसितं किंचित्कुरुते चौघसंज्ञया ॥ १० ॥ शुद्धस्यान्वेषणे तीर्थोच्छेदः स्यादिति वादिनाम् ॥ लोकाचारादरश्रद्धा लोकसंज्ञेति गीयते ॥ ११ ॥ शिक्षितादिपदोपेतमप्यावश्यकमुच्यते ॥ द्रव्यतो भावनिर्मुक्तमशुद्धस्य तु का कथा ॥ १२ ॥ तीर्थोच्छेदभिया हंताविशुद्धस्यैव चादरे ॥ सूत्रक्रियाविलोपः स्याद्गतानुगतिकत्वतः ॥ १३ ॥ धर्म्मोद्यतेन कर्त्तव्यं कृतं बहुभिरेव चेत् ॥ तदा मिथ्यादृशां धर्मो न त्याज्यः स्यात्कदाचन ॥ १४ ॥ तस्माद्गतानुगत्या यत् क्रियते सूत्रवर्जितम् ॥

उंघतो लोकतो वा तदननुष्ठानमेव हि ॥ १५ ॥ अकामनिर्जरांगत्वं कायक्लेशादिहोदितम् ॥ सकामनिर्जरा तु स्यात् सोपयोगप्रवृत्तितः ॥ १६ ॥ सदनुष्ठानरागेण तद्धेतुर्मार्गगामिनाम् ॥ एतच्च चरमावर्त्तेऽनाभोगादेर्विना भवेत् ॥ १७ ॥ धर्मयौवनकालोऽयं भवबालदशापरा ॥ अत्र स्यात्सत्क्रियारागोऽन्यत्र चासत्क्रियादरः ॥ १८ ॥ भोगरागाद् यथा यूनो बालक्रीडाऽखिला ह्रिये ॥ धर्म्मे यूनस्तथा धर्म्मरागेणासत्क्रिया ह्रिये ॥ १९ ॥ चतुर्थं चरमावर्त्ते तस्माद्धर्म्मानुरागतः ॥ अनुष्ठानं विनिर्दिष्टं बीजादिक्रमसंगतम् ॥ २० ॥ बीजं चेह जनान् दृष्ट्वा शुद्धानुष्ठानकारिणः ॥ बहुमानप्रशंसाभ्यां चिकीर्षा शुद्धगोचरा ॥ २१ ॥ तस्या एवानुबंधश्चाकलंकः कीर्त्यतेऽकुरः ॥ तद्धेत्वन्वेषणा चित्रा स्कंधकल्पा च वर्णिता ॥ २२ ॥ प्रवृत्तिस्तेषु चित्रा च पत्रादिसदृशी मता ॥ पुष्पं च गुरुयोगादिहेतुसंपत्तिलक्षणम् ॥ २३ ॥ भावधर्म्मस्य संपत्तिर्या च सद्देशनादिना ॥ फलं तदत्र विज्ञेयं नियमान्मोक्षसाधकम् ॥ २४ ॥ सहजो भावधर्मो हि शुद्धश्चंदनगंधवत् ॥ एतद्गर्भमनुष्ठानममृतं संप्रचक्षते ॥ २५ ॥ जैनीमाज्ञां पुरस्कृत्य प्रवृत्तं चित्तशुद्धितः ॥ संवेगगर्भमत्यंतममृतं तद्विदो विदुः ॥ २६ ॥ शास्त्रार्थालोचनं सम्यक् प्रणिधानं च कर्म्मणि ॥ कालाद्यंगाविपर्यासोऽमृतानुष्ठानलक्षणम् ॥ २७ ॥ द्वयं हि सदनुष्ठानं त्रयमत्रासदेव च ॥ तत्रापि चरमं श्रेष्ठं मोहोग्रविषनाशनात् ॥ २८ ॥ आदरः करणे प्रीतिरविघ्नः संपदागमः ॥ जिज्ञासा तज्ज्ञसेवा च सदनुष्ठानलक्षणम् ॥ २९ ॥ भेदैर्भिन्नं भवेदिच्छाप्रवृत्तिस्थिरसिद्धिभिः ॥ चतुर्विधमिदं मोक्षयोजनाद्योगसंज्ञितम् ॥ ३० ॥ इच्छा तद्वत्कथा प्रीतियुक्ताविपरिणामिनी ॥ प्रवृत्तिः पालनं सम्यक् सर्वत्रोपशमान्वितम् ॥ ३१ ॥ सत्क्षयोपशमोत्कर्षाद तिचारादिचिंतया ॥ रहितं तु स्थिरं सिद्धिः परेषामर्थसाधकम् ॥ ३२ ॥ भेदा इमे विचित्राः स्युः क्षयोप-

शमभेदतः ॥ श्रद्धामीत्यादियोगेन भव्यानां मार्गगामिनाम् ॥ ३३ ॥ अनुकंपा च निर्वेदः संवेगः प्रशमस्तथा ॥ एतेषाम-
नुभावाः स्युरिछादीनां यथाक्रमम् ॥ ३४ ॥ कायोत्सर्गादिसूत्राणां श्रद्धामेधादिभावतः ॥ इछादियोगे साफल्यं देशसर्वव्रत-
स्पृशाम् ॥ ३५ ॥ गुरुखंडादिमाधुर्यभेदवत् पुरुषांतरे ॥ भेदेऽपीछादिभावानां दोषो नार्थान्वयादिह ॥ ३६ ॥ येषां नेछा-
दिलेशोपि तेषां त्वेतत्समर्प्पणे ॥ स्फुटो महामृषावाद इत्याचार्याः प्रचक्षते ॥ ३७ ॥ उन्मार्गोत्थापनं बाढमसमंजसकारणे ॥
भावनीयमिदं तत्त्वं जानानैर्योगविंशिकाम् ॥ ३८ ॥ त्रिधा तत्सदनुष्ठानमादेयं शुद्धचेतसा ॥ ज्ञात्वा समयसद्भावं
लोकसंज्ञां विहाय च ॥ ३९ ॥ ॥ ॥ ॥ ॥ ॥ ॥

॥ इति सदनुष्ठानाधिकारः ॥ १० ॥

॥ उचितमाचरणं शुभमिछतां प्रथमतो मनसः खलु शोधनम् ॥ गदवतां ह्यकृते मलशोधने कमुपयोगमुपैतु रसायनम् ॥ १ ॥
परजने प्रसभं किमु रज्यति द्विषति वा स्वमनो यदि निर्मलम् ॥ विरहिणामरतेर्जगतो रतेरपि च का विकृतिर्विमले विधौ
॥ २ ॥ रुचितमाकलयन्ननुपस्थितं स्वमनसैव हि शोचति मानवः ॥ उपनते स्मयमानमुखः पुनर्भवति तत्र परस्य किमु-
च्यताम् ॥ ३ ॥ चरणयोगघटान्प्रविलोठयन् शमरसं सकलं विकिरत्यधः ॥ चपल एष मनःकपिरुच्चकैः रसवणिग् विदधातु
मुनिस्तु किं ॥ ४ ॥ सततकुट्टितसंयमभूतलोत्थितरजोनिकरैः प्रथयंस्तमः ॥ अतिदृढैश्च मनस्तुरगो गुणैरपि नियंत्रित एष
न तिष्ठति ॥ ५ ॥ जिनवचोघनसारमलिम्लुचः कुसुमसायकपावकदीपकः ॥ अहह कोपि मनःपवनो बली शुभमतिद्रुमसं-
ततिभंगकृत् ॥ ६ ॥ चरणगोपुरभंगपरः स्फुरत्समयबोधतरूनपि पातयन् ॥ भ्रमति यद्यतिमत्तमनोगजः क्व कुशलं शिव-

राजपथे तदा ॥ ७ ॥ व्रततरून्प्रगुणीकुरुते जनो दहति दुष्टमनोदहनः पुनः ॥ ननु परिश्रम एष विशेषवान् क्व भविता
सुगुणोपवनोदये ॥ ८ ॥ अनिगृहीतमना विदधत्परां न वपुषा वचसा च शुभक्रियाम् ॥ गुणमुपैति विराधनयाऽनया बत
दुरंतभवभ्रममंचति ॥ ९ ॥ अनिगृहीतमनाः कुविकल्पतो नरकमृच्छति तंदुलमत्स्यवत् ॥ इयमभक्षणजा तदजीर्णताऽनुप-
नतार्थविकल्पकदर्थना ॥ १० ॥ मनसि लोलतरे विपरीततां वचननेत्रकरेंगितगोपना ॥ व्रजति धूर्त्ततया ह्यनयाखिलं
निबिडदंभपरैर्मुषितं जगत् ॥ ११ ॥ मनस एव ततः परिशोधनं नियमतो विदधीत महामतिः ॥ इदमभेषजसंवननं मुनेः
परपुमर्थरतस्य शिवश्रियः ॥ १२ ॥ प्रवचनाब्जविलासरविप्रभा प्रशमनीरतरंगतरंगिणी ॥ हृदयशुद्धिरुदीर्णमदज्वरप्रसर-
नाशविधौ परमौषधम् ॥ १३ ॥ अनुभवामृतकुंडमनुत्तरव्रतमरालविलासपयोजिनी ॥ सकलकर्मकलंकविनाशिनी मनस
एव हि शुद्धिरुदाहृता ॥ १४ ॥ प्रथमतो व्यवहारनयस्थितोऽशुभविकल्पनिवृत्तिपरो भवेत् ॥ शुभविकल्पमयव्रतसेवया
हरति कंटक एव हि कंटकम् ॥ १५ ॥ विषमधीत्य पदानि शनैः शनैर्हरति मंत्रपदावधि मांत्रिकः ॥ भवति देशनिवृत्ति-
रपि स्फुटा गुणकरी प्रथमं मनसस्तथा ॥ १६ ॥ च्युतमसद्विषयव्यवसायतो लगति यत्र मनोऽधिकसौष्ठवात् ॥ प्रतिकृतिः
पदमात्मवदेव वा तदवलंबनमत्र शुभं मतम् ॥ १७ ॥ तदनु काचन निश्चयकल्पना विगलितव्यवहारपदावधिः ॥ न किम-
पीति विवेचनसंमुखी भवति सर्वनिवृत्तिसमाधये ॥ १८ ॥ इह हि सर्वबहिर्विषयच्युतं हृदयमात्मनि केवलमागतम् ॥ चर-
णदर्शनबोधपरंपरापरिचितं प्रसरत्यविकल्पकम् ॥ १९ ॥ तदिदमन्यदुपैत्यधुनापि नो नियतवस्तुविलास्यपि निश्चयात् ॥
क्षणमसंगमुदीतनिसर्गधीहृतबहिर्ग्रहमंतरुदाहृता ॥ २० ॥ कृतकषायजयः सगभीरिम प्रकृतिशांतमुदात्तमुदारधीः ॥ समनु-

॥ ११ ॥

गृह्य मनोऽनुभवत्यहो गलितमोहतमः परमं महः ॥ २१ ॥ गलितदुष्टविकल्पपरंपरं धृतविशुद्धि मनो भवतीदृशम् ॥ धृतिमुपेत्य ततश्च महामतिः समधिगच्छति शुभ्रयशःश्रियम् ॥ २२ ॥ ॥ ॥ ॥

॥ इति मनःशुद्धयधिकारः ॥ ११ ॥

॥ मनशुद्धिश्च सम्यक्त्वे सत्येव परमार्थतः ॥ तद्विना मोहगर्भा सा प्रत्यपायानुबंधिनी ॥ १ ॥ सम्यक्त्वसहिता एव-शुद्धा दानादिकाः क्रियाः ॥ तासां मोक्षफले प्रोक्ता यदस्य सहकारिता ॥ २ ॥ कुर्वाणोऽपि क्रियां ज्ञातिधनभोगांस्त्यज-न्नपि ॥ दुःखस्योरो ददानोऽपि नांधो जयति वैरिणम् ॥ ३ ॥ कुर्वन्निवृत्तिमप्येवं कामभोगांस्त्यजन्नपि ॥ दुःखस्योरो ददा नोऽपि मिथ्यादृष्टिर्न सिध्यति ॥ ४ ॥ कनीनिकेव नेत्रस्य कुसुमस्येव सौरभम् ॥ सम्यक्त्वमुच्यते सारः सर्वेषां धर्म्मकर्म्म-णाम् ॥ ५ ॥ तत्त्वश्रद्धानमेतच्च गदितं जिनशासने ॥ सर्वे जीवा न हंतव्याः सूत्रे तत्त्वमितीष्यते ॥ ६ ॥ शुद्धो धर्मोऽय-मित्येतद्धर्म्मरुच्यात्मकं स्थितम् ॥ शुद्धानामिदमन्यासां रुचीनामुपलक्षणम् ॥ ७ ॥ अथवेदं यथा तत्त्वमाज्ञयैव तथाऽ-खिलम् ॥ नवानामपि तत्त्वानामिति श्रद्धोदितार्थतः ॥ ८ ॥ इहैव प्रोच्यते शुद्धाऽहिंसा वा तत्त्वमित्यतः ॥ सम्यक्त्वं दर्शितं सूत्रप्रामाण्योपगमात्मकम् ॥ ९ ॥ शुद्धाऽहिंसोक्तितः सूत्रप्रामाण्यं तत एव च ॥ अहिंसाशुद्धधीरेवमन्योन्याश्रय-भीर्ननु ॥ १० ॥ नैवं यस्मादहिंसायां सर्वेषामेकवाक्यता ॥ तच्छुद्धतावबोधश्च संभवादिविचारणात् ॥ ११ ॥ यथाऽहिं-सादयः पंच व्रतधर्मयमादिभिः ॥ पदैः कुशलधर्माद्यैः कथ्यंते स्वस्वदर्शने ॥ १२ ॥ प्राहुर्भागवतास्तत्र व्रतोपव्रतपंचकम् ॥ यमांश्च नियमान् पाशुपता धर्मान् दशाभ्यधुः ॥ १३ ॥ अहिंसा सत्यवचनमस्तैन्यं चाप्यकल्पना ॥ ब्रह्मचर्यं तथाक्रोधो

ह्यार्जवं शौचमेव च ॥ १४ ॥ संतोषो गुरुशुश्रूषा इत्येते दश कीर्तिताः ॥ निगद्यंते यमाः सांख्यैरपि व्यासानुसारिभिः ॥
॥ १५ ॥ अहिंसा सत्यमस्तैन्यं ब्रह्मचर्यं तुरीयकम् ॥ पंचमो व्यवहारश्चेत्येते पंच यमाः स्मृताः ॥ १६ ॥ अक्रोधो गुरु-
शुश्रूषा शौचमाहारलाघवम् ॥ अप्रमादश्च पंचैते नियमाः परिकीर्तिताः ॥ १७ ॥ बौद्धैः कुशलधर्माश्च दशेष्यंते यदुच्यते ॥
हिंसास्तेयान्यथाकामं पैशुन्यं परुषानृतम् ॥ १८ ॥ संभिन्नालापव्यापादमभिध्यादृग्विपर्ययम् ॥ पापकर्मेति दशधा काय-
वाङ्मानसैस्त्यजेत् ॥ १९ ॥ ब्रह्मादिपदवाच्यानि तान्याहुर्वैदिकादयः ॥ अतः सर्वैकवाक्यत्वाद्धर्मशास्त्रमदोऽर्थकम् ॥२०॥
क्व चैतत्संभवो युक्त इति चिंत्यं महात्मना ॥ शास्त्रं परीक्षमाणेनाव्याकुलेनांतरात्मना ॥ २१ ॥ प्रमाणलक्षणादेस्तु नोप-
योगोऽत्र कश्चन ॥ तन्निश्चयेऽनवस्थानादन्यथार्थस्थितेर्यतः ॥ २२ ॥ प्रसिद्धानि प्रमाणानि व्यवहारश्च तत्कृतः ॥ प्रमा-
णलक्षणस्योक्तौ ज्ञायते न प्रयोजनम् ॥ २३ ॥ तत्रात्मा नित्य एवेति येषामेकांतदर्शनम् ॥ हिंसादयः कथं तेषां कथम-
प्यात्मनोऽव्ययात् ॥ २४ ॥ मनोयोगविशेषस्य ध्वंसो मरणमात्मनः ॥ हिंसा तच्चेन्न तत्त्वस्य सिद्धेरार्थसमाजतः ॥ २५ ॥
नैति बुद्धिगता दुःखोत्पादरूपेयमौचितीम् ॥ पुंसि भेदाग्रहात्तस्याः परमार्थाऽव्यवस्थितेः ॥ २६ ॥ न च हिंसापदं नाशप-
र्यायं कथमप्यहो ॥ जीवस्यैकांतनित्यत्वेऽनुभवाबाधकं भवेत् ॥ २७ ॥ शरीरेणापि संबंधो नित्यत्वेऽस्य न संभवी ॥ विभु-
त्वे नैव संसारः कल्पितः स्यादसंशयम् ॥ २८ ॥ आत्मक्रियां विना च स्यान्मिताणुग्रहणं कथम् ॥ कथं संयोगभेदादिक-
ल्पना चापि युज्यते ॥ २९ ॥ अदृष्टाद्देहसंयोगः स्यादन्यतरकर्मजः ॥ इत्थं जन्मोपपत्तिश्चेन्न तद्योगाविवेचनात् ॥ ३० ॥
कथंचिन्मूर्त्ततापत्तिर्विना वपुरसंक्रमात् ॥ व्यापारयोगतश्चैव यत्किंचित्तदिदं जगुः ॥ ३१ ॥ निःक्रियोऽसौ ततो हंति

हन्यते वा न जातुचित् ॥ कंचित्केनचिदित्येवं न हिंसास्योपपद्यते ॥ ३२ ॥ अनित्यैकांतपक्षेऽपि हिंसादीनामसंभवः ॥
नाशहेतोरयोगेन क्षणिकत्वस्य साधनात् ॥ ३३ ॥ न च संतानभेदस्य जनको हिंसको भवेत् ॥ सांवृतत्वादजन्यत्वात्
भावत्वनियतं हि तत् ॥ ३४ ॥ नरादिः क्षणहतुश्च सूकरादेर्न हिंसकः ॥ सूकरांत्यक्षणेनैव व्यभिचारप्रसंगतः ॥ ३५ ॥
अनंतरक्षणोत्पादे बुद्धलुब्धकयोस्तुला ॥ नैव तद्विरतिः क्वापि ततः शास्त्राद्यसंगतिः ॥ ३६ ॥ घटंते न विनाऽहिंसां सत्या-
दीन्यपि तत्त्वतः ॥ एतस्या वृत्तिभूतानि तानि यद्भगवान् जगौ ॥ ३७ ॥ मौनींद्रे च प्रवचने युज्यते सर्वमेव हि ॥ नित्या-
नित्ये स्फुटं देहाद्भिन्नाभिन्ने तथात्मनि ॥ ३८ ॥ आत्मा द्रव्यार्थतो नित्यः पर्यायार्थाद्विनश्वरः ॥ हिनस्ति हन्यते तत्त-
त्फलान्यप्यधिगच्छति ॥ ३९ ॥ इह चानुभवः साक्षी व्यावृत्त्यन्वयगोचरः ॥ एकांतपक्षपातिन्यो युक्तयस्तु मिथो हताः
॥ ४० ॥ पीडाकर्तृत्वतो देहव्यापत्त्या दुष्टभावतः ॥ त्रिधा हिंसागमे प्रोक्ता नहीत्थमपहेतुका ॥ ४१ ॥ हंतुर्जाग्रति को
दोषो हिंसनीयस्य कर्म्मणि ॥ प्रसक्तिस्तदभावे चान्यत्रापीति मुधा वचः ॥ ४२ ॥ हिंस्यकर्म्मविपाकेयं दुष्टाशयनिमित्तता ॥
हिंसकत्वं न तेनेदं वैद्यस्य स्याद्रिपोरिव ॥ ४३ ॥ इत्थं सदुपदेशादेस्तन्निवृत्तिरपि स्फुटा ॥ सोपक्रमस्य पापस्य नाशात्स्वा-
शयवृद्धितः ॥ ४४ ॥ अपवर्गतरोर्बीजं मुख्याऽहिंसेयमुच्यते ॥ सत्यादीनि व्रतान्यत्र जायंते पल्लवा नवाः ॥ ४५ ॥ अहिं-
सासंभवश्चेत्थं दृश्यतेऽत्रैव शासने ॥ अनुबंधादिसंशुद्धिरप्यत्रैवास्ति वास्तवी ॥ ४६ ॥ हिंसाया ज्ञानयोगेन सम्यग्दृष्टेर्महा-
३ त्मनः ॥ तप्तलोहपदन्यासतुल्याया नानुबंधनम् ॥ ४७ ॥ सतामस्याश्च कस्याश्चिद् यतनाभक्तिशालिनाम् ॥ अनुबंधो
ह्यहिंसाया जिनपूजादिकर्म्मणि ॥ ४८ ॥ हिंसानुबंधिनी हिंसा मिथ्यादृष्टेस्तु दुर्मतेः ॥ अज्ञानशक्तियोगेन तस्याहिंसापि

 

तादृशी ॥ ४९ ॥ येन स्यान्निह्नवादीनां दिविषद्दुर्गतिः क्रमात् ॥ हिंसैव महती तिर्यङ्नरकादिभवांतरे ॥ ५० ॥ साधूनामप्रमत्तानां सा चाहिंसानुबंधिनी ॥ हिंसानुबंधविच्छेदाद्गुणोत्कर्षो यतस्ततः ॥ ५१ ॥ मुग्धानामियमज्ञत्वात् सानुबंधा न कर्हिचित् ॥ ज्ञानोद्रेकाप्रमादाभ्यामस्या यदनुबंधनम् ॥ ५२ ॥ एकस्यामपि हिंसायामुक्तं सुमहदंतरम् ॥ भाववीर्यादिवैचित्र्यादहिंसायां च तत्तथा ॥ ५३ ॥ सद्यः कालांतरे चैतद्विपाकेनापि भिन्नता ॥ प्रतिपक्षांतरालेन तथाशक्तिनियोगतः ॥ ५४ ॥ हिंसाप्युत्तरकालीनविशिष्टगुणसंक्रमात् ॥ त्यक्ताविध्यनुबंधत्वादहिंसैवातिभक्तितः ॥ ५५ ॥ ईदृग्भंगशतोपेताऽहिंसा यत्रोपवर्ण्यते ॥ सर्वांशपरिशुद्धं तत्प्रमाणं जिनशासनम् ॥ ५६ ॥ अर्थोऽयमपरोऽनर्थ इति निर्द्धारणं हृदि ॥ आस्तिक्यं परमं चिन्हं सम्यक्त्वस्य जगुर्जिनाः ॥ ५७ ॥ शमसंवेगनिर्वेदानुकंपाभिः परिष्कृतम् ॥ दधतामेतदच्छिन्नं सम्यक्त्वं स्थिरतां व्रजेत् ॥ ५८ ॥ ॥ ॥ ॥ ॥ ॥ ॥

॥ इति सम्यक्त्वाधिकारः ॥ १२ ॥

॥ मिथ्यात्वत्यागतः शुद्धं सम्यक्त्वं जायतेऽगिनाम् ॥ अतस्तत्परिहाराय यतितव्यं महात्मना ॥ १ ॥ नास्ति नित्यो न कर्त्ता च न भोक्तात्मा न निर्वृतः ॥ तदुपायश्च नेत्याहुर्मिथ्यात्वस्य पदानि षट् ॥ २ ॥ एतैर्यस्माद्भवेच्छुद्धव्यवहारविलंघनम् ॥ अयमेव च मिथ्यात्वध्वंसी सदुपदेशतः ॥ ३ ॥ नास्तित्वादिग्रहे नैवोपदेशो नोपदेशकः ॥ ततः कस्योपकारः स्यात्संदेहादिव्युदासतः ॥ ४ ॥ येषां निश्चय एवेष्टो व्यवहारस्तु संगतः ॥ विप्राणां म्लेच्छभाषेव स्वार्थमात्रोपदेशनात् ॥ ५ ॥ यथा केवलमात्मानं जानानः श्रुतकेवली ॥ श्रुतान्निश्चिनुयात्सर्वं श्रुतं च व्यवहारतः ॥ ६ ॥ निश्चयार्थोऽत्र नो साक्षाद्वक्तुं केनापि

पार्यते ॥ व्यवहारो गुणद्वारा तदर्थावगमक्षमः ॥ ७ ॥ प्राधान्यं व्यवहारे चेत्तत्तेषां निश्चये कथम् ॥ परार्थस्वार्थते तुल्ये
शब्दज्ञानात्मनोर्द्वयोः ॥ ८ ॥ प्राधान्याद्व्यवहारस्य ततस्तद्भेदकारिणाम् ॥ मिथ्यात्वरूपतैतेषां पदानां परिकीर्त्तिता ॥ ९ ॥
नास्त्येवात्मेति चार्वाकः प्रत्यक्षानुपलंभतः ॥ अहंताव्यपदेशस्य शरीरेणोपपत्तितः ॥ १० ॥ मद्यांगेभ्यो मदव्यक्तिः प्रत्ये-
कमसती यथा ॥ मिलितेभ्यो हि भूतेभ्यो ज्ञानव्यक्तिस्तथा मता ॥ ११ ॥ राजरंकादिवैचित्र्यमपि नात्मबलाहितम् ॥ स्वा-
भाविकस्य भेदस्य ग्रावादिष्वपि दर्शनात् ॥ १२ ॥ वाक्यैर्न गम्यते चात्मा परस्परविरोधिभिः ॥ दृष्टवान्न च कोऽप्येनं
प्रमाणं यद्वचो भवेत् ॥ १३ ॥ आत्मानं परलोकं च क्रियां च विविधां वदन् ॥ भोगेभ्यो भ्रंशयत्युच्चैर्लोकचित्तं प्रतारकः
॥ १४ ॥ त्याज्यास्तन्नैहिकाः कामाः कार्या नानागतस्पृहा ॥ भस्मीभूतेषु भूतेषु वृथा प्रत्यागतिस्पृहा ॥ १५ ॥ तदेतद्दर्शनं
मिथ्या जीवः प्रत्यक्ष एव यत् ॥ गुणानां संशयादीनां प्रत्यक्षाणामभेदतः ॥ १६ ॥ न चाहंप्रत्ययादीनां शरीरस्यैव धर्म्म-
ता ॥ नेत्रादिग्राह्यतापत्तेर्नियतं गौरवादिवत् ॥ १७ ॥ शरीरस्यैव चात्मत्वे नानुभूतस्मृतिर्भवेत् ॥ बालत्वादिदशाभेदात्त-
स्यैकस्यानवस्थितेः ॥ १८ ॥ नात्मांगं विगमेप्यस्य तल्लब्धानुस्मृतिर्यतः ॥ व्यये गृहगवाक्षस्य तल्लब्धार्थाधिगंतृवत् ॥ १९ ॥
न दोषः कारणात्कार्ये वासनासंक्रमाच्च न ॥ भ्रूणस्य स्मरणापत्तेरंबानुभवसंक्रमात् ॥ २० ॥ नोपादानादुपादेयवासनास्थै-
र्यदर्शने ॥ करादेरतथात्वेनायोग्यत्वाप्तेरणुस्थितौ ॥ २१ ॥ मद्यांगेभ्यो मदव्यक्तिरपि नो मेलकं विना ॥ ज्ञानव्यक्तिस्तथा
भाव्याऽन्यथा सा सर्वदा भवेत् ॥ २२ ॥ राजरंकादिवैचित्र्यमप्यात्मकृतकर्मजम् ॥ सुखदुःखादिसंवित्तिविशेषो नान्यथा
भवेत् ॥ २३ ॥ आगमाद्गम्यते चात्मा दृष्टेष्टार्थाविरोधिनः ॥ तदुक्ता सर्वविच्चैनं दृष्टवान्वीतकश्मलः ॥ २४ ॥ अभ्रांतानां

च विफला नामुष्मिक्यः प्रवृत्तयः ॥ परबंधनहेतोः कः स्वात्मानमवसादयेत् ॥ २५ ॥ सिद्धिः स्थाएवादिवद्व्यक्ता संशया-
देव चात्मनः ॥ असौ खरविषाणादौ व्यस्तार्थविषयः पुनः ॥ २६ ॥ अजीव इति शब्दश्च जीवसत्तानियंत्रितः ॥ असतो न
निषेधो यत्संयोगादिनिषेधनात् ॥ २७ ॥ संयोगः समवायश्च सामान्यं च विशिष्टता ॥ निषिध्यते पदार्थानां त एव न तु
सर्वथा ॥ २८ ॥ शुद्धं व्युत्पत्तिमज्जीवपदं सार्थं घटादिवत् ॥ तदर्थश्च शरीरं नो पर्यायपदभेदतः ॥ २९ ॥ आत्मव्यवस्थि-
तेस्त्याज्यं ततश्चार्वाकदर्शनम् ॥ पापाः किलैतदालापाः सद्व्यापारविरोधिनः ॥ ३० ॥ ज्ञानक्षणावलीरूपो नित्यो नात्मेति
सौगताः ॥ क्रमाक्रमाभ्यां नित्यत्वे युज्यतेऽर्थक्रिया न हि ॥ ३१ ॥ स्वभावहानितो ध्रौव्यं क्रमेणार्थक्रियाकृतौ ॥ अक्र-
मेण च तद्भावे युगपत्सर्वसंभवः ॥ ३२ ॥ क्षणिके तु न दोषोऽस्मिन् कुर्वद्रूपविशेषिते ॥ ध्रुवेक्षणोत्थतृष्णाया निवृत्तेश्च
गुणो महान् ॥ ३३ ॥ मिथ्यात्ववृद्धिकृन्नूनं तदेतदपि दर्शनम् ॥ क्षणिके कृतहानिर्यत्तथात्मन्यकृतागमः ॥ ३४ ॥ एकद्र-
व्यान्वयाभावाद्वासनासंक्रमश्च न ॥ पौर्वापर्य्यं हि भावानां सर्वत्रातिप्रसक्तिमत् ॥ ३५ ॥ कुर्वद्रूपविशेषे च न प्रवृत्तिर्न
वाऽनुमा ॥ अनिश्चयान्न वाध्यक्षं तथा चोदयतो जगौ ॥ ३६ ॥ न वैजात्यं विना तत् स्यान्न तस्मिन्ननुमा भवेत् ॥ विना
तेन न तत्सिद्धिर्नाध्यक्षं निश्चयं विना ॥ ३७ ॥ एकताप्रत्यभिज्ञानं क्षणिकत्वं च बाधते ॥ योऽहमन्वभवं सोऽहं स्मरामी-
त्यवधारणात् ॥ ३८ ॥ नास्मिन्विषयबाधो यत् क्षणिकेऽपि यथैकता ॥ नानाज्ञानान्वये तद्वत् स्थिरे नानाक्षणान्वये ॥ ३९ ॥
नानाकार्यैक्यकरणस्वाभाव्ये च विरुध्यते ॥ स्याद्वादसन्निवेशेन नित्यत्वेऽर्थक्रिया न हि ॥ ४० ॥ नीलादावप्यतद्भेदश-
क्तयः सुवचाः कथम् ॥ परेणापि हि नानेकस्वभावोपगमं विना ॥ ४१ ॥ ध्रुवेक्षणेऽपि न प्रेम निवृत्तमनुपप्लवात् ॥ ग्राह्या-

कार इव ज्ञाने गुणस्तन्नात्र दर्शने ॥ ४२ ॥ प्रत्युतानित्यभावे हि स्वतः क्षणजनुर्ध्रिया ॥ हेत्वनादरतः सर्वक्रियाविफलता भवेत् ॥ ४३ ॥ तस्मादिदमपि त्याज्यमनित्यत्वस्य दर्शनम् ॥ नित्यसत्यचिदानंदपदसंसर्गमिच्छता ॥ ४४ ॥ न कर्त्ता नापि भोक्तात्मा कापिलानां तु दर्शने ॥ जन्यधर्माश्रयो नायं प्रकृतिः परिणामिनी ॥ ४५ ॥ प्रथमः परिणामोऽस्या बुद्धिर्धर्माष्ट-काऽन्विता ॥ ततोऽहंकारतन्मात्रेंद्रियभूतोदयः क्रमात् ॥ ४६ ॥ चिद्रूपपुरुषो बुद्धेः सिध्यै चैतन्यमानतः ॥ सिद्धिस्तस्या अविषयाऽवच्छेदनियमाच्चितः ॥ ४७ ॥ हेतुत्वे पुंस्प्रकृत्यर्थेंद्रियाणामत्र निर्वृतिः ॥ दृष्टादृष्टविभागश्च व्यासंगश्च न युज्यते ॥ ४८ ॥ स्वप्ने व्याघ्रादिसंकल्पान्नरत्वानभिमानतः ॥ अहंकारश्च नियतव्यापारः परिकल्प्यते ॥ ४९ ॥ तन्मात्रादिक्रमस्त-स्मात्प्रपंचोत्पत्तिहेतवे ॥ इत्थं बुद्धिर्जगत्कर्त्री पुरुषो न विकारभाक् ॥ ५० ॥ पुरुषार्थोपरागौ द्वौ व्यापारावेश एव च ॥ अत्रांशो वेद्म्यहं वस्तु करोमीति च धीस्ततः ॥ ५१ ॥ चेतनोऽहं करोमीति बुद्धेर्भेदाग्रहात्स्मयः ॥ एतन्नाशेऽनवच्छिन्नं चैतन्यं मोक्ष इष्यते ॥ ५२ ॥ कर्तृबुद्धिगते दुःखसुखे पुंस्युपचारतः ॥ नरनाथे यथा भृत्यगतौ जयपराजयौ ॥ ५३ ॥ कर्त्ता भोक्ता च नो तस्मादात्मा नित्यो निरंजनः ॥ अध्यासादन्यथाबुद्धिस्तथा चोक्तं महात्मना ॥ ५४ ॥ प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वथा ॥ अहंकारविमूढात्मा कर्त्ताहमिति मन्यते ॥ ५५ ॥ विचार्यमाणं नो चारु तदेतदपि दर्शनम् ॥ कृतिचैतन्ययोर्व्यक्तं सामानाधिकरण्यतः ॥ ५६ ॥ बुद्धिः कर्त्री च भोक्त्री च नित्या चेन्नास्ति निर्वृतिः ॥ अनित्या चेन्न संसारः प्राग्धर्मादेरयोगतः ॥ ५७ ॥ प्रकृतावेव धर्मादिस्वीकारे बुद्धिरेव का ॥ सुवचश्च घटादौ स्यादीदृग्धर्म्मान्वयस्तथा

१ ऽवच्छेदनियमान्वित इति वा पाठः ।

॥ ५८ ॥ कृतिभोगौ च बुद्धेश्चेद्बंधो मोक्षश्च नात्मनः ॥ ततश्चात्मानमुद्दिश्य कूटमेतद्यदुच्यते ॥ ५९ ॥ पंचविंशतितत्त्वज्ञो यत्र यत्राश्रमे रतः ॥ जटी मुंडी शिखी चापि मुच्यते नात्र[1] संशयः ॥ ६० ॥ एतस्य चोपचारत्वे मोक्षशास्त्रं वृथाखिलम् ॥ अन्यस्य हि विमोक्षार्थे न कोऽप्यन्यः प्रवर्तते ॥ ६१ ॥ कापिलानां मते तस्मादस्मिन्नैवोचिता रतिः ॥ यत्रानुभवसंसिद्धः कर्त्ता भोक्ता च लुप्यते ॥ ६२ ॥ नास्ति निर्वाणमित्याहुरात्मनः केऽप्यबंधतः ॥ प्राक्पश्चाद्युगपद्वापि कर्म्मबंधाव्यवस्थितेः ॥ ६३ ॥ अनादिर्यदि संबंध इष्यते जीवकर्मणोः ॥ तदानंत्यान्न मोक्षः स्यात्तदात्माकाशयोगवत् ॥ ६४ ॥ तदेतदत्यसंबद्धं यन्मिथो हेतुकार्ययोः ॥ संतानानादिता बीजांकुरवत् देहकर्मणोः ॥ ६५ ॥ कर्त्ता कर्मान्वितो देहे जीवः कर्मणि देहयुक् ॥ क्रियाफलोपभुक्कुंभे दंडान्वितकुलालवत् ॥ ६६ ॥ अनादिसंततेर्नाशः स्याद्बीजांकुरयोरिव ॥ कुकुट्यंडकयोः स्वर्णमलयोरिव वानयोः ॥ ६७ ॥ भव्येषु च व्यवस्थेयं संबंधो जीवकर्मणोः ॥ अनाद्यनंतोऽभव्यानां स्यादात्माकाशयोगवत् ॥ ६८ ॥ द्रव्यभावे समानेऽपि जीवाजीवत्वभेदवत् ॥ जीवभावे समानेऽपि भव्याभव्यत्वयोर्भिदा ॥ ६९ ॥ स्वाभाविकं च भव्यत्वं कलशप्रागभाववत् ॥ नाशकारणसाम्राज्याद्विनश्यन्न विरुध्यते ॥ ७० ॥ भव्योच्छेदो न चैवं स्याद्गुर्वानंत्यान्नभोंशवत् ॥ प्रतिमादलवत् क्वापि फलाभावेपि योग्यता ॥ ७१ ॥ नैतद्वयं वदामो यद्भव्यः सर्वोऽपि सिध्यति ॥ यस्तु सिध्यति सोऽवश्यं भव्य एवेति नो मतम् ॥ ७२ ॥ ननु मोक्षेऽपि जन्यत्वाद्विनाशिनी भवस्थितिः ॥ नैवं प्रध्वंसवत्तस्यानिधनत्वव्यवस्थितेः ॥ ७३ ॥ आकाशस्येव वैविक्त्या मुद्गरादेर्घटक्षये ॥ ज्ञानादेः कर्मणो नाशे नात्मनो जायतेऽधिकम् ॥ ७४ ॥ न च कर्मा-

१ भवबंधनात् इति वा पाठः ।

णुसंबंधान्मुक्तस्यापि न मुक्तता ॥ योगानां बंधहेतूनामपुनर्भवसंभवात् ॥ ७५ ॥ सुखस्य तारतम्येन प्रकर्षस्यापि संभवात्॥ अनंतसुखसंवित्तिर्मोक्षः सिध्यति निर्भयः ॥ ७६ ॥ वचनं नास्तिकाभानामात्मसत्तानिषेधकम् ॥ भ्रांतानां तेन नादेयं परमार्थगवेषिणा ॥ ७७ ॥ न मोक्षोपाय इत्याहुरपरे नास्तिकोपमाः ॥ कार्यमस्ति न हेतुश्चेत्येषा तेषां कदर्थना ॥ ७८ ॥ अकस्मादेव भवतीत्यलीकं नियतावधेः ॥ कादाचित्कस्य दृष्टत्वाद्भाषे तार्किकोऽप्यदः ॥७९॥ हेतुभूतिनिषेधो न स्वानुपाख्याविधिर्न च ॥ स्वभाववर्णना नैवमवधेर्नियतत्वतः ॥ ८० ॥ न च सार्वत्रिको मोक्षः संसारस्यापि दर्शनात् ॥ न चेदानीं न तद्व्यक्तिर्व्यंजको हेतुरेव यत् ॥ ८१ ॥ मोक्षोपायोऽस्तु किंत्वस्य निश्चयो नेति चेन्मतम् ॥ तन्न रत्नत्रयस्यैव तथा भावविनिश्चयात् ॥ ८२ ॥ भवकारणरागादिप्रतिपक्षमदः खलु ॥ तद्विपक्षस्य मोक्षस्य कारणं घटतेतराम् ॥ ८३ ॥ अथ रत्नत्रयप्राप्तेः प्राक्कर्मलघुता यथा ॥ परतोऽपि तथैव स्यादिति किं तदपेक्षया ॥ ८४ ॥ नैवं यत्पूर्वसेवैव मृद्वी नो साधनक्रिया ॥ सम्यक्त्वादिक्रिया तस्माद् दृढैव शिवसाधने ॥ ८५ ॥ गुणाः प्रादुर्भवंत्युच्चैरथवा कर्मलाघवात् ॥ तथाभव्यतया तेषां कुतोऽपेक्षानिवारणम् ॥ ८६ ॥ तथाभव्यतयाक्षेपाद्गुणा न च न हेतवः ॥ अन्योन्यसहकारित्वाद् दंडचक्रभ्रमादिवत् ॥ ८७ ॥ ज्ञानदर्शनचारित्राण्युपायास्तद्भवक्षये ॥ एतन्निषेधकं वाक्यं त्याज्यं मिथ्यात्ववृद्धिकृत् ॥ ८८ ॥ मिथ्यात्वस्य पदान्येतान्युत्सृज्योत्तमधीधनः ॥ भावयेत्प्रातिलोम्येन सम्यक्त्वस्य पदानि षट् ॥ ८९ ॥ ॥ ॥

॥ इति मिथ्यात्वत्यागाधिकारः ॥ १३ ॥

॥ मिथ्यात्वदावानलनीरवाहमसद्ग्रहत्यागमुदाहरंति ॥ अतो रतिस्तत्र बुधैर्विधेया विशुद्धभावैः श्रुतसारवद्भिः ॥ १ ॥

असद्ग्रहाग्निज्वलितं यदंतः क्व तत्र तत्त्वव्यवसायवल्लिः ॥ प्रशांतिपुष्पाणि हितोपदेशफलानि चान्यत्र गवेषयतुं ॥ २ ॥
अधीत्य किंचिच्च निशम्य किंचिदसद्ग्रहात्पंडितमानिनो ये ॥ मुखं सुखं चुंबितमस्तु वाचो लीलारहस्यं तु न तैर्जगाहे
॥ ३ ॥ असद्ग्रहोत्सर्पदतुच्छदर्पैर्बोधांशतांधीकृतमुग्धलोकैः ॥ विडंबिता हंत जडैर्वितंडापांडित्यकंडूलतया त्रिलोकी ॥ ४ ॥
विधोर्विवेकस्य न यत्र दृष्टिस्तमोघनं तत्त्वरविर्विलीनः ॥ अशुक्लपक्षस्थितिरेष नूनमसद्ग्रहः कोऽपि कुहूविलासः ॥ ५ ॥
कुतर्कदात्रेण लुनाति तत्त्ववल्लीं रसात्सिंचति दोषवृक्षम् ॥ क्षिपत्यधः स्वादुफलं शमाख्यमसद्ग्रहच्छन्नमतिर्मनुष्यः ॥ ६ ॥
असद्ग्रहग्रावमये हि चित्ते न क्वापि सद्भावरसप्रवेशः ॥ इहांकुरश्चित्तविशुद्धबोधः सिद्धांतवाचां बत कोऽपराधः ॥ ७ ॥
व्रतानि चीर्णानि तपोऽपि तप्तं कृता प्रयत्नेन च पिंडशुद्धिः ॥ अभूत्फलं यत्तु न निन्हवानामसद्ग्रहस्यैव हि सोऽपराधः
॥ ८ ॥ स्थालं स्वबुद्धिः सुगुरोश्च दातुरुपस्थिता काचन मोदकाली ॥ असद्ग्रहः कोऽपि गलेग्रहीता तथापि भोक्तुं न
ददाति दुष्टः ॥ ९ ॥ गुरुप्रसादीक्रियमाणमर्थं गृह्णाति नासद्ग्रहवांस्ततः किम् ॥ द्राक्षा हि साक्षादुपनीयमानाः क्रमेलकः
कंटकभुक् न भुंक्ते ॥ १० ॥ असद्ग्रहात्पामरसंगतिं ये कुर्वंति तेषां न रतिर्बुधेषु ॥ विष्टासु पुष्टाः किल वायसा नो मिष्टा-
न्ननिष्ठाः प्रसभं भवंति ॥ ११ ॥ नियोजयत्येव मतिं न युक्तौ युक्तिं मतौ यः प्रसभं नियुंक्ते ॥ असद्ग्रहादेव न कस्य
हास्योऽजले घटारोपणमादधानः ॥ १२ ॥ असद्ग्रहो यस्य गतो न नाशं न दीयमानं श्रुतमस्य शस्यम् ॥ न नाम वैक-
ल्यकलंकितस्य प्रौढा प्रदातुं घटते नृपश्रीः ॥ १३ ॥ आमे घटे वारि धृतं यथा सद्विनाशयेत्स्वं च घटं च सद्यः ॥ अस-
द्ग्रहग्रस्तमतेस्तथैव श्रुतात्प्रदत्तादुभयोर्विनाशः ॥ १४ ॥ असद्ग्रहग्रस्तमतेः प्रदत्ते हितोपदेशं खलु यो विमूढः ॥ शुनी-

शरीरे स महोपकारी कस्तूरिकालेपनमादधाति ॥ १५ ॥ कष्टेन लब्धं विशदागमार्थं ददाति योऽसद्ग्रहदूषिताय ॥ स खिद्यते यत्नशतोपनीतं बीजं वपन्नूषरभूमिदेशे ॥ १६ ॥ शृणोति शास्त्राणि गुरोस्तदाज्ञां करोति नासद्ग्रहवान् कदाचित् ॥ विवेचकत्वं मनुते त्वसारग्राही भुवि स्वस्य च चालनीवत् ॥ १७ ॥ दंभाय चातुर्यमघाय शास्त्रं प्रतारणाय प्रतिभापटुत्वम्॥ गर्वाय धीरत्वमहो गुणानामसद्ग्रहस्थे विपरीतसृष्टिः ॥ १८ ॥ असद्ग्रहस्थेन समं समंतात्सौहार्दभृद्दुःखमवैति तादृग् ॥ उपैति यादृक्कदली कुवृक्षस्फुटत्त्रुटत्कंटककोटिकीर्णा ॥ १९ ॥ विद्या विवेको विनयो विशुद्धिः सिद्धांतवाल्लभ्यमुदारता च ॥ असद्ग्रहाद्यांति विनाशमेते गुणास्तृणानीव कणाद्दवाग्नेः ॥ २० ॥ स्वार्थः प्रियो नो गुणवांस्तु कश्चिन्मूढेषु मैत्री न तु तत्त्ववित्सु ॥ असद्ग्रहापादितविभ्रमाणां स्थितिः किलासावधमाधमानाम् ॥ २१ ॥ इदं विदंस्तत्त्वमुदारबुद्धिरसद्ग्रहं यस्तृणवज्जहाति ॥ जहाति नैनं कुलजेव योषिद्गुणानुरक्ता दयितं यशःश्रीः ॥ २२ ॥ ॥ ॥

॥ इत्यसद्ग्रहत्यागाधिकारः ॥ १४ ॥

॥ असद्ग्रहव्ययावांतमिथ्यात्वविषविप्रुषः ॥ सम्यक्त्वशालिनोऽध्यात्मशुद्धेर्योगः प्रसिध्यति ॥ १ ॥ कर्मज्ञानविभेदेन स द्विधा तत्र चादिमः ॥ आवश्यकादिविहितक्रियारूपः प्रकीर्त्तितः ॥ २ ॥ शारीरस्पंदकर्मात्मा यदयं पुण्यलक्षणं ॥ कर्मातनोति सद्रागात्कर्मयोगस्ततः स्मृतः ॥ ३ ॥ आवश्यकादिरागेण वात्सल्याद्भगवद्गिरां ॥ प्राप्नोति स्वर्गसौख्यानि न याति परमं पदम् ॥ ४ ॥ ज्ञानयोगस्तपः शुद्धमात्मरत्येकलक्षणं ॥ इंद्रियार्थोन्मनीभावात्स मोक्षसुखसाधकः ॥ ५ ॥ न परप्रतिबंधोऽस्मिन्नल्पोऽप्येकात्मवेदनात् ॥ शुभं कर्मापि नैवात्र व्याक्षेपायोपजायते ॥ ६ ॥ न ह्यप्रमत्तसाधूनां क्रियाप्यावश्यका-

दिका ॥ नियता ध्यानशुद्धत्वाद्यदन्यैरप्यदः स्मृतं ॥७॥ यस्त्वात्मरतिरेव स्यादात्मतृप्तश्च मानवः॥ आत्मन्येव च संतुष्टस्तस्य
कार्यं न विद्यते ॥ ८ ॥ नैवं तस्य कृतेनार्थो नाकृतेनेह कश्चन ॥ न चास्य सर्वभूतेषु कश्चिदर्थव्यपाश्रयः ॥ ९ ॥ अवकाशो
निषिद्धोऽस्मिन्नरत्यानंदयोरपि ॥ ध्यानावष्टंभतः क्वास्तु तत्क्रियाणां विकल्पनम्॥ १० ॥ देहनिर्वाहमात्रार्था यापि भिक्षाट-
नादिका ॥ क्रिया सा ज्ञानिनोऽसंगान्नैव ध्यानविघातिनी ॥ ११ ॥ रत्नशिक्षादृगन्या हि तन्नियोजनदृग् यथा ॥ फलभेदा-
त्तथाचारक्रियाप्यस्य विभिद्यते ॥ १२ ॥ ध्यानार्था हि क्रिया सेयं प्रत्याहृत्य निजं मनः ॥ प्रारब्धजन्मसंकल्पादात्मज्ञानाय
कल्पते ॥ १३ ॥ स्थिरीभूतमपि स्वांतं रजसा चलतां व्रजेत् ॥ प्रत्याहृत्य निगृह्णाति ज्ञानी यदिदमुच्यते ॥ १४ ॥ शनैः
शनैरुपरमेद् बुद्ध्या धृतिगृहीतया ॥ आत्मसंस्थं मनः कृत्वा न किंचिदपि चिंतयेत् ॥ १५ ॥ यतो यतो निःसरति मनश्चं-
चलमस्थिरम् ॥ ततस्ततो नियम्यैतदात्मन्येव वशं नयेत् ॥ १६ ॥ अत एवादृढस्वांतः कुर्याच्छास्त्रोदितां क्रियाम् ॥ सकलां
विषयप्रत्याहरणाय महामतिः ॥ १७ ॥ श्रुत्वा पैशाचिकीं वार्त्तां कुलवध्वाश्च रक्षणं ॥ नित्यं संयमयोगेषु व्यापृतात्मा भवे-
द्यतिः ॥ १८ ॥ या निश्चयैकलीनानां क्रिया नातिप्रयोजनाः ॥ व्यवहारदशास्थानां ता एवातिगुणावहाः ॥ १९ ॥ कर्म-
णोऽपि हि शुद्धस्य श्रद्धामेधादियोगतः ॥ अक्षतं मुक्तिहेतुत्वं ज्ञानयोगानतिक्रमात् ॥ २० ॥ अभ्यासे सत्क्रियापेक्षा
योगिनां चित्तशुद्धये ॥ ज्ञानपाके शमस्यैव यत्परैरप्यदः स्मृतं ॥ २१ ॥ आरुरुक्षोर्मुनेर्योगं कर्मकारणमुच्यते ॥ योगारूढस्य
तस्यैव शमः कारणमुच्यते ॥ २२ ॥ यदा हि नेंद्रियार्थेषु न कर्म्मस्वनुषज्यते ॥ सर्वसंकल्पसंन्यासी योगारूढस्तदोच्यते
॥ २३ ॥ ज्ञानं क्रियाविहीनं न क्रिया वा ज्ञानवर्जिता ॥ गुणप्रधानभावेन दशाभेदः किलैनयोः ॥ २४ ॥ ज्ञानिनां कर्मयो-

गेन चित्तशुद्धिमुपेयुषां ॥ निरवद्यप्रवृत्तीनां ज्ञानयोगौचिती ततः ॥ २५ ॥ अतएव हि सुश्राद्धचरणस्पर्शनोत्तरं ॥ दुःष्पाल-
श्रमणाचारग्रहणं विहितं जिनैः ॥ २६ ॥ एकोद्देशेन संवृत्तं कर्म यत्पौर्वभूमिकं ॥ दोषोच्छेदकरं तत्स्याद् ज्ञानयोगप्रवृद्धये
॥ २७ ॥ अज्ञानिनां तु यत्कर्म न ततश्चित्तशोधनं ॥ यागादेरतथाभावान् म्लेच्छादिकृतकर्मवत् ॥ २८ ॥ न च तत्कर्मयो-
गेऽपि फलसंकल्पवर्जनात् ॥ संन्यासो ब्रह्मबोधाद्वा सावद्यत्वात्स्वरूपतः ॥ २९ ॥ नो चेदित्थं भवेच्छुद्धिर्गोहिंसादेरपि
स्फुटा ॥ श्येनाद्वा वेदविहिताद्विशेषानुपलक्षणात् ॥३०॥ सावद्यकर्म नो तस्मादादेयं बुद्धिविप्लवात् ॥ कर्मोदयागते त्वस्मि-
न्नसंकल्पादबंधनम् ॥ ३१ ॥ कर्माण्याचरतो ज्ञातुर्मुक्तिभावो न हीयते ॥ तत्र संकल्पजो बंधो गीयते यत्परैरपि ॥ ३२ ॥
कर्मण्यकर्म यः पश्येदकर्मणि च कर्म्म यः ॥ स बुद्धिमान्मनुष्येषु स युक्तः कृत्स्नकर्म्मकृत् ॥ ३३ ॥ कर्मण्यकर्म वाऽकर्म
कर्म्मण्यस्मिन्नुभेऽपि॥ नोभे वा भंगवैचित्र्यादकर्मण्यपि नो मते ॥३४॥ कर्म नैष्कर्म्य वैषम्यमुदासीनो विभावयन् ॥ ज्ञानी
न लिप्यते भोगैः पद्मपत्रमिवांभसा ॥ ३५ ॥ पापाकरणमात्राद्धि न मौनं विचिकित्सया ॥ अनन्यपरमात्साम्यात् ज्ञान-
योगी भवेन्मुनिः ॥ ३६ ॥ विषयेषु न रागी वा द्वेषी वा मौनमश्नुते ॥ समं रूपं विदंस्तेषु ज्ञानयोगी न लिप्यते ॥ ३७ ॥
सतत्त्वचिंतया यस्याभिसमन्वागता इमे ॥ आत्मवान् ज्ञानवान्वेद धर्मब्रह्ममयो हि सः ॥ ३८ ॥ वैषम्यबीजमज्ञानं निघ्नंति
ज्ञानयोगिनः ॥ विषयांस्ते परिज्ञाय लोकं जानंति तत्त्वतः ॥३९॥ इतश्चापूर्वविज्ञानाच्चिदानंदविनोदिनः ॥ ज्योतिष्मंतो भवं
त्येते ज्ञाननिर्धूतकल्मषाः ॥४०॥ तेजोलेश्याविवृद्धिर्या पर्यायक्रमवृद्धितः ॥ भाषिता भगवत्यादौ सेत्थंभूतस्य युज्यते ॥४१॥
विषमेऽपि समेक्षी यः स ज्ञानी स च पंडितः ॥ जीवन्मुक्तः स्थिरं ब्रह्म तथाचोक्तं परैरपि ॥४२॥ विद्याविनयसंपन्ने ब्राह्मणे

गवि हस्तिनि ॥ शुनि चैव श्वपाके च पंडिताः समदर्शिनः ॥४३॥ इहैव तैर्जितः सर्गो येषां साम्ये स्थितं मनः ॥ निर्दोषं हि समं
ब्रह्म तस्माद् ब्रह्मणि ते स्थिताः॥४४॥ न प्रहृष्येत्प्रियं प्राप्य नोद्विजेत्प्राप्य चाप्रियं ॥ स्थिरबुद्धिरसंमूढो ब्रह्मविद्ब्रह्मणि स्थितः
॥४५॥ अर्वाग्दशायांदोषाय वैषम्ये साम्यदर्शनम् ॥ निरपेक्षमुनीनां तु रागद्वेषक्षयाय तत् ॥४६॥ रागद्वेषक्षयादेति ज्ञानी वि-
षयशून्यतां ॥ छिद्यते भिद्यते वाऽयं हन्यते वा न जातुचित् ॥४७॥ अनुस्मरति नातीतं नैव कांक्षत्यनागतम् ॥ शीतोष्णसुखदुः-
खेषु समो मानापमानयोः ॥ ४८ ॥ जितेंद्रियो जितक्रोधो मानमायानुपद्रुतः ॥ लोभसंस्पर्शरहितो वेदखेदविवर्जितः ॥ ४९ ॥
संनिरुध्यात्मनात्मानं स्थितः स्वकृतकर्मभित् ॥ हठप्रयत्नोपरतः सहजाचारसेवनात् ॥ ५० ॥ लोकसंज्ञाविनिर्मुक्तो मिथ्या-
चारप्रपंचहृत् ॥ उल्लसत्कंडकस्थानः परेण परमाश्रितः ॥ ५१ ॥ श्रद्धावानाज्ञया युक्तः शस्त्रातीतो ह्यशस्त्रवान् ॥ गतो
दृष्टेषु निर्वेदमनिह्नुतपराक्रमः ॥ ५२ ॥ निक्षिप्तदंडो ध्यानाग्निदग्धपापेंधनव्रजः ॥ प्रतिस्रोतोऽनुगत्वेन लोकोत्तरचरित्रभृत्
॥ ५३ ॥ लब्धान् कामान्बहिष्कुर्वन्नकुर्वन्बहुरूपताम् ॥ स्फारीकुर्वन् परं चक्षुरपरं च निमीलयन् ॥ ५४ ॥ पश्यन्नंतर्गतान्
भावान् पूर्णभावमुपागतः ॥ भुंजानोऽध्यात्मसाम्राज्यमवशिष्टं न पश्यति ॥ ५५ ॥ श्रेष्ठो हि ज्ञानयोगोऽयमध्यात्मन्येव
यज्जगौ ॥ बंधप्रमोक्षं भगवान् लोकसारे सुनिश्चितम् ॥ ५६ ॥ उपयोगैकसारत्वादाश्वसंमोहबोधतः ॥ मोक्षाप्तेर्युज्यते चैत
त्तथाचोक्तं परैरपि ॥ ५७ ॥ तपस्विभ्योऽधिको योगी ज्ञानिभ्योऽप्यधिको मतः ॥ कर्मिभ्यश्चाधिको योगी तस्माद्योगी
भवार्जुन ॥ ५८ ॥ समापत्तिरिह व्यक्तमात्मनः परमात्मनि ॥ अभेदोपासनारूपस्ततः श्रेष्ठतरो ह्ययम् ॥ ५९ ॥ उपासना
भागवती सर्वेभ्योऽपि गरीयसी ॥ महापापक्षयकरी तथा चोक्तं परैरपि ॥ ६० ॥ योगिनामपि सर्वेषां मद्गतेनांतरात्मना ॥

श्रद्धावान् भजते यो मां स मे युक्ततमो मतः ॥ ६१ ॥ उपास्ते ज्ञानवान् देवं यो निरंजनमव्ययम् ॥ स तु तन्मयतां याति ध्याननिर्धूतकल्मषः ॥ ६२ ॥ विशेषमप्यजानानो यः कुग्रहविवर्जितः ॥ सर्वज्ञं सेवते सोऽपि सामान्ययोगमास्थितः ॥६३॥ सर्वज्ञो मुख्य एकस्तत्प्रतिपत्तिश्च यावताम् ॥ सर्वेऽपि ते तमापन्ना मुख्यं सामान्यतो बुधाः ॥ ६४ ॥ न ज्ञायते विशेषस्तु सर्वथा सर्वदर्शिभिः ॥ अतो न ते तमापन्ना विशिष्य भुवि केचन ॥ ६५ ॥ सर्वज्ञप्रतिपत्त्यंशात्तुल्यता सर्वयोगिनाम् ॥ दूरासन्नादिभेदस्तु तद्भृत्यत्वं निहंति न ॥६६॥ माध्यस्थ्यमवलंब्यैव देवतातिशयस्य हि ॥ सेवा सर्वैर्बुधैरिष्टा कालातीतोऽपि यज्जगौ ॥ ६७ ॥ अन्येषामप्ययं मार्गो मुक्ताविद्यादिवादिनाम् ॥ अभिधानादिभेदेन तत्त्वरीत्या[1] व्यवस्थितः ॥ ६८ ॥ मुक्तो बुद्धोऽर्हन्वापि यदैश्वर्येण समन्वितः ॥ तदीश्वरः स एव स्यात् संज्ञाभेदोऽत्र केवलम् ॥ ६९॥ अनादिशुद्ध इत्यादिर्यो भेदो यस्य कल्प्यते ॥ तत्तत्तंत्रानुसारेण मन्ये सोऽपि निरर्थकः ॥ ७० ॥ विशेषस्यापरिज्ञानाद् युक्तीनां जातिवादिनः ॥ प्रायो विरोधतश्चैव फलाभेदाच्च भावतः ॥७१॥ अविद्याक्लेशकर्मादि यतश्च भवकारणम् ॥ ततः प्रधानमेवैतत्संज्ञाभेदमुपागतम् ॥ ७२ ॥ अस्यापि योऽपरो भेदश्चित्रोपाधिस्तथा तथा ॥ गीयतेऽतीतहेतुभ्यो धीमतां सोऽप्यपार्थकः ॥ ७३ ॥ ततोऽस्थानप्रयासोऽयं यत्तद्भेदनिरूपणम् ॥ सामान्यमनुमानस्य यतश्च विषयो मतः ॥ ७४ ॥ संक्षिप्तरुचिजिज्ञासोर्विशेषानवलंबनम् ॥ चारिसंजीविनीचारज्ञातादत्रोपयुज्यते ॥ ७५ ॥ जिज्ञासापि सतां न्याय्या यत्परेऽपि वदंत्यदः॥ जिज्ञासुरपि योगस्य शब्दब्रह्मातिवर्त्तते ॥ ७६ ॥ आर्तो जिज्ञासुरर्थार्थी ज्ञानी चेति चतुर्विधाः ॥ उपासकास्त्रयस्तत्र धन्या वस्तुविशेषतः॥७७॥

---

१ तत्त्वनीत्या इति वा पाठः ।

ज्ञानी तु शांतविक्षेपो नित्यभक्तिर्विशिष्यते ॥ अत्यासन्नो ह्यसौ भर्तुरंतरात्मा सदाशयः ॥ ७८ ॥ कर्मयोगविशुद्धस्ततज्ज्ञाने युंजीत मानसम् ॥ अज्ञश्चाश्रद्दधानश्च संशयानो विनश्यति ॥ ७९ ॥ निर्भयः स्थिरनासाग्रदत्तदृष्टिर्व्रते स्थितः ॥ सुखासनः प्रसन्नास्यो दिशश्चानवलोकयन् ॥ ८० ॥ देहमध्यशिरोग्रीवमवक्रं धारयन्बुधः ॥ दंतैरसंस्पृशन् दंतान् सुश्लिष्टाधरपल्लवः ॥ ८१ ॥ आर्त्तरौद्रे परित्यज्य धर्म्ये शुक्ले च दत्तधीः ॥ अप्रमत्तो रतो ध्याने ज्ञानयोगी भवेन्मुनिः ॥ ८२ ॥ कर्मयोगं समभ्यस्य ज्ञानयोगसमाहितः ॥ ध्यानयोगं समारुह्य मुक्तियोगं प्रपद्यते ॥ ८३ ॥ ॥ ॥ ॥

॥ इति योगाधिकारः ॥ १५

॥ स्थिरमध्यवसानं यत्तद्ध्यानं चित्तमस्थिरम् ॥ भावना चाप्यनुप्रेक्षा चिंता वा तत्रिधा मतम् ॥ १ ॥ मुहूर्त्तांतर्भवेस्थ्यानमेकार्थे मनसः स्थितिः ॥ बह्वर्थसंक्रमे दीर्घाप्यच्छिन्ना ध्यानसंततिः ॥ २ ॥ आर्त्तं रौद्रं च धर्म्यं च शुक्लं चेति चतुर्विधम् ॥ तत् स्याद्भेदाविह द्वौ द्वौ कारणं भवमोक्षयोः ॥ ३ ॥ शब्दादीनामनिष्टानां वियोगासंप्रयोगयोः ॥ चिंतनं वेदनायाश्च व्याकुलत्वमुपेयुषः ॥ ४ ॥ इष्टानां प्रणिधानं च संप्रयोगावियोगयोः ॥ निदानचिंतनं पापमार्त्तमित्थं चतुर्विधम् ॥ ५ ॥ कापोतनीलकृष्णानां लेश्यानामत्र संभवः ॥ अनतिक्लिष्टभावानां कर्म्मणां परिणामतः ॥ ६ ॥ क्रंदनं रुदनं प्रोच्चैः शोचनं परिदेवनम् ॥ तारुनं लुंचनं चेति लिंगान्यस्य विदुर्बुधाः ॥ ७ ॥ मोघं निंदन्निजं कृत्यं प्रशंसन् परसंपदः ॥ विस्मितः प्रार्थयन्नेताः प्रसक्तश्चैतदर्जने ॥ ८ ॥ प्रमत्तश्चेंद्रियार्थेषु गृध्नो धर्म्मपराङ्मुखः ॥ जिनोक्तमपुरस्कुर्वन्नार्त्तध्याने प्रवर्त्तते ॥ ९ ॥ प्रमत्तांतगुणस्थानानुगतं तन्महात्मनां ॥ सर्वप्रमादमूलत्वात्त्याज्यं तिर्य्यग्गतिप्रदम् ॥ १० ॥ निर्दयं वधबंधादिचिंतनं निबिरु-

क्रुधा ॥ पिशुनासत्यमिथ्यावाक् प्रणिधानं च मायया ॥ ११ ॥ चौर्य्यधीर्निरपेक्षस्य तीव्रक्रोधाकुलस्य च ॥ सर्वाभिशंकाकलुषं चित्तं च धनरक्षणे ॥ १२ ॥ एतत्सदोषकरणकारणानुमतिस्थिति ॥ देशविरतिपर्यंतं रौद्रध्यानं चतुर्विधम् ॥ १३ ॥ कापोतनीलकृष्णानां लेश्यानामत्र संभवः ॥ अतिसंक्लिष्टरूपाणां कर्मणां परिणामतः ॥ १४ ॥ उत्सन्नबहुदोषत्वं नानामारणदोषता ॥ हिंसादिषु प्रवृत्तिश्च कृत्वाघं स्मयमानता ॥ १५ ॥ निर्दयत्वाननुशयौ बहुमानः परापदि ॥ लिंगान्यत्रेत्यदो धीरैस्त्याज्यं नरकदुःखदम् ॥ १६ ॥ अप्रशस्ते इमे ध्याने दुरंते चिरसंस्तुते ॥ प्रशस्तं तु कृताभ्यासो ध्यानमारोढुमर्हति ॥ १७ ॥ भावना देशकालौ च स्वासनालंबनक्रमान् ॥ ध्यातव्यध्यात्रनुप्रेक्षालेश्यालिंगफलानि च ॥ १८ ॥ ज्ञात्वा धर्म्यं ततो ध्यायेच्चतस्रस्तत्र भावनाः ॥ ज्ञानदर्शनचारित्रवैराग्याख्याः प्रकीर्तिताः ॥ १९ ॥ निश्चलत्वमसंमोहो निर्जरा पूर्वकर्मणाम् ॥ संगाशंसाभयोच्छेदः फलान्यासां यथाक्रमम् ॥ २० ॥ स्थिरचित्तः क्रियैताभिर्याति ध्यानस्य योग्यताम् ॥ योग्यतैव हि नान्यस्य तथाचोक्तं परैरपि ॥ २१ ॥ चंचलं हि मनः कृष्ण प्रमाथि बलवत् दृढम् ॥ तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करम् ॥ २२ ॥ असंशयं महाबाहो मनो दुर्निग्रहं चलम् ॥ अभ्यासेन तु कौंतेय वैराग्येण च गृह्यते ॥ २३ ॥ असंयतात्मनो योगो दुःप्राप्य इति मे मतिः ॥ वश्यात्मना तु यतता शक्योऽवाप्तुमुपायतः ॥ २४ ॥ सद्दशप्रत्ययावृत्त्या वैतृष्ण्याद्बहिरर्थतः ॥ एतच्च युज्यते सर्वं भावनाभावितात्मनि ॥ २५ ॥ स्त्रीपशुक्लीबदुःशीलवर्जितं स्थानमागमे ॥ सदा यतीनामाज्ञप्तं ध्यानकाले विशेषतः ॥ २६ ॥ स्थिरयोगस्य तु ग्रामेऽविशेषः कानने वने ॥ तेन यत्र समाधानं स देशो ध्यायतो मतः ॥ २७ ॥ यत्र योगसमाधानं कालोऽपीष्टः स एव हि ॥ दिनरात्रिक्षणादीनां ध्यानिनो नियमस्तु न ॥ २८ ॥ यैवावस्था जिता जातु

न स्याद्ध्यानोपघातिनी ॥ तया ध्यायेन्निषण्णो वा स्थितो वा शयितोऽथवा ॥ २९ ॥ सर्वासु मुनयो देशकालावस्थासु केवलम् ॥ प्राप्तास्तन्नियमो नासां नियता योगसुस्थता ॥ ३० ॥ वाचना चैव पृच्छा च परावृत्यनुचिंतने ॥ क्रिया चालंबनानीह सद्धर्मावश्यकानि च ॥ ३१ ॥ आरोहति दृढद्रव्यालंबनो विषमं पदम् ॥ तथारोहति सद्ध्यानं सूत्राद्यालंबनाश्रितः ॥३२॥ आलंबनादरोद्भूतप्रत्यूहक्षययोगतः ॥ ध्यानाद्यारोहणभ्रंशो योगिनां नोपजायते ॥ ३३ ॥ मनोरोधादिको ध्यानप्रतिपत्तिक्रमो जिने ॥ शेषेषु तु यथायोगं समाधानं प्रकीर्तितम् ॥ ३४ ॥ आज्ञापायविपाकानां संस्थानस्य च चिंतनात् ॥ धर्मध्यानोपयुक्तानां ध्यातव्यं स्याच्चतुर्विधम् ॥ ३५ ॥ नयभंगप्रमाणाढ्यां हेतूदाहरणान्विताम् ॥ आज्ञां ध्यायेज्जिनेंद्राणामप्रामाण्याकलंकिताम् ॥ ३६ ॥ रागद्वेषकषायादिपीडितानां जनुष्मताम् ॥ ऐहिकामुष्मिकांस्तांस्तान्नानापायान्विचिंतयेत् ॥ ३७ ॥ ध्यायेत्कर्मविपाकं च तं तं योगानुभावजम् ॥ प्रकृत्यादिचतुर्भेदं शुभाशुभविभागतः ॥ ३८ ॥ उत्पादस्थितिभंगादिपर्यायैर्लक्षणैः पृथक् ॥ भेदैर्नामादिभिर्लोकसंस्थानं चिंतयेद् भृतम् ॥ ३९ ॥ चिंतयेत्तत्र कर्त्तारं भोक्तारं निजकर्मणाम् ॥ अरूपमव्ययं जीवमुपयोगस्वलक्षणम् ॥ ४० ॥ तत्कर्मजनितं जन्मजरामरणवारिणा ॥ पूर्णं मोहमहावर्त्तकामौर्वानलभीषणम् ॥ ४१ ॥ आशामहानिलापूर्णकषायकलशोच्छलत् ॥ असद्विकल्पकल्लोलचक्रं दधतमुद्धतम् ॥ ४२ ॥ हृदिस्रोतसिकावेलासंपातदुरतिक्रमम् ॥ प्रार्थनावल्लिसंतानं दुष्पूरविषयोदरम् ॥ ४३ ॥ अज्ञानदुर्दिनं व्यापद्विद्युत्पातोद्भवद्भयम् ॥ कदाग्रहकुवातेन हृदयोत्कंपकारिणम् ॥४४॥ विविधव्याधिसंबंधमत्स्यकच्छपसंकुलम्॥चिंतयेच्च भवांभोधिं चलद्दोषाद्रिदुर्गमम्॥४५॥त्रिभिर्विशेषकम्॥ तस्य संतरणोपायं सम्यक्त्वदृढबंधनम्॥बहुशीलांगफलकं ज्ञाननिर्यामकान्वितम्॥४६॥संवरास्ताश्रवच्छिद्रं गुप्तिगुप्तं

समंततः ॥ आचारमंडपोद्दीप्तापवादोत्सर्गभूद्वयम् ॥ ४७ ॥ असंख्यैर्दुर्धरैर्योधैर्दुष्प्रधृष्यं सदाशयैः ॥ सद्योगकूपस्तंभाग्रन्य-
स्ताध्यात्मसितांशुकम् ॥४८॥ तपोऽनुकूलपवनोद्भूतसंवेगवेगतः ॥ वैराग्यमार्गपतितं चारित्रवहनं श्रिताः ॥४९॥ सद्भावनाख्य
मंजूषान्यस्तसच्चित्तरत्नतः ॥ यथाऽविघ्नेन गच्छंति निर्वाणनगरं बुधाः ॥५०॥ पंचभिः कुलकम् ॥ यथा च मोहपल्लीशे लब्धव्यतिकरे
सति ॥ संसारनाटकोच्छेदाशंकापंकाविले मुहुः ॥ ५१ ॥ सज्जीकृतस्वीयभटे नावं दुर्बुद्धिनामिकाम् ॥ श्रिते दुर्नीतिनौवृंदा-
रूढशेषभटान्विते ॥५२॥ आगच्छत्यथ धर्मेशभटौघे रणमंडपम् ॥ तत्त्वचिंतादिनाराचसज्जीभूते समाश्रिते ॥५३॥ मिथोलग्ने
रणावेशे सम्यग्दर्शनमंत्रिणा ॥ मिथ्यात्वमंत्री विषमां प्राप्यते चरमां दशाम् ॥५४॥ चतुर्भिः कुलकम् ॥ लीलयैव निरुध्यंते कषाय
चराट अपि ॥ प्रशमादिमहायोधैः शीलेन स्मरतस्करः ॥५५॥ हास्यादिषट्ककलुंटाकवृंदं वैराग्यसेनया ॥ निद्रादयश्च ताड्यंते
श्रुतोद्योगादिभिर्भटैः ॥ ५६ ॥ भटाभ्यां धर्म्यशुक्लाभ्यामार्तरौद्राभिधौ भटौ ॥ निग्रहेणेंद्रियाणां च जीयते ह्यागसंयमः ॥
॥ ५७ ॥ क्षयोपशमतश्चक्षुर्दर्शनावरणादयः ॥ नश्यत्यसातसैन्यं च पुण्योदयपराक्रमात् ॥ ५८ ॥ सह द्वेषगजेंद्रेण रागकेस-
रिणा तथा ॥ सुतेन मोहभूपोऽपि धर्मभूपेन हन्यते ॥ ५९ ॥ ततः प्राप्तमहानंदा धर्म्मभूपप्रसादतः ॥ यथा कृतार्था जा-
यंते साधवो व्यवहारिणः ॥ ६० ॥ विचिंतयेत्तथा सर्वं धर्मध्याननिविष्टधीः ॥ ईदृगन्यदपि न्यस्तमर्थजातं यदागमे ॥६१॥
मनसश्चेंद्रियाणां च जयाद्यो निर्विकारधीः ॥ धर्मध्यानस्य स ध्याता शांतो दांतः प्रकीर्तितः ॥ ६२ ॥ परैरपि यदिष्टं च
स्थितप्रज्ञस्य लक्षणम् ॥ घटते ह्यत्र तत्सर्वं तथा चेदं व्यवस्थितम् ॥ ६३ ॥ प्रजहाति यदा कामान् सर्वान् पार्थ मनोग-
तान् ॥ आत्मन्येवात्मना तुष्टः स्थितप्रज्ञस्तदोच्यते ॥ ६४ ॥ दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः ॥ वीतरागभयक्रोधः

स्थितधीर्मुनिरुच्यते ॥ ६५ ॥ यः सर्वत्रानभिस्नेहस्तत्तत्प्राप्य शुभाशुभम् ॥ नाभिनंदति न द्वेष्टि तस्य प्रज्ञा प्रतिष्ठिता॥६६॥
यदा संहरते चायं कूर्मोऽगानीव सर्वशः ॥ इंद्रियाणींद्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता ॥ ६७ ॥ शांतो दांतो भवेदीदृगा-
त्मारामतया स्थितः ॥ सिद्धस्य हि स्वभावो यः सैव साधकयोग्यता ॥ ६८ ॥ ध्यातायमेव शुक्लस्याप्रमत्तः पादयोर्द्वयोः ॥
पूर्वविद् योग्ययोगी च केवली परयोस्तयोः ॥ ६९ ॥ अनित्यत्वाद्यनुप्रेक्षा ध्यानस्योपरमेऽपि हि ॥ भावयेन्नित्यमभ्रांतः प्राणा
ध्यानस्य ताः खलु ॥ ७० ॥ तीव्रादिभेदभाजः स्युर्लेश्यास्तिस्र इहोत्तराः ॥ लिंगान्यत्रागमश्रद्धा विनयः सद्गुणस्तुतिः ॥७१॥
शीलसंयमयुक्तस्य ध्यायतो धर्म्यमुत्तमम् ॥ स्वर्गप्राप्तिं फलं प्राहुः प्रौढपुण्यानुबंधिनीम् ॥ ७२ ॥ ध्यायेच्छुक्लमथ क्षांतिमृदु-
त्वार्जवमुक्तिभिः ॥ छद्मस्थोऽणौ मनो धृत्वा व्यपनीय मनो जिनः ॥ ७३ ॥ सवितर्कं सविचारं सपृथक्त्वं तदादिमम् ॥
नानानयाश्रितं तत्र वितर्कः पूर्वगं श्रुतम् ॥ ७४ ॥ अर्थव्यंजनयोगानां विचारोऽन्योन्यसंक्रमः ॥ पृथक्त्वं द्रव्यपर्यायगुणां-
तरगतिः पुनः ॥ ७५ ॥ त्रियोगयोगिनः साधोर्वितर्काद्यन्वितं ह्यदः ॥ ईषच्चलतरंगाऽब्धेः क्षोभाभावदशानिभम् ॥ ७६ ॥
एकत्वेन वितर्केण विचारेण च संयुतम् ॥ निर्वातस्थप्रदीपाभं द्वितीयं त्वेकपर्ययम् ॥ ७७ ॥ सूक्ष्मक्रियानिवृत्त्याख्यं तृतीयं
तु जिनस्य तत् ॥ अर्धरुद्धांगयोगस्य रुद्धयोगद्वयस्य च ॥ ७८॥ तुरीयं तु समुच्छिन्नक्रियमप्रतिपाति तत् ॥ शैलवन्निष्प्रकं-
पस्य शैलेश्यां विश्ववेदिनः ॥ ७९ ॥ एतच्चतुर्विधं शुक्लध्यानमत्र द्वयोः फलम् ॥ आद्ययोः सुरलोकाप्तिरंत्ययोस्तु महोदयः
॥ ८० ॥ आश्रवापायसंसारानुभावभवसंततीः ॥ अर्थे विपरिणामं वानुपश्येच्छुक्लविश्रमे ॥ ८१ ॥ द्वयोः शुक्ला तृतीये च ॥ २१ ॥
लेश्या सा परमा मता ॥ चतुर्थशुक्लभेदस्तु लेश्यातीतः प्रकीर्तितः ॥ ८२ ॥ लिंगं निर्मलयोगस्य शुक्लध्यानवतोऽवधः ॥

असंमोहो विवेकश्च व्युत्सर्गश्चाभिधीयते ॥ ८३ ॥ अवधाऽुपसर्गेभ्यः कंपते न बिभेति च ॥ असंमोहान्न सूक्ष्मार्थे माया-
स्वपि च मुह्यति ॥ ८४ ॥ विवेकात्सर्वसंयोगाद्भिन्नमात्मानमीक्षते ॥ देहोपकरणासंगो व्युत्सर्गाज्जायते मुनिः ॥ ८५ ॥ एत-
ध्यानक्रमं शुद्धं मत्वा भगवदाज्ञया ॥ यः कुर्यादेतदभ्यासं संपूर्णाध्यात्मविद्भवेत् ॥ ८६ ॥ ॥ ॥

॥ इति ध्यानाधिकारः ॥ १६

॥ यत्र गच्छति परं परिपाकं पाकशासनपदं तृणकल्पम् ॥ स्वप्रकाशसुखबोधमयं तद्ध्यानमेव भवनाशि भजध्वम् ॥ १ ॥
आतुरैरपि जडैरपि साक्षात् सुत्यजा हि विषया न तु रागः ॥ ध्यानवांस्तु परमद्युतिदर्शी तृप्तिमाप्य न तमृच्छति भूयः ॥२॥
या निशा सकलभूतगणानां ध्यानिनो दिनमहोत्सव एषः ॥ यत्र जाग्रति च तेऽभिनिविष्टा ध्यानिनो भवति तत्र सुषुप्तिः
॥ ३ ॥ संप्लुतोदकमिवांधुजलानां सर्वतः सकलकर्म्मफलानाम् ॥ सिद्धिरस्ति खलु यत्र तदुच्चैर्ध्यानमेव परमार्थनिदानम्
॥ ४ ॥ बाध्यते न हि कषायसमुत्थैर्मानसैर्न ततभूपनमद्भिः ॥ अत्यनिष्टविषयैरपि दुःखैर्ध्यानवान्निभृतमात्मनि लीनः ॥ ५ ॥
स्पष्टदृष्टसुखसंभृतमिष्टं ध्यानमस्तु शिवशर्मगरिष्ठम् ॥ नास्तिकस्तु निहतो यदि न स्यादेवमादिनयवाङ्मयदंभात् ॥ ६ ॥
यत्र नार्कविधुतारकदीपज्योतिषां प्रसरतामवकाशः ॥ ध्यानभिन्नतमसां मुदितात्मज्योतिषां तदपि भाति रहस्यम् ॥ ७ ॥
योजयत्यमितकालवियुक्तां प्रेयसीं शमरतिं त्वरितं यत् ॥ ध्यानमित्रमिदमेव मतं नः किं परैर्जगति कृत्रिममित्रैः ॥ ८ ॥
वारितस्मरबलातपचारे शीलशीतलसुगंधिनिवेशे ॥ उच्छ्रिते प्रशमतल्पनिविष्टो ध्यानधाम्नि लभते सुखमात्मा ॥ ९ ॥ शील-

---

१ नतनूपनमद्भिः इति पाठांतरम् ।

विष्टरदमोदकपाद्यप्रातिजार्घशमतामधुपर्कैः ॥ ध्यानधाम्नि जवति स्फुटमात्माहूतपूतपरमातिथिपूजा ॥ १० ॥ आत्मनो हि परमात्मनि योऽनूझेदबुद्धिकृत एव विवादः ॥ ध्यानसंधिकृदमुं व्यपनीय झागजेदमनयोर्वितनोति ॥ ११ ॥ क्वामृतं विषजृते फणिलोके क्व च्यियिण्यपि विधौ त्रिदिवे वा ॥ क्वाप्सरोरतिमतां त्रिदशानां ध्यान एव तदिदं बुधपेयम् ॥ १२ ॥ गोस्तनीषु न सितासु सुधायां नापि नापि वनिताधरबिंबे ॥ तं रसं कमपि वेत्ति मनस्वी ध्यानसंजवधृतौ प्रथते यः ॥ १३ ॥ इत्यवेत्य मनसा परिपक्वध्यानसंजवफले गरिमाणम् ॥ तत्र यस्य रतिरेनमुपैति प्रौढधामजृतमाशु यशःश्रीः ॥ १४ ॥ ॥ ॥

॥ इति ध्यानस्तुत्यधिकारः ॥ १७

॥ आत्मज्ञानफलं ध्यानमात्मज्ञानं च मुक्तिदम् । आत्मज्ञानाय तन्नित्यं यत्नः कार्यो महात्मना ॥ १ ॥ ज्ञाते ह्यात्मनि नो जूयो ज्ञातव्यमवशिष्यते ॥ अज्ञाते पुनरेतस्मिन् ज्ञानमन्यन्निरर्थकम् ॥ २ ॥ नवानामपि तत्त्वानां ज्ञानमात्मप्रसिद्धये ॥ येनाजीवादयो जावाः स्वजेदप्रतियोगिनः ॥ ३ ॥ श्रुतो ह्यात्मपराजेदोऽनुजूतः संस्तुतोऽपि वा ॥ निसर्गादुपदेशाद्वा वेत्ति जेदं तु कश्चन ॥ ४ ॥ तदेकत्वपृथक्त्वाज्यामात्मज्ञानं हितावहम् ॥ वृथैवाजिनिविष्टानामन्यथा धीर्विडंबना ॥ ५ ॥ एक एव हि तत्रात्मा स्वजावसमवस्थितः ॥ ज्ञानदर्शनचारित्रलक्षणः प्रतिपादितः ॥ ६ ॥ प्रजानैर्मल्यशक्तीनां यथा रत्नान्न जिन्नता ॥ ज्ञानदर्शनचारित्रलक्षणानां तथात्मनः ॥७ ॥ आत्मनो लक्षणानां च व्यवहारो हि जिन्नताम् ॥ षष्ठ्यादिव्यपदेशेन मन्यते न तु निश्चयः ॥ ८ ॥ घटस्य रूपमित्यत्र यथा जेदो विकल्पजः ॥ आत्मनश्च गुणानां च तथा जेदो न तात्त्विकः ॥ ९ ॥ शुद्धं यदात्मनो रूपं निश्चयेनानुजूयते ॥ व्यवहारो जिदाद्वारानुजावयति तत्परम् ॥ १० ॥ वस्तुतस्तु गुणानां

तद्रूपं न स्वात्मनः पृथक् ॥ आत्मा स्यादन्यथाऽनात्मा ज्ञानाद्यपि जडं भवेत् ॥ ११ ॥ चैतन्यपरसामान्यात् सर्वेषामेक-
तात्मनाम् ॥ निश्चिता कर्मजनितो भेदः पुनरुपप्लवः ॥ १२ ॥ मन्यते व्यवहारस्तु भूतग्रामादिभेदतः ॥ जन्मादेश्च व्यव-
स्थातो मिथो नानात्वमात्मनाम् ॥ १३ ॥ न चैतन्निश्चये युक्तं भूतग्रामो यतोऽखिलः ॥ नामकर्मप्रकृतिजः स्वभावो नात्मनः
पुनः ॥ १४ ॥ जन्मादिकोऽपि नियतः परिणामो हि कर्मणाम् ॥ न च कर्मकृतो भेदः स्यादात्मन्यविकारिणि ॥ १५ ॥
आरोप्य केवलं कर्म कृतां विकृतिमात्मनि ॥ भ्रमंति भ्रष्टविज्ञाना भीमे संसारसागरे ॥ १६ ॥ उपाधिभेदजं भेदं वेत्त्यज्ञः
स्फटिके यथा ॥ तथा कर्मकृतं भेदमात्मन्येवाभिमन्यते ॥ १७ ॥ उपाधिकर्मजो नास्ति व्यवहारस्त्वकर्मणः ॥ इत्यागम-
वचो लुप्तमात्मवैरूप्यवादिना ॥ १८ ॥ एकक्षेत्रस्थितोऽप्येति नात्मा कर्मगुणान्वयम् ॥ तथाभव्यस्वभावत्वाच्छुद्धो धर्मास्ति-
कायवत् ॥ १९ ॥ यथा तैमिरिकश्चंद्रमप्येकं मन्यते द्विधा ॥ अनिश्चयकृतोन्मादस्तथात्मानमनेकधा ॥ २० ॥ यथानुभूयते
ह्येकं स्वरूपास्तित्वमन्वयात् ॥ सादृश्यास्तित्वमप्येकमविरुद्धं तथात्मनाम् ॥ २१ ॥ सदसद्वादपिशुनात् संगोप्य व्यवहारतः ॥
दर्शयत्येकतारत्नं सतां शुद्धनयः सुहृत् ॥ २२ ॥ नृनारकादिपर्यायैरप्युत्पन्नविनश्वरैः ॥ भिन्नैर्जहाति नैकत्वमात्मद्रव्यं सदा-
न्वयि ॥ २३ ॥ यथैकं हेम केयूरकुंडलादिषु वर्त्तते ॥ नृनारकादिभावेषु तथात्मैको निरंजनः ॥ २४ ॥ कर्मणस्ते हि पर्याया
नात्मनः शुद्धसाक्षिणः ॥ कर्म क्रियास्वभावं यदात्मात्वजस्वभाववान् ॥ २५ ॥ नाणूनां कर्मणो वासौ भवसर्गः स्वभावजः ॥
एकैकविरहेऽभावान्न च तत्त्वांतरं स्थितम् ॥ २६ ॥ श्वेतद्रव्यकृतं श्वैत्यं भित्तिभागे यथा द्वयोः ॥ भात्यनंतर्भवन्नून्यं प्रपं-
चोऽपि तथेक्ष्यताम् ॥ २७ ॥ यथा स्वप्नावबुद्धोऽर्थो विबुद्धेन न दृश्यते ॥ व्यवहारमतः सर्गो ज्ञानिना न तथेक्ष्यते ॥ २८ ॥

मध्याह्ने मृगतृष्णायां पयःपूरो यथेक्ष्यते ॥ तथा संयोगजः सर्गो विवेकाख्यातिविप्लवे ॥ २९ ॥ गंधर्वनगरादीनामंबरे ऽंबरो यथा ॥ तथा संयोगजः सर्वो विलासो वितथाकृतिः ॥ ३० ॥ इति शुद्धनयायत्तमेकत्वं प्राप्तमात्मनि ॥ अंशादिकल्पनाप्यस्य नेष्टा यत्पूर्णवादिनः ॥ ३१ ॥ एक आत्मेति सूत्रस्याप्ययमेवाशयो मतः ॥ प्रत्यग्ज्योतिषमात्मानमाहुः शुद्धनयाः खलु ॥ ३२ ॥ प्रपंचसंचयक्लिष्टान्मायारूपाद्बिभेमि ते ॥ प्रसीद भगवन्नात्मन् शुद्धरूपं प्रकाशय ॥ ३३॥ देहेन सममेकत्वं मन्यते व्यवहारवित् ॥ कथंचिन्मूर्ततापत्तेर्वेदनादिसमुद्भवात् ॥ ३४ ॥ तन्निश्चयो न सहते यदमूर्त्तो न मूर्त्तताम् ॥ अंशेनाप्यवगाहेत पावकः शीततामिव ॥ ३५ ॥ उष्णस्याग्नेर्यथा योगाद् घृतमुष्णमिति भ्रमः ॥ तथा मूर्त्तांगसंबंधादात्मा मूर्त्त इति भ्रमः ॥ ३६ ॥ न रूपं न रसो गंधो न न स्पर्शो न चाकृतिः ॥ यस्य धर्मो न शब्दो वा तस्य का नाम मूर्त्तता ॥ ३७ ॥ दृशादृश्यं हृदाग्राह्यं वाचामपि न गोचरः ॥ स्वप्रकाशं हि यद्रूपं तस्य का नाम मूर्त्तता ॥ ३८ ॥ आत्मा सत्यचिदानंदः सूक्ष्मात्सूक्ष्मः परात्परः ॥ स्पृशत्यपि न मूर्त्तत्वं तथा चोक्तं परैरपि ॥ ३९ ॥ इंद्रियाणि पराण्याहुरिंद्रियेभ्यः परं मनः ॥ मनसोऽपि परा बुद्धिर्यो बुद्धेः परतस्तु सः ॥ ४० ॥ विकले हंत लोकेऽस्मिन्नमूर्त्ते मूर्त्तताभ्रमात् ॥ पश्यत्याश्चर्यवद् ज्ञानी वदत्याश्चर्यवद्वचः ॥ ४१ ॥ वेदनापि न मूर्त्तत्वनिमित्ता स्फुटमात्मनः ॥ पुद्गलानां तदापत्तेः किं त्वशुद्धस्वशक्तिजा ॥ ४२ ॥ अंद्धधारा यथा ज्ञानं स्वयं परिणमत्ययम् ॥ तथेष्टानिष्टविषयस्पर्शद्वारेण वेदनाम् ॥ ४३ ॥ विपाककालं प्राप्यासौ वेदनापरिणामभाक् ॥ मूर्त्तं निमित्तमात्रं नो घटे दंडवदन्वयि ॥ ४४ ॥ ज्ञानाख्या चेतना बोधः कर्माख्या द्विष्टरक्तता ॥ जंतोः कर्मफलाख्या सा वेदना व्यपदिश्यते ॥ ४५ ॥ नात्मा तस्मादमूर्त्तत्वं चैतन्यं चातिवर्तते ॥ अतो देहेन नैकत्वं तस्य मूर्त्तेन

कर्हिचित् ॥ ४६ ॥ सन्निकृष्टान्मनोवाणीकर्मादेरपि पुद्गलात् ॥ विप्रकृष्टाद्धनादेश्च भाव्यैवं भिन्नतात्मनः॥ ४७ ॥ पुद्गलानां गुणो मूर्त्तिरात्मा ज्ञानगुणः पुनः ॥ पुद्गलेभ्यस्ततो भिन्नमात्मद्रव्यं जगुर्जिनाः ॥ ४८ ॥ धर्मस्य गतिहेतुत्वं गुणो ज्ञानं तथात्मनः ॥ धर्मास्तिकायात्तद्भिन्नमात्मद्रव्यं जगुर्जिनाः ॥ ४९ ॥ अधर्मे स्थितिहेतुत्वं गुणो ज्ञानगुणोऽसुमान् ॥ ततोऽधर्मास्तिकायान्यमात्मद्रव्यं जगुर्जिनाः ॥ ५० ॥ अवगाहो गुणो व्योम्नो ज्ञानं खल्वात्मनो गुणः ॥ व्योमास्तिकायात्तद्भिन्नमात्मद्रव्यं जगुर्जिनाः ॥ ५१ ॥ आत्मा ज्ञानगुणः सिद्धः समयो वर्त्तनागुणः ॥ तद्भिन्नं समयद्रव्यादात्मद्रव्यं जगुर्जिनाः ॥ ५२ ॥ आत्मनस्तदजीवेभ्यो विभिन्नत्वं व्यवस्थितम् ॥ व्यक्तिभेदनयादेशादजीवत्वमपीष्यते ॥ ५३ ॥ अजीवा जन्मिनः शुद्धभावप्राणव्यपेक्षया ॥ सिद्धाश्च निर्मलज्ञाना द्रव्यप्राणव्यपेक्षया ॥ ५४ ॥ इंद्रियाणि बलं श्वासोच्छ्वासो ह्यायुस्तथा परम् ॥ द्रव्यप्राणाश्चतुर्भेदाः पर्यायाः पुद्गलाश्रिताः ॥ ५५ ॥ भिन्नास्ते ह्यात्मनोऽत्यंतं तदेतैर्नास्ति जीवनम्॥ ज्ञानवीर्यसदाश्वासनित्यस्थितिविकारिभिः ॥ ५६ ॥ एतत्प्रकृतिभूताभिः शाश्वतीभिस्तु शक्तिभिः ॥ जीवत्यात्मा सदेत्येषा शुद्धद्रव्यनयस्थितिः ॥ ५७ ॥ जीवो जीवति न प्राणैर्विना तैरेव जीवति ॥ इदं चित्रं चरित्रं के हंत पर्यनुयुंजताम् ॥ ५८ ॥ नात्मा पुण्यं नवा पापमेते यत्पुद्गलात्मके ॥ आद्यबालशरीरस्योपादानत्वेन कल्पिते ॥ ५९ ॥ पुण्यं कर्म शुभं प्रोक्तमशुभं पापमुच्यते ॥ तत्कथं तु शुभं जंतून् यत् पातयति जन्मनि ॥ ६० ॥ न ह्यायसस्य बंधस्य तपनीयमयस्य च ॥ पारतंत्र्याविशेषेण फलभेदोऽस्ति कश्चन ॥ ६१ ॥ फलाभ्यां सुखदुःखाभ्यां न भेदः पुण्यपापयोः ॥ दुःखान्न भिद्यते हंत यतः पुण्यफलं सुखम् ॥ ६२ ॥ सर्वपुण्यफलं दुःखं कर्मोदयकृतत्वतः ॥ तत्र दुःखप्रतीकारे विमूढानां सुखत्वधीः ॥ ६३ ॥ परिणामाच्च तापाच्च संस्काराच्च

बुधैर्मतम् ॥ गुणवृत्तिविरोधाच्च दुःखं पुण्यभवं सुखम् ॥ ६४ ॥ देहपुष्टेर्नरामर्त्यनायकानामपि स्फुटम् ॥ महाजपोषणस्येव
परिणामोऽतिदारुणः ॥ ६५ ॥ जलूकाः सुखमानिन्यः पिबंत्यो रुधिरं यथा ॥ भुंजाना विषयान् यांति दशामंतेऽतिदारु-
णाम् ॥ ६६ ॥ तीव्राग्निसंगसंशुष्यत्पयसामयसामिव ॥ यत्रौत्सुक्यात्सदाक्षाणां तप्तता तत्र किं सुखम् ॥ ६७ ॥ प्राक्पश्चा-
च्चारतिस्पर्शात्पुटपाकमुपेयुषि ॥ इंद्रियाणां गणे तापव्याप एव न निर्वृतिः ॥ ६८ ॥ सदा यत्र स्थितो द्वेषोल्लेखः स्वप्रतिपं-
थिषु ॥ सुखानुभवकालेऽपि तत्र तापहतं मनः ॥ ६९ ॥ स्कंधात् स्कंधांतरारोपे भारस्येव न तत्त्वतः ॥ अक्षाल्हादेऽपि
दुःखस्य संस्कारो विनिवर्त्तते ॥ ७० ॥ सुखं दुःखं च मोहश्च तिस्रोऽपि गुणवृत्तयः ॥ विरुद्धा अपि वर्त्तंते दुःखजात्यन-
तिक्रमात् ॥ ७१ ॥ क्रुद्धनागफणाभोगोपमो भोगोद्भवोऽखिलः ॥ विलासश्चित्ररूपोऽपि भयहेतुर्विवेकिनाम् ॥ ७२ ॥ इत्थ-
मेकत्वमापन्नं फलतः पुण्यपापयोः ॥ मन्यते यो न मूढात्मा नांतस्तस्य भवोदधेः ॥ ७३ ॥ दुःखैकरूपयोर्भिन्नस्तेनात्मा पुण्य-
पापयोः ॥ शुद्धनिश्चयतः सत्यचिदानंदमयः सदा ॥ ७४ ॥ तत् तुरीयदशाव्यंग्यरूपमावरणक्षयात् ॥ भात्युष्णोद्योतशीलस्य
घननाशाद्रवेरिव ॥ ७५ ॥ जायंते जाग्रतोऽक्षेभ्यश्चित्राधिसुखवृत्तयः ॥ सामान्यं तु चिदानंदरूपं सर्वदशान्वयि ॥ ७६ ॥
स्फुलिंगैर्न यथा वह्निर्दीप्यते ताप्यतेऽथवा ॥ नानुभूतिपराभूती तथैताभिः किलात्मनः ॥७७॥ साक्षिणः सुखरूपस्य सुषुप्तौ
निरहंकृतम् ॥ यथा भानं तथा शुद्धविवेके तदतिस्फुटम् ॥ ७८ ॥ तच्चिदानंदभावस्य भोक्तात्मा शुद्धनिश्चयात् ॥ अशुद्ध-
निश्चयात्कर्म्मकृतयोः सुखदुःखयोः ॥ ७९ ॥ कर्मणोऽपि च भोगस्य स्रगादेर्व्यवहारतः ॥ नैगमादिव्यवस्थापि भावनीया-
ऽनया दिशा ॥ ८० ॥ कर्त्तापि शुद्धभावानामात्मा शुद्धनयाद्विभुः ॥ प्रतीत्य वृत्तिं यच्छुद्धक्षणानामेष मन्यते ॥ ८१ ॥

अनुपप्लवसाम्राज्ये विसभागपरिक्षये ॥ आत्मा शुद्धस्वभावानां जननाय प्रवर्त्तते ॥ ८२ ॥ चित्तमेव हि संसारो रागादि-
क्लेशवासितम् ॥ तदेव तैर्विनिर्मुक्तं भवांत इति कथ्यते ॥ ८३ ॥ यश्च चित्तक्षणः क्लिष्टो नासावात्मा विरोधतः ॥ अनन्य-
विकृतं रूपमित्यन्वर्थं ह्यदः पदम् ॥ ८४ ॥ श्रुतवानुपयोगश्चेत्येतन्मिथ्या यथा वचः ॥ तथात्मा शुद्धरूपश्चेत्येवं शब्दनया
जगुः ॥ ८५ ॥ शुद्धपर्यायरूपस्तदात्मा शुद्धः स्वभावकृत् ॥ प्रथमाप्रथमत्वादिभेदोऽप्येवं हि तात्त्विकः ॥ ८६ ॥ ये तु
दिक्पटदेशीयाः शुद्धद्रव्यतयात्मनः ॥ शुद्धस्वभावकर्तृत्वं जगुस्तेऽपूर्वबुद्धयः ॥ ८७ ॥ द्रव्यास्तिकस्य प्रकृतिः शुद्धा संग्रह-
गोचरा ॥ येनोक्ता संमतौ श्रीमत्सिद्धसेनदिवाकरैः ॥ ८८ ॥ तन्मते च न कर्तृत्वं भावानां सर्वदान्वयात् ॥ कूटस्थः केवलं
तिष्ठत्यात्मा साक्षित्वमाश्रितः ॥ ८९ ॥ कर्त्तुं व्याप्रियते नायमुदासीन इव स्थितः ॥ आकाशमिव पंकेन लिप्यते न च
कर्मणा ॥ ९० ॥ स्वरूपं तु न कर्त्तव्यं ज्ञातव्यं केवलं स्वतः ॥ दीपेन दीप्यते ज्योतिर्न त्वपूर्वं विधीयते ॥ ९१ ॥ अन्यथा
प्रागनात्मा स्यात्स्वरूपाननुवृत्तितः ॥ न च हेतुसहस्रेणाप्यात्मता स्यादनात्मनः ॥ ९२ ॥ नये तेनेह नो कर्त्ता किं त्वात्मा
शुद्धभावभृत् ॥ उपचारात्तु लोकेषु तत्कर्तृत्वमपीष्यताम् ॥ ९३ ॥ उत्पत्तिमात्मधर्माणां विशेषग्राहिणो जगुः ॥ अव्यक्ति-
रावृतेस्तेषां नाभावादिति का प्रमा ॥ ९४ ॥ सत्त्वं च परसंताने नोपयुक्तं कथंचन ॥ संतानिनामनित्यत्वात्संतानोऽपि न च
ध्रुवः ॥ ९५ ॥ व्योमाप्युत्पत्तिमत्तत्तदवगाहात्मना ततः ॥ नित्यता नात्मधर्माणां तद्दृष्टांतबलादपि ॥ ९६ ॥ ऋजुसूत्रनय-
स्तत्र कर्तृतां तस्य मन्यते ॥ स्वयं परिणमत्यात्मा यं यं भावं यदा यदा ॥ ९७ ॥ कर्तृत्वं परभावानामसौ, नाभ्युपगच्छति ॥
क्रियाद्वयं हि नैकस्य द्रव्यस्याभिमतं जिनैः ॥ ९८ ॥ भूतिर्या हि क्रिया सैव स्यादेकद्रव्यसंततौ ॥ न साजात्यं विना च

स्यात् परद्रव्यगुणेषु सा ॥ ९९ ॥ नन्वेवमन्यभावाना न चेत्कर्त्ता परो जनः ॥ तदा हिंसादयादानहरणाद्यन्यवस्थितिः
॥ १०० ॥ सत्यं पराश्रयं न स्यात् फलं कस्यापि यद्यपि ॥ तथापि स्वगतं कर्म स्वफलं नातिवर्त्तते ॥ १०१ ॥ हिनस्ति न
परं कोपि निश्चयान्न च रक्षति ॥ तदायुःकर्मणो नाशे मृतिर्जीवनमन्यथा ॥ १०२ ॥ हिंसादयाविकल्पाभ्यां स्वगताभ्यां
तु केवलम् ॥ फलं विचित्रमाप्नोति परापेक्षां विना पुमान् ॥ १०३ ॥ शरीरी म्रियतां मा वा ध्रुवं हिंसा प्रमादिनः ॥ दयैव
यतमानस्य वधेऽपि प्राणिनां क्वचित् ॥ १०४ ॥ परस्य युज्यते दानं हरणं वा न कस्यचित् ॥ न धर्मसुखयोर्यत्ते कृतनाशा-
दिदोषतः ॥ १०५ ॥ भिन्नाभ्यां भक्तवित्तादिपुद्गलाभ्यां च ते कुतः ॥ स्वत्वापत्तिर्यतो दानं हरणं स्वत्वनाशनम् ॥ १०६ ॥
कर्मोदयाच्च तद्दानं हरणं वा शरीरिणाम् ॥ पुरुषाणां प्रयासः कस्तत्रोपनमति स्वतः ॥ १०७ ॥ स्वगताभ्यां तु भावाभ्यां
केवलं दानचौर्ययोः ॥ अनुग्रहोपघातौ स्तः परापेक्षा परस्य न ॥ १०८ ॥ पराश्रितानां भावानां कर्तृत्वाद्यभिमानतः ॥
कर्मणा बध्यतेऽज्ञानी ज्ञानवांस्तु न लिप्यते ॥ १०९ ॥ कर्त्तैवमात्मा नो पुण्यपापयोरपि कर्मणोः ॥ रागद्वेषाशयानां तु कर्त्ते-
ष्टानिष्टवस्तुषु ॥ ११० ॥ रज्यते द्वेष्टि वार्थेषु तत्तत्कार्यविकल्पतः ॥ आत्मा यदा तदा कर्म भ्रमादात्मनि युज्यते ॥ १११ ॥
स्नेहाभ्यक्ततनोरंगं रेणुनाश्लिष्यते यथा ॥ रागद्वेषानुविद्धस्य कर्मबंधस्तथा मतः ॥ ११२ ॥ आत्मा न व्यापृतस्तत्र राग-
द्वेषाशयं सृजन् ॥ तन्निमित्तोपनम्रेषु कर्मोपादानकर्मसु ॥ ११३ ॥ लोहं स्वक्रिययाभ्येति भ्रामकोपलसंनिधौ ॥ यथा कर्म
तथा चित्रं रक्तद्विष्टात्मसंनिधौ ॥ ११४ ॥ वारि वर्षन् यथांभोदो धान्यवर्षी निगद्यते ॥ भावकर्म सृजन्नात्मा तथा पुद्गल-
कर्मकृत् ॥ ११५ ॥ नैगमव्यवहारौ तु ब्रूतः कर्मादिकर्तृताम् ॥ व्यापारः फलपर्यंतः परिदृष्टो यदात्मनः ॥ ११६ ॥ अन्यो-

न्यानुगतानां का तदेतदिति वा भिदा ॥ यावच्चरमपर्यायं यथा पानीयदुग्धयोः ॥ ११७ ॥ नात्मनो विकृतिं दत्ते तदेषा
नयकल्पना ॥ शुद्धस्य रजतस्येव शुक्तिधर्मप्रकल्पना ॥ ११८ ॥ मुषितत्वं यथा पांथगतं पथ्युपचर्यते ॥ तथा पुद्गलकर्मस्था
विक्रियात्मनि बालिशैः ॥ ११९ ॥ कृष्णः शोणोऽपि चोपाधेर्नाशुद्धः स्फटिको यथा ॥ रक्तो द्विष्टस्तथैवात्मा संसर्गात्पुण्य-
पापयोः ॥ १२० ॥ सेयं नटकला तावद् यावद्विविधकल्पना ॥ यद्रूपं कल्पनातीतं तत्तु पश्यत्यकल्पकः ॥ १२१ ॥ कल्प-
नामोहितो जंतुः शुक्लं कृष्णं च पश्यति ॥ तस्यां पुनर्विलीनायामशुक्लाकृष्णमीक्षते ॥ १२२ ॥ तद्ध्यानं सा स्तुतिर्भक्तिः
सैवोक्ता परमात्मनः ॥ पुण्यपापविहीनस्य यद्रूपस्यानुचिंतनम् ॥ १२३ ॥ शरीररूपलावण्यवप्रछत्रध्वजादिभिः ॥ वर्णितैर्वी-
तरागस्य वास्तवी नोपवर्णना ॥ १२४ ॥ व्यवहारस्तुतिः सेयं वीतरागात्मवर्त्तिनाम् ॥ ज्ञानादीनां गुणानां तु वर्णना निश्च-
यस्तुतिः ॥ १२५ ॥ पुरादिवर्णनाद्राजा स्तुतः स्यादुपचारतः ॥ तत्त्वतः शौर्यगांभीर्यधैर्यादिगुणवर्णनात् ॥ १२६ ॥ मुख्यो-
पचारधर्माणामविभागेन या स्तुतिः ॥ न सा चित्तप्रसादाय कवित्वं कुकवेरिव ॥ १२७ ॥ अन्यथाभिनिवेशेन प्रत्युतानर्थ-
कारिणी ॥ सुतीक्ष्णखड्गधारेव प्रमादेन करे धृता ॥ १२८ ॥ मणिप्रभामणिज्ञानन्यायेन शुभकल्पना ॥ वस्तुस्पर्शितया
न्याय्या यावन्नानंजनप्रथा ॥ १२९ ॥ पुण्यपापविनिर्मुक्तं तत्त्वतस्त्वविकल्पकम् ॥ नित्यं ब्रह्म सदा ध्येयमेषा शुद्धनयस्थितिः
॥ १३० ॥ आश्रवः संवरश्चापि नात्मा विज्ञानलक्षणः ॥ यत्कर्मपुद्गलादानरोधावाश्रवसंवरौ ॥ १३१ ॥ आत्मादत्ते तु यै-
र्भावैः स्वतंत्रः कर्मपुद्गलान् ॥ मिथ्यात्वाविरती योगाः कषायास्तेऽतराश्रवाः ॥ १३२ ॥ भावनाधर्मचारित्रपरीषहजया-
दयः ॥ आश्रवोच्छेदिनो धर्मा आत्मनो भावसंवराः ॥ १३३ ॥ आश्रवः संवरो न स्यात्संवरश्चाश्रवः क्वचित् ॥ भवमोक्षफ-

लाभेदोऽन्यथा स्याद्धेतुसंकरात् ॥ १३४ ॥ कर्माश्रवं च संवृण्वन्नात्मा भिन्नैर्निजाशयैः ॥ करोति न परापेक्षामलंभूष्णुः
स्वतः सदा ॥ १३५ ॥ निमित्तमात्रभूतास्तु हिंसाऽहिंसादयोऽखिलाः ॥ ये परप्राणिपर्याया न ते स्वफलहेतवः ॥ १३६ ॥
व्यवहारविमूढस्तु हेतूंस्तानेव मन्यते ॥ बाह्यक्रियारतस्वांतस्तत्त्वं गूढं न पश्यति ॥ १३७ ॥ हेतुत्वं प्रतिपद्यंते नैवैतेऽनि-
यमस्पृशः ॥ यावंत आश्रवाः प्रोक्तास्तावंतो हि परिश्रवाः ॥ १३८ ॥ तस्मादनियतं रूपं बाह्यहेतुषु सर्वथा ॥ नियतौ भा-
ववैचित्र्यादात्मैवाश्रवसंवरौ ॥ १३९ ॥ अज्ञानाद्विषयासक्तो बध्यते विषयैस्तु न ॥ ज्ञानाद्विमुच्यते चात्मा न तु शास्त्रा-
दिपुद्गलात् ॥ १४० ॥ शास्त्रं गुरोश्च विनयं क्रियामावश्यकानि च ॥ संवरांगतया प्राहुर्व्यवहारविशारदाः ॥ १४१ ॥ वि-
शिष्टा वाक्तनुस्वांतपुद्गलास्तेऽफलावहाः ॥ ये तु ज्ञानादयो भावाः संवरत्वं प्रयांति ते ॥ १४२ ॥ ज्ञानादिभावयुक्तेषु शुभ-
योगेषु तद्गतम् ॥ संवरत्वं समारोप्य स्मयंते व्यवहारिणः ॥ १४३ ॥ प्रशस्तरागयुक्तेषु चारित्रादिगुणेष्वपि ॥ शुभाश्रवत्व-
मारोप्य फलभेदं वदंति ते ॥ १४४ ॥ भवनिर्वाणहेतूनां वस्तुतो न विपर्ययः ॥ अज्ञानादेव तज्ज्ञानं ज्ञानी तत्र न मुह्यति
॥ १४५ ॥ तीर्थकृन्नामहेतुत्वं यत्सम्यक्त्वस्य वर्ण्यते ॥ यच्चाहारकहेतुत्वं संयमस्यातिशायिनः ॥ १४६ ॥ तपःसंयमयोः
स्वर्गहेतुत्वं यच्च पूर्वयोः ॥ उपचारेण तद्युक्तं स्याद् घृतं दहतीतिवत् ॥ १४७ ॥ येनांशेनात्मनो योगस्तेनांशेनाश्रवो मतः ॥
येनांशेनोपयोगस्तु तेनांशेनास्य संवरः ॥ १४८ ॥ तेनासावंशविश्रांतौ बिभ्रदाश्रवसंवरौ ॥ भात्यादर्श इव स्वच्छास्वच्छभाग-
द्वयः सदा ॥ १४९ ॥ शुद्धैव ज्ञानधारा स्यात्सम्यक्त्वप्राप्त्यनंतरम् ॥ हेतुभेदाद्विचित्रा तु योगधारा प्रवर्त्तते ॥ १५० ॥
सम्यग्दृशो विशुद्धत्वं सर्वास्वपि दशास्वतः ॥ मृदुमध्यादिभावस्तु क्रियावैचित्र्यतो भवेत् ॥ १५१ ॥ यदा तु सर्वतः शुद्धि-

जायते धारयोर्द्वयोः ॥ शैलेशीसंज्ञितः स्थैर्यात्तदा स्यात्सर्वसंवरः ॥ १५२ ॥ ततोऽर्वाग् यच्च यावच्च स्थिरत्वं तावदात्मनः ॥
संवरो योगचांचल्यं यावत्तावत्किलाश्रवः ॥ १५३ ॥ अशुद्धनयतश्चैवं संवराश्रवसंकथा ॥ संसारिणां च सिद्धानां न शुद्ध-
नयतो भिदा ॥ १५४ ॥ निर्जरा कर्मणां शाटो नात्माऽसौ कर्म्मपर्ययः ॥ येन निर्जीयते कर्म स भावस्त्वात्मलक्षणम्॥१५५॥
सत्तपो द्वादशविधं शुद्धज्ञानसमन्वितम् ॥ आत्मशक्तिसमुत्थानं चित्तवृत्तिनिरोधकृत् ॥ १५६ ॥ यत्र रोधः कषायाणां
ब्रह्मध्यानं जिनस्य च ॥ ज्ञातव्यं तत्तपः शुद्धमवशिष्टं तु लंघनम् ॥ १५७ ॥ बुभुक्षा देहकार्श्यं वा तपसो नास्ति लक्षणम् ॥
तितिक्षाब्रह्मगुप्त्यादिस्थानं ज्ञानं तु तद्वपुः ॥ १५८ ॥ ज्ञानेन निपुणेनैक्यं प्राप्तं चंदनगंधवत् ॥ निर्जरामात्मनो दत्ते तपो
नान्यादृशं क्वचित् ॥ १५९ ॥ तपस्वी जिनभक्त्या च शासनोद्भासनेच्छया ॥ पुण्यं बध्नाति बहुलं मुच्यते तु गतस्पृहः ॥
॥ १६० ॥ कर्मतापकरं ज्ञानं तपस्तन्नैव वेत्ति यः ॥ प्राप्नोतु स हतस्वांतो विपुलां निर्जरां कथम् ॥ १६१ ॥ अज्ञानी तपसा
जन्मकोटिभिः कर्म यन्नयेत् ॥ अंतं ज्ञानतपोयुक्तस्तत् क्षणेनैव संहरेत् ॥ १६२ ॥ ज्ञानयोगस्तपःशुद्धमित्याहुर्मुनिपुंगवाः ॥
तस्मान्निकाचितस्यापि कर्मणो युज्यते क्षयः ॥ १६३ ॥ यदिहापूर्वकरणं श्रेणिः शुद्धा च जायते ॥ ध्रुवः स्थितिक्षयस्तत्र
स्थितानां प्राच्यकर्मणाम् ॥ १६४ ॥ तस्माद् ज्ञानमयः शुद्धस्तपस्वी भावनिर्जरा ॥ शुद्धनिश्चयतस्त्वेषा सदा शुद्धस्य कापि
न ॥ १६५ ॥ बंधः कर्मात्मसंश्लेषो द्रव्यतः स चतुर्विधः ॥ तद्धेत्वध्यवसायात्मा भावतस्तु प्रकीर्त्तितः ॥ १६६ ॥ वेष्टय-
त्यात्मनात्मानं यथा सर्पस्तथासुमान् ॥ तत्तद्भावैः परिणतो बध्नात्यात्मानमात्मना ॥ १६७ ॥ बध्नाति स्वं यथा कोशकार-
कीटः स्वतंतुभिः ॥ आत्मनः स्वगतैर्भावैर्बंधने सोपमा स्मृता ॥ १६८ ॥ जंतूनां सापराधानां बंधकारी न हीश्वरः ॥ तद्बं-

धकानवस्थानादबंधस्याप्रवृत्तितः ॥ १६९ ॥ न त्वज्ञानप्रवृत्त्यर्थं ज्ञानवन्नोदना ध्रुवा ॥ अबुद्धिपूर्वकार्येषु स्वप्नादौ तददर्श-
नात् ॥ १७० ॥ तथाभव्यतया जंतुर्नोदितश्च प्रवर्त्तते ॥ बध्नन् पुण्यं च पापं च परिणामानुसारतः ॥ १७१ ॥ शुद्ध-
निश्चयतस्त्वात्मा न बद्धो बंधशंकया ॥ भयकंपादिकं किंतु रज्जावहिमतेरिव ॥ १७२ ॥ रोगस्थित्यनुसारेण प्रवृत्ती रोगिणो
यथा ॥ भवस्थित्यनुसारेण तथा बंधेऽपि वर्ण्यते ॥ १७३ ॥ दृढाज्ञानमयीं शंकामेनामपनिनीषवः ॥ अध्यात्मशास्त्रमिच्छंति
श्रोतुं वैराग्यकांक्षिणः ॥ १७४ ॥ दिशः प्रदर्शकं शाखाचंद्रन्यायेन तत्पुनः ॥ प्रत्यक्षविषयां शंकां न हि हंति परोक्षधीः
॥ १७५ ॥ शंखे श्वैत्यानुमानेऽपि दोषात्पीतत्वधीर्यथा ॥ शास्त्रज्ञानेऽपि मिथ्याधीसंस्काराद्बंधधीस्तथा ॥ १७६ ॥ श्रुत्वा
मत्वा मुहुः स्मृत्वा साक्षादनुभवंति ये ॥ तत्त्वं न बंधधीस्तेषामात्माबंधः प्रकाशते ॥ १७७ ॥ द्रव्यमोक्षः क्षयः कर्मद्रव्या-
णां नात्मलक्षणम् ॥ भावमोक्षस्तु तद्धेतुरात्मा रत्नत्रयान्वयी ॥ १७८ ॥ ज्ञानदर्शनचारित्रैरात्मैक्यं लभते यदा ॥ कर्माणि
कुपितानीव भवंत्याशु तदा पृथक् ॥ १७९ ॥ अतो रत्नत्रयं मोक्षस्तदभावे कृतार्थता ॥ पाषंडिगणलिंगैश्च गृहिलिंगैश्च कापि
न ॥ १८० ॥ पाषंडिगणलिंगेषु गृहिलिंगेषु ये रताः ॥ न ते समयसारस्य ज्ञातारो बालबुद्धयः ॥ १८१ ॥ भावलिंगरता ये
स्युः सर्वसारविदो हि ते ॥ लिंगस्था वा गृहस्था वा सिध्यंति धूतकल्मषाः ॥ १८२ ॥ भावलिंगं हि मोक्षांगं द्रव्यलिंगम-
कारणम् ॥ द्रव्यं नात्यंतिकं यस्मान्नाप्येकांतिकमिष्यते ॥ १८३ ॥ यथाजातदशालिंगमर्थादव्यभिचारि चेत् ॥ विपक्षबा-
धकाभावात् तद्धेतुत्वे तु का प्रमा ॥ १८४ ॥ वस्त्रादिधारणेच्छा चेद्बाधिका तस्य तां विना ॥ धृतस्य किमवस्थाने करा-
देरिव बाधकम् ॥ १८५ ॥ स्वरूपेण च वस्त्रं चेत्केवलज्ञानबाधकम् ॥ तदा दिक्पटनीत्यैव तत्तदावरणं भवेत् ॥ १८६ ॥

इत्थं केवलिनस्तेन मूर्ध्नि क्षिप्तेन केनचित् ॥ केवलित्वं पलायेतेत्यहो किमसमंजसम् ॥ १८७ ॥ भावलिंगात्ततो मोक्षो
भिन्नलिंगेष्वपि ध्रुवः ॥ कदाग्रहं विमुच्यैतद्भावनीयं मनस्विना ॥ १८८ ॥ अशुद्धनयतो ह्यात्मा बद्धो मुक्त इति स्थितिः ॥
न शुद्धनयतस्त्वेष बध्यते नापि मुच्यते ॥ १८९ ॥ अन्वयव्यतिरेकाभ्यामात्मतत्त्वविनिश्चयम् ॥ नवभ्योऽपि हि तत्त्वेभ्यः
कुर्यादेवं विचक्षणः ॥ १९० ॥ इदं हि परमध्यात्मममृतं ह्यद एव च ॥ इदं हि परमं ज्ञानं योगोऽयं परमः स्मृतः ॥१९१॥
गुह्याद्गुह्यतरं तत्त्वमेतत्सूक्ष्मनयाश्रितम् ॥ न देयं स्वल्पबुद्धीनां ते ह्येतस्य विडंबकाः ॥ १९२ ॥ जनानामल्पबुद्धीनां नैत-
त्तत्त्वं हितावहम् ॥ निर्बलानां क्षुधार्त्तानां भोजनं चक्रिणो यथा ॥ १९३ ॥ ज्ञानांशदुर्विदग्धानां तत्त्वमेतदनर्थकृत् ॥
अशुद्धमंत्रपाठस्य फणिरत्नग्रहो यथा ॥ १९४ ॥ व्यवहाराविनिष्णातो यो ज्ञीप्सति विनिश्चयम् ॥ कासारतरणाशक्तः सागरं
स तितीर्षति ॥ १९५ ॥ व्यवहारं विनिश्चित्य ततः शुद्धनयाश्रितः ॥ आत्मज्ञानरतो भूत्वा परमं साम्यमाश्रयेत् ॥ १९६ ॥

॥ इत्यात्मनिश्चयाधिकारः ॥ १८

॥ उत्सर्पद्व्यवहारनिश्चयकथाकल्लोलकोलाहलत्रस्यद्दुर्नयवादिकच्छपकुलभ्रश्यत्कुपक्षाचलम् ॥ उद्यद्युक्तिनदीप्रवेशसुभगं
स्याद्वादमर्यादया युक्तं श्रीजिनशासनं जलनिधिं मुक्त्वा परं नाश्रये ॥ १ ॥ पूर्णः पुण्यनयप्रमाणरचनापुष्पैः सदास्थारसैस्त-
त्त्वज्ञानफलः सदा विजयते स्याद्वादकल्पद्रुमः ॥ एतस्मात् पतितैः प्रवादकुसुमैः षड्दर्शनारामभूर्भूयः सौरभमुद्वमत्यभिम-
तैरध्यात्मवार्तालवैः ॥ २ ॥ चित्रोत्सर्गशुभापवादरचनासानुश्रियालंकृतः श्रद्धानंदनचंदनद्रुमनिभप्रज्ञोल्लसत्सौरभः ॥ भ्रा-
म्यद्भिः परदर्शनग्रहगणैरासेव्यमानः सदा तर्कस्वर्णशिलोच्छ्रितो विजयते जैनागमो मंदरः ॥ ३ ॥ स्याद्दोषापगमस्तमांसि ज-

गति क्षीयंत एव क्षणादध्वानो विशदीभवंति निबिडा निद्रा दृशोर्गच्छति ॥ यस्मिन्नभ्युदिते प्रमाणदिवसप्रारंभकल्याणिनी प्रौढत्वं नयगीर्दधाति स रविर्जैनागमो नंदतात् ॥ ४ ॥ अध्यात्मामृतवर्षिभिः कुवलयोल्लासं विलासैर्गवां तापव्यापविनाशिभिर्वितनुते लब्धोदयो यः सदा ॥ तर्कस्थाणुशिरःस्थितः परिवृतः स्फारैर्नयैस्तारकैः सोऽयंश्रीजिनशासनामृतरुचिः कस्यैति नो रुच्यताम् ॥ ५ ॥ बौद्धानामृजुसूत्रतो मतमभूद्वेदांतिनां संग्रहात्सांख्यानां तत एव नैगमनयाद् योगश्च वैशेषिकः ॥ शब्दब्रह्मविदोऽपि शब्दनयतः सर्वैर्नयैर्गुंफिता जैनी दृष्टिरितीह सारतरता प्रत्यक्षमुद्वीक्ष्यते ॥ ६ ॥ ऊष्मा नार्कमपाकरोति दहनं नैव स्फुलिंगावली नाब्धिं सिंधुजलप्लवः सुरगिरिं ग्रावा न चाभ्यापतन् ॥ एवं सर्वनयैकभावगरिमस्थानं जिनेंद्रागमं तत्तद्दर्शनसंकथांशरचनारूपा न हंतुं क्षमा ॥ ७ ॥ दुःसाध्यं परवादिनां परमतक्षेपं विना स्वं मतं तत्क्षेपे च कषायपंककलुषं चेतः समापद्यते ॥ सोऽयं निःस्वनिधिग्रहव्यवसितो वेतालकोपक्रमो नायं सर्वहितावहे जिनमते तत्त्वप्रसिद्ध्यर्थिनाम् ॥ ८ ॥ वार्त्ताः संति सहस्रशः प्रतिमतं ज्ञानांशबद्धक्रमाश्चेतस्तासु न नः प्रयाति नितमां लीनं जिनेंद्रागमे ॥ नोत्सर्पंति लताः कति प्रतिदिशं पुष्पैः पवित्रा मधौ ताभ्यो नैति रतिं रसालकलिकारक्तस्तु पुंस्कोकिलः ॥ ९ ॥ शब्दो वा मतिरर्थ एव वसु वा जातिः क्रिया वा गुणः शब्दार्थः किमिति स्थिता प्रतिमतं संदेहशंकुव्यथा ॥ जैनेंद्रे तु मते न सा प्रतिपदं जात्यंतरार्थस्थितेः सामान्यं च विशेषमेव च यथा तात्पर्यमन्विच्छति ॥ १० ॥ यत्रानर्पितमादधाति गुणतां मुख्यं तु वस्त्वर्पितं तात्पर्यानवलंबनेन तु भवेद्बोधः स्फुटं लौकिकः ॥ संपूर्णं त्ववभासते कृतधियां कृत्स्नाद्विवक्षाक्रमात् तां लोकोत्तरभंगपद्धतिमयीं स्याद्वादमुद्रां स्तुमः ॥ ११ ॥ आत्मीयानुभवाश्रयार्थविषयोऽप्युच्चैर्यदीयक्रमो म्लेच्छानामिव संस्कृतं तनुधि-

यामाश्चर्यमोहावहः ॥ व्युत्पत्तिप्रतिपत्तिहेतुविततस्याद्वादवाग्गुंफितं तं जैनागममाकलय्य न वयं व्याक्षेपभाजः क्वचित् ॥१२॥
मूलं सर्ववचोगतस्य विदितं जैनेश्वरं शासनं तस्मादेव समुत्थितैर्नयमतैस्तस्यैव यत्खंडनम् ॥ एतत्किंचन कौशलं कलिमलच्छ-
न्नात्मनः स्वाश्रितां शाखां छेत्तुमिवोद्यतस्य कटुकोदर्काय तर्कार्थिनः ॥ १३ ॥ त्यक्त्वोन्मादविभज्यवादरचनामाकर्ण्य कर्णा-
मृतं सिद्धांतार्थरहस्यवित् क्व लभतामन्यत्र शास्त्रे रतिम् ॥ यस्यां सर्वनया विशंति न पुनर्व्यस्तेषु तेष्वेव या मालायां
मणयो लुठंति न पुनर्व्यस्तेषु मालापि सा ॥ १४ ॥ अन्योन्यप्रतिपक्षभावविततान् स्वस्वार्थसत्यान्नयान्नापेक्षाविषयाग्रहैर्विभ-
जते माध्यस्थ्यमास्थाय यः॥ स्याद्वादे सुपथे निवेश्य हरते तेषां तु दिङ्मूढतां कुंदेंदुप्रतिमं यशो विजयिनस्तस्यैव संवर्द्धते ॥१५॥

॥ इति जिनमतस्तुत्यधिकारः ॥ १९

शास्त्रोपदर्शितदिशा गलितासद्ग्रहकषायकलुषाणाम् ॥ प्रियमनुभवैकवेद्यं रहस्यमाविर्भवति किमपि ॥ १ ॥ प्रथमाभ्या-
सविलासादाविर्भूयैव यत्क्षणाल्लीनम् ॥ चंचत्तरुणीविभ्रमसममुत्तरलं मनः कुरुते ॥ २ ॥ सुविदितयोगैरिष्टं क्षिप्तं मूढं तथैव
विक्षिप्तं ॥ एकाग्रं च निरुद्धं चेतः पंचप्रकारमिति ॥ ३ ॥ विषयेषु कल्पितेषु च पुरःस्थितेषु च निवेशितं रजसा ॥ सुख-
दुःखयुग्बहिर्मुखमाम्नातं क्षिप्तमिह चित्तम् ॥ ४ ॥ क्रोधादिभिर्नियमितं विरुद्धकृत्येषु यत्तमोभूम्ना ॥ कृत्याकृत्यविभागासं-
गतमेतन्मनो मूढम् ॥ ५ ॥ सत्वोद्रेकात्परिहृतदुःखनिदानेषु सुखनिदानेषु ॥ शब्दादिषु प्रवृत्तं सदैव चित्तं तु विक्षिप्तम् ॥६॥
अद्वेषादिगुणवतां नित्यं खेदादिदोषपरिहारात् ॥ सदृशप्रत्ययसंगतमेकाग्रं चित्तमाम्नातम् ॥ ७ ॥ उपरतविकल्पवृत्तिकमवग्र-
हादिक्रमच्युतं शुद्धम् ॥ आत्मारामसुनीनां भवति निरुद्धं सदा चेतः ॥ ८ ॥ न समाधावुपयोगं तिस्रश्चेतोदशा इह लभंते ॥

सत्वोत्कर्षात् स्थैर्यात्तुभे समाधिसुखातिशयात् ॥ ९ ॥ योगारंभस्तु भवेद्विक्षिप्ते मनसि जातु सानंदे ॥ क्षिप्ते मूढे चास्मिन् व्युत्थानं भवति नियमेन ॥ १० ॥ विषयकषायनिवृत्तं योगेषु च संचरिष्णु विविधेषु ॥ गृहखेलद्बालोपममपि चलमिष्टं मनोऽभ्यासे ॥ ११ ॥ वचनानुष्ठानगतं यातायातं च सातिचारमपि ॥ चेतोऽभ्यासदशायां गजांकुशन्यायतोऽदुष्टम् ॥१२॥ ज्ञानविचाराभिमुखं यथा यथा भवति किमपि सानंदम् ॥ अर्थैः प्रलोभ्य बाह्यैरनुगृह्णीयात्तथा चेतः ॥ १३ ॥ अभिरूपजिन-प्रतिमां विशिष्टपदवाक्यवर्णरचना च ॥ पुरुषविशेषादिकमप्यत एवालंबनं ब्रुवते ॥ १४ ॥ आलंबनैः प्रशस्तैः प्रायो भावः प्रशस्त एव यतः ॥ इति सालंबनयोगी मनः शुभालंबनं दध्यात् ॥ १५ ॥ सालंबनं क्षणमपि क्षणमपि कुर्यान्मनो निरा-लंबम् ॥ इत्यनुभवपरिपाकादाकालं स्यान्निरालंबम् ॥१६॥ आलंब्यैकपदार्थं यदा न किंचिद्विचिंतयेदन्यत् ॥ अनुपनतेंधन-वह्निवदुपशांतं स्यात्तदा चेतः ॥ १७ ॥ शोकमदमदनमत्सरकलहकदाग्रहविषादवैराणि ॥ क्षीयंते शांतहृदामनुभव एवात्र साक्षी नः ॥१८॥ शांते मनसि ज्योतिः प्रकाशते शांतमात्मनः सहजम् ॥ भस्मीभवत्यविद्या मोहध्वांतं विलयमेति ॥१९॥ बाह्यात्मनोऽधिकारः शांतहृदामंतरात्मनां न स्यात् ॥ परमात्मानुध्येयः सन्निहितो ध्यानतो भवति ॥ २० ॥ कायादिर्बहि-रात्मा तदधिष्ठातांतरात्मतामेति ॥ गतनिःशेषोपाधिः परमात्मा कीर्त्तितस्तज्ज्ञैः ॥ २१ ॥ विषयकषायावेशः तत्त्वाश्रद्धा गुणेषु च द्वेषः ॥ आत्माज्ञानं च यदा बाह्यात्मा स्यात्तदा व्यक्तः ॥ २२ ॥ तत्त्वश्रद्धा ज्ञानं महाव्रतान्यप्रमादपरता च ॥ मोहजयश्च यदा स्यात् तदांतरात्मा भवेद्व्यक्तः ॥ २३ ॥ ज्ञानं केवलसंज्ञं योगनिरोधः समग्रकर्म्महतिः ॥ सिद्धिनिवासश्च यदा परमात्मा स्यात्तदा व्यक्तः ॥ २४ ॥ आत्ममनोगुणवृत्ती विविच्य यः प्रतिपदं विजानाति ॥ कुशलानुबंधयुक्तः प्रा-

प्नोति ब्रह्मभूयमसौ ॥ २५ ॥ ब्रह्मस्थो ब्रह्मज्ञो ब्रह्म प्राप्नोति तत्र किं चित्रम् ॥ ब्रह्मविदां वचसापि ब्रह्मविलासाननुभवामः ॥ २६ ॥ ब्रह्माध्ययनेषु मतं ब्रह्माष्टादशसहस्रपदभावैः ॥ येनाप्तं तत् पूर्णं योगी स ब्रह्मणः परमः ॥ २७ ॥ ध्येयोऽयं सेव्योऽयं कार्या भक्तिः सुकृतधियाऽस्यैव ॥ अस्मिन्गुरुत्वबुद्ध्या सुतरः संसारसिंधुरपि ॥ २८ ॥ अवलंब्येच्छायोगं पूर्णाचारासहिष्णवश्च वयम् ॥ भक्त्या परममुनीनां तदीयपदवीमनुसरामः ॥२९॥ अल्पापि यात्र यतना निर्दंभा सा शुभानुबंधकरी ॥ अज्ञानविषव्ययकृद्विवेचनं चात्मभावानां ॥ ३० ॥ सिद्धांततदंगानां शास्त्राणामस्तु परिचयः शक्त्या ॥ परमालंबनभूतो दर्शनपक्षोऽयमस्माकम् ॥ ३१ ॥ विधिकथनं विधिरागो विधिमार्गस्थापनं विधीच्छूनां ॥ अविधिनिषेधश्चेति प्रवचनभक्तिः प्रसिद्धा नः ॥ ३२ ॥ अध्यात्मभावनोज्ज्वलचेतोवृत्त्योचितं हि नः कृत्यम् ॥ पूर्णक्रियाभिलाषश्चेति द्वयमात्मशुद्धिकरम् ॥ ३३ ॥ द्वयमिह शुभानुबंधः शक्यारंभश्च शुद्धपक्षश्च ॥ अहितो विपर्ययः पुनरित्यनुभवसंगतः पंथाः ॥ ३४ ॥ ये त्वनुभवाविनिश्चितमार्गाश्चारित्रपरिणतिभ्रष्टाः ॥ बाह्यक्रियया चरणाभिमानिनो ज्ञानिनोऽपि न ते ॥ ३५ ॥ लोकेषु बहिर्बुद्धिषु विगोपकानां बहिष्क्रियासु रतिः ॥ श्रद्धां विना न चैताः सतां प्रमाणं यतोऽभिहितम् ॥ ३६ ॥ बालः पश्यति लिंगं मध्यमबुद्धिर्विचारयति वृत्तम् ॥ आगमतत्त्वं तु बुधः परीक्षते सर्वयत्नेन ॥ ३७ ॥ निंद्यो न कोपि लोके पापिष्ठेष्वपि भवस्थितिश्चिंत्या ॥ पूज्या गुणगरिमाढ्या धार्यो रागो गुणलवेऽपि ॥ ३८ ॥ निश्चित्यागमतत्त्वं तस्मादुत्सृज्य लोकसंज्ञां च ॥ श्रद्धाविवेकसारं यतितव्यं योगिना नित्यम् ॥ ३९ ॥ ग्राह्यं हितमपि बालादालापैर्दुर्जनस्य न द्वेष्यम् ॥ त्यक्तव्या च पराशा पाशा इव संगमा ज्ञेयाः ॥ ४० ॥ स्तुत्या स्मयो न कार्यः कोपोऽपि च निंदया जनैः कृतया ॥ सेव्या धर्माचार्यास्तत्त्वं

जिज्ञासनीयं च ॥ ४१ ॥ शौचं स्थैर्यमदंभो वैराग्यं चात्मनिग्रहः कार्यः ॥ दृश्या भवगतदोषाश्चिंत्यं देहादिवैरूप्यम् ॥४२॥ भक्तिर्भगवति धार्या सेव्यो देशः सदा विविक्तश्च ॥ स्थातव्यं सम्यक्त्वे विश्वास्यो न प्रमादरिपुः ॥ ४३ ॥ ध्येयात्मबोधनिष्ठा सर्वत्रैवागमः पुरस्कार्यः ॥ त्यक्तव्याः कुविकल्पाः स्थेयं वृद्धानुवृत्त्या च ॥ ४४ ॥ साक्षात्कार्यं तत्त्वं चिद्रूपानंदमेदुरैर्भाव्यम् ॥ हितकारी ज्ञानवतामनुभववेद्यः प्रकारोऽयम् ॥ ४५ ॥ ॥ ॥ ॥ ॥

॥ इत्यनुभवाधिकारः ॥ २०

॥ येषां कैरवकुंदवृंदशशभृत्कर्पूरशुभ्रा गुणा मालिन्यं व्यपनीय चेतसि नृणां वैशद्यमातन्वते ॥ संतः संतु मयि प्रसन्नमनसस्ते केऽपि गौणीकृतस्वार्था मुख्यपरोपकारविधयोऽत्युच्चैःखलैः किं खलैः ॥ १ ॥ ग्रंथार्थान् प्रगुणीकरोति सुकविर्यत्नेन तेषां प्रथामातन्वंति कृपाकटाक्षलहरीलावण्यतः सज्जनाः ॥ माकंदद्रुममंजरीं वितनुते चित्रा मधुश्रीस्ततः सौभाग्यं प्रथयंति पंचमचमत्कारेण पुंस्कोकिलाः ॥ २ ॥ दोषोल्लेखविषः खलाननबिलादुद्भाय कोपाज्ज्वलन् जिह्वाहिर्ननु कं गुणं न गुणिनां बालं क्षयं प्रापयेत् ॥ न स्याच्चेत्प्रबलप्रभावभवनं दिव्यौषधीसन्निधौ शास्त्रार्थोपनिषद्विदां शुभहृदां कारुण्यपुण्यप्रथा ॥ ३ ॥ उत्तानार्थगिरां स्वतोऽप्यवगमान्निःसारतां मेनिरे गंभीरार्थसमर्थने बत खलाः काठिन्यदोषं ददुः ॥ तत्को नाम गुणोऽस्तु कश्च सुकविः किं काव्यमित्यादिकां स्थित्युच्छेदमतिं हरंति नियतां दृष्टा व्यवस्थाः सताम् ॥ ४ ॥ अध्यात्मामृतवर्षिणीमपि कथामापीय संतः सुखं गाहंते विषमुद्गिरंति तु खला वैषम्यमेतत्कुतः ॥ नेदं चाद्भुतमिंदुदीधितिपिबाः प्रीताश्चकोरा भृशं किं न स्युर्बत चक्रवाकतरुणास्त्वत्यंतखेदातुराः ॥ ५ ॥ किंचित्साम्यमवेक्ष्य ये विदधते काचेंद्रनीलाभिदां तेषां न प्रमदा-

वहा तनुधियां गूढा कवीनां कृतिः ॥ ये जानंति विशेषमप्यविषमे रेखोपरेखांशतो वस्तुन्यस्तु सतामितः कृतधियां तेषा महानुत्सवः ॥ ६ ॥ पूर्णाध्यात्मपदार्थसार्थघटना चेतश्चमत्कारिणी मोहछन्नदृशां नवेत्तनुधियां नो पंडितानामिव ॥ काकुव्याकुलकामगर्वगहनप्रोद्दामवाक्चातुरी कामिन्याः प्रसन्न प्रमोदयति न ग्राम्यान् विदग्धानिव ॥ ७ ॥ स्नात्वा सिद्धांतकुंभे विधुकरविशदाध्यात्मपानीयपूरैस्तापं संसारदुःखं कलिकलुषमलं लोभतृष्णां च हित्वा ॥ जाता ये शुद्धरूपाः शमदमशुचितार्चदनालिप्तगात्राः शीलालंकारसाराः सकलगुणनिधीन्सज्जनांस्तान्नमामः ॥ ८ ॥ पाथोदः पद्यबंधैर्विपुलरसभरं वर्षति ग्रंथकर्त्ता प्रेम्णां पूरैस्तु चेतःसर इह सुहृदां प्लाव्यते वेगवद्भिः ॥ त्रुट्यंति स्वांतबंधाः पुनरसमगुणद्वेषिणां दुर्जनानां चित्रं भावज्ञनेत्रात् प्रणयरसवशान्निःसरत्यश्रुनीरम् ॥ ए ॥ उद्दामग्रंथभावप्रथनभवयशःसंचयः सत्कवीनां क्षीराब्धिर्मथ्यते यः सहृदयविबुधैर्मेरुणा वर्णनेन ॥ एतद्दिंडीरपिंडीभवति विधुरुचेर्मंडलं विप्रुषस्तास्ताराः कैलासशैलादय इह दधते वीचिविक्षोभलीलाम् ॥ १० ॥ काव्यं दृष्ट्वा कवीनां हृतममृतमिति स्वःसदां पानशंकी खेदं धत्ते तु मूर्धा मृदुतरहृदयः सज्जनो व्याधुतेन ॥ ज्ञात्वा सर्वोपभोग्यं प्रसृमरमथ तत्कीर्त्तिपीयूषपूरं नित्यं रक्षापिधानानियतमतितरां मोदते च स्मितेन ॥ ११ ॥ निष्पाद्य श्लोककुंभं निपुणनयमृदा कुंभकाराः कवींद्रा दार्ढ्यं चारोप्य तस्मिन् किमपि परिचयात्सत्परीक्षार्कभासम् ॥ पक्कं कुर्वंति बाढं गुणहरणमतिप्रज्वलद्दोषदृष्टिज्वालामालाकराले खलजनवचनज्वालजिह्वे निवेश्य ॥ १२ ॥ इक्षुद्राक्षारसौघः कविजनवचनं दुर्जनस्याग्नियंत्रान्नानार्थद्रव्ययोगात्समुपचितगुणो मद्यतां याति सद्यः ॥ संतः पीत्वा यदुच्चैर्दधति हृदि मुदं घूर्णयंत्यक्षियुग्मं स्वैरं हर्षप्रकर्षादपि च विदधते नृत्यगानप्रबंधम् ॥ १३ ॥ नव्योऽस्माकं प्रबंधोऽप्यनणुगुणभृतां सज्जनानां

प्रजावाग्विख्यातः स्यादितीमे हितकरणविधौ प्रार्थनीया न किं नः ॥ निष्णाता वा स्वतस्ते रविरुचय इवांजोरुहाणां गुणानामुल्लासेऽपेक्षणीयो न खलु पररुचेः क्वापि तेषां स्वजावः॥१४॥ यत्कीर्त्तिस्फूर्त्तिगानावहितसुरवधूवृंदकोलाहलेन प्रक्षुब्धस्वर्गसिंधोः पतितजलजरैः क्षालितः शैत्यमेति ॥ अश्रांतभ्रांतकांतग्रहगणकिरणैस्तापवान् स्वर्णशैलो ज्राजंते ते मुनींद्रा नयविजयबुधाः सज्जनव्रातधुर्याः ॥ १५ ॥ चक्रे प्रकरणमेतत्तत्पदसेवापरो यशोविजयः ॥ अध्यात्मधृतरुचीनामिदमानंदावहं जवतु ॥ १६ ॥ ॥ ॥ ॥ ॥ ॥ ॥

॥ इति श्रीमदध्यात्मसारग्रंथः समाप्तः ॥

# ॥ अथ देवधर्मपरीक्षाप्रारंभः ॥

॥ ऐन्द्रवृन्दनतं नत्वा वीरं तत्त्वार्थदर्शिनम् । निराकरोमि देवानामधर्मवचनभ्रमम्॥१॥ इह केचिन्मूढमतयो देवा अधर्मिण इति निष्ठुरं भाषंते तत्तुच्छम् । देवानामसंयतत्वव्यपदेशस्यापि सिद्धांते निषिद्धत्वात् । तथाचोक्तं भगवत्यां पंचमशते चतुर्थोद्देशके-देवाणं भंते संजयत्ति वत्तव्वं सिया गोयमा नो इणठ्ठे समठ्ठे अब्भरकाणमेयं देवाणं । देवाणं भंते असंजयत्ति वत्तव्वं सिया नो इणठ्ठे समठ्ठे निठ्ठुरवयणमेयं देवाणं । देवाणं भंते संजयाऽसंजयत्ति वत्तव्वं सिया गोयमा नो इणठ्ठे समठ्ठे असब्भूअमेयं देवाणं। से किं खाइएणं भंते देवत्ति वत्तव्वं सिया गोयमा देवाणं नोसंजयत्ति वत्तव्वं सिया।अत्र यदि देवानामसंयतत्वव्यपदेशोऽपि निषिद्धस्तदा कथमधर्मित्वव्यपदेशः सचेतसा कर्तव्य इति पर्यालोचनीयम् ॥१॥ ननु तर्हि नोसंयताइतिवन्नोधर्मिण इति वक्तव्यम् । न ।देवानां संयमसामान्याभावेऽपि निष्ठुरभाषापरिहारार्थं नोसंयतत्वव्यपदेशविधावपि धर्मसामान्याभावाभावेन तत्प्रयुक्तनोधर्मित्वव्यपदेशासिद्धेः।धर्मसामान्याभावस्तेषु कथं नास्तीति चेत् "दुविहे धम्मे पन्नत्ते सुअधम्मे य चरित्तधम्मे य " इति स्थानांगविवेचितश्रुतधर्मस्य तेषामभावासिद्धेः ॥ २ ॥ स्यात्केषांचिदाशंका-सूत्रापठनाच्छ्रुतधर्मोऽपि तेषां न भविष्यतीति अयुक्ता सा"सुयधम्मे दुविहे पन्नत्ते तं सुत्तसुयधम्मे चेव अत्थसुअधम्मे चेव" इति विभागपर्यालोचनया सम्यग्दृष्टिमात्रे श्रुतधर्मसद्भावस्यावश्यकत्वात् ॥ ३ ॥ अथ नेरइयाणं पुच्छा "गोयमा नेरइया नोधम्मे ठिया अधम्मे ठिया- नो धम्माधम्मेवि ठिया एवं जाव चउरिंदिया पंचिंदियतिरिक्खजोणिया नोधम्मे ठिया अधम्मे ठिया धम्माधम्मेवि ठिया

मणुस्सा जहा जीवा वाणमंतरजोइसियवेमाणिया जहानेरइया" इति भगवतीसप्तदशशतकद्वितीयोद्देशकवचनस्य का गतिरिति चेद्देवाशातनया बद्धदुर्गतिकर्मणां भवतां न काचिदस्ति गतिः अस्माकं तु सम्यगुपासितगुरुकुलानामस्ति समीचीनैव गतिः । तथाहि–उपक्रमे चात्र धर्मशब्दः संयमपर्यायो धर्माधर्मशब्दश्च देशविरतिपर्यायः "स्था"धात्वर्थश्चाभ्युपगम उक्तोऽधर्मस्थितत्वं च तदन्यतरप्रतिज्ञाभावादविरतिप्रतिपत्तिमात्रमुक्तम् यथाश्रुतश्च स्थाधात्वर्थः कंठत एवाक्षिप्य निषिद्ध इति किमनुपपन्नम् । एवं हि संमुग्धार्थविवरणेन साधारणोपदेशेन च देवेषु निष्ठुरभाषाप्रसंगोऽपि न भवति । सचायं पाठः– "से नूणं भंते संजयविरयपडिहयपच्चक्खायपावकम्मे धम्मे ठिते असंजयअविरयअप्पडिहयअपच्चक्खायपावकम्मे अधम्मे ठिते संजयासंजए धम्माधम्मे ठिते हंता गोयमा सं जाव । एयंसि भंते धम्मंसि वा अधम्मंसि वा धम्माधम्मंसि वा चक्किया केइ आसइत्तए वा जाव तुयट्टित्तए वा नो इणट्ठे समट्ठे से केणं खाइअट्ठेणं भंते एवं वुच्चई जाव धम्माधम्मे ठिए गोयमा संजयविरय जाव धम्मे ठिए धम्मं चेव उवसंपज्जित्ताणं विहरइ असंजय जाव पावकम्मे अधम्मे ठिते अधम्मं चेव उवसंपज्जित्ताणं विहरइ संजयासंजए धम्माधम्मे ठिए धम्माधम्मं उवसंपज्जित्ताणं विहरइ से तेणट्ठेणं जाव ठिएत्ति" ॥ ४ ॥ एतेन "नेरइयाणं पुच्छा गोयमा नेरइया बाला नो पंडिया नो बालपंडिया एवं जाव चउरिंदियाणं पंचिंदियतिरिक्खजोणियाणं पुच्छा गोयमा पंचिंदियतिरिक्खजोणिया बाला नो पंडिया बालपंडिया वि मणुस्सा जहा जीवा वाणमंतरजोइसियवेमाणिया जहा नेरइया" इत्यग्रेतनसूत्रमपि व्याख्यातम् । पूर्वसूत्रादस्यार्थतोऽभेदात् व्यवहारमात्रे च परं भेदात् । तथा च वृत्तिः–प्रागुक्तानां संयतादीनामिहोक्तानां च पंडितादीनां यद्यपि शब्दत एव भेदो नाप्यर्थतस्तथापि

संयतत्वादिव्यपदेशः क्रियासव्यपेक्षः पण्डितत्वादिव्यपदेशस्तु बोधविशेषापेक्ष इति । इत्थं च व्रतक्रियापेक्षया सम्यग्दृशां देवानां बालत्वेऽपि सम्यग्ज्ञानापेक्षया कथं बालत्वमिति पर्यालोचनीयम् ॥ ५ ॥ यदि च बालादिशब्दश्रवणमात्रेण तात्पर्यार्थानालोचनेनात्र तव व्यामोहस्तदा "जे अ बुद्धा महाभागा वीरा सम्मत्तदंसिणो । सुद्धं तेसिं परक्कंतं अफलं होइ सव्वसो ॥ १ ॥" इति वीर्याध्ययनोक्तगाथायां सम्यक्त्वस्याफलत्वश्रवणेन तव दुरुत्तर एव व्यामोहः स्यात् । तात्पर्यपर्यालोचनायां तु न काचिदनुपपत्तिरिति भावनीयं गुरुकुलवासिना ॥ ६ ॥ एतेन नारकातिदेशेन तादृशा एव देवा इति जाल्मप्रलपितमपास्तम् । तद्वैसदृश्यस्यापि सूत्रे बहुशो दर्शनात् । तथोक्तं भगवत्यां तृतीयशतके तुर्योद्देशके-"जीवेणं भंते जे भविए णेरइए उववज्जित्तए सेणं भंते किंलेसेसु उववज्जति गोयमा जल्लेस्साइं दव्वाइं परियाइत्ता कालं करेइ तल्लेसेसु उववज्जति । तं० कण्हलेस्सेसु वा नीललेस्सेसु वा काउलेस्सेसु वा । एवं जस्स जा लेस्सा सा तस्स भाणियव्वा जाव जीवेणं जे भविए जोइसिएसु उववज्जित्तए पुच्छा गोयमा जल्लेस्साइं दव्वाइं परियाइत्ता कालं करेइ तल्लेस्सेसु उववज्जति तं० तेउलेस्सेसु वा । जीवेणं भंते जे भविए वेमाणिएसु उववज्जित्तए सेणं भंते किंलेस्सेसु उववज्जइ जल्लेस्साइं दव्वाइं परियाइत्ता कालं करेइ तल्लेस्सेसु उववज्जइ तं तेउलेस्सेसु वा पउमलेस्सेसुवा सुक्कलेस्सेसु वेति" । अथात्र सामान्योक्तावपि मिथ्यादृष्टिसम्यग्दृशोर्विशेषोऽन्वेषणीयइति चेत्त्वदुपदर्शितस्थलेऽपि किमित्यसौ नान्वेषणीय इति मध्यस्थदृशा विचारणीयम् ॥ ७ ॥ एवं चतुर्दशशतकतृतीयोद्देशके-"अत्थिणं भंते नेरइयाणं सक्कारेति वा सम्माणेति वा कितिकम्मेति वा अब्भुट्ठाणेति वा अंजलिपग्गहेति वा आसणाभिग्गहेति वा आसणपदाणेति वा गतस्स पच्चुग्गच्छणता आगच्छंतस्स पज्जुवासणता गच्छंतस्स

पमिसंसाहणता णो इणठे समठे । अत्थिणं नंते असुरकुमाराणं सक्कारेति जाव पमिसंसाहणता ५ हंता अत्थि एवं जाव-थणियकुमाराणं" इत्यत्राभ्युत्थानादिकं नैरयिकाणां निषिद्धं देवानां चोक्तं तच्च साध्वादिगोचरं तपोविशेष एव नविष्यति शुश्रूषाविनयरूपत्वेन तस्य पंचविंशतितमशतकेऽष्टमोद्देशे प्रतिपादनादित्ययमपि व्यवहारविनयक्रियारूपो विशेषः सम्यग्दृष्टिदेवानां कुतो मनसि जायते ॥ ८ ॥ अन्यान्यपि सम्यग्दृशां देवानां सम्यक्त्वधर्मोद्द्योतकानि बहून्यक्षराणि दृश्यंते । तथोक्तं सनत्कुमारेन्द्रमाश्रित्य तृतीयशतके प्रथमोद्देशके–"सणंकुमारेणं नंते देविंदे देवराया किं नवसिद्धिए अनवसिद्धिए सम्मदिठी मिन्नादिठी परित्तसंसारए अणंतसंसारए सुलनबोहिए डुल्लनबोहिए आराहए विराहए चरिमे अचरिमे गोयमा सणंकुमारेणं देविंदे देवराया नवसिद्धिए एवं सम० परि० सुलन० आरा० चरि० पसत्थं णेयवं । से केणठेणं नंते गोयमा सणंकुमारेणं देविंदे बहूणं समणाणं बहूणं समणीणं बहूणं सावगाणं बहूणं साविगाणं हियकामए सुहकामए पसत्थकामए आणुकंपिए णिस्सेयसिए हियसुहणिस्सेयसकामए सेतेणठेणं गोयमा सणंकुमारेणं नवसिद्धिए जाव चरिमए" अत्र हेतुप्रश्नोत्तराभ्यां देवनवस्य साधुवैयावृत्त्यादिक्रिययाऽपि साफल्यं दर्शितम् । न च सम्यग्दर्शनादौ स्वत एव सिद्धेस्तदनुपयोगः शंकनीयः, असतो गुणस्योत्पादनाय सतश्च स्थैर्याधानाय क्रियाव्यापारोपयोगस्य तत्रश्संमतत्वात् अन्यथा गुणस्थाने सिद्ध्यसिद्धिभ्यां बाह्यक्रियाविलोपप्रसंगादिति दिक् ॥ ए ॥ तथा शक्रेन्द्रमाश्रित्य षोमशशते द्वितीयोद्देशकेऽनिहितम् "सक्केणं नंते देविंदे देवराया किं सम्मावाई मिन्नावाई गोयमा सम्मावादी नो मिन्नावादी । सक्केणं नंते देविंदे देवराया किं सच्चं नासं नासति, मोसं नासं नासति, सच्चामोसं नासं नासति, असच्चामोसं नासं नासइ । गोयमा सच्चंपि नासं ना-

सइ जाव असच्चामोसंपि भासं भासइ।सक्केणं भंते देविंदे देवराया किं सावज्जं भासं भासइ अणवज्जं भासं भासइ गोयमा सावज्जंपि भासं भासइ अणवज्जंपि भासं भासइ, जाव से केणट्ठेणं भंते एवं वुच्चइ सावज्जंपि जाव अणवज्जंपि भासं भासइ। गोयमा जाहेणं सक्के देविंदे देवराया सुहमकाइयं अणिज्जुहित्ताणं भासं भासइ ताहेणं सक्के देविंदे देवराया सावज्जं भासं भासइ, जाहेणं सक्के देविंदे देवराया सुहुमकाइयं निज्जुहित्ताणं भासं भासति ताहेणं सक्के देविंदे देवराया अणवज्जं भासं भासइ, से तेणट्ठेणं जाव०भासइ। सक्केणं भंते देविंदे देवराया किं भवसिद्धिए अभवसिद्धिए सम्मदिट्ठिए मिच्छादिट्ठिए एवं जहा मोउद्देसए सणंकुमारो जाव णो अचरिमेत्ति" अत्र शक्रेन्द्रस्य प्रमादादिना भाषाचतुष्टयभाषित्वसंभवेऽपि सम्यग्वादीति भणितिना स्वरसतः सम्यग्वादशीलत्वमुक्तम् सुहुमकायं अणुविशेषं वा संभवतीति बोध्यम्॥ १०॥ "अणिज्जुहित्ताणं" इत्यत्र सूक्ष्मकायं हस्तादिकं वस्त्रं वाऽदत्त्वेत्यर्थाद्धस्ताद्यावृतमुखत्वेन भाषमाणतया जीवसंरक्षणतोऽनवद्यभाषाभाषित्वमुक्तम्। एतच्च धर्मकथावसरे जिनपूजावसरे चातथा तत्रैव–"कतिविहेणं भंते उग्गहे पण्णत्ते सक्का पंचविहे पण्णत्ते तंजहा देविंदोग्गहे १ रायावग्गहे २ गाहावइउग्गहे ३ सागारिउग्गहे ४ साहम्मियउग्गहे ५ जे इमे भंते अज्जत्ताए समणा निग्गंथा विहरंति एएसिणं अहं उग्गहं अणुजाणामि" इत्यनेन शक्रस्यावग्रहदातृत्वमुक्तम् स च साधूनां वसतिदानरूपो महानेव धर्म इति ॥११॥ तथा दशमशते पंचमोद्देशके–"पभूणं भंते चमरे असुरिंदे असुरकुमारराया चमरचंचारायहाणीए सभाए सुहम्माए चमरंसि सिंहासणंसि तुडिएणं सद्धिं दिव्वाइं भोगभोगाइं भुंजमाणे विहरित्तए णो इणट्ठे समट्ठे से केणट्ठेणं भंते एवं वुच्चइ णो पभू

चमरे असुर० चमरचंचाए रायहाणीए जाव विहरित्तए अज्जो चमरस्सणं असुरिंदस्स असुरकुमाररन्नो चमरचंचाए रायहाणीए सन्नाए सुहम्माए माणवए चेइए खंन्ने वइरामएसु गोलवट्टसमुग्गएसु बहुईउ जिणसकहाउ संणिखित्ताउ जाउणं चमरस्स असुरिंदस्स असुरकुमाररण्णो अत्रेसिं च बहूणं असुरकुमाराणं देवाण य देवीण य अच्चणिज्जाउ वंदणिज्जाउ नमंसणिज्जाउ पूयणिज्जाउ सक्कारणिज्जाउ संमाणणिज्जाउ कल्लाणं मंगलं देवयं चेइयं पज्जुवासणिज्जाउ न्नवंति से तेणठेणं अज्जो एवं वुच्चइ णो पत्रू चमरे असुरिंदे जाव राया चमरचंचाए जाव विहरित्तए" इत्यादिसूत्रकदंबकेन चमरेन्द्रस्य तदतिदेशेन बलींद्रादीनामीशानेन्द्रपर्यंतानां तल्लोकपालानां च न्नगवदस्थ्याशातनापरिहार उक्तः । स च न्नगवद्विनयरूपधर्म एव पर्यवस्यतीति बोध्यम् ॥ १२ ॥ तथोत्तराध्ययनेषु हरिकेशीये–"पुव्विं च इण्हिं च अणागयं च मणप्पउसो न मे अत्थि कोई । जक्खा हु वेयावडियं करेंति तम्हा हु एए णिहया कुमारा" इत्यत्र महर्षिणोपसर्गकर्तृशिक्षादातृयक्षस्य वैयावृत्त्यगुण उद्भावितः स च तपोविशेष एव । अथ हिंसारूपेऽस्मिन् यक्षव्यापारे कथं वैयावृत्त्यकृत्योक्तिरिति चेदेतत्त्वया वक्तुः समीप एव गत्वा प्रष्टव्यम् अन्यत्रानाश्वासात्परिणामप्राधान्यवादिनां तु न कश्चिदत्र शंकालेशोऽपि ॥ १३ ॥ किंच सम्यक्त्वं प्रथमः संवरन्नेद इति सम्यग्दृष्टित्वेनैव देवानामवर्जनीयं धर्मित्वम् । तदुक्तं स्थानांगे--"पंच आसवदारा पन्नत्ता तंजहा मिच्छत्तं, अविरई, पमाउ, कसाया, जोगा । पंच संवरदारा पण्णत्ता तंजहा--सम्मत्तं, विरई, अपमाउ, अकसायत्तं, अजोगत्तम्" इति । हंतैवं मिथ्यादर्शनशल्यविरमणेन सम्यग्दृष्टिमात्रस्य विरतत्त्वं प्रसक्तमिति चतुर्थगुणस्थानकोच्छेदो न एकाश्रववत्तयापि त्रयोदशगुणस्थानेऽनाश्रवत्वव्यपदेशवदेकसंवरसत्तया चतुर्थगुणस्थानेऽविरतत्वव्यपदेशस्याविरुद्धत्वात् फलं तु

हेतुमात्राधीनं न पाणिपिधेयमिति श्रद्धेयम् ॥ १४ ॥ इत्थमेव धर्मव्यवसायग्रहणपूर्वकः सूर्याभदेवस्य देवाधिदेवप्रतिमार्चनविधिरतिशयितभक्त्युपबृंहितः श्रीराजप्रश्नीयसूत्रोक्तः संगच्छते । तथा च तत्पाठः-तएणं तस्स सूरियाभस्स देवस्स सामाणियपरिसोववन्नगा देवा पोत्थयरयणं उवणामंति । ततेणं से सूरियाभे देवे पोत्थयरयणं गिण्हइ पोत्थयरयणं गिण्हित्ता पोत्थयरयणं विघाडेइ पोत्थयरयणं वाएइ पोत्थयरयणं वाएत्ता धम्मियं ववसायं गिण्हति पोत्थयरयणं पडिनिक्खिवति सिंहासणाओ अब्भुट्ठेइ २ ववसायसभाओ पुरच्छिमिल्लेण तोरणेणं तिसोवाणपडिरूवएणं पच्चोरुहइ २ हत्थपादं पक्खालेति २ आयंते चोक्खे परमसुईभूए सेयरययामयं विमलसलिलपुण्णं मत्तगयमहामुहागितिसमाणं भिंगारं पगिण्हइ २ जाइं तत्थ उप्पलाइं जाव सयसहस्सपत्ताइं ताइं गिण्हति २ णंदातो पुक्करणीतो पच्चोरुहति जेणेव सिद्धायतणे तेणेव पहारेत्थगमणाए । ततेणं तं सूरियाभं देवं चत्तारि सामाणियसाहस्सीओ जाव सोलस आयरक्खदेवसाहस्सीओ अन्ने य बहवे सूरियाभ जाव देवीओ य अप्पेगतिया उप्पलहत्थगया जाव सयसहस्सपत्तहत्थगया सूरियाभं देवं पिट्ठतो समणुगच्छंति । ततेणं तं सूरियाभं देवं बहवे आभिओगिया देवा य देवीओ य अप्पेगइया कलसहत्थगया जाव अप्पेगइया धूवकडुच्छुयहत्थगता हट्ठतुट्ठ जाव सूरियाभं देवं पिट्ठतो २ समणुगच्छंति ततेणं सूरियाभे जाव देवेहि य देवीहि य सद्धिं संपरिवुडे सव्विड्ढीए जाव णातियरवेणं जेणेव सिद्धायतणे तेणेव उवागच्छति सिद्धायतणं पुरच्छिमिल्लेणं दारेणं अणुपविसति २ जेणेव देवच्छंदे जेणेव जिणपडिमाओ तेणेव उवागच्छति जिणपडिमाणं आलोए पणामं करेति लोमहत्थगं गिण्हति २ जिणपडिमातो सुरभिणा गंधोदएणं ण्हाएति ण्हाइत्ता सरसेणं गोसीसचंदणेणं गायाइं अणुलिंपित्ता जिणपडिमाणं अहयाइं देवदूसजु-

अलाइं नियंसेइ २ पुप्फारुहणं मल्लारुहणं चुन्नारुहणं वत्थारुहणं आभरणारुहणं करेति करित्ता आसत्तोसत्तविउलवट्टवग्घारियमल्लदामकलावं करेइ करित्ता कयग्गहगहियकरयलप्पब्भट्ठविप्पमुक्केणं दसद्धवन्नेणं कुसुमेणं मुक्कपुप्फपत्तोवयारकलियं करेति करित्ता जिणपडिमाणं पुरतो अच्छेहिं सण्हेहिं रययामएहिं अच्छरसाहिं तंडुलेहिं अट्ठमंगलए आलिहइ तंजहा सत्थियं जाव दप्पणं। तयणंतरंचणं चंदप्पभरयणवइरवेरुलियविमलदंडकंचणमणिरयणभत्तिचित्तं कालागुरुपवरकुंदुरुक्कधूवमघमघंतगंधुत्तमाणुविद्धं धूववट्टिं विणिम्मुयंतं वेरुलियमयं कडुच्छुयं पग्गहिय पत्तेयं २ धूवं दाऊण जिणवराणं अट्ठसयविसुद्धगंथजुत्तेहिं महावित्तेहिं संथुणइ। सत्तट्ठपयाइं पच्चोसक्कइ २ वामं जाणुं अंचेइ दाहिणं जाणुं धरणितलंसि निहट्टु तिक्खुत्तो मुद्धाणं धरणितलंसि निवेसेइ२इसिं पच्चुन्नमइ२करयलपरिग्गहियं सिरसावत्तं मत्थए अंजलिं कट्टु एवं वयासी नमोत्थुणं जाव संपत्ताणं वंदइ णमंसइ ॥ १५ ॥ अयमेव पाठः प्रायो विजयदेववक्तव्यतायां जीवाभिगमेऽपि ॥ १६ ॥ अमून्यक्षराणि जंबूद्वीपप्रज्ञप्त्यादावप्यूह्यानि । ननु जिनप्रतिमानामिव द्वारशाखाशालभंजिकादीनामप्यर्चनश्रवणं "धम्मियं ववसायं ववसइत्ति" धार्मिकं धर्मानुगतं व्यवसायं व्यवस्यति कर्तुमभिलषतीति भावः इति सामान्यत एव वृत्तौ व्याख्यानाच्च कुलधर्मानुगत एवायं व्यवसायो भविष्यति "दसविहे धम्मे पन्नत्ते गामधम्मे, नगरधम्मे, रज्जधम्मे, पासंडधम्मे, कुलधम्मे, गण, संघ, सुअ, चरित्तधम्मे, अत्थिकायधम्मेत्ति" सूत्रे दशधा धर्मपदार्थस्य विभक्तत्वादिति चेन्न द्वारशाखाद्यर्चनाज्जिनप्रतिमार्चने आलोकप्रणामशक्रस्तवाष्टोत्तरशतवृत्तस्तोत्रादीनां स्फुटतरस्य विशेषस्य सूत्र एवोपलभ्यमानत्वात्। धर्मव्यवसायस्य तत्र सम्यक्त्वानुगतस्यैव संभवात्। अत एवाभिनवोत्पन्नस्य सूर्याभस्य "किं मे पूर्वं श्रेयः किं मे पश्चा-

च्छ्रेय" इति प्रश्ने सामानिकदेवैर्जिनप्रतिमार्चनं जिनसंबंध्यर्चनं चेति द्वयमेव तथोत्तरितमित्युभयत्र वैधीयं प्रवृत्तिरन्यत्र तु रागप्राप्ता यथा भरतेशस्य भगवज्ज्ञानोत्पत्तौ चक्रोत्पत्तौ चेति न कश्चिद्दोषः। अयं चात्र पाठः-"तएणं तस्स सूरियाभस्स देवस्स पंचविहाए पज्जत्तिए पज्जत्तभावं गयस्स समाणस्स इमे एतारूवे अज्झत्थिए चिंतिए पत्थिए मणोगए संकप्पे समुप्पज्जित्था "किं मे पुव्विं करणिज्जं किं मे पच्छा करणिज्जं किं मे पुव्विं सेयं किं मे पच्छा सेयं किं मे पुव्विं पच्छावि हियाए सुहाए खमाए निस्सेयसाए आणुगामियत्ताए भविस्सइ तएणं तस्स सूरियाभस्स देवस्स सामाणियपरिसोववन्नगा देवा सूरियाभस्स इममेतारूवमज्झत्थियं जाव समुप्पन्नं समभिजाणित्ता जेणेव सू० ते० सूरियाभं देवं करयलपरिग्गहियं सिरसावत्तं मत्थए अंजलिं कट्टु जएणं विजएणं वद्धावेंति २ एवं वयासी एवं खलु देवाणुप्पियाणं सूरियाभे विमाणे सिद्धायतणंसि जिणपडिमाणं जिणुस्सेहप्पमाणमित्ताणं अट्ठसयं सन्निखित्तं चिट्ठति सभाएणं सुहम्माए माणवए चेइए खंभे वइरामएसु गोलवट्टसमुग्गएसु बहुईओ जिणसकहाओ सन्निक्खित्ताओ चिट्ठंति ताओणं देवाणुप्पियाणं अन्नेसिं बहूणं वेमाणियाणं देवाण य देवीण य अच्चणिज्जाओ जाव पज्जुवासणिज्जाओ तंजहा एयंणं देवाणुप्पियाणं पुव्विं करणिज्जं एयंणं देवाणुप्पियाणं पच्छाकरणिज्जं तं एयंणं देवाणुप्पियाणं पुव्विं सेयं तं एयंणं देवाणुप्पियाणं पच्छा सेयं तं एयंणं देवाणुप्पियाणं पुव्विं पच्छावि हियाए सुहाए खमाए निस्सेयसाए आणुगामियत्ताए भविस्सइ" इति ॥ १७॥ नन्वत्र पूर्वपश्चाच्छब्दाभ्यां तद्भवीयकालत्रयव्यापिश्रेयोहेतुताया एव प्रतिपादनात्सूर्याभादीनां जिनप्रतिमार्चनमपि नामुष्मिकफलहेतुरिति मोक्षार्थिना विरतिमता नैतदालंबनं विधेयमिति चेन्न पश्चाच्छब्देन तद्भवीयानागतकालस्यैवाक्षेप इत्यत्र मानाभावात्-"अम्मताय मए

भोगा भुत्ता विसफलोवमा । पच्छा कडुयविवागा अणुबंधदुहावहा ॥ १ ॥" इति मृगापुत्रीयाध्ययने पश्चाच्छब्देनामुष्मिकानागतकालस्य स्पष्टमेवाभिधानात् । किं च "किं मे पुव्विं करणिज्जं किं मे पच्छा करणिज्जं" इत्यनेन नतभवे कालत्रये तस्यावश्यकर्तव्यत्वमेव जिज्ञासितं सूर्याभादिभिः । तच्च निश्चित्य व्ययमभिहितं निश्चितार्थभावैः सामानिकैरिति कथं न तस्यामुष्मिकफलता प्रदेशिने केश्याख्यातपूर्वपश्चाद्रमणीयतायाइवेति विचारणीयम् । भवांतरार्जितशुभकर्मभोगरूपोचितप्रवृत्तिमात्रेण तच्चरितार्थमात्रोक्तावन्यतीर्थिकमतप्रवेशः । एवं हि तपःसंयमादिकष्टमपि भवांतरार्जितकर्मभोगसाधनमात्रमिति वदन् बौद्धदुरुढ एव । विजयेनामुष्मिकशुभावहादृष्टार्जनेन समाधानं तूभयत्र तुल्यम् । ऐहिकविध्वंसहेतुमंगलमात्रतया मोक्षहेतुतानिराकरणं चोद्यमप्युभयत्र सुवचं समसमाधानं च "धम्मो मंगलमुक्किठ्ठ"मित्यादिना तपःसंयमादौ मंगलरूपतायाः स्पष्टमेवोक्तत्वात् ॥ १८ ॥ एतेन स्थितिरूपमेव जिनप्रतिमाद्यर्चनं देवानां न तु धर्मरूपमिति धर्मशृगालादिप्रलपितमपास्तम् । स्थितेरपि धर्माधर्मरूपतया विवेचने धर्मस्थितावेव तस्यान्तर्भावस्य वाच्यत्वात् । धर्मे स्थितिपदं नास्तीति तु मुग्धजनध्यांध्यकरणमात्रम् बृहत्कल्पषष्ठोद्देशके साधुधर्मेऽपि स्थितिपदस्य स्पष्टमभिधानात् । "छव्विहा कप्पठिई पन्नत्ता तंजहा सामाइयसंजयकप्पठिइ १ छेओवठावणियकप्पठिइ २ णिव्विसमाणकप्पठिइ ३ णिविठ्ठकाइयकप्पठिइ ४ जिणकप्पठ्ठिइ ५ थेरकप्पठ्ठिइत्ति ६ ॥ १९ ॥ एतेन लोकसंग्रहार्थतास्थितावपि प्रत्युक्तम् ज्ञानिनामपि लोकसंग्रहस्य कर्मक्षपणार्थतयैवाभियुक्तैर्व्याख्यातत्वात् । तथा च प्राकृतकर्मफलभोगपक्ष एवमुपतिष्ठते स च प्रागेव प्रतिबंद्या निरस्त इति ॥ २० ॥ एतेनैव यत्र प्रत्यक्षनिर्देशो पश्चात्पूर्वशब्दाभ्यां फलोपदेशस्तत्रैवैहिकमात्रफलकत्वम् । यत्र च परलोकवाचिशब्देन निर्देश-

स्तत्रामुष्मिकफलकत्वं लभ्यते । यथा स्कंदकोद्देशके-"आलित्तेणं भंते लोए आलित्तपलित्तेणं भंते लोए जराए मरणेण य से जहा णामए केइ गाहावती अगारंसि झियायमाणंसि जे से तत्थ भंडे भवति अप्पभारमोल्लगुरुए तं गहाय आताए एगंतं अवक्कमति एस मे णित्थारिए समाणे पुरो हियाए सुहाए खमाए णिस्सेसाए आणुगमियत्ताए भविस्सति एवामेव देवाणुप्पिया एगेभंडे इट्ठे कंते पिए मणुन्ने मणामे थिज्जे वेसासिए संमते अणुमते बहुमते भंडकरंडगसमाणे माणं सीयं माणं उण्हं माणं खुहा माणं पिवासा माणं चोरा माणं वाला माणं दंसा माणं मसया माणं वातियपेत्तियसन्निवातिय विविहा रोगातंका परिस्सहोवसग्गा फुसंतुत्तिकट्टु एस मे णित्थारिए समाणे परलोगस्स हिताए खमाए णिस्सेसाए आणुगामियत्ताए भविस्सती"त्यत्र गृहपतेर्भांडं गृहीत्वापक्रमणस्यैहिकमात्रफलकत्वम् स्कंदकस्य च स्वात्मनिस्तारणस्यामुष्मिकफलकत्वं प्रसिद्धम् । एवं च जिनप्रतिमार्चनादि सूर्याभादीनामैहिकमात्रफलकमेवेत्यपि निरस्तम् अन्यत्र दृष्टजन्ममात्रवेदनीयकर्मणोऽदृष्टजनकस्य प्रेत्याफलजनकत्वस्यार्थसिद्धत्वात् । अन्यथा भगवद्वंदनादिकमपि देवानां प्रेत्य हितावहं न स्यात्तस्य च तथात्वं कंठत एवोक्तं सूत्रे । तथा च राजप्रश्नीये सूर्याभोक्तिः-"तं महाफलं खलु तहारूवाणं अरिहंताणं भगवंताणं णामगोयस्सवि सवणयाए किमंग पुण अभिगमणवंदणनमंसणपडिपुच्छणपज्जुवासणयाए एगस्सवि आयरियस्स धम्मियस्स सुवयणस्स सवणयाए किमंग पुण विउलस्स अट्ठस्स गहणयाए तं गच्छामिणं समणं भगवं महावीरं वंदामि णमंसामि सक्कारेमि सम्माणेमि कल्लाणं मंगलं देवयं चेइयं पज्जुवासामि एयं मे पेच्चा हिताए सुहाए खमाए निस्सेसाए आणुगामियत्ताए भविस्सइत्ति" ॥ २१ ॥ ननु वंदनपूजनादिफलस्थले देवानां पाठवैसदृश्यदर्शनादेवास्माकं भ्रम इति चेन्न वंदनाधिकारे पर्युपासनावंदन-

पूजाया अपि ग्रहणात् को ह्येकाधिकारिकृतस्य विहितकर्मणः फले विशेषः । अधर्मिणां हि देवानामधर्मित्वेऽभ्युपगम्यमाने द्वयमपि तेषां विपरीतफलं वाच्यं धार्मिकमूर्धन्यैस्तेषां धर्मित्वमभ्युपगच्छद्भिश्च तुल्यजातीयशुभफलमिति । न च वंदनाधिकारे "पेच्चाहियाए" इत्येव सार्वत्रिकः पाठो भगवत्यौपपातिकादौ-"एयण्णे इह भवे वा परभवे वा आणुगामियत्ताए भविस्सइत्ति" पाठस्यापि दर्शनात् । तस्माच्छब्दच्छलनं जाल्मानामेव पण्डितास्त्वर्थतात्पर्यैकरसिका इति प्रत्येयम् ॥ २२ ॥

अथ स्वरूपतो निरवद्यं भगवद्वंदनं देवानां परलोकहितम् । अत एव सूर्याभाभियोगिकदेवानां वंदनादिप्रतिज्ञा भगवतानुमता । तथा च सूत्रम्-अम्हेणं भंते सूरियाभस्स देवस्स आभियोगिया देवाणुप्पियं वंदामो णमंसामो सक्कारेमो सम्माणेमो कल्लाणं मंगलं देवयं चेइयं पज्जुवासामो देवाति समणे भगवं महावीरे देवे एवं वयासी पोराणमेयं देवा जीयमेयं देवा किच्चमेयं देवा करणिज्जमेयं देवा आइन्नमेयं देवा जंणं भवणवइवाणमंतरजोइसियवेमाणिया देवा अरिहंते भगवंते वंदंति णमंसंति वंदित्ता नमंसित्ता साइं साइं णामगोयाइं साधिंति तं पोराणमेयं देवा जाव अब्भणुन्नायं देवाणं" इति सूर्याभवंदनादिप्रतिज्ञायामप्ययमेव पाठः । पूजादिकं तु स्वरूपतः सावद्यमिति न तद्देवानां परलोकहितविध्यागतम् किं तु रागप्राप्तमेव । तथा च सूर्याभेण स्वस्य भवसिद्धिकत्वादिप्रश्ने कृते तदुत्तरे वाचावधृते जातहर्षेण त्रिःकृत्वोऽपि नाटकानुज्ञाया वचने भगवता तूष्णीमेव स्थितम् । तथा च सूत्रम्-"अहन्नं भंते सूरियाभे भवसिद्धिए अभवसिद्धिए सम्मदिट्ठी मिच्छादिट्ठी परित्तसंसारे अणंतसंसारे सुलभबोहिए दुल्लभबोहिए आराहए विराहए चरिमे अचरिमे सूरियाभाति समणं भगवं महावीरे सूरियाभं देवं एवं वयासी सूरियाभा तुमण्णं भवसिद्धिए नो अभवसिद्धिए जाव चरिमे णो अचरिमे तएणं सूरियाभे देवे

समणेणं भगवया महावीरेणं एवं वुत्ते समाणे हट्ठतुट्ठचित्तमाणंदिए परमसोमणसे समणं भगवं महावीरं वंदति नमंसति २ एवं वयासी तुब्भे णं भंते जाव सव्वं जाणह सव्वं पासह सव्वं कालं जाणह सव्वे भावे पासह जाणंतिणं देवाणुप्पिया मम पुव्विं वा पच्छा वा ममेयारूवं दिव्वं देविड्ढिं दिव्वं देवजुइं दिव्वं देवाणुभागं लद्धं पत्तं अभिसमण्णागयं तं इच्छामिणं देवाणुप्पियाणं भत्तिपुव्वगं गोयमादियाणं समणाणं निग्गंथाणं दिव्वं देविड्ढिं दिव्वं देवजुइं दिव्वं देवाणुभागं दिव्वं बत्तीसतिबद्धं नट्टविहं उवदंसित्तए तएणं समणे भगवं महावीरे सूरियाभेणं देवेणं एवं वुत्ते समाणे सूरियाभस्स देवस्स एयमट्ठं नो आढाति णो परियाणाति तुसिणीए संचिट्ठति तएणं से सूरियाभे देवे समणं भगवं महावीरं दोच्चंपि तच्चंपि एवं वयासी-तुब्भेणं भंते सव्वं जाणह जाव उवदंसित्तएत्ति कट्टु समणं भगवं महावीरं तिखुत्तो आयाहीणं पयाहीणं वंदइ" इत्यादि इति-चेन्मैवम् भवसिद्धिकत्वादिना निश्चितयोग्यभावे सूर्याभे नाटकरूपद्रव्यपूजानुज्ञां याचमाने भगवतोऽनिषेधस्यैवानुमतिरूपत्वात् "अनिषिद्धमनुमतमिति" न्यायात्। कथमन्यथा धर्महेतुमुपस्थिते प्रथमं सर्वविरतिमनुपदिश्य देशविरत्युपदेशे-"गाहावइचोरगाहणविमोक्खणट्ठयाए" इत्यादिसिद्धांतसिद्धन्यायेन क्रमोल्लंघनकारिणः स्थावरहिंसानुमतिरप्रतिषेधानुमतिरेव हिंसा। एवमत्रापि योग्ये प्रष्टरि अप्रतिषेधानुमतिरवारितैव। तदिदमभिप्रेत्योक्तं श्रीहरिभद्रसूरिभिः-"जिणभवणकारणाइवि भरहेण न णिवारियं? तेणं। जह तेसिंचिय कामा सल्लसरिसाइणातेण ॥ १ ॥ ता एस अणुमउ च्चिय अप्पडिसेहाउ तंतजुत्तीए। इय सेसाणवि इत्थं अणुमोअणमाइ अविरुद्धं ॥ २ ॥ अयं चात्र प्रयोगः नाटकादि द्रव्यार्चनं भगवतोऽनुमतं योग्यं प्रत्यनिषिद्धत्वात् यद्भगवदनुमतं न भवति तद्योग्यं प्रति प्रतिषिद्धं भवति यथा कामभो-

गादिकमिति व्यतिरेकी यद्येन यं प्रति न निषिध्यते तत्तं प्रति तदनुमतं यथाऽक्रमज्ञस्य प्रथमदेशविरत्युपदेशे स्थावरहिंसादिकमिति सामान्यतो व्याप्तावन्वयी वा ॥ २३ ॥ ननु न वयमनुमानरसिका मौनकारणाभावात् सूत्रे साक्षात्फलादर्शनाच्च द्रव्यस्तवे विप्रतिपद्यामह इति चेच्छृणु मौनकारणं तावन्नाटकोपक्रमस्य वारणे सूर्याभे भगवद्भक्तिध्वंसः प्रवर्तने च गौतमादीनां स्वाध्यायोपघात इति तुल्यायव्ययत्वमेवेति वृत्तिकृदभिप्रायः। वस्तुतस्तु स्वरूपतः सावद्येऽनुबंधतश्च निरवद्ये भगवतो भाषास्वभाव एवायं पर्यनुयोगस्य विषयेऽन्यत्रापि स्वतंत्रेच्छाया अपर्यनुयोज्यत्वोक्तेः। अत एव चारित्रग्रहणविधावपि शिष्यं प्रति भगवतः क्वचिदिच्छानुलोमा भाषा क्वचिच्चाज्ञापनीति वैचित्र्यं दृश्यते। इच्छानुलोमाभेदप्रायं चैतन्मौनमिति विचारणीयमभिनिवेशं विहाय चेतसि। यच्चोक्तम्-"फलं द्रव्यस्तवस्य न दृश्यते सूत्र" इति तत्र न ह्ययं स्थाणोरपराधो यदेनमन्धा न पश्यंतीति न्यायः "देवाणुप्पियाणं भत्तिपुव्वगं" इत्यादिना भगवंतं प्रति भक्तिरूपत्वेन गौतमादीन् प्रति च गौरवात् प्रीतिहेतुक्रिया आराधनेति लक्षणादाराधनाख्यशुश्रूषारूपत्वेन सिद्धस्य सूर्याभनाटकस्योत्तराध्ययनेषु सम्यक्त्वपराक्रमाध्ययने चतुर्थजल्पोत्तर एव साक्षात्फलदर्शनात्। तथा च सूत्रम्-"गुरुसाहम्मियसुस्सूसणयाएणं भंते जीवे किं जणइ गोयमा गुरुसाहम्मियसुस्सूसणयाए विणयपडिवत्तिं जणइ विणयपडिवत्तिएणं जीवे अणच्चासायणसीले नेरइयतिरिक्खजोणियमणुस्सदेवदुग्गईओ निरुंभइ वन्नसंजलणभत्तिबहुमाणयाए मणुस्सदेवसुगईओ निबंधइ सिद्धिसुगइं च विसोहेइ पसत्थाइं च णं विणयमूलाइं सव्वकज्जाइं साहेइ अन्ने य बहवे जीवे विणइत्ता भवइत्ति"। अत्र मनुष्यदेवसद्गती बध्नाति इत्यनेन सम्यग्दृष्टेरिवापुनर्बंधकस्य मिथ्यादृष्टेरपि भगवद्भक्तिः सफलेति दर्शितम्। न हि सम्यग्दृष्टिर्मनुष्यो वैमा-

निकगतिं विनान्यां गतिं बध्नाति देवकृतभक्तिविषयो वायं निर्देशः देवस्य सम्यग्दृशोऽपि भगवद्भक्त्या मनुष्यगतेरेव बंधादिति ध्येयम् ॥ २४ ॥ एतेन "दाणट्ठयाइ जे पाणा हम्मंति तसथावरा । तेसिं सारक्खणट्ठाए तम्हा अत्थित्ति नो वए ॥ १ ॥ जेसिं तं उवकप्पंति अन्नं पाणं तहाविहं । तेसिं लाभंतरायंति तम्हा णत्थित्ति णो वए ॥ २ ॥ जे अ दाणं पसंसंति वहमिछंति पाणिणं । जेअणं पडिसेहंति वित्तिछेयं करंति ते ॥ ३ ॥" इत्यादिसूत्रकृतांगैकादशाध्ययनोक्तदानाद्युपदेश इव जिनपूजाद्युपदेशोऽपि साधोः पुण्यपापान्यतरदर्शनदोषभियानुचित इति निरस्तम् । उक्तदानोपदेशस्यायोग्यान्यतीर्थिकप्रतिबोधितसामान्यधर्मिविषयतया निषिद्धत्वेऽपि योग्ये प्रष्टरि विभागनिर्धारणस्यावश्यकत्वात् अन्यथा प्रष्टुः संदेहसमुन्मज्जनप्रसंगात् । प्रकृते च योग्यप्रश्ने भगवतो मौनमनुमतिमेव व्यंजयति । न ह्ययोग्यस्य जमालेर्विहारप्रश्ने मौनतुल्यमेतदिति । दानानुपदेशोऽप्यवस्थाविशेषविषयो विशिष्टगुणस्थानावाप्तियोग्यताकारणेन घोरापवादिकदानस्यापि शास्त्रार्थत्वादित्यप्युक्तमाचार्यैरष्टकादौ । किं च दानादौ पापपुण्यान्यतरानुपदेशः साधोः किं तथाभाषास्वभावात् उत तदन्यतरफलाभावात् आहोश्वित् संकीर्णफलभावात् उताहोऽन्यतरोपदेशे कस्यचिद्धेतुविपर्यस्तबुद्धयुत्पादभयात् । नाद्यो निर्बीजस्य स्वभावस्यानाश्रयणीयत्वात् । न द्वितीयः पापपुण्यान्यतरफलाजनकस्य छद्मस्थकर्मणोऽप्रसिद्धेः । न तृतीयो द्रव्यभावरूपाणां योगानामध्यवसायानां च शुभाशुभव्यतिरिक्ततृतीयराश्यारूढानामभावात् संकीर्णकर्मबंधरूपफलासिद्धेः । योऽपि व्यवहारतोऽविधिना दानादिरूपः शुद्धाशुद्धयोग इष्यते सोऽपि परिणामप्राधान्यान्निश्चयत उत्कटैककोटिशेषतयैव पर्यवस्यन्न संकीर्णकर्मबंधायालम् । द्रव्यकोटेर्नैर्बल्यस्य भावकोटेः प्राबल्यस्य च सर्वत्र संभवात् । अन्यथा नद्युत्तारादौ

यतमानस्य यतेरपि द्रव्यहिंसाभावचारित्रनिमित्तकमिश्रकर्मबंधप्रसंगात् । तस्माद्बंधत एकरूपमेव कर्म । संक्रमतस्तु मिश्रमोहनीयरूपं संकीर्णं संभवत्यपीति प्रसिद्धं महाभाष्यादाविति न संकीर्णबंधपक्षो ज्यायान् । चतुर्थे तु पक्षे विशेषधर्मविवेकानभिज्ञस्य सामान्यधर्मप्रियस्य विप्रत्ययोत्पादनमेव विविच्यानुपदेशे कारणमागतमिति योग्ये मार्गविघ्ने च विविच्य फलोपदेश आवश्यकोऽन्यथा कर्मकरादीनां निषेधोऽपि सूत्रेऽनुपपन्नः स्यात् । तत्रापि वारणावारणयोर्वृत्तिविच्छेदप्राणवधानुमोदनप्रसंगरूपाया उभयतःपाशारज्जोर्दुर्निवारत्वात् । तस्माद्योग्यतयाऽनिषेधानुमतं जिनपूजादि भगवतेति व्यवस्थितम् ॥ २५ ॥ अत एवार्थदंडक्रियायां नागभूतयक्षार्थभूतविधिवर्जिनपूजाद्यारंभः सूत्रे प्रतिपदोक्त्या न परिगणितः । इदमप्यंजनं दत्त्वा मिथ्यात्वमलिना दृष्टिः सचेतसा नैर्मल्यमानेया । तथोक्तं द्वितीयांगे द्वितीयश्रुतस्कंधे द्वितीयाध्ययने-"पढमे दंडसमादाणे अट्ठादंडवत्तिए त्ति आहिज्जइ से जहा णामए केई पुरिसे आयहेउंवा णाइहेउं वा मित्तहेउं वा णागहेउंवा भूतहेउं वा जक्खहेउं वा तं दंडं तसथावरेहिं पाणेहिं सयमेव णिस्सिरइ अन्नेहिं वा णिस्सिरावेइ अन्नंपि निस्सरंतं समणुजाणइ एवं खलु तस्स तप्पत्तियं सावज्जंति आहिज्जइ पढमे दंडसमादाणे अट्ठादंडेत्ति आहिए" अत्र यदि जिनपूजार्थेऽपि कोऽपि वधः परिगणनीयः स्यात्तदा "नागहेउं" इत्यादिवत् "जिणपडिमाहेउं" इत्यप्यवक्ष्यत । तस्मादर्थदंडक्रियायां प्रतिपदोक्तिप्रसंगेऽप्यनुक्तत्वान्न तस्य तादृशक्रियारूपत्वमिति न निषिद्धोऽयम् ॥ २६ ॥ एतेन जिनपूजादौ यावानारंभस्तावानधर्मः यावती च भक्तिस्तावान् धर्म इति मिश्रभाषापि परास्ता । मिश्रभाषायाः साधूनामसत्यभाषाया इव वक्तुमयोग्यत्वात् । अन्यथा "कविला इत्थंपि इहयंपित्ति" मरीचेर्मिश्रवचनमुत्सूत्रं न स्यादत एव श्रुतभावभाषापि तृती-

यत्रेदपरित्यागेन त्रिविधैव दशवैकालिकनिर्युक्तावुक्ता। हंतैवं मिश्रपक्षः सूत्रकृतोक्त उच्छिद्यत एवेति चेदुच्छिद्यत एव। तत्त्वचिंतायां पक्षद्वय एव पक्षत्रयस्यांतर्भावनात्। तथा च सूत्रम्-"अविरतिं पडुच्च बाले आहिज्जइ विरतिं पडुच्च पंडिए आहिज्जइ विरताविरतिं पडुच्च बालपंडिए आहिज्जइ तत्थणं जा सा सव्वतो अविरती एस ठाणे आरंभठाणे अणारिए जाव असव्वदुक्खपहीणमग्गे एगंतमिच्छे असाहू तत्थणं जा सा सव्वतो विरती एस ठाणे अणारंभठाणे आयरिए जाव सव्वदुक्खप्पहीणमग्गे साहू तत्थणं जा सा सव्वतो विरताविरती एस ठाणे आरंभाणारंभठाणे आरिए जाव सव्वदुक्खप्पहीणमग्गे एगंतसम्मे साहू एवमेव समणुगम्ममाणा समोगाहिज्जमाणा इमेहिं चेव दोहिं ठाणेहिं समोअरंति तंजहा धम्मे चेव अधम्मे चेव उवसंते चेव अणुवसंते चेव तत्थणं जे से पढमस्स ठाणस्स अधम्मपक्खस्स विभंगे एवमाहिज्जति तस्सणं इमाइं तिन्नि तेवठ्ठाइं पावाउअसयाइं भवंतित्ति अक्खायमित्यादि"। अत्र ह्यन्यतीर्थिकपक्ष एवाधर्मरूपो जैनपक्षस्तु अपुनर्बन्धकादिर्वीतरागचारित्रपर्यवसानो धर्मरूप एव कंठतो विरतिरूपधर्मोपादानेऽप्यर्थतः सम्यक्त्वादिधर्मस्याप्यपरित्यागात् अन्यथा चतुर्थगुणस्थानं कस्मिन् पक्षेऽतर्भावनीयम्। ये तु देवानांप्रिया देशविरतेर्मिश्रपक्षतयैव कंठोक्तत्वादेकांतधर्मतां न श्रद्दधते ते सूत्रपशवः क्रियालेशवतां तापसादीनामपि मार्गं मिश्रपक्षतयोक्तं जात्यंतरं किमिति न श्रद्दधीरन्। तथा च सूत्रम्-"अहावरे तच्चस्स ठाणस्स मीसगस्स विभंगे एवमाहिज्जति जे इमे भवंति आरण्णिया आवसहिया गामंतिया कण्हुइ राहस्सिया जाव ततो विप्पमुच्चमाणा भुज्जो एलमूयत्ताए पच्चायंति एस ठाणे अणारिए अकेवले जाव असव्वदुक्खप्पहीणमग्गे एगंतमिच्छे असाहू एस खलु तच्चस्स ठाणगस्स विभंगे एवमाहिएत्ति" तस्मात्परेषामधर्म इव जिनाज्ञावतां मिश्रपक्षोऽपि धर्म

एवेति ध्येयम् । अनेकांतांशप्रकारेणैव व्यवच्छेदनीय इति तत्त्वम् ! ॥ २१ ॥ आस्तामन्यत् परं जिनपूजादिद्रव्यस्तवस्य धर्मकर्मत्वेऽभ्युपगम्यमाने हिंसाया दूषणत्वं क्व गतमिति चेत् कया विधया तस्या दूषणत्वं-अविरतिविधया, प्रमादविधया, कषायविधया, योगविधया वा । नाद्योऽसंयतानामविरतिं प्रतीत्यात्माद्यारंभकत्वस्य सदातनत्वेन तत्तद्धर्मक्रियाकालीनानुषंगिकहिंसाया अविरतिविधया विशेष्याननुप्रवेशात् । न द्वितीयो भक्तियतनानुबंधशुद्धौ प्रवृत्तस्यापि धर्मकर्मणि प्रमादकार्यानुत्पत्तेः । अन्यथा प्रमत्तसंयतानां शुभाशुभयोगभेदेन आत्माद्यनारंभकत्वतदनारंभकत्वभेदभणनानुपपत्तेः । अयमतिदेशो हि संयतासंयतादावपि द्रष्टव्यः पृथक् तत्र मिश्रयोगकार्यानुपदेशात् । अत एव तेजोलेश्यादिदंडकत्रयेऽपि संयतासंयतप्रमत्ताप्रमत्तभेदभिन्नान्येव सूत्राणि भगवत्यामतिदिष्टानीति दिक् । नापि तृतीयचतुर्थौ भक्तियतनाभ्यामेव काषायिकानामध्यवसायानां योगानां च शुभानामेव जननात् । स्वरूपतो दोषत्वासंभवे "आसवा ते परिस्सवा" इत्यादिसूत्रन्यायेनैवानैकांतिकत्वात् । तस्माद्विधिभक्तिशुद्धे धर्मकर्मण्यारंभो न दोषावह इति स्थितम् । यत्तु-"अकसिणपवत्तगाणं विरयाविरयाण एस खलु जुत्तो । संसारपयणुकरणे दव्वथए कूवदिट्ठंतो ॥ १ ॥" इत्यनेनावश्यकनिर्युक्तौ महानिशीथे च द्रव्यस्तवे कूपखननं दृष्टांतीकृतम् । तत्कूपखननं यथा स्वपरोपकाराय भवत्येवं स्नानपूजादिकं करणानुमोदनद्वारेण स्वपरयोः पुण्यकारणं स्यादित्येवंपरतया व्याख्येयम् । ये तु प्रांचो नैतद्व्याख्यानमागमानुपाति धर्मार्थप्रवृत्तावपि आरंभजनितस्य पापस्येष्टत्वात् । कथमन्यथा भगवत्यामुक्तम्-"तहारूवं समणं वा माहणं वा पडिहयपच्चक्खायपावकम्मं अफासुएणं अणेसणिज्जेणं असण ४ पडिलाभेमाणे भंते किं कज्जइ गोयमा अप्पे पावकम्मे कज्जइ बहुतरिया से णिज्जरा कज्जइत्ति"तथा

ग्लानप्रतिचरणानंतरं पंचकल्याणकप्रायश्चित्तप्रतिपत्तिरपि कथं स्यात् । तस्माद्यथा कूपखननं श्रमतृष्णाकर्दमोपलेपादिदोषदुष्टमपि जलोत्पत्तावनंतरोक्तदोषानपोह्य स्वोपकाराय परोपकाराय च भवति । एवं स्नानादिकमप्यारंभदोषमपोह्य शुभाध्यवसायोत्पादनेन विशिष्टाशुभकर्मनिर्जरणपुण्यबंधकारणं भवत्येवं व्याख्येयमिति वदंति तेषामाशयं त एव जानंति । पूजार्थं स्नानादिकरणकालेऽपि निर्मलजलकल्पशुभाध्यवसायस्य विद्यमानत्वेन कर्दमलेपादिकल्पपापाभावादित्थमुदाहरणवैषम्यापातात् । न चेदेवं कथं क्रियमाणं कृतमिति भगवदुक्तनयोपग्रहः । कथं वा तन्मूलकमापरिणतस्य गुरुसमीपं प्रतिष्ठासमानस्यान्तरैव कृतकालस्याराधकत्ववचनं भगवत्यादावुपपद्यते । यच्चाप्रासुकदानेऽल्पतरपापार्जनमुक्तं तल्लुब्धकदृष्टांतेन दायकस्याव्युत्पन्नत्वात् द्रव्यक्षेत्रादिकारणविध्यनभिज्ञत्वाद्वा तदादरस्य व्युत्पन्नाभिज्ञादरजनितनिर्जरापेक्षया प्रकृष्टनिर्जरापेक्षया वाऽन्यथा बहुतरनिर्जरानांतरीयकपुण्यबंधकल्पेऽल्पस्यापि पापस्य बंधहेतोर्वक्तुमशक्यत्वात् संक्रमापेक्षया तु यथोक्तं । यदिवाऽप्रासुकदाने आरंभजनिताल्पतरोपार्जनमावश्यकम् । तदाह–"अहागमाइं भुंजंति अन्नमन्ने सकम्मुणा । उवलित्ते वियाणिज्जाणुवलित्तेत्ति वा पुणो ॥ १ ॥ एतेहिं दोहिं ठाणेहिं ववहारो न विज्जइ । एतेहिं दोहिं ठाणेहिं अणायारं तु जाणए ॥ २ ॥" इति सूत्रकृतोक्तोऽप्रासुकदातृभोक्त्रोरुपलेपानुपलेपानेकांतः कथंकारं संगमनीयः । अत एवात्रापि किंचिदंगवैगुण्य एव हि स्वस्यानुचितनिर्जरापकर्षो न तु सर्वसागुण्ये अनुबंधशुद्धौच स्वरूपहिंसामात्रेण तस्याः स्वकार्ये उपादानतारतम्यपारतंत्र्याच्च–"जा जयमाणस्स भवे विराहणा सुत्तविहिसमग्गस्स सा होइ णिज्जरफला अज्झत्थविसोहिजुत्तस्से" त्यत्रापवादपदप्रत्यययाया हिंसाया एव निर्जराहेतुत्वं व्याख्यातं मलयगिरिचरणैः । यदपि ग्लानप्रतिचरणे पंचकल्याणकप्रा-

यश्चित्तदानमुक्तं तदपि गीतार्थयतनाकृतयोगिकारणान्यतरपदवैकल्यप्रयुक्तं सर्वपदसागुण्येऽपवादप्रतिषेविणोऽपि निर्दोषत्व-
स्यैवाभिधानात् । तदाहुः संघदासगणिक्षमाश्रमणाः कल्पभाष्ये-"गीयत्थो जयणाए कडजोगी कारणंमि णिद्दोसो । एगेसिं
गीयकडो अरत्तदुट्ठो अजयणाएत्ति" ॥१॥ तथा "हिट्ठाणट्ठिओवि पावयणी गणिट्ठयाइ अथिरे उ । कडजोगी जं णिसेवइ
आदिणिदेसंव सो पुज्जोत्ति ॥ २ ॥" अधःस्थानस्थितत्वं चात्र तादृगपवादप्रतिषेवाधिकारिविशेषणमुक्तम् । न तु तेनाध-
स्तनस्थानप्राप्त्या हेतुभूतया दृष्टांतानुपपत्तेरित्यवसेयम् । यच्च क्वचित् "आलोइय पडिक्कंतो सुद्धो जं णिज्जरा विउले"त्युक्तं
तदन्यतरवैगुण्यप्रयुक्तमेकत्र चरितार्थमालोचनाप्रतिक्रमणमन्यत्र साध्वाचारपरिपालनार्थमात्रेणोपयुज्यते वैयावृत्त्ये पराभ्य
र्थितस्यापि साधोरधिकारे-"तत्थवि सो इच्छं से करेइ मज्जायमूलीय"मितिवदित्यभिप्रायेणेति ज्ञेयम् । नन्वपवादेऽल्प-
स्यापि पापस्यानादरे वैद्यकविहितदाहदृष्टांतेन तत्रोत्सर्गनिषेधफलावर्जनाभिधानानुपपत्तिरिति चेन्न "न हिंस्यात् सर्वाणि
भूतानी" त्यादिलौकिकोत्सर्गनिषेधे स्वरूपहिंसाया विषयत्वेऽपि "सव्वे पाणा सव्वे भूया" इत्यादि लोकोत्तरोत्सर्गनिषेधे
प्रमादयोगेन प्राणव्यपरोपणरूपाया हिंसाया एव विषयत्वे दोषभावात् । अन्यथा लोचानशनादीनामपि स्वरूपतो दुष्टत्वा-
पत्तेः । परहिंसाया इवात्महिंसाया अपि निषिद्धत्वादित्युक्तमाचार्यैः पदवाक्यार्थादिविचाराधिकारे उपदेशपदादौ । विवे-
चितं चास्माभिर्ज्ञानबिंद्वादाविति तत एवैतत्तत्त्वमवधार्यम् । तस्माद्यथागुणस्थानमनुबंधशुद्ध्या निर्जरासामग्र्यामनुप्रविशन्नि-
रवद्यमेव जिनपूजाद्यनुष्ठानमिति सिद्धम् । एतेन पुण्यैकांतपक्षोऽपि निरस्तः । सरागचारित्र इव भावशुद्ध्या पुण्यजनकस्यापि
पापप्रकृतिनिर्जराजनकत्वाविरोधात् । इत्थं च जिनपूजाजिनवंदनसाधुहितकामनाद्युचिताचारलक्षणचित्तपुष्टिशुद्धिशालिनां

देवानामधर्मवादं वदंतो देवानांप्रिया दुर्लभबोधिका एवेति श्रद्धेयम्। तदुक्तं स्थानांगे पंचमस्थानके–"पंचहिं ठाणेहिं जीवा दुल्लभबोहिअत्ताए कम्मं पकरिंति तंजहा अरिहंताणं अवन्नं वयमाणे अरिहंतपन्नत्तस्स धम्मस्स अवन्नं वयमाणे आयरियउवज्झायाणं अवन्नं वयमाणे। चाउवन्नस्स समणसंघस्स अवन्नं वयमाणे। विविक्कतवबंभचेराणं देवाणं अवन्नं वयमाणेत्ति" अत्र यथोक्तविशेषणेन सम्यग्दृष्टयो देवा उपात्तास्तेन बहुजननेतृवद्देवानामवर्णवादोऽनर्थहेतुत्वान्नोचित इत्यपास्तम्। यथोक्तविशेषणेनार्हदादिमध्यपाठेन च परमार्थहितदातरि वृथा वैगुण्योद्भावनरूपावर्णवादस्यैव दुर्लभबोधिहेतुतायाः स्पष्टत्वात्। अत एव तद्वर्णवादस्य सुलभबोधिहेतुत्वमुक्तम्। पंचहिं ठाणेहिं सुलहबोहिअत्ताए कम्मं करेइ अरिहंताणं वन्नं वयमाणे जाव विविक्कतवबंभचेराणं देवाणं वन्नं वयमाणेत्ति" ॥ ॥ ॥ ॥

॥ प्रकामपिहितानननैर्बहुकदाग्रहैर्दुर्जनैर्जगत् किमु न वंचितं कृतकधार्मिकख्यातितः।
अनुग्रहविधावतः प्रगुणचेतसां सादरैर्यशोविजयवाचकैरयमकारि तत्त्वश्रमः ॥ १ ॥
प्रत्यक्षरं निरूप्यास्य ग्रंथमानं विनिश्चितम्। संयुक्ता पंचविंशत्या श्लोकानां तु चतुःशती ॥ २ ॥

॥ इति न्यायविशारदोपाध्यायश्रीमद्यशोविजयकृतोऽयं
देवधर्मपरीक्षानाम ग्रंथः संपूर्णः ॥ श्रीरस्तु ॥

॥ श्रीवीतरागेभ्यो नमः ॥

# ॥ न्यायविशारदोपाध्यायश्रीमद्यशोविजयप्रणीताध्यात्मोपनिषत् ॥

॥ ऐन्द्रवृन्दनतं नत्वा वीतरागं स्वयंभुवम् ॥ अध्यात्मोपनिषन्नामा ग्रंथोऽस्माभिर्विधीयते ॥ १ ॥ आत्मानमधिकृत्य स्याद्यः पंचाचारचारिमा ॥ शब्दयोगार्थनिपुणास्तदध्यात्मं प्रचक्षते ॥ २ ॥ रूढ्यर्थनिपुणास्त्वाहुश्चित्तं मैत्र्यादिवासितम् ॥ अध्यात्मं निर्मलं बाह्यव्यवहारोपबृंहितम् ॥ ३ ॥ एवंभूतनये ज्ञेयः प्रथमोऽर्थोऽत्र कोविदैः ॥ यथायथं द्वितीयोऽर्थो व्यवहारर्जुसूत्रयोः ॥ ४ ॥ गलन्नयकृतभ्रांतिर्यः स्याद्विश्रांतिसंमुखः ॥ स्याद्वादविशदालोकः स एवाध्यात्मभाजनम् ॥ ५ ॥ मनोवत्सो युक्तिगवीं मध्यस्थस्यानुधावति ॥ तामाकर्षति पुच्छेन तुच्छाग्रहमनःकपिः ॥ ६ ॥ अनर्थायैव नार्थाय जातिप्रायाश्च युक्तयः ॥ हस्ती हन्तीति वचने प्राप्ताप्राप्तविकल्पवत् ॥ ७ ॥ ज्ञायेरन् हेतुवादेन पदार्था यद्यतीन्द्रियाः ॥ कालेनैतावता प्राज्ञैः कृतः स्यात्तेषु निश्चयः ॥ ८ ॥ आगमश्चोपपत्तिश्च संपूर्णं दृष्टिलक्षणम् ॥ अतीन्द्रियाणामर्थानां सद्भावप्रतिपत्तये ॥ ९ ॥ अंतरा केवलज्ञानं छद्मस्थाः खल्वचक्षुषः ॥ हस्तस्पर्शसमं शास्त्रज्ञानं तद्व्यवहारकृत् ॥ १० ॥ शुद्धोञ्छाद्यपि शास्त्राज्ञानिरपेक्षस्य नो हितम् ॥ भौतहंतुर्यथा तस्य पदस्पर्शनिषेधनम् ॥ ११ ॥ शासनात्त्राणशक्तेश्च बुधैः शास्त्रं निरुच्यते ॥ वचनं वीतरागस्य तच्च नान्यस्य कस्यचित् ॥ १२ ॥ वीतरागोऽनृतं नैव ब्रूयात्तद्धेत्वभावतः ॥ यस्तद्वाक्येष्वनाश्वासस्तन्महामोहजृंभितम् ॥ १३ ॥ शास्त्रे पुरस्कृते तस्माद्वीतरागः पुरस्कृतः ॥ पुरस्कृते पुनस्तस्मिन्नियमात् सर्वसिद्धयः ॥ १४ ॥

एनं केचित् समापत्तिं वदंत्यन्ये ध्रुवं पदम् ॥ प्रशान्तवाहितामन्ये विसभागक्षयं परे ॥ १५ ॥ चर्मचक्षुर्भृतः सर्वे देवाश्चा-
वधिचक्षुषः ॥ सर्वतश्चक्षुषः सिद्धा योगिनः शास्त्रचक्षुषः ॥ १६ ॥ परीक्षंते कषच्छेदतापैः स्वर्णं यथा जनाः ॥ शास्त्रेऽपि
वर्णिकाशुद्धिं परीक्षंतां तथा बुधाः ॥ १७ ॥ विधयः प्रतिषेधाश्च भूयांसो यत्र वर्णिताः ॥ एकाधिकारा दृश्यन्ते कषशुद्धिं
वदन्ति ताम् ॥ १८ ॥ सिद्धान्तेषु यथा ध्यानाध्ययनादिविधिव्रजाः ॥ हिंसादीनां निषेधाश्च भूयांसो मोक्षगोचराः ॥ १९ ॥
अर्थकामविमिश्रं यद्यच्च क्रूतकथाविलम् ॥ आनुषंगिकमोक्षार्थं यन्न तत् कषशुद्धिमत् ॥ २० ॥ विधीनां च निषेधानां
योगक्षेमकरी क्रिया ॥ वर्ण्यते यत्र सर्वत्र तच्छास्त्रं छेदशुद्धिमत् ॥ २१ ॥ कायिकाद्यपि कुर्वीत गुप्तश्च समितो मुनिः ॥ कृत्ये
ज्यायसि किं वाच्यमित्युक्तं समये यथा ॥ २२ ॥ अन्यार्थं किंचिदुत्सृष्टं यत्रान्यार्थमपोह्यते ॥ दुर्विधिप्रतिषेधं तन्न शास्त्रं
छेदशुद्धिमत् ॥ २३ ॥ निषिद्धस्य विधानेऽपि हिंसादेर्भूतिकामिभिः ॥ दाहस्येव न सद्वैद्यैर्याति प्रकृतिदुष्टता ॥ २४ ॥
हिंसा भावकृतो दोषो दाहस्तु न तथेति चेत् ॥ भूत्यर्थं तद्विधानेऽपि भावदोषः कथं गतः ॥ २५ ॥ वेदोक्तत्वान्मनःशुद्ध्या
कर्मयज्ञोऽपि योगिनः ॥ ब्रह्मयज्ञ इतीच्छन्तः श्येनयागं त्यजन्ति किम् ॥ २६ ॥ वेदान्तविधिशेषत्वमतः कर्मविधेर्हितम् ॥
भिन्नात्मदर्शकाः शेषा वेदान्ता एव कर्मणः ॥ २७ ॥ कर्मणां निरवद्यानां चित्तशोधकतां परम् ॥ सांख्याचार्या अपीच्छन्ती-
त्यास्तामेषोऽत्र विस्तरः ॥ २८ ॥ यत्र सर्वनयालंबिविचारप्रबलाग्निना ॥ तात्पर्यश्यामिका न स्यात्तच्छास्त्रं तापशुद्धिमत्॥२९॥
यथाह सोमिलप्रश्ने जिनः स्याद्वादसिद्धये ॥ द्रव्यार्थादहमेकोऽस्मि दृग्ज्ञानार्थादुभावपि ॥ ३० ॥ अक्षयश्चाव्ययश्चास्मि

१ तापरं.

प्रदेशार्थविचारतः ॥ अनेकभूतभावात्मा पर्यायार्थपरिग्रहात् ॥ ३१ ॥ द्वयोरेकत्वबुद्ध्यापि यथा द्वित्वं न गच्छति ॥ नयैकान्तधियाप्येवमनेकांतो न गच्छति ॥ ३२ ॥ सामग्र्येण न मानं स्याद्द्वयोरेकत्वधीर्यथा ॥ तथा वस्तुनि वस्त्वंशबुद्धिर्ज्ञेया नयात्मिका ॥ ३३ ॥ एकदेशेन चैकत्वधीर्द्वयोः स्याद्यथा प्रमा ॥ तथा वस्तुनि वस्त्वंशबुद्धिर्ज्ञेया नयात्मिका ॥ ३४ ॥ इत्थं च संशयत्वं यन्नयानां भाषते परः ॥ तदपास्तं विलंबानां प्रत्येकं न नयेषु यत् ॥ ३५ ॥ सामग्र्येण द्वयालंबेऽप्यविरोधे समुच्चयः ॥ विरोधे दुर्नयव्राताः स्वशस्त्रेण स्वयं हताः ॥ ३६ ॥ कथं विप्रतिषिद्धानां न विरोधः समुच्चये ॥ अपेक्षाभेदतो हन्त कैव विप्रतिषिद्धता ॥ ३७ ॥ भिन्नापेक्षा यथैकत्र पितृपुत्रादिकल्पना ॥ नित्यानित्याद्यनेकान्तस्तथैव न विरोत्स्यते ॥ ३८ ॥ व्यापके सत्यनेकान्ते स्वरूपपररूपयोः ॥ आनेकांत्यान्न कुत्रापि निर्णीतिरिति चेन्मतिः ॥ ३९ ॥ अव्याप्यवृत्तिधर्माणां यथावच्छेदकाश्रया ॥ नापि ततः परावृत्तिस्तत् किं नात्र तथेक्ष्यते ॥ ४० ॥ आनैगमांत्यभेदं तत्परावृत्तावपि स्फुटम् ॥ अभिप्रेताश्रयेणैव निर्णयो व्यवहारकः ॥ ४१ ॥ अनेकान्तेऽप्यनेकान्तादनिष्टैवमपाकृता[1] ॥ नयसूक्ष्मेक्षिकाप्रान्ते विश्रान्तेः सुलभत्वतः ॥ ४२ ॥ आत्माश्रयादयोऽप्यत्र सावकाशा न कर्हिचित् ॥ ते हि प्रमाणसिद्धार्थात् प्रकृत्यैव पराङ्मुखाः ॥ ४३ ॥ उत्पन्नं दधिभावेन नष्टं दुग्धतया पयः ॥ गोरसत्वात् स्थिरं जानन् स्याद्वादद्विड् जनोऽपि कः ॥४४॥ इच्छन् प्रधानं सत्वाद्यैर्विरुद्धैर्गुंफितं गुणैः ॥ सांख्यः संख्यावतां मुख्यो नानेकान्तं प्रतिक्षिपेत् ॥ ४५ ॥ विज्ञानस्यैकमाकारं नानाकारकरंबितम् ॥ इच्छंस्तथागतः प्राज्ञो नानेकांतं प्रतिक्षिपेत् ॥ ४६ ॥ चित्रमेकमनेकं च रूपं प्रामाणिकं वदन् ॥ योगो

१ छैव.

वैशेषिको वापि नानेकांतं प्रतिक्षिपेत् ॥ ४७ ॥ प्रत्यक्षमितिमात्रंशे मेयांशे तद्विलक्षणम् ॥ गुरुर्ज्ञानं वदन्नेकं नानेकांतं प्रतिक्षिपेत् ॥ ४८ ॥ जातिव्यक्त्यात्मकं वस्तु वदन्ननुभवोचितम् ॥ भट्टो वापि मुरारिर्वा नानेकांतं प्रतिक्षिपेत् ॥ ४९ ॥ अबद्धं परमार्थेन बद्धं च व्यवहारतः ॥ ब्रुवाणो ब्रह्मवेदान्ती नानेकांतं प्रतिक्षिपेत् ॥ ५० ॥ ब्रुवाणा भिन्नभिन्नार्थान्नयभेदव्यपेक्षया ॥ प्रतिक्षिपेयुर्नो वेदाः स्याद्वादं सार्वतांत्रिकम् ॥ ५१ ॥ विमतिः संमतिर्वापि चार्वाकस्य न मृग्यते ॥ परलोकात्ममोक्षेषु यस्य मुह्यति शेमुषी ॥ ५२ ॥ तेनानेकान्तसूत्रं यद्यद्वा सूत्रं नयात्मकम् ॥ तदेव तापशुद्धं स्यान्न तु दुर्नयसंज्ञितम् ॥ ५३ ॥ नित्यैकान्ते न हिंसादि तत्पर्यायापरिक्षयात् ॥ मनःसंयोगनाशादौ व्यापारानुपलंभतः ॥ ५४ ॥ बुद्धिलेपोऽपि को नित्यनिर्लेपात्मव्यवस्थितौ ॥ सामानाधिकरण्येन बंधमोक्षौ हि संगतौ ॥ ५५ ॥ अनित्यैकान्तपक्षेऽपि हिंसादिकमसंगतम् ॥ स्वतो विनाशशीलानां क्षणानां नाशकोऽस्तु कः ॥ ५६ ॥ आनन्तर्यं क्षणानां तु न हिंसादिनियामकम् ॥ विशेषादर्शनात्तस्य बुद्धलुब्धकयोर्मिथः ॥ ५७ ॥ संक्लेशेन विशेषश्चेदानन्तर्यमपार्थकम् ॥ न हि तेनापि संक्लिष्टमध्ये भेदो विधीयते ॥ ५८ ॥ मनोवाक्काययोगानां भेदादेवं क्रियाभिदा ॥ समग्रैव विशीर्येतेत्येतदन्यत्र चर्चितम् ॥ ५९ ॥ नित्यानित्याद्यनेकान्तशास्त्रं तस्माद्विशिष्यते ॥ तद्दृष्ट्यैव हि माध्यस्थ्यं गरिष्ठमुपपद्यते ॥ ६० ॥ यस्य सर्वत्र समता नयेषु तनयेष्विव ॥ तस्यानेकान्तवादस्य क्व न्यूनाधिकशेमुषी ॥ ६१ ॥ स्वतंत्रास्तु नयास्तस्य नांशाः किं तु प्रकल्पिताः ॥ रागद्वेषौ कथं तस्य दूषणेऽपि च भूषणे ॥ ६२ ॥ अर्थे महेन्द्रजालस्य दूषितेऽपि च भूषिते ॥ यथा जनानां माध्यस्थ्यं दुर्नयार्थे तथा मुनेः ॥ ६३ ॥ दूषयेदज्ञ एवोच्चैः स्याद्वादं न तु पण्डितः ॥ अज्ञप्रलापे सुज्ञानां न द्वेषः करुणैव तु ॥ ६४ ॥ त्रिविधं



१ प्रत्यक्षं मितमात्रंशे इति प्रत्यंतरे ।

ज्ञानमाख्यातं श्रुतं चिन्ता च भावना ॥ आद्यं कोष्ठगबीजाभं वाक्यार्थविषयं मतम् ॥ ६५ ॥ महावाक्यार्थजं यत्तु सूक्ष्मयुक्तिशतान्वितम् ॥ तद्द्वितीयं जले तैलबिंदुरीत्या प्रसृत्वरम् ॥ ६६ ॥ ऐदंपर्यगतं यच्च विध्यादौ यत्नवच्च यत् ॥ तृतीयं तदशुद्धोच्चजात्यरत्नविभानिभम् ॥ ६७ ॥ आद्ये ज्ञाने मनाक् पुंसस्तद्रागाद्दर्शनग्रहः ॥ द्वितीये न भवत्येष चिन्तायोगात्कंदाचन ॥ ६८ ॥ चारिसंजीविनीचारकारकज्ञाततोऽन्तिमे ॥ सर्वत्रैव हिता वृत्तिर्गांभीर्यात्तत्वदर्शिनः ॥ ६९ ॥ तेन स्याद्वादमालंब्य सर्वदर्शनतुल्यताम् ॥ मोक्षोद्देशाविशेषेण[1] यः पश्यति स शास्त्रवित् ॥ ७० ॥ माध्यस्थ्यमेव शास्त्रार्थो येन तच्चारु सिध्यति ॥ स एव धर्मवादः स्यादन्यद्बालिशवल्गनम् ॥ ७१ ॥ पुत्रदारादि संसारो धनिनां मूढचेतसाम् ॥ पंडितानां तु संसारः शास्त्रमध्यात्मवर्जितम् ॥ ७२ ॥ माध्यस्थ्यसहितं ह्येकपदज्ञानमपि प्रमा ॥ शास्त्रकोटिर्वृथैवान्या तथा चोक्तं महात्मना ॥ ७३ ॥ वादांश्च प्रतिवादांश्च वदंतोऽनिश्चितांस्तथा ॥ तत्त्वांतं नैव गच्छंति तिलपीलकवद्गतौ ॥ ७४ ॥ इति यतिवदनात्पदानि बुध्ध्वा प्रशमविवेचनसंवराभिधानि ॥ प्रदलितदुरितः क्षणाच्चिलातितनय इह त्रिदशालयं जगाम ॥ ७५ ॥ नचानेकान्तार्थावगमरहितस्यास्य फलितं कथं माध्यस्थ्येन स्फुटमितिविधेयं भ्रमपदम् ॥ समाधेरव्यक्ताद्यदभिदधति व्यक्तसदृशं फलं योगाचाया ध्रुवमभिनिवेशे विगलिते ॥ ७६ ॥ विशेषादोघाद्वा सपदि तदनेकान्तसमये समुन्मीलद्भक्तिर्भवति य इहाध्यात्मविशदः ॥ भृशं धीरोदात्तप्रियतमगुणोज्जागररुचिर्यशःश्रीस्तस्यांकं त्यजति न कदापि प्रणयिनी ७७

॥ इति श्रीपंडितनयविजयगणिशिष्यपंडितपद्मविजयगणिसहोदरोपाध्यायश्रीयशोविजयगणिविरचितेऽध्यात्मोपनिषत्प्रकरणे शास्त्रयोगशुद्धिनामा प्रथमोऽधिकारः ॥ १ ॥

---

१ मोक्षोद्देशाद्विशेषेण ।

## ॥ अथ द्वितीयोऽधिकारः ॥

॥ दिशा दर्शितया शास्त्रैर्गच्छन्नच्छमतिः पथि ॥ ज्ञानयोगं प्रयुञ्जीत तद्विशेषोपलब्धये ॥ १ ॥ योगजादृष्टजनितः स तु प्रातिभसंज्ञितः ॥ संध्येव दिनरात्रिभ्यां केवलश्रुतयोः पृथक् ॥ २ ॥ पदमात्रं हि नान्वेति शास्त्रं दिग्दर्शनोत्तरम् ॥ ज्ञानयोगो मुनेः पार्श्वमाकैवल्यं न मुंचति ॥ ३ ॥ तत्त्वतो ब्रह्मणः शास्त्रं लक्षकं न तु दर्शकम् ॥ न चादृष्टात्मतत्त्वस्य दृष्टभ्रांतिर्निवर्तते ॥ ४ ॥ तेनात्मदर्शनाकांक्षी ज्ञानेनान्तर्मुखो भवेत् ॥ दृष्टुर्दृगात्मता मुक्तिर्दृश्यैकात्म्यं भवभ्रमः ॥ ५ ॥ आत्मज्ञाने मुनिर्मग्नः सर्वं पुद्गलविभ्रमम् ॥ महेन्द्रजालवद्वेत्ति नैव तत्रानुरज्यते ॥ ६ ॥ आस्वादिता सुमधुरा येन ज्ञानरतिः सुधा ॥ न लगत्येव तच्चेतो विषयेषु विषेष्विव ॥ ७ ॥ सत्तत्त्वचिंतया यस्याभिसमन्वागता इमे ॥ आत्मवान् ज्ञानवान् वेदधर्मवान् ब्रह्मवांश्च सः ॥ ८ ॥ विषयान् साधकः पूर्वमनिष्टत्वधिया त्यजेत् ॥ न त्यजेन्न च गृह्णीयात् सिद्धो विंद्यात् स तत्त्वतः ॥ ९ ॥ योगारंभदशास्थस्य दुःखमन्तर्बहिः सुखम् ॥ सुखमन्तर्बहिर्दुःखं सिद्धयोगस्य तु ध्रुवम् ॥ १० ॥ प्रकाशशक्त्या यद्रूपमात्मनो ज्ञानमुच्यते ॥ सुखं स्वरूपविश्रान्तिशक्त्या वाच्यं तदेव तु ॥ ११ ॥ सर्वं परवशं दुःखं सर्वमात्मवशं सुखम् ॥ एतदुक्तं समासेन लक्षणं सुखदुःखयोः ॥ १२ ॥ ज्ञानमग्नस्य यच्छर्म तद्वक्तुं नैव पार्यते ॥ नोपमेयं प्रियाश्लेषैर्नापि तच्चन्दनद्रवैः ॥ १३ ॥ तेजोलेश्याविवृद्धिर्या पर्यायक्रमवृद्धितः ॥ भाषिता भगवत्यादौ सेत्थंभूतस्य युज्यते ॥ १४ ॥ चिन्मात्रलक्षणेनान्यव्यतिरिक्तत्वमात्मनः ॥ प्रतीयते यदश्रान्तं तदेव ज्ञानमुत्तमम् ॥ १५ ॥ शुभोपयोगरूपोऽयं समाधिः

सविकल्पकः ॥ शुद्धोपयोगरूपस्तु निर्विकल्पस्तदेकदृक् ॥ १६ ॥ आद्यः सालंबनो नाम योगोऽनालंबनः परः ॥ छायाया दर्पणाभावे मुखविश्रांतिसंनिभः ॥ १७ ॥ यद्दृश्यं यच्च निर्वाच्यं मननीयं च यद्भुवि ॥ तद्रूपं परसंश्लिष्टं न शुद्धद्रव्यलक्षणम् ॥ १८ ॥ अपदस्य पदं नास्तीत्युपक्रम्यागमे ततः ॥ उपाधिमात्रव्यावृत्त्या प्रोक्तं शुद्धात्मलक्षणम् ॥ १९ ॥ यतो वाचो निवर्तन्ते अप्राप्य मनसा सह ॥ इति श्रुतिरपि व्यक्तमेतदर्थानुभाषिणी ॥ २० ॥ अतीन्द्रियं परं ब्रह्म विशुद्धानुभवं विना ॥ शास्त्रयुक्तिशतेनापि नैव गम्यं कदाचन ॥ २१ ॥ केषां न कल्पना दर्वी शास्त्रक्षीरान्नगाहिनी ॥ विरलास्तद्रसास्वादविदोऽनुभवजिह्वया ॥ २२ ॥ पश्यतु ब्रह्म निर्द्वंद्वं निर्द्वंद्वानुभवं विना ॥ कथं लिपिमयी दृष्टिः वाङ्मयी वा मनोमयी ॥ २३ ॥ न सुषुप्तिरमोहत्वान्नापि च स्वापजागरौ ॥ कल्पनाशिल्पविश्रांतेस्तुर्यैवानुभवो दशा ॥ २४ ॥ अधिगत्याखिलं शब्दब्रह्म शास्त्रदृशा मुनिः ॥ स्वसंवेद्यपरं ब्रह्मानुभवैरधिगच्छति ॥ २५ ॥ ये पर्यायेषु निरतास्ते ह्यन्यसमयस्थिताः ॥ आत्मस्वभावनिष्ठानां ध्रुवा स्वसमयस्थितिः ॥ २६ ॥ आवापोद्वापविश्रान्तिर्यत्राशुद्धनयस्य तत् ॥ शुद्धानुभवसंवेद्यं स्वरूपं परमात्मनः ॥ २७ ॥ गुणस्थानानि यावंति यावंत्यश्चापि मार्गणाः ॥ तदन्यतरसंश्लेषो नैवातः परमात्मनः ॥ २८ ॥ कर्मोपाधिकृतान् भावान् य आत्मन्यध्यवस्यति ॥ तेन स्वाभाविकं रूपं न बुद्धं परमात्मनः ॥ २९ ॥ यथा भृत्यैः कृतं युद्धं स्वामिन्येवोपचर्यते ॥ शुद्धात्मन्यविवेकेन कर्मस्कंधोर्जितं तथा ॥ ३० ॥ मुषितत्वं यथा पांथगतं पथ्युपचर्यते ॥ तथा व्यवहरत्यज्ञश्चिद्रूपे कर्मविक्रियाम् ॥ ३१ ॥ स्वत एव समायांति कर्माण्यारब्धशक्तितः ॥ एकक्षेत्रावगाहेन ज्ञानी तत्र न

१ आर्षच्छंदोनुलौम्यात् ।

दोषभाक् ॥ ३२ ॥ दारुयंत्रस्थपाञ्चालीनृत्यतुल्याः प्रवृत्तयः ॥ योगिनो नैव बाधायै ज्ञानिनो लोकवर्तिनः ॥ ३३ ॥ प्रार
ब्धादृष्टजनितात् सामायिकविवेकतः ॥ क्रियापि ज्ञानिनो व्यक्तामौचितीं नातिवर्तते ॥ ३४ ॥ संसारे निवसन् स्वार्थसज्जः
कज्जलवेश्मनि ॥ लिप्यते निखिलो लोको ज्ञानसिद्धो न लिप्यते ॥ ३५ ॥ नाहं पुद्गलभावानां कर्ता कारयिता च न ॥
नानुमंतापि चेत्यात्मज्ञानवान् लिप्यते कथम् ॥ ३६ ॥ लिप्यते पुद्गलस्कंधो न लिप्ये पुद्गलैरहम् ॥ चित्रव्योमाञ्जनेनेव
ध्यायन्निति न लिप्यते ॥ ३७ ॥ लिप्तता ज्ञानसंपातप्रतिघाताय केवलम् ॥ निर्लेपज्ञानमग्नस्य क्रिया सर्वोपयुज्यते ॥ ३८ ॥
तपःश्रुतादिना मत्तः क्रियावानपि लिप्यते ॥ भावनाज्ञानसंपन्नो निष्क्रियोऽपि न लिप्यते ॥ ३९ ॥ समलं निर्मलं चेद-
मिति द्वैतं यदागतम् ॥ अद्वैतं निर्मलं ब्रह्म तदेकमवशिष्यते ॥ ४० ॥ महासामान्यरूपेऽस्मिन्मज्जंति नयजा भिदाः ॥
समुद्र इव कल्लोलाः पवनोन्माथनिर्मिताः ॥ ४१ ॥ षड्द्रव्यैकात्म्यसंस्पर्शि सत्सामान्यं हि यद्यपि ॥ परस्यानुपयोगित्वात्
स्वविश्रांतं तथापि तत् ॥ ४२ ॥ नयेन संग्रहेणैवमृजुसूत्रोपजीविना ॥ सच्चिदानंदरूपत्वं ब्रह्मणो व्यवतिष्ठते ॥ ४३ ॥ सत्त्व-
चित्त्वादिधर्माणां भेदाभेदविचारणे ॥ न चार्थोऽयं विशीर्येत निर्विकल्पप्रसिद्धितः ॥ ४४ ॥ योगजानुभवारूढे सन्मात्रे
निर्विकल्पके ॥ विकल्पौघासहिष्णुत्वं भूषणं न तु दूषणम् ॥ ४५ ॥ यो ह्याख्यातुमशक्योऽपि प्रत्याख्यातुं न शक्यते ॥
प्राज्ञैर्न दूषणीयोऽर्थः स माधुर्यविशेषवत् ॥ ४६ ॥ कुमारी न यथा वेत्ति सुखं दयितभोगजम् ॥ न जानाति तथा लोको
योगिनां ज्ञानजं सुखम् ॥ ४७ ॥ अत्यंतपक्वबोधाय समाधिर्निर्विकल्पकः ॥ वाच्योऽयं नार्धविज्ञस्य तथा चोक्तं परैरपि
॥ ४८ ॥ आदौ शमदमप्रायैर्गुणैः शिष्यं प्रबोधयेत् ॥ पश्चात् सर्वमिदं ब्रह्म शुद्धस्त्वमिति बोधयेत् ॥ ४९ ॥ अज्ञस्यार्धप्रबु-

ऽस्य सर्वं ब्रह्मेति यो वदेत् ॥ महानरकजालेषु स तेन विनियोजितः ॥ ५० ॥ तेनादौ शोधयेच्चित्तं सद्विकल्पैर्व्रतादिभिः ॥
यत्कामादिविकाराणां प्रतिसंख्याननाश्यता ॥ ५१ ॥ विकल्परूपा मायेयं विकल्पेनैव नाश्यते ॥ अवस्थान्तरभेदेन तथा
चोक्तं परैरपि ॥ ५२ ॥ अविद्ययैवोत्तमया स्वात्मनाशोद्यमोत्थया ॥ विद्या संप्राप्यते राम सर्वदोषापहारिणी ॥ ५३ ॥
शाम्यति ह्यस्त्रमस्त्रेण मलेन क्षाल्यते मलः ॥ शमं विषं विषेणैति रिपुणा हन्यते रिपुः ॥ ५४ ॥ ईदृशी भूतमायेयं या
स्वनाशेन हर्षद ॥ न लक्ष्यते स्वभावोऽस्याः प्रेक्ष्यमाणैव नश्यति ॥ ५५ ॥ व्रतादिः शुभसंकल्पो निर्नाश्याशुभवासनाम् ॥
दाह्यं विनैव दहनः स्वयमेव विनंक्ष्यति ॥ ५६ ॥ इयं नैश्रेयिकी शक्तिर्न प्रवृत्तिर्न वा क्रिया ॥ शुभसंकल्पनाशार्थं योगि-
नामुपयुज्यते ॥ ५७ ॥ द्वितीयापूर्वकरणे क्षायोपशमिका गुणाः ॥ क्षमाद्या अपि यास्यंति स्थास्यंति क्षायिकाः परम् ॥५८॥
इत्थं यथाबलमनुद्यममुद्यमं च कुर्वन् दशानुगुणमुत्तममान्तरार्थे ॥ चिन्मात्रनिर्भरनिवेशितपक्षपातः प्रातर्द्युरत्नमिव दीप्ति-
मुपैति योगी ॥ ५९ ॥ अन्यस्य तु प्रविततं व्यवहारमार्गं प्रज्ञापनीय इह सद्गुरुवाक्यनिष्ठः ॥ चिद्दर्पणप्रतिफलत्रिजगद्वि-
वर्ते वर्तेत किं पुनरसौ सहजात्मरूपे ॥ ६० ॥ भवतु किमपि तत्त्वं बाह्यमाभ्यंतरं वा हृदि वितरति साम्यं निर्मलश्चिद्वि-
चारः ॥ तदिह निचितपंचाचारसंचारचारुस्फुरितपरमभावे पक्षपातोऽधिको नः ॥ ६१ ॥ स्फुटमपरमभावे नैगमस्तारत-
म्यम् प्रवदतु न तु हृष्येत्तावता ज्ञानयोगी ॥ कलितपरमभावं चिच्चमत्कारसारम् सकलनयविशुद्धं चित्तमेकं प्रमाणम् ॥६२॥
हरिरपरनयानां गर्जितैः कुञ्जराणाम् सहजविपिनसुप्तो निश्चयो नो बिभेति ॥ अपि तु भवति लीलोज्जृम्भिजृंभोन्मुखेऽस्मिन्
गलितमदभरास्ते नोच्छ्वसंत्येव भीताः ॥ ६३ ॥ कलितविविधबाह्यव्यापकोलाहलौघव्युपरमपरमार्थे भावनापावनानाम् ॥

क्वचन किमपि शोच्यं नास्ति नैवास्ति मोच्यं न च किमपि विधेयं नैव गेयं न देयम् ॥ ६४ ॥ इति सुपरिणतात्मख्याति-चातुर्यकेलिर्भवति यतिपतिर्यश्छिन्नरोषासिवीर्यः । हरहिमकरहारस्फारमंदारगंगारजतकलशशुभ्रा स्यात्तदीया यशःश्रीः ॥६५॥

इति श्रीपंडितनयविजयगणिशिष्यपंडितश्रीपद्मविजयगणिसहोदरोपाध्यायश्रीयशोविजयगणिकृतेऽध्यात्मोपनिषत्प्रकरणे ज्ञानयोगशुद्धिनामा ॥२॥

---

## ॥ अथ तृतीयोऽधिकारः ॥

॥ यान्येव साधनान्यादौ गृह्णीयाज्ज्ञानसाधकः ॥ सिद्धयोगस्य तान्येव लक्षणानि स्वभावतः ॥ १ ॥ अत एव जगौ यात्रां सत्तपोनियमादिषु ॥ यतनां सोमिलप्रश्ने भगवान् स्वस्य निश्चिताम् ॥ २ ॥ अतश्चैव स्थितप्रज्ञभावसाधनलक्षणे ॥ अन्यूनान्यधिके प्रोक्ते योगदृष्ट्या परैरपि ॥ ३ ॥ नाज्ञानिनो विशेष्येत यथेच्छाचरणे पुनः ॥ ज्ञानी स्वलक्षणाभावात्तथा चोक्तं परैरपि ॥ ४ ॥ बुद्धाऽद्वैतसतत्त्वस्य यथेच्छाचरणं यदि ॥ शुनां तत्त्वदृशां चैव को भेदोऽशुचिभक्षणे ॥ ५ ॥ अबुद्धिपूर्विका वृत्तिर्न दुष्टा तत्र यद्यपि ॥ तथापि योगजादृष्टमहिम्ना सा न संभवेत् ॥ ६ ॥ निवृत्तमशुभाचाराच्छुभाचारप्रवृत्तिमत् ॥ स्याद्वा चित्तमुदासीनं सामायिकवतो मुनेः ॥ ७ ॥ विधयश्च निषेधाश्च नत्वज्ञाननियंत्रिताः ॥ बालस्यैवागमे प्रोक्तो नोद्देशः पश्यकस्य यत् ॥ ८ ॥ न च सामर्थ्ययोगस्य युक्तं शास्त्रं नियामकम् ॥ कल्पातीतस्य मर्यादाप्यस्ति न ज्ञानिनः क्वचित् ॥ ९ ॥ भावस्य सिद्ध्यसिद्धिभ्यां यच्चाकिंचित्करी क्रिया ॥ ज्ञानमेव क्रियामुक्तं राजयोगस्तदिष्यताम् ॥ १० ॥ मैवं नाकेवली पश्यो नापूर्वकरणं विना ॥ धर्मसंन्यासयोगी चेत्यन्यस्य नियता क्रिया ॥ ११ ॥ स्थैर्याधानाय सिद्धस्यासि-

क्षस्यानयनाय च ॥ भावस्यैव क्रिया शान्तचित्तानामुपयुज्यते ॥ १२ ॥ क्रियाविरहितं हन्त ज्ञानमात्रमनर्थकम् ॥ गतिं विना पथज्ञोऽपि नाप्नोति पुरमीप्सितम् ॥ १३ ॥ स्वानुकूलां क्रियां काले ज्ञानपूर्णोऽप्यपेक्षते ॥ प्रदीपः स्वप्रकाशोऽपि तैलपूर्त्यादिकं यथा ॥ १४ ॥ बाह्यभावं पुरस्कृत्य ये क्रिया व्यवहारतः ॥ वदने कवलक्षेपं विना ते तृप्तिकांक्षिणः ॥ १५ ॥ गुणवद्बहुमानादेर्नित्यस्मृत्या च सत्क्रिया ॥ जातं न पातयेद्भावमजातं जनयेदपि ॥ १६ ॥ क्षायोपशमिके भावे या क्रिया क्रियते तया ॥ पतितस्यापि तद्भावप्रवृद्धिर्जायते पुनः ॥ १७ ॥ गुणवृद्ध्यै ततः कुर्यात् क्रियामस्खलनाय वा ॥ एकं तु संयमस्थानं जिनानामवतिष्ठते ॥ १८ ॥ अज्ञाननाशकत्वेन ननु ज्ञानं विशिष्यते ॥ न हि रज्जावहिभ्रांतिर्गमने न निवर्तते॥१९॥ सत्यं क्रियागमप्रोक्ता ज्ञानिनोऽप्युपयुज्यते ॥ संचितादृष्टनाशार्थं नासूरोऽपि यदभ्यधात् ॥ २० ॥ तंडुलस्य यथा वर्म यथा ताम्रस्य कालिका ॥ नश्यति क्रियया पुत्र पुरुषस्य तथा मलम् ॥ २१ ॥ जीवस्य तंडुलस्येव मलं सहजमप्यलम् ॥ नश्यत्येव न संदेहस्तस्मादुद्यमवान् भव ॥ २२ ॥ अविद्या च दिदृक्षा च भवबीजं च वासना ॥ सहजं च मलं चेति पर्यायाः कर्मणः स्मृताः ॥ २३ ॥ ज्ञानिनो नास्त्यदृष्टं चेद्भस्मसात्कृतकर्मणः ॥ शरीरपातः किं न स्याज्जीवनादृष्टनाशतः ॥ २४ ॥ शरीरमीश्वरस्येव विदुषोऽप्यवतिष्ठते ॥ अन्यादृष्टवशेनेति कश्चिदाह तदक्षमम् ॥ २५ ॥ शरीरं विदुषः शिष्याद्यदृष्टाद्यदि तिष्ठति ॥ तदाऽसुहृददृष्टेन न नश्येदिति का प्रमा ॥ २६ ॥ न चोपादाननाशेऽपि क्षणं कार्यं यथेष्यते ॥ तार्किकैः स्थितिमत्तद्वच्चिरं विद्वत्तनुस्थितिः ॥ २७ ॥ निरुपादानकार्यस्य क्षणं यत्तार्किकैः स्थितिः ॥ नाशहेत्वन्तराभावादिष्टा न च स दुर्वचः ॥ २८ ॥ अन्यादृष्टस्य तत्पातप्रतिबंधकतां नयेत् ॥ म्रियमाणोऽपि जीव्येत शिष्यादृष्टवशाद्गुरुः ॥ २९ ॥ स्वभा-

वान्निरुपादानं यदि विद्वत्तनुस्थितिः ॥ तथापि कालनियमे तत्र युक्तिर्न विद्यते ॥ ३० ॥ जलूंखलस्य तच्चिंत्यं मतं वेदान्तिनो ह्यदः ॥ प्रारब्धादृष्टतः किं तु ज्ञेया विद्वत्तनुस्थितिः ॥ ३१ ॥ तत्प्रारब्धेतरादृष्टं ज्ञाननाश्यं यदीष्यते ॥ लाघवेन विजातीयं तन्नाश्यं तत्प्रकल्प्यताम् ॥ ३२ ॥ इत्थं च ज्ञानिनो ज्ञाननाश्यकर्मक्षये सति ॥ क्रियैकनाश्यकर्मौघक्षयार्थं सापि युज्यते ॥ ३३ ॥ सर्वकर्मक्षये ज्ञानकर्मणोस्तत्समुच्चयः ॥ अन्योऽन्यप्रतिबंधेन तथा चोक्तं परैरपि ॥ ३४ ॥ न यावत्सममभ्यस्तौ ज्ञानसत्पुरुषक्रमौ ॥ एकोऽपि नैतयोस्तावत्पुरुषस्येह सिध्यति ॥ ३५ ॥ यथा छाद्मस्थिके ज्ञानकर्मणी सहकृत्वरे[1] ॥ क्षायिके अपि विज्ञेये तथैव मतिशालिभिः ॥ ३६ ॥ संप्राप्तकेवलज्ञाना अपि यज्जिनपुंगवाः ॥ क्रियां योगनिरोधाख्यां कृत्वा सिध्यंति नान्यथा ॥ ३७ ॥ तेन ये क्रियया मुक्ता ज्ञानमात्राभिमानिनः ॥ ते भ्रष्टा ज्ञानकर्मभ्यां नास्तिका नात्र संशयः ॥ ३८ ॥ ज्ञानोत्पत्तिं समुद्भाव्य कामादीनन्यदृष्टितः ॥ अपह्नुवानैर्लोकेभ्यो नास्तिकैर्वंचितं जगत् ॥ ३९ ॥ ज्ञानस्य परिपाकाद्धि क्रियाऽसंगत्वमंगति ॥ न तु प्रयाति पार्थक्यं चंदनादिव सौरभम् ॥ ४० ॥ प्रीतिभक्तिवचोऽसंगैरनुष्ठानं चतुर्विधम् ॥ यत्परैर्योगिभिर्गीतं तदित्थं युज्यतेऽखिलम् ॥ ४१ ॥ ज्ञाने चैव क्रियायां च युगपद्विहितादरः ॥ द्रव्यभावविशुद्धः सन् प्रयात्येव परं पदम् ॥ ४२ ॥ क्रियाज्ञानसंयोगविश्रांतचित्ताः समुद्भूतनिर्बाधचारित्रवृत्ताः ॥ नयोन्मेषनिर्णीतनिःशेषभावास्तपःशक्तिलब्धप्रसिद्धप्रभावाः ॥ ४३ ॥ भयक्रोधमायामदाज्ञाननिद्राप्रमादोज्झिताः शुद्धमुद्रा मुनीन्द्राः ॥ यशःश्रीसमालिंगिता वादिदंतिस्मयोच्छेदहर्यक्षतुल्या जयंति ॥ ४४ ॥ ॥ ॥ ॥ ॥

इति पंडितश्रीनयविजयगणिशिष्यपंडितश्रीपद्मविजयगणिसहोदरोपाध्यायश्रीयशोविजयगणिविरचितेऽध्यात्मोपनिषत्प्रकरणे क्रियायोगशुद्धिनामा ३ ॥ ४८ ॥

१ सहगत्वरे !

## ॥ अथ चतुर्थोऽधिकारः ॥

॥ ज्ञानक्रियाश्वद्वययुक्तसाम्यरथाधिरूढः शिवमार्गगामी ॥ न ग्रामपूःकंटकजारतीनां जनोऽनुपानत्क इवार्तिमेति ॥ १ ॥
आत्मप्रवृत्तावतिजागरूकः परप्रवृत्तौ बधिरांधमूकः ॥ सदा चिदानंदपदोपयोगी लोकोत्तरं साम्यमुपैति योगी ॥ २ ॥
परीषहैश्च प्रबलोपसर्गयोगाच्चलत्येव न साम्ययुक्तः ॥ स्थैर्याद्विपर्यासमुपैति जातु क्ष्मा न शैलैर्न च सिंधुनाथैः ॥ ३ ॥
इतस्ततो नारतिवह्नियोगादुड्डीय गच्छेद्यदि चित्तसूतः ॥ साम्यैकसिद्धौषधमूर्छितः सन् कल्याणसिद्धेर्न तदा विलंबः ॥ ४ ॥
अंतर्निमग्नः समतासुखाब्धौ बाह्ये सुखे नो रतिमेति योगी ॥ अटत्यटव्यां क इवार्थलुब्धो गृहे समुत्सर्पति कल्पवृक्षे ॥ ५ ॥
यस्मिन्नविद्यार्पितबाह्यवस्तुविस्तारजभ्रांतिरुपैति शांतिम् ॥ तस्मिंश्चिदेकार्णवनिस्तरंगस्वभावसाम्ये रमते सुबुद्धिः ॥ ६ ॥
शुद्धात्मतत्त्वप्रगुणा विमर्शाः स्पर्शाख्यसंवेदनमादधानाः ॥ यदान्यबुद्धिं विनिवर्तयंति तदा समत्वं प्रथतेऽवशिष्टम् ॥ ७ ॥
विना समत्वं प्रसरन्ममत्वं सामायिकं मायिकमेव मन्ये ॥ आये समानां सति सद्गुणानां शुद्धं हि तच्छुद्धनया विदंति ॥ ८ ॥
निशानभोमंदिररत्नदीपज्योतिर्भिरुद्योतितपूर्वमंतः ॥ विद्योतते तत्परमात्मतत्त्वं प्रसृत्वरे साम्यमणिप्रकाशे ॥ ९ ॥ एकां
विवेकांकुरितां श्रिता यां निर्वाणमापुर्भरतादिभूपाः ॥ सैवर्जुमार्गः समता मुनीनामन्यस्तु तस्या निखिलः प्रपंचः ॥ १० ॥
अल्पेऽपि साधुर्न कषायवह्नावह्नाय विश्वासमुपैति भीतः ॥ प्रवर्धमानः स दहेद्गुणौघं साम्यांबुपूरैर्यदि नापनीतः ॥ ११ ॥
प्रारब्धजा ज्ञानवतां कषाया आभासिका इत्यभिमानमात्रम् ॥ नाशो हि भावः प्रतिसंख्यया यो नाबोधवत्साम्यरतौ स
तिष्ठेत् ॥ १२ ॥ साम्यं विना यस्य तपःक्रियादेर्निष्ठा प्रतिष्ठार्जनमात्र एव ॥ स्वर्धेनुचिंतामणिकामकुंभान् करोत्यसौ काण-

कपर्दमूल्यान् ॥ १३ ॥ ज्ञानी क्रियावान् विरतस्तपस्वी ध्यानी च मौनी स्थिरदर्शनश्च ॥ साधुर्गुणं तं लभते न जातु प्राप्नोति यं साम्यसमाधिनिष्ठः ॥ १४ ॥ दुर्योधनेनाभिहतश्चुकोप न पाण्डवैर्यो न नुतो जहर्ष ॥ स्तुमो भदंतं दमदंतमंतःसमत्ववंतं मुनिसत्तमं तम् ॥ १५ ॥ यो दह्यमानां मिथिलां निरीक्ष्य शक्रेण नुन्नोऽपि नमिः पुरीं स्वाम् ॥ न मेऽत्र किंचिज्ज्वलतीति मेने साम्येन तेनोरुयशो वितेने ॥ १६ ॥ साम्यप्रसादास्तवपुर्ममत्वाः सत्त्वाधिकाः स्वं ध्रुवमेव मत्वा ॥ न सेहिरेऽर्त्तिं किमु तीव्रयंत्रनिष्पीडिताः स्कंधकसूरिशिष्याः ॥ १७ ॥ लोकोत्तरं चारुचरित्रमेतन्मेतार्यसाधोः समतासमाधेः ॥ हृदाप्यकुप्यन्न यदार्द्रचर्मबद्धेऽपि मूर्धन्ययमाप तापम् ॥ १८ ॥ जज्वाल नांतश्च सुराधमेन प्रोज्वालितेऽपि ज्वलनेन मौलौ ॥ मौलिर्मुनीनां स न कैर्निषेव्यः कृष्णानुजन्मा समतामृताब्धिः ॥ १९ ॥ गंगाजले यो न जहौ सुरेण विद्धोऽपि शूले समतानुवेधम् ॥ प्रयागतीर्थोदयकृन्मुनीनां मान्यः स सूरिस्तनुजोऽन्निकायाः ॥ २० ॥ स्त्रीभ्रूणगोब्राह्मणघातजातपापादधःपातकृताभिमुख्याः ॥ दृढप्रहारिप्रमुखाः क्षणेन साम्यावलंबात्पदमुच्चमापुः ॥ २१ ॥ अप्राप्तधर्माऽपि पुरादिमार्हन्माता शिवं यद्भगवत्यवाप ॥ नाप्नोति पारं वचसोऽनुपाधिसमाधिसाम्यस्य विजृंभितं तत् ॥ २२ ॥ इति शुभमतिर्मत्वा साम्यप्रभावमनुत्तरं य इह निरतो नित्यानंदः कदापि न खिद्यते ॥ विगलदखिलाविद्यः पूर्णस्वभावसमृद्धिमान् स खलु लभते भावारीणां जयेन यशःश्रियम् ॥ २३ ॥ ॥ ॥ ॥ ॥ ॥ ॥

॥ इति श्रीयशोविजयोपाध्यायगणिकृते यशःश्रयंकेऽध्यात्मोपनिषत्प्रकरणे साम्ययोगशुद्धिनामा चतुर्थोऽधिकारः समाप्तः ॥ ४ ॥

॥ समाप्तमिदमध्यात्मोपनिषत्प्रकरणम् ॥

## ॥ अथाध्यात्मिकमतपरीक्षा ॥

। अथवा ।

## ॥ आध्यात्मिकमतखंडनम् ॥

स्वस्तिश्रीपूर्णघूर्णन्नतसुरसुरसोल्लासिमूर्धार्पितस्त्रग्-राजीराजीवगुञ्जद्भ्रमरपरिकरैः सेव्यपादारविन्दः । स्पर्धाबंधात्स्वत्रासामिव कनकगिरिं कंपयन् स्वर्णवर्णः शोभाभिर्वर्धमानः स जिनपरिवृढः पातु वो वर्धमानः ॥ १ ॥ नत्वा गुरुपदकमलं स्मृत्वा वाचं परोपकारकृते । स्वोपज्ञाध्यात्मिकमतखंडनटीकां करोमि मुदा ॥ २ ॥

इह तावद्ग्रंथादौ ग्रंथकर्ता प्रारिप्सितनिर्विघ्नसमाप्तिकामनया शिष्टाचारपरिपालनाय च स्वाभिमतदेवतानमस्कारादिलक्षणं मंगलमाचरणीयमिति मनसिकृत्य वर्तमानशासनस्वामितयाभ्यर्हितं श्रीवर्धमानस्वामिनं नमस्कुर्वन्नाह

श्रीवर्धमानं जिनवर्धमानं नमामि तं कामितकामकुंभम् ।
आकारभेदेऽपि कुबुद्धिभेदे शस्त्रस्य तुल्यं यदुपज्ञशास्त्रम् ॥ १ ॥

टीका—तं जिनवर्धमानमहं नमामीति क्रियाकारकसंटंकः । जिनश्चासौ वर्धमानश्चेति कर्मधारयः । जयति रागादिशत्रूनिति जिनः । कथंभूतं श्रीवर्धमानं श्रिया सकलकर्मक्षयाविर्भूतानन्तचतुष्कसंपद्रूपयाऽष्टमहाप्रातिहार्यरूपया वा वर्धमानं

श्रीवर्धमानं। पुनः कथंभूतं कामितकामकुंभं कामितानि वांछितानि तेषु कामकुंभमिवेत्युपमानं। कं यदुपज्ञशास्त्रं द्वादशांगीरूपम् आकारभेदेऽपि तथाविधावयवरचनाविशेषभेदेऽपि कुबुद्धिरज्ञानं तस्य भेदे शस्त्रतुल्यं वर्तते। अयं भावः। यथा शस्त्रं प्रतिनियतं लक्ष्यं भिनत्त्येवं यत्प्रवचनमपि सदसद्विवेचकत्वेन मिथ्यात्वाभिनिवेशं भिनत्ति निवर्तयति। न चैवं जमालिप्रभृतीनां मिथ्यात्वाभिनिवेशनिवर्तकत्वाभावेन भगवद्वचनस्यासामर्थ्यं शंकनीयं, योग्यानुद्दिश्यैवैतदभिधानात्। न खलु भानवीया भानवः कौशिकस्य लोचनमनुन्मीलयन्त उपलंभसंभावनास्पदं भवेयुरिति। पक्ष आकारेणैव शस्त्रशास्त्रयोर्भेदोऽन्तरं, न तु वर्णमात्रान्तरेणेति ॥ १ ॥

बन्धोदयोदीरणसत्पदाख्यमुवोष कर्मेन्धनमिद्धतेजाः।
ध्यानानलेन प्रबलेन यो वः समग्रवित्पातु स वीरदेवः ॥ २ ॥

टीका—स वीरदेवः श्रीवर्धमानस्वामी वो युष्मान् पातु। कथंभूतः। समग्रवित् समग्रं सर्वद्रव्यपर्यायात्मकं वस्तु वेत्ति पश्यति जानाति वेति। दर्शनज्ञानयोश्चायं भेदः जीवस्वाभाव्यात्सामान्यप्रधानमुपसर्जनीकृतविशेषमर्थग्रहणं दर्शनमुच्यते तथा प्रधानविशेषमुपसर्जनीकृतसामान्यं च ज्ञानमिति। स को यो ध्यानानलेन कर्मेन्धनमुवोषाज्वालयत् ध्यानमेव निर्मलत्वादनलोऽग्निः कर्मैव दाह्यत्वसाधर्म्यादिन्धनमिति रूपकम्। कर्मेन्धनमित्यत्र जात्यभिप्रायमेकवचनम्। कथंभूतं कर्मेन्धनं। बंधोदयोदीरणसत्पदाख्यम् तत्र मिथ्यात्वादिभिर्बन्धहेतुभिरञ्जनचूर्णपूर्णसमुद्गकवन्निरन्तरं पुद्गलनिचिते लोके कर्मयोग्यवर्गणापुद्ग-

रात्मनः क्षीरनीरवद्वह्न्ययःपिण्डवद्वान्योन्यानुगमाभेदात्मकः संबंधो बंधः(१) तेषां च यथास्वस्थितिबद्धानां कर्मपुद्गलानामपवर्तनादिकरणविशेषे कृते स्वाभाविके वा स्थित्यपचये सत्युदयसमयप्राप्तानां विपाकवेदनमुदयः (२) तेषामेव कर्मपुद्गलानामकालप्राप्तानां जीवसामर्थ्यविशेषादुदयावलिकायां प्रक्षेपणमुदीरणा (३) तेषामेव कर्मपुद्गलानां बंधसंक्रमाभ्यां लब्धात्मलाभानां निर्जरणसंक्रमणकृतस्वरूपप्रच्युत्यभावे सद्भावः सत्ता (४) सदिति भावप्रधानो निर्देशस्ततश्च बंधोदयोदीरणसद्वाचकानि पदानि बंधादीनि तैराख्यायते व्यपदिश्यते यत्तद्बंधोदयोदीरणसत्पदाख्यम् । अयं भावः कर्मणामष्टौ मूलप्रकृतयः । तद्यथा-ज्ञानावरणं १ दर्शनावरणं २ वेदनीयं ३ मोहनीयं ४ आयुष्कर्म ५ नामकर्म ६ गोत्रकर्म ७ अन्तरायं चेति ८ । उत्तरप्रकृतीनां चाष्टपंचाशदधिकशतं भेदास्तद्यथा-मतिज्ञानावरणं १ श्रुतज्ञानावरणं २ अवधिज्ञानावरणं ३ मनःपर्यायज्ञानावरणं ४ केवलज्ञानावरणं ५ चेति ज्ञानावरणस्य पंच भेदाः । चक्षुर्दर्शनावरणं १ अचक्षुर्दर्शनावरणं २ अवधिदर्शनावरणं ३ केवलदर्शनावरणं ४ निद्रा ५ निद्रानिद्रा ६ प्रचला ७ प्रचलाप्रचला ८ स्त्यानर्द्धी ९ चेति दर्शनावरणस्य नवैव भेदाः । वेदनीयकर्मणो द्वौ भेदौ सातावेदनीयमसातावेदनीयं चेति । सम्यक्त्वमोहनीयं १ मिश्रमोहनीयं २ मिथ्यात्वमोहनीयं ३ अनन्तानुबंधिक्रोध ४ मान ५ माया ६ लोभाः ७ अप्रत्याख्यानक्रोध ८ मान ९ माया १० लोभाः ११ प्रत्याख्यानावरणक्रोध १२ मान १३ माया १४ लोभाः १५ संज्वलनक्रोध १६ मान १७ माया १८ लोभाः १९ स्त्रीवेदः २० पुरुषवेदः २१ नपुंसकवेदः २२ हास्यं २३ रतिः २४ अरतिः २५ भयं २६ शोकः २७

१ बंधोदयोदीरणसत्पदानि । २ प्रकृतिपार्थक्याय नात्र सन्धिः क्वचित् ।

जुगुप्सा २८ चेति मोहनीयकर्मणोऽष्टाविंशतिर्भेदाः । नरकायुः १ तिर्यगायुः २ मनुष्यायुः ३ देवायुः ४ चेति आयुष्कम-
र्णश्चत्वारो भेदाः। देवगतिः १ मनुष्यगतिः २ तिर्यग्गतिः ३ नरकगतिः ४ एकेन्द्रियजातिः ५ द्वीन्द्रियजातिः ६ त्रीन्द्रिय-
जातिः ७ चतुरिन्द्रियजातिः ८ पंचेन्द्रियजातिः ९ औदारिकशरीरं १० वैक्रियशरीरं ११ आहारकशरीरं १२ तैजसश-
रीरं १३ कार्मणशरीरं १४ औदारिकोपांगं १५ वैक्रियोपांगं १६ आहारकोपांगं १७ औदारिकौदारिकबंधनं १८ वैक्रिय-
वैक्रियबंधनं १९ आहारकाहारकबंधनं २० तैजसतैजसबं० २१ कार्मणकार्मणबं० २२ औदारिकतैजसबं० २३ वैक्रियतै-
जसबं० २४ आहारकतैजसबं० २५ कार्मणतैजसबं० २६ औदारिककार्मणबं० २७ वैक्रियकार्मणबं० २८ आहारककार्मण-
बं० २९ औदारिकतैजसकार्मणबं० ३० वैक्रियतैजसकार्मणबं० ३१ आहारकतैजसकार्मणबं० ३२ औदारिकसंघातनं ३३
वैक्रियसंघातनं ३४ आहारकसंघातनं ३५ तैजससंघातनं ३६ कार्मणसंघातनं ३७ वज्रर्षभनाराचं ३८ ऋषभनाराचं ३९
नाराचं ४० अर्धनाराचं ४१ कीलिका ४२ सेवार्तसंहननं ४३ समचतुरस्रं ४४ न्यग्रोधं ४५ सादि ४६ वामनं ४७ कुब्जं
४८ हुंडसंस्थानं ४९ कृष्णवर्णः ५० नीलवर्णः ५१ रक्तवर्णः ५२ पीतवर्णः ५३ धवलवर्णः ५४ सुरभिगंधः ५५ असुर-
भिगंधः ५६ तिक्तरसः ५७ कटुरसः ५८ कषायरसः ५९ आम्लरसः ६० मधुररसः ६१ गुरु ६२ लघु ६३ मृदु ६४ खर
६५ शीत ६६ उष्ण ६७ स्निग्ध ६८ रुक्षस्पर्शाः ६९ देव ७० मनुष्य ७१ तिर्यग् ७२ नरकानुपूर्व्यः ७३ शुभखगतिः ७४
अशुभखगतिः ७५ पराघात ७६ उच्छ्वास ७७ आतप ७८ उद्योत ७९ अगुरुलघु ८० जिननाम ८१ निर्माण ८२ उप-
घाताः ८३ त्रस ८४ बादर ८५ पर्याप्त ८६ प्रत्येक ८७ स्थिर ८८ शुभ ८९ सुभग ९० सुस्वर ९१ आदेय ९२ यशो-

॥ ५१ ॥

नामानि ९३ स्थावर ९४ सूक्ष्म ९५ अपर्याप्त ९६ साधारण ९७ अस्थिर ९८ अशुभ ९९ दुर्भग १०० दुःस्वर १०१ अनादेय १०२ अयशांसि १०३ चेति नामकर्मणस्त्र्युत्तरं शतं भेदाः। गोत्रकर्मण उच्चैर्गोत्रं १ नीचैर्गोत्रं २ चेति द्वौ भेदौ। दानान्तरायं १ लाभान्तरायं २ भोगान्तरायं ३ उपभोगान्तरायं ४ वीर्यान्तरायं ५ चेति अंतरायकर्मणः पंच भेदाः। तदेवमष्टपंचाशदधिकशतप्रकृतीनां मध्याद्बंधनसंघातनयोर्विंशतिर्भेदास्तनुष्वेवान्तर्भावादपनीयन्ते। ततो वर्णगंधरसस्पर्शानां यथासंख्यं पंचद्विपंचाष्टभेदैर्निष्पन्नां विंशतिमपनीय तेषामेव सामान्यवर्णगन्धरसस्पर्शलक्षणं चतुष्कं गृह्यते। ततश्च वर्णादि षोडशकबंधनपंचदशकसंघातनपंचकलक्षणानां षट्त्रिंशत्प्रकृतीनामपसारणेन द्वाविंशत्यधिकशतमवशिष्यते तत्रापि सम्यक्त्वमिश्रके बंधे नाधिक्रियेते। यतो मिथ्यात्वपुद्गलानामेव जीवः सम्यक्त्वगुणेन मिथ्यात्वरूपतामपनीय केषांचिदत्यंतविशुद्धिमासादयति अपरेषां त्वीषद्विशुद्धिं केचित्पुनर्मिथ्यात्वरूपा एवावतिष्ठंते तत्र येऽत्यन्तविशुद्धास्ते सम्यक्त्वव्यपदेशभाजः ईषद्विशुद्धा मिश्रव्यपदेशभाजः शेषा मिथ्यात्वव्यपदेशभाज इति। उदयोदीरणासत्तासु पुनस्तयोरप्यधिकारः। ततश्च बंधप्रायोग्या विंशत्यधिकशतप्रकृतयः उदयोदीरणाप्रायोग्याश्च द्वाविंशत्यधिकशतप्रकृतयः सत्ताप्रायोग्याश्च पूर्वापनीतानामपि प्रकृतीनां संग्रहणादष्टपंचाशदधिकशतप्रकृतयः। तथा चोक्तम्–"बंधणसंघयगहो तणूसु सामन्नवन्न चउ।
इय सत्तठी बंधोदए अ नय सम्ममीसया बंधे॥ बंधुदए सत्ताए वीस दुवीसठ्ठवन्नसयंति॥" तासु च बंधोदीरणप्रायोग्याः प्रकृतीः सयोगिकेवलिगुणस्थानावसाना एव च योगी भावात् क्षपयित्वा शेषाश्चायोगिकेवलिचरमसमये क्षपयित्वा यो भगवान्निर्मलाविकलकेवलबलावलोकितनिखिललोकालोकः सिद्धिवधूवक्षोजयोर्वितितपत्रलतिकामलिखत्। पुनः कथंभूत

इद्धतेजा इद्धं वीर्यान्तरायकर्मसमूलकाषंकषणात् प्रकटितस्वरूपं तेजो वीर्यं यस्य स तथा । अत्र च श्लोकद्वये भगवतः श्रीवर्धमानस्वामिनश्चत्वारो मूलातिशयाः प्रतिपादिताः । तथाहि-समग्रविदित्यनेन लोकालोकालोकनप्रवणविमलकेवलालोकसंपत्प्रतिपादनाज्ज्ञानातिशयः, तथा जिनवर्धमानमित्यत्र 'जिन' इति विशेषणेन रागादिशत्रूणां जयप्रतिपादनादपायापगमातिशयः, तथा आकारभेदेऽपीत्यादिना प्रथमपद्योत्तरार्धेन मिथ्यात्ववासनानिर्मूलनक्षमजाह्नवीजलनिर्मलपरस्परविरोधलेशवर्जितसप्तनयविशुद्धद्वादशांगीप्रणयनभणनाद्वचनातिशयः तथा श्रीवर्धमानमित्यनेनाकृत्रिमभक्तिप्राग्भारोद्भूतप्रभूतरोमांचदन्तुरशरीरसकलसुरनिकायनायकविरचिताष्टमहाप्रातिहार्याहार्यसंपत्प्रतिपादनात्पूजातिशय इति ॥ २ ॥

अथ प्रेक्षावत्प्रवृत्तिप्रयोजकं स्वाभिधेयं प्रतिजानीते-

**नत्वा श्रीवीरतीर्थेशं कुतीर्थिकमदापहम् । स्थाप्यते कवलाहारस्तत्प्रसादाज्जिनेशितुः ॥ ३ ॥**

टीका-इह तावत्करालकलिकालप्रबलकरवालविदलितमतयः कियच्चिद्दिगंबरशास्त्राभ्युपमात् कियच्चिच्च श्वेतांबरशास्त्राभ्युपगमाच्च संमूर्छिमकल्पा उभयतो भ्रष्टा भागीरथीसलिलनिर्मलेऽपि पीयूषयूषातिशायिमाधुर्ये भगवद्वचसि कालुष्यं दधानाः केचन निकाचितपापकर्मकलुषितात्मानः केवलिनां कवलाहारं प्रति विप्रतिपद्यंत इति तत्स्थापनमत्राभिधेयम् । श्लोकोऽयं स्पष्टार्थः । नवरं जिनेशितुरिति अन्येषामपि सामान्यकेवलिनामुपलक्षणम् । यद्वा जयंति रागादिशत्रूनिति जिना उपशान्तमोहगुणस्थानवर्तिनस्तेषामीशितोपशमापेक्षया क्षयस्य प्राधान्यात्केवली तस्य जिनेशितुरिति जात्यभिप्रायं चात्रैकवचनमिति ॥ ३ ॥ तत्र तावत्परपक्षमुत्थापयिष्यन् स्वसिद्धांतं द्रढयति--

अर्हतां यद्यतिशयाश्चतुस्त्रिंशत्ततो न किम् । विशेषसिद्धिः सामान्यसिद्धिमाक्षिपति स्फुटम् ॥ ४ ॥

टीका–अर्हतां तीर्थकृतां चेद्यदि चतुस्त्रिंशदतिशया अभ्युपगम्यन्त इति शेषस्तर्हि केवलिविशेषस्य तीर्थकृतः कवलाहारसिद्धिः सामान्यसिद्धिं सामान्यकेवलिनामपि कवलाहारसिद्धिं कथं न गमयतीत्यक्षरार्थः । भावार्थस्त्वयम्–अर्हन्तस्तावच्चतुस्त्रिंशदतिशयविराजमाना भवन्तीत्युभयवादिसिद्धं तत्र सहजाश्चत्वारोऽतिशया एकादश कर्मक्षयोत्था एकोनविंशतिश्च देवकृताः । तथा चाहुः–"तेषां च देहोऽद्भुतरूपगन्धो निरामयः स्वेदमलोज्झितश्च । श्वासोऽब्जगन्धो रुधिरामिषं तु गोक्षीरधाराधवलं ह्यविस्रम् ॥ १ ॥ आहारनीहारविधिस्त्वदृश्य श्चत्वार एतेऽतिशयाः सहोत्थाः । क्षेत्रे स्थितिर्योजनमात्रकेऽपि नृदेवतिर्यग्जनकोटिकोटेः ॥ २ ॥ वाणी नृतिर्यक्सुरलोकभाषा-संवादिनी योजनगामिनी च । भामंडलं चारु च मौलिपृष्ठे विडंबिताहर्पतिमंडलश्रि ॥ ३ ॥ साग्रे च गव्यूतिशतद्वये रुजा वैरेतयो मार्यतिवृष्ट्यवृष्टयः । दुर्भिक्षमन्यस्वकचक्रतो भयं स्यान्नैत एकादश कर्मघातजाः ॥ ४ ॥ खे धर्मचक्रं चमराः सपाद-पीठं मृगेन्द्रासनमुज्ज्वलं च । छत्रत्रयं रत्नमयो ध्वजोऽङ्घ्रि-न्यासे च चामीकरपंकजानि ॥ ५ ॥ वप्रत्रयं चारुचतुर्मुखांगता चैत्यद्रुमोऽधोवदनाश्च कंटकाः । द्रुमानतिर्दुन्दुभिनाद उच्चकै-र्वातोऽनुकूलः शकुनाः प्रदक्षिणाः ॥ ६ ॥ गन्धांबुवर्षं बहुवर्णपुष्प-वृष्टिः कचश्मश्रुनखाप्रवृद्धिः । चतुर्विधा मर्त्यनिकायकोटिर्जघन्यभावादपि पार्श्वदेशे ॥ ७ ॥ ऋतूनामिन्द्रियार्थाना-मनुकूलत्वमित्यमी । एकोनविंशतिर्दैव्याश्चतुस्त्रिंशच्च मीलिताः ॥ ८ ॥ इति" तत्र च चतुस्त्रिंशदतिशयाः केवलज्ञानोत्पत्तिसमनन्तरमेव प्राप्यंते नान्यदा कारणान्तरवैफल्यात् । तथा चाहारनीहारविधेरदृश्यत्वं केवलिनां कवलाहाराभ्युपगममन्तरा कथं जाघटीति आहारशब्दस्य सामा-

न्यवाचकत्वेऽपि नीहारशब्दसमभिव्याहारस्य तत्र तात्पर्यख्यापकात् ; न च नीहारशब्दस्तैजसशरीरेण पच्यमाने लोमाहार एव रूढः । यतः किमियं रूढिर्लौकिकी पारिभाषिकी वा नाद्योऽसंभवात् नापि द्वितीयस्तथा कुत्रचिदपि पूर्वसूरिभिरनाख्यातत्वात् । किं चैतदतिशयस्य सहोत्थत्वेन गार्हस्थ्येऽपि कवलाहारविलोपान्न लज्जसे सामान्यजनसाधारणत्वाच्च कथमतिशयत्वमप्येतस्येति पूर्वापरविचारचातुरीशून्यहृदयः संवादयितुमप्यनर्होऽसि । ननु किं तदतिशयत्वम् न तावत्तीर्थंकरनामकर्मोदयजनितो लब्धिविशेषः तीर्थंकरनामकर्मोदयस्य त्रयोदशगुणस्थान एवाभिहितत्वात्तथा चाहुः–"उदए जस्स सुरासुर-नरनिवहेहिं च पूइउ होइ । तं तित्थयरनामं तस्स विवागो हु केवलिणो ॥ १ ॥ इति" । नाप्यर्हत्त्वसमानाधिकरणो विशेषगुण एवातिशयः घातिकर्मक्षयोद्भवानां केवलज्ञानादीनां सामान्यकेवलिसाधारणत्वात् । न चान्यव्यावृत्तिबुध्ध्युपधायकार्हत्त्वसमानाधिकरणो विशेषगुण एवातिशयः लक्षणविशेषस्यापि तथात्वप्रसंगात् । नापि कश्चन शक्तिविशेषोऽनिर्वचनात् । तस्मादतिशयत्वमेवासिद्धमिति कश्चित् । अत्राभिदध्महे सहजदेवकृतक्षायिकत्वोपाधिभेदावच्छिन्नभेदप्रतियोग्यव्यासज्यवृत्तितीर्थंकरत्वसमानाधिकरणो विशेषगुण एवातिशयः । नन्वेषां युगपदनुत्पत्तौ किं नियामकमिति चेच्छृणु सर्वत्र प्रतिबन्धकाभावस्तत्कारणमन्यथा तन्तुरूपं पटोत्पत्तिमनपेक्ष्यापि पटरूपं जनयेत्तस्माद्यथा तत्र प्रतिबन्धकाभावः कारणमेवमत्रापि प्रतिबन्धकौ चात्र गर्भानवतारज्ञानानुत्पादौ तौ च कारणीभूताभावप्रतियोगित्वेन कार्यैकोन्नेयाविति प्रतिबन्धकानपगम एव नियामकः । चतुरादीनां च समकालोत्पत्तौ पंचांगुलीनामिव प्रतिबन्धकाभाव एव नियामक इति सर्वमवदातम् । न तु सर्वमिलनेनैव चतुस्त्रिंशदतिशयस्वामित्वमेवार्हतां मन्यामहे न तु केवलज्ञानोत्पत्तिसमनंतरं चतुस्त्रिं-

शदेवातिशयाः प्राप्यन्त इति तस्माच्चतुर्थातिशयस्वामित्वमर्हतां छद्मस्थावस्थायामेव न तु सार्वकालिकमिति वाच्यम् । असतः स्वामित्वायोगात् अतिशयानां चतुस्त्रिंशत्संख्याप्रतियोगित्वानुपपत्तेश्च सकलमेलकसमवधाने तदभावात् तत्सत्त्वे च तदभावादिति । असतश्च स्वामित्वे गतदशरजतो विंशतिरजतप्रार्थी दशरजतप्राप्त्यैव चरितार्थः स्यात् । किं च कथमेवं कदाग्रहग्रहग्रस्तोऽसि यदेनं प्रत्येव दृढः प्रद्वेषो भवतः अवबोध्यमानोऽपि किं नावबुध्यसे शृणु भोः-"उसरणमवसरित्ता चउतीसं अइसए निसेवित्ता । धम्मकहं च कहंता अरिहंता हुंतु मे सरणं" मित्यादौ चतुस्त्रिंशदतिशयवत्त्वं त्वया कथं व्यापनीयम् । तदत्यन्ताभावाप्रतियोगित्वादिति चेत्तदत्यन्ताभाव एवातिप्रसंगः । भावत्वे सतीति विशेषणादपि न साध्यसिद्धिः गार्हस्थ्येऽपि चतुस्त्रिंशदतिशयवत्त्वव्यपदेश्यताप्रसंगात् । न चेष्टापत्तिः तदानीमेव तीर्थंकरनामकर्मविपाकवेदनप्रसंगात् व्यवहारविरोधित्वाच्च । व्यवहारानुरोधेन हि कल्पना न तु कल्पनानुगुण्येन व्यवहारस्तथा चार्षम्-"जइ जिणमयं पवज्जह ता मा ववहारनिच्छए मुअह । ववहारनउच्छेए तित्थुच्छेओ जओ भणिओ ॥ १ ॥" इति । सर्वं चैतत्सिद्धान्तपथाननुयायि पूर्वपक्षवचनमित्यलमुत्सूत्रप्ररूपणविस्पंदितैः । प्रमाणं चात्र अर्हन्तः कवलाहारिणश्चतुस्त्रिंशदतिशयवत्त्वान्यथानुपपत्तेरिति । तदेवमर्हतां चतुस्त्रिंशदतिशयाभ्युपगंत्रा कवलाहारित्वं मन्तव्यमेव । तथा च सामान्यकेवलिनामप्ययमनायाससाध्य एवेति प्रचिकटिषयोत्तरार्धं विव्रियते विशेषेति-सामान्यकेवलिनः कवलाहारिणः तद्विशेषगतनिरुपाधिकतद्धर्मप्रतियोगित्वात् तद्धर्मश्च कवलाहारित्वम् न चायं भागासिद्धो हेतुः पक्षहेत्वोरेकावच्छेदकावच्छिन्नत्वात् एकं चावच्छेदकं सयोगिकेवलित्वमिति । ननु केवलिनो न कवलाहारिणः संज्ञारहितत्वादित्यनेन सत्प्रतिपक्षोऽयं हेतुरिति चेन्न

एतस्य लोमाहाराभावस्यापि साधकत्वेनाप्रयोजकत्वादिति सिद्धमेतेनानुमानेन केवलिनां कवलाहारित्वमिति ॥ ४ ॥ अमु-
मेवार्थं पूर्वपक्षनिरासेन दृढयितुमिच्छुः पूर्वपक्षमुपन्यस्यति--

**व्यापकं कारणं कार्यं सार्वज्ञ्येन विरुध्यते । ननु तत्कवलाहारस्तेषां नाभ्युपगम्यते ॥ ५ ॥**

टीका--व्याप्याधिकवृत्तिः व्यापकम् १ । अन्यथासिद्धिशून्येतरज्ञानानधीनज्ञानकार्यप्रागभावावच्छिन्नसमयपरिचायित-
नियतसमवधानप्रतियोगित्वावच्छेदकधर्मवत्कारणम् २ । अनन्यथासिद्धनियतपश्चाद्भावि कार्यमित्येके ३ । एतदुपलक्ष्यः
स्वरूपसंबंधविशेष एव व्यापकत्वं १ कारणत्वं २ कार्यत्वं ३ च तत्प्रतियोगि व्यापकं १ कारणं २ कार्यं ३ चेति वस्तुगतिः ।
तथा च कवलाहारस्य व्यापकमाहारसंज्ञादि कारणं च बुभुक्षामोहनीयादि कार्यं च निद्रादि सर्वज्ञत्वेन सह नावतिष्ठते ।
अयं भावः--यत्र खलु कवलाहारः संप्रतिपन्नस्तत्र सातावेदनीयोदीरणमपि तथा च केवलिनः सकाशात् सातावेदनीयोदी-
रणालक्षणं व्यापकं निवर्तमानं स्वव्याप्यं कवलाहारमपि निवर्तयति व्याप्यनिवृत्तौ व्यापकनिवृत्ते रावश्यकत्वात् । न च वेदनीयो-
दयवत्केवलिनां वेदनीयोदीरणापि भवत्येवेति वाच्यम् तस्या निषिद्धत्वात् तथा च कर्मस्तवे देवेन्द्रसूरयः--"उदउव्वुदीरणया
परमपमत्ताइ सगगुणेसु । एसा पयडि तिगुणा वेयणी आहारजुगल थीणतिगं । मणुआउ पमत्तंता अजोगि अणुदीरगो
भयवं ॥ १ ॥" सातासातमनुजायुषां हि प्रमादसहितेनैव योगेनोदीरणा भवति नान्येनेत्युत्तरेषु न तदुदीरणेति तट्टी-
कायाम् । तथा भोक्तुमिच्छा बुभुक्षेति बुभुक्षाया इच्छारूपत्वेन सकलमोहध्वंसवत्ययोगात्तत्कार्यमपि कवलाहारलक्षणं न

संभवति । तथा यत्राहारस्तत्र निद्रा यत्राहारो न भवति तत्र निद्रापि न भवतीत्यन्वयव्यतिरेकाभ्यां निद्राया आहारकार्यत्वावधारणात्केवलिनि कवलाहाराभ्युपगमे निद्राप्यापद्येत तस्मात्सार्वज्ञ्यस्य कवलाहारव्यापककारणकार्यविरोधित्वात्केवलिनि कवलाहारो नाभ्युपगम्य इति पूर्वपक्षः ॥ इति ॥ ५ ॥ अथैतदेव विवृत्य दूषयति–

**तदप्यसत्तस्य वेद्योदीरणं व्यापकं न यत् । दर्शनावरणी निद्रा बुभुक्षा मोह एव च ॥ ६ ॥**

टीका–यत्तावदुक्तं "सार्वज्ञ्येन सह कवलाहारव्यापककारणकार्याणि विरुध्यते ततो न तेषां कवलाहार" इति तत्खल्वनुहरते नपुंसकादपत्यप्रसवमनोरथम् । यतो यत्र कवलाहारस्तत्र सातावेदनीयोदीरणमिति न व्याप्तिः विषमिश्रितमोदकभक्षणेन व्यभिचारात् । अथ यदि वेदनीयोदीरणेन व्याप्तिः स्याच्छद्मस्थकवलाहारित्वस्यैवास्तामन्यथा केवलिनस्तन्निवृत्तौ तद्व्याप्यानां गतिस्थितिनिषद्योपदेशदानादीनामपि निवृत्तिः स्यात् । अथ कवलाहारात्केवलिनां सातावेदनीयोदीरणा कथं न स्यादिति चेत्तज्जन्यसुखानुत्पत्तेः अथ तदपि कथं नोत्पद्यत इति चेत्तत्सुखस्य मतिज्ञानसाध्यत्वात्केवलिनां च तदभावादिति ब्रूमः । ननु तर्हि कवलाहारेण किं कर्तव्यमिति चेत् क्षुद्वेदनोपशम एवेति न व्यापकविरोधः । नापि कार्यकारणविरोधः यतो निद्रा दर्शनावरणस्यैव कार्यमिति भगवति तदभावेनैव तदभावः बुभुक्षा चेल्लालक्षणो मोह एव स च न कवलाहारं प्रति कारणं किं त्वभिलाषमात्रं प्रति तयोः कवलाहारकार्यकारणत्वं कल्पयन्मार्गाद्भ्रष्टोऽसीति समासार्थः । व्यासार्थस्त्वयम्–भो नग्नाटमतानुयायिन् "कवलाहारः सार्वज्ञ्येन विरुध्यते" इति यत्तव संमतं तत् किमाहत्य ? पारं-

पर्येण २ वा । प्रथमपक्षेऽपि किं केवली कवलान्न प्राप्नोति १ उत प्राप्तानप्याहर्तुं न शक्नोति २ शक्तोऽपि वा विमलके-वलालोकपलायनशंकया नाहरति ३ । नाद्यद्वितीयौ अन्तरायकर्मणः समूलकाषं कषणात् । न च लाभान्तरायक्षयोपशम एव लाभप्रयोजकः लाभान्तरायक्षयस्य तु शक्तिरूपमेव कार्यं न तु व्यक्तिरूपमिति तत्रापि योगक्षेमसाधारण्यात् तस्मा-द्यथा दानान्तरायक्षयेऽपि दानं दातुं शक्यते तद्वदत्रापीति न कोऽपि दोषावकाशः अन्यथा भवस्थसिद्धयोरन्तरासंभवात् अन्तरायक्षयस्य तु दानादौ विघ्नाभाव एव फलम् । तथा चाहुर्जिनभद्रगणिक्षमाश्रमणाः—“दिंतस्स लभंतस्स भुजंतस्स व जिणस्स एस गुणो । खीणंतरायगत्ते जं से विग्घं न संभवइ १ त्ति ” ॥ नापि तृतीयं तत्र हि कवलाहारविरोधि व्यापकं १ कारणं २ कार्यं ३ सहचरादि ४ वेति पक्षचतुष्टयमुपतिष्ठते । तत्र नाद्यः पक्षः सुन्दरः कवलाहारस्य हि व्यापकं शक्तिविशेषाडुदरकन्दराकोणे क्षेपः स च सार्वज्ञ्ये सुतरां संभवी वीर्यान्तरायकर्मणः समूलमुन्मूलितत्वात् । न च वेदनी-योदीरणलक्षणं व्यापकं विरुध्यत इति वाच्यम् तस्या गतिस्थितिनिषद्योपदेशदानादीनामपि व्यापकत्वापत्तेर्दुष्परिहरत्वात् तस्माच्छद्मस्थकवलाहारित्वस्यैव वेदनीयोदीरणाया व्यापकत्वं युक्तिमत् । न चाहारसंज्ञया सह विरोधः प्रोद्भावनीयः लोमा-हारस्याप्युच्छेदापत्तेः । यतो यत्र कवलाहारित्वं तत्राहारसंज्ञेति व्याप्तिसद्भावात्कवलाहारव्यापकत्वमाहारसंज्ञाया मन्यसे तत्र वयं पृच्छामः किमर्थं कवलपदोपादानं किमेकेन्द्रियादिषु व्यभिचारादाहोस्विज्जिनानां लोमाहारस्याप्युच्छेदापत्तेः नाद्य-स्तेषामपि सूक्ष्मरूपसंज्ञाभिधानात्तथा चार्षम्--“आहारभय परिग्गह मेहुण तह कोहमाणमाया य । लोभो लोगो ओहो दस सण्णा सव्वजीवाणं ? त्ति” ॥ यत्तु भगवत्यां--“तेसिणं जीवाणं नो एवं तक्काइ वा सण्णा इ वा पण्णाइ वा मणेइ वा वईइ वे”

त्याद्युक्तं तद्दीर्घकालिकीहेतुवादोपदेशिकीदृष्टिवादोपदेशिक्यन्यतमनिषेधपरम् । तथा च चतुश्चत्वारिंशत्तमद्वारे प्रवचनसारोद्धारे हेतुवादोपदेशिकीव्याख्यानावसरे सिद्धसेनसूरयः—"अत्र च निश्चेष्टा धर्माद्यभितापेऽपि तन्निराकरणप्रवृत्तिनिवृत्तिविरहिताः पृथिव्यादय एवासंज्ञिनो भवन्तीति" । तथा संग्रहणीवृत्तावपि "अत्र पंचण्ह मोहसन्निति पंचानां पृथिव्यादीनामोघसंज्ञा वृत्त्यारोहणाद्यभिप्रायरूपौघसंज्ञा पृथिव्यप्तेजोवायुवनस्पतीनामाहारादिसंज्ञोपलक्षकमोघसंज्ञामात्रमेव न दीर्घकालिक्यादिसंज्ञात्रयमित्यर्थ" इति देवभद्रसूरयः प्राहुरिति बहु वक्तव्यमेतद्विस्तरभयान्नेह तन्यते । अत्र कश्चिद्द्वितीयपक्षोपक्षेपदीक्षादक्षो दिगंबरकुञ्जरः प्रत्यवतिष्ठते । स एवं प्रष्टव्यः किं तव शिवभूतेः कवलाहारेणापराद्धं यदाहारसंज्ञायास्तुल्येऽप्युभयव्यापकत्वे कवलाहारमेव निषेधयामास । तस्मादेतत्सर्वं छद्मस्थकवलाहारित्वस्यैव व्यापकम् अन्यथा लाघवात्कवलपदानुपादानेनाहारसंज्ञाया आहारित्वस्यैव व्यापकत्वसिद्धौ केवलिनां लोमाहारस्याप्युच्छेदापत्तिः । नापि कारणविरोधः यतस्तदपि किं बाह्यं विरुध्यत आभ्यन्तरं वा बाह्यमपि कवलनीयं वस्तु पात्रादिकं वा । नाद्यः प्रमाणाभावात् । अथ सार्वज्ञ्यं कवलनीयवस्तुविरुद्धमस्मदादिज्ञानातिरिक्तज्ञानत्वादित्यस्त्येव प्रमाणं तन्न त्वज्ज्ञानेनैव व्यभिचारात् सार्वज्ञ्यं न कवलनीयवस्तुविरुद्धं ज्ञानत्वादस्मदादिज्ञानवदित्यनेन सत्प्रतिपक्षत्वाच्च । नापि द्वितीयस्तस्यानुपदमेव निराकरिष्यमाणत्वात् । आभ्यन्तरमपि न तावत्तैजसशरीरं विरुध्यते तवाप्यनभिमतत्वात् । नापि कर्म तदपि किं घात्यघाति वा नाद्यो ज्ञानावरणदर्शनावरणान्तरायाणां ज्ञानदर्शनावरणदानाद्यपायमात्रचरितार्थत्वात् । नापि मोहोऽग्रे निराकरिष्यमाणत्वात् । अथाघाति कर्म तत्कारणं विरुध्यत इति यदि द्वितीयपक्षं कक्षीकुरुषे तदा वन्ध्यातनयकंठे गगनकुसु-

ममालामारोपय तथाविधाहारपर्याप्तिनामकर्मोदयवेदनीयोदययोस्त्वयापि संप्रतिपन्नत्वात् । नापि कार्यं सार्वज्ञ्येन विरोधमधिरोहति यतस्तत् किं निद्रा वा १ ईर्यापथो वा २ विसूचिकादिव्याधिर्वा ३ पुरीषादिजुगुप्सितं वा ४ रिरंसा वा ५ रसनेन्द्रियोद्भवमतिज्ञानं वा ६ परोपकारणान्तरायो वा ७ अन्यद्वा ८ । नाद्यस्तस्या दर्शनावरणकार्यत्वात् भगवति तु तदभावादेव तदभावः कवलाहारस्तु घटं प्रति रासभ इवान्यथासिद्धः । न द्वितीयो गमनादावपि समानकक्षत्वात् । न तृतीयो हितमिताहाराभ्यवहारात् । नापि तुर्यस्तत्किं स्वस्यैव वा परस्य वा न प्रथमो जुगुप्सामोहनीयकर्मणो निर्मूलितत्वात् न द्वितीयोऽर्हतां हि आहारनीहारौ मांसचक्षुषामगोचराविति सहजातिशयप्रभावेणैव तदभावात् अन्यथा सकलसुरासुरनरपरिवृढसहस्रसंकुलायामासीनस्य भगवतो नाभ्यमपि कुतो न जुगुप्साहेतुरिति सामान्यकेवलिभिस्तु विविक्तस्थले तत्करणाद्दोषाभावः । नापि पंचमो मोहनीयकर्मणः समूलनिर्मूलनात् । नापि षष्ठो जानुदघ्नाकीर्णविकचविचकिलमन्दारपुंडरीकचंपकप्रभृतिकुसुमप्रकरप्रवरपरिमलसंबन्धेन घ्राणेन्द्रियज्ञानवत्तावन्मात्रेण रसनेन्द्रियज्ञानानुदयादचक्षुर्दर्शनमेव तत्र कारणमिति निष्टंकयामः । नापि सप्तमस्तृतीययाममुहूर्तमात्र एव भगवतां भुक्तेः शेषमशेषकालमुपकारावसरात् । नाप्यष्टमोऽनिर्वचनात् । नापि सहचरादिविरोधः यतस्तत् किं छद्मस्थत्वमन्यद्वा । नाद्योऽस्मदादौ तथादर्शनात् तत्साहचर्यनियमाभ्युपगमेऽघातिकर्मणामपि तत्सहचरं स्यात् तथा च केवलिषु कवलाहाराभाववत्तदभावोऽप्यभ्युपगन्तव्यः स्यात् । अन्यत्तु करवस्त्रचालनादि भवति तत्सहचरं न तु केवलित्वेन विरुद्धमिति । सर्वमेतच्छ्रीजैनचिंतामणिरत्नाकरावतारिकायां क्षुण्णधियां सुज्ञेयमिति ॥ ६ ॥ पुनरपि तत्कारणविशेषविरोधं शंकते–

**पात्राभावाद्ध्यानविघ्नान्मोहाभावादवृद्धितः। परमौदारिकांगानां ननु नाहारसंभवः ॥ ७ ॥**

टीका—ननु परमौदारिकांगानामस्मदाद्यपेक्षया विशिष्टशरीराणां केवलिनां "क्वचित्सामान्यशब्दा अपि विशेषतात्पर्यवशाद्विशेषवाचका" इति न्यायादाहारसंभवः कवलाहारोपपत्तिर्न भवति । हेतुगर्भं चेदं विशेषणं तेन यत्रौदारिकशरीरधारिपुरुषत्वं तत्र कवलाहारित्वमिति व्याप्तिसंभवेऽपि केवलिनस्तद्विपरीतत्वसाधको हेतुः सूचितो भवति । तथा कवलाहारकारणास्मदाद्यौदारिकशरीरस्य सार्वज्ञ्येन सह विरोधश्चेति कारणविरोधः । पुनः कस्मात् ? पात्राभावात् पात्रसद्भावे हि मूर्च्छयावश्यं भवितव्यमिति क्षीणमोहेन भगवता कथं तद्ग्रहणीयमित्यपि कारणविरोधः । पुनः कस्मात्? ध्यानविघ्नात् न हि कवलनीयवस्तूपभोगसमये ध्यानं ध्यातुं पार्यत इति कार्यविरोधः । पुनः कस्मात्? मोहाभावात् आहारो हि बुभुक्षापूर्वकः बुभुक्षा चाहारविषयप्रीत्यात्मिका मोहनीयप्रकृतिविशेष एव मोहश्च भगवता समूलकाषं कषित इति कारणविरोधः । पुनः कस्मात्? अवृद्धितः वृद्ध्यभावादित्यर्थः परमौदारिकं हि शरीरं न चीयते न चोपचीयते कवलाहाराभ्युपगमे त्ववश्यमेतदुपचयं प्राप्नोतीति कार्यविरोधः । तस्मात्कार्यकारणविरोधात् केवलिनां कवलाहारो न प्रामाणिक इति क्षपणकमतानुयायिनामाशय इति ॥ ७ ॥ अथैतच्छ्लोकद्वयेन निरस्यति—

**अंगवत्पात्रधरणेऽप्यप्रमत्तस्य न क्षतिः । गतिवत् स न मोहोत्थो न च ध्यानं तदेष्यते ॥ ८ ॥**

**पुद्गलोपचयाद्वृद्धिस्त्वौदारिकशरीरिणाम् । जिनानां हि भवेत्तेन भग्नं नग्नाटनाटकम्॥९॥युग्मम्॥**

टीका—अप्रमत्तस्य मूर्छारहितस्य शरीरवत्पात्रधरणेऽपि न कोऽपि दोषः । यथा पात्रं मूर्छाजनकमेवं शरीरमपि मूर्छाजनकं सुप्रतीतमेव । ततश्च शरीरे यदि न मोहस्तर्हि पात्रादावपि कौतस्कुत इति न पात्रादिकारणविरोधः । अथ मोहलक्षणकारणविरोधं परिजिहीर्षन्नाह—गतीति स कवलाहारो मोहोत्थो मोहजन्यो न भवति गत्यादिवत् कवलाहारो हि अस्मदादिषु मोहपूर्वक एव दृश्यत इति कृत्वा केवलिनि तदभावोऽभ्युपगम्यते । तथा च गत्यादीन्यपि अस्मदादिषु मोहसहकृतान्येवोपलभ्यन्त इति केवलिनो मोहाभावेन तदभावस्याप्यशक्यपरिहारत्वात्कुतस्तीर्थप्रवृत्तिः । तथा यथा गत्यादिकर्मैव गत्यादीनां कारणं न मोहस्तथा तथाविधाहारपर्याप्तिनामकर्मोदयसहकृतो वेदनीयोदय एव कवलाहारस्य कारणं न मोह इत्यपि प्रतिपद्यताम् । तथा च श्रीरत्नाकरावतारिकायां रत्नप्रभाचार्याः—"तथाविधाहारपर्याप्तिनामकर्मोदयवेदनीयोदयप्रबलप्रज्वलदौदर्यज्वलनोपतप्यमानो हि पुमानाहारमाहारयतीति" न मोहलक्षणकारणविरोधः । अथ ध्यानविघ्नलक्षणं कार्यविरोधं निरस्यति—न चेति । तदा शैलेशीकरणात्प्राक् ध्यानं सूक्ष्मक्रियानिवृत्तिसंज्ञकं शुक्लध्यानतृतीयपादलक्षणं नेष्यते नाभ्युपगम्यते सैद्धान्तिकैरिति शेषः इति न ध्यानविघ्नलक्षणकार्यविरोधः । अथ चतुर्थपंचमपक्षे[1] दूषयति—पुद्गलेति । शरीरस्य हि वृद्धिः पुद्गलोपचयाद्भवति । न चाहाराभावादेव तदभावसिद्धिरिति अन्योऽन्याश्रयापातात् तस्माद्वृद्धिलक्षणकार्यविरोधोऽपि न भवति । तथौदारिकशरीरिणामित्येतेन तदभिमतं परमौदारिकत्वं निरस्तं । तन्निरासस्त्वग्रे स्फुटीकरिष्यते । तदेवं पूर्वोक्ता दिगंबरविकल्पाः श्वेतांबरसिद्धान्तवचनैरत्यंतं कदर्थिताः क्षणमप्युल्लसितुमशक्ताः स्वयमेव पंचत्वं

१ पक्षौ

प्राप्ता इति । नग्नः सन्नटतीति नग्नाटः क्षपणकस्तस्य नाटकमिव नाटकं प्रतिज्ञातत्यागादप्रतिज्ञातोपादानाच्च चापल्याकुलं पूर्वपक्षवचनं भग्नं निरस्तमिति श्लोकद्वयसमासार्थः व्यासार्थस्त्वयम्-यत्तावद्दिगंबराः सार्वज्ञ्येन सह पात्रादिविरोधं प्रोद्भावयन्ति तत् किं स्वरूपमात्रेण वा १ ममकारकारणत्वाद्वा २ छद्मस्थसंयतत्वेनापि विरोधित्वाद्वा ३ जुगुप्साहेतुत्वाद्वा ४ आचेलक्याद्वा ५ तत्सद्भावे केवलानुत्पत्तेर्वा ६ आत्मना सहासंबद्धत्वाद्वा ७ अन्यस्माद्वा ८ इति । तत्राष्टौ विकल्पा उपतिष्ठंते । तत्र नाद्यः पक्षः सुन्दरः भगवतामर्हतां पाणिपात्रत्वेन केवलज्ञानोत्पत्त्यनंतरमपि तत्सद्भावस्याभयवादिन्यविवादास्पदत्वात् । १ । नापि द्वितीयः शरीरसद्भावेऽपि तद्भावप्रसंगात् । अथ क्षीणमोहस्य भगवतो न शरीरे ममत्वसंभव इति चेत्तदितरत्रापि तुल्यम् अस्मदादिषूभयसद्भावेऽपि तद्भावदर्शनात् तस्मात्पात्रत्वावच्छिन्नस्य ममकारकारणत्वे मानाभावान्मूर्छासहकृतस्यैव तस्य ममकारकारणत्वम् । २ । नापि तृतीयः यतस्तेनापि किं स्वरूपमात्रेणैव विरोधः १ ममकारकारणत्वाद्वा २ जिनानुपदिष्टत्वाद्वा ३ परिग्रहरूपत्वाद्वा ४ नाद्यस्तवाभिमतस्य करपात्रित्वस्याप्यनुपपत्तेः । न द्वितीयः तस्य समनन्तरपक्षप्रहारेणैवोपक्षीणत्वात् । अथ पात्रस्यादानमोचनादौ मोहस्तर्हि उत्थानोपविशनादावपि स कुत्र गतः । नापि तृतीयः तस्य सिद्धान्तेऽनुज्ञातत्वादेव । तथा चागमः--"जं पि वत्थं च पायं वा कंबलं पायपुंछणं । तं पि संजमलज्जट्ठा धारंति परिहरंति य ॥ १ ॥" श्रीदशवैकालिके न च कारणिकमिदमसमसाहसवतास्मदादीनां धर्ममनुचितमिति वाच्यम् आहारस्यापि कारणिकत्वेन तद्ग्रहणस्याप्यनुचितत्वापत्तेः तथा चार्षम्--छहिं ठाणेहिं समणे निग्गंथे आहारमाहारेमाणे नाइक्कमइ तंजहा-वेयणवेयावच्चे इरियट्ठाए अ संजमट्ठाए । तह पाणवत्तियाए छट्ठं पुण धम्मचिंताए त्ति ॥

छहिंति कंठ्यम् । आहारमशनादिकमाहारयन्नभ्यवहरन्नातिक्रामत्याज्ञां पुष्टालंबनत्वात् अन्यथा त्वतिक्रामत्येव रागादिभावात् । तद्यथा–"वेअ" गाहा क्षुद्वेदना १ वैयावृत्त्यमाचार्यादिकृत्यकरणं २ वेदनवैयावृत्त्यं भुंजीत वेदनोपशमनार्थं १ वैयावृत्त्यकरणार्थं २ वेति भावः । ईर्या गमनं तस्या विशुद्धिर्युगमात्रनिहितदृष्टित्वमीर्याविशुद्धिस्तस्यै ईर्याविशुद्ध्यर्थम् । इह च विशुद्धिशब्दलोपादीर्यार्थमित्युक्तम् । बुभुक्षितो हीर्याशुद्धावशक्तः स्यादिति तदर्थमिति । चः समुच्चये । संयमः प्रेक्षोत्प्रेक्षाप्रमार्जनादिलक्षणस्तदर्थं । तथेति कारणान्तरसमुच्चये । प्राणा उच्छ्वासादयो बलं वा तेषां तस्य वा वृत्तिः पालनं तदर्थं प्राणधारणार्थमित्यर्थः । षष्ठं पुनः कारणं धर्मचिंतायै गुणनानुप्रेक्षार्थमित्यर्थः । इत्येतानि षट् कारणानीति । तस्मात् कारणिकमपि चेदाहारग्रहणं युक्तं तर्हि पात्रादिरक्षणमपि संयतानां कथमयुक्तमिति मुधा शिवभूतिना विप्रतारितोऽसि । नापि चतुर्थः मूर्छाविषयस्य संयमोपघातिन एव वस्तुतः परिग्रहरूपत्वात् अन्यस्य तु शरीरस्येवातथारूपत्वात् । तथा चागमः–"न सो परिग्गहो वुत्तो नायपुत्तेण ताइणा । मुच्छा परिग्गहो वुत्तो इय वुत्तं महेसिणा ॥ १ ॥ इति" श्रीदशवैकालिके तथा–"तम्हा किमत्थि वत्थु गंथो गंथोव सव्वहा लोए । गंथो वमओ गंथो मुच्छममुच्छाइ निच्छयओ ॥ १ ॥ वत्थाइं तेण जं जं संजमसाहणमरागदोसस्स । तं तमपरिग्गहोच्चिअ परिग्गहो जं तदुवयारी ॥ २ ॥" तस्मात् किं नाम तद्वस्त्वस्ति लोके यदात्मस्वरूपेण सर्वथा ग्रंथोऽग्रंथो वा । नास्त्येवैतदित्यर्थः । ततश्च यत्र वस्त्रपात्रदेहाहारकनकादौ मूर्छा समुत्पद्यते तन्निश्चयतः परमार्थतो ग्रंथः । यत्र तु सा नोपजायते तदग्रंथ इति । एतदेव व्यक्तीकरोति "वत्थाइ तेणेति" शेषं सुगम-

मित्यादि । किं च पात्रादिकं विना यतीनामादान[1]निक्षेपणासमितिपारिष्ठापनिकासमिती कथं भवतः यतो वस्त्रपात्रादिधर्मोपकरणमुपदधत एव ते भवतः । यत उक्तम्—"ओहोवहोवग्गहिअं भंडगं दुविहं मुणी । गिन्हंतो निक्खिवंतो वा पउंजिज्ज इमं विहिं ॥ १ ॥ चक्खुसा पडिलेहित्ता पमज्जिज्ज जयं जई । आइज्ज निक्खिविज्जा वा दुहा वि समिए सिया ॥ २ ॥ इति" तथा—"[2]उच्चारं पासवणं खेलं सिंघाणजल्लिअं । आहारं उवहिं देहं अन्नं वा वि तहाविहं ॥ १ ॥ विच्छिन्ने दूरमोगाढे नासन्ने बिलवज्जिए । तसपाणबीयरहिए उच्चाराईणि वोसिरे ॥ २ ॥" इति श्रीउत्तराध्ययने २४ । तथा च समित्याद्युपयुक्तपात्रादिधर्मोपकरणधरणं संयतानामुचितमेव । ननु तर्हि तीर्थकृतामपि पात्राद्यभावेन समितिपंचकाद्यभाव आपद्यत इति चेन्न अच्छिद्रपाणित्वप्रभृतिलब्धिभाजां तेषां पात्राद्यभावेऽप्यसमितीनामभावेन तत्प्रतिपक्षभूतानां समितीनामेव सद्भावात् अन्येषां तु पात्राभावेन भोजने क्रियमाणे स्निग्धदुग्धादिबिंदूनामधःपातात् तद्गंधाकृष्टानां समुदितानां पिपीलिकादीनां कस्यचित्पादादिन्यासेन कृतान्तसदनप्राप्तौ कथं न तुभ्यं कृतान्तः कुप्यतीत्यलमतिप्रसंगेन । ३ । नापि चतुर्थः अनन्तशोऽशुचिभावापन्नमपि पात्रं यतो न जुगुप्साहेतुः वर्तमानपर्यायात्मकस्यैव प्रामाणिकत्वाद्भगवतो जुगुप्सामोहनीयकर्मणः क्षीणत्वाच्च । ४ । नापि पंचमः पात्रविषयकलब्धिरहितानां वस्त्रजन्यकार्यविषयलब्धिभाजां च जिनकल्पिकानां सत्यप्याचेलक्ये पात्रधारित्वस्यास्माकमभिमतत्वात् । किं च वस्त्रमपि चेत् सार्वज्ञ्येन विरोधमधिरोहेत्तर्हि कस्यचिदाक-

---

१ आसनादीनि संवीक्ष्य प्रतिलिख्य च यत्नतः । गृह्णीयान्निक्षिपेद्वा यत्सादानसमितिर्मता ॥ १ ॥ कफविप्रुण्मलप्राय निर्जंतुजगतीतले । यत्नाद्यदुत्सृजेत्साधुः सोत्सर्गसमितिर्मता ॥ २ ॥ इतियोगशास्त्रे । २ न ह्युच्चारप्रस्रवणादीनां पात्रं विना परिष्ठापनं भवतीत्येतेनापि पात्रग्रहणमाक्षिप्यत एव

स्मिकचीवरसंबंधेनोत्पन्नमपि केवलज्ञानं विलीयेत सहानवस्थायित्वस्यैव विरुद्धत्वलक्षणात् । यथा दूरीकृत्यापि तिमिरनिकुरंबं सकलभुवनमंडलं प्रकाशयन् मार्तंडमंडलप्रकाशो दुर्दिनेनाव्रियत इति । न च छद्मस्थानामपि संयतानां वस्त्रं धर्तुमनुचितमिति कुतो न केवलिनामपीति वाच्यम् एतस्य पात्रविरोधनिराकरणेनैव निराकृतकल्पत्वात् । न च "जिताचेलपरीषहो मुनि" रिति वचनश्रवणात्तेषां वस्त्रधरणं न युक्तिमत् एवं हि क्षुत्परीषहविजयस्याप्याहाराभावेनैव साध्यत्वाद्दिगंबराणां व्रतग्रहणानंतरमेव यावज्जीवमनशनमायातम् । तस्माद्यथानेषणीयभक्तत्याग एषणीयोपभोगे च क्षुत्परीषहविजयः एवमचेलकपरीषहविजयोऽप्येषणीयवस्त्रपरिभोगे न तु सर्वथा तदनुपभोगेनेति बहुवक्तव्यमेतद्विस्तरभयान्नेह तन्यते । ५ । षष्ठोऽप्यभित्तिचित्रार्पितः तथाहि पात्रस्य केवलज्ञानोत्पत्तिप्रतिबंधकत्वं किं स्वरूपमात्रेण ममकारकारणाद्वा । तत्र नाद्यपक्षेण तत्साधनमन्धायालेख्यदर्शनमिव सहृदयहृदयचमत्कारकारणम् अर्हतां पाणिपात्रत्वेन केवलज्ञानानुत्पत्तिप्रसक्तेः । नापि द्वितीयः शरीरसद्भावेऽपि तदभावप्रसंगादित्याम्रेडितमपि किं न बुध्यसे । ५ । नापि सप्तमः भामंडलादीनामपि सार्वज्ञ्यविरोधित्वप्रसक्तेः अथ तेनापि सह संयोगः संबन्धो वर्तत एवेति चेदत्रापि धार्यधारकभावसंबंधं कथं न कक्षीकुरुषे । ७ । नाप्यंत्यस्तदनिर्वचनादिति सुव्यवस्थितं पात्रलक्षणकारणविरोधनिराकरणस्थलम् । अथाहारस्य मोहकार्यत्वं निराक्रियते । तत्र नग्नाटस्यायमाशयः-"कवलाहारस्तावन्मोहजन्यः तथा च क्षीणसकलघातिकर्मणां केवलिनां विचार्यमाणोऽयं कथमुपपद्यत इति" । अत्र वयं वदामः-मोहः किं बुभुक्षालक्षणः कारणं सामान्येन वा आद्येऽपि किं सर्वत्रापि अस्मदादावेवेति वा । नाद्यः प्रमाणाभावात् । अथ क्रिया इच्छापूर्विका क्रियात्वात् संप्रतिपन्नभुजिक्रियावदित्यनुमानमेव

तत्साधकमस्तीति चेन्न सुप्तमत्तमूर्छितादिक्रियाभिर्व्यभिचारात् । न च स्ववशेति विशेषणोपादानेऽपि साध्यासिद्धिः पक्ष-तावच्छेदकावच्छिन्नायां सुप्तमत्तमूर्छितादिक्रियायां स्ववशक्रियात्वस्यावृत्त्या हेतोर्भागासिद्धत्वात् । नन्वेवमनुमानमात्रोच्छेदापत्तिः पर्वतोऽयमग्निमान् धूमवत्त्वात् महानसवदित्यत्र धूमवत्त्वस्यापि हेतोः पक्षतावच्छेदकावच्छिन्नवृत्तित्वाभावेन भागासिद्धत्वापत्तेः । तत्र धूमवत्पर्वतत्वं पक्षतावच्छेदकमिति चेदत्रापि स्ववशक्रियात्वमेव पक्षतावच्छेदकमास्तामिति चेत्तथापि केवलिगतस्थितिनिषद्यादिभिर्व्यभिचारः । अत्र कश्चिद्गाढकर्मा मूढमतिः काशकुशावलंबनेन शंकते--ननु गत्यादयः केवलिनां न भवंति मोहसहकृतत्वात् । किं तर्हि यस्योपविष्टस्योर्ध्वंदमस्य वा यदा केवलज्ञानमुत्पन्नं ततः प्रभृति स केवली उपविष्टः सन्नूर्ध्वंदमो वा स्वायुःपरिसमाप्तिं यावद्धियति तूलवद्भ्राम्यन्नेवावतिष्ठते न चैवं तस्य काचिद्वेदना संभवति मोहाभावेन वेदनीयोदयस्य निःसत्ताकत्वादिति स तावत्प्रत्यक्षमृषावादी सर्वविसंवादी संवादयितुमप्यनर्हः तीर्थप्रवृत्तेरप्युच्छेदापातात् विहायोगतिनामकर्मोदयादिवैयर्थ्यापाताच्च । यत्तु तेन वेदनीयोदयस्यनिःसत्ताकत्वमुक्तं तदपि मन्दम् अनागमिकत्वात् आगमे हि अत्यन्तोदयः सातस्य केवलिन्यभिधीयते । तथा चोक्तम्--"जं च कामसुहं लोए जं च दिव्वं महासुहं । वीयरागसुहस्सेयं णंतभागंपि णग्घइ" ॥ १ ॥ इत्यादि । सातासातयोश्चान्तर्मुहूर्तमानतया यथा सातोदयः एवमसातोदयोऽपि । न चैवं यथानंतसुखं तथानंतदुःखमपि केवलिनामापतितं सातोदयस्य प्रशमरसपारंपरतंत्रत्वात् असातोदयः पुनः क्षुदादि कवलाहारादिचिकित्सार्हो रोगादिवेद्यस्तु कादाचित्कः । यत्तु केवलिनां वेदनीयं कर्म जरद्वस्त्रप्रायमिति प्रावाहिकं वचः तदपि सातवेदनीयबन्धमात्रपरमिति सूत्रकृतांगवृत्तिकृतोभिप्रायमनुसृत्य व्याकुर्मः । द्वितीये तु सिद्धं नः

समीहितम् न केवलिनामनपायं वेदनीयादि कारणिकस्य कवलाहारस्य सिद्धत्वात् । न द्वितीयः गत्यादीनामप्युच्छेदापत्तेः । तथा च यथा गत्यादिकर्मजनितं गत्यादिकं केवलिन्यभ्युपगन्तव्यं तथा वेदनीयादिकारणिका भुक्तिरपि प्रतिपद्यतामिति कवलाहारस्य मोहकार्यतानिराकरणस्थलम् । अथ ध्यानविघ्नलक्षणकार्यविरोधं निराकरोति–न चेति । शुक्लध्यानं तावच्चतुष्पादम् । तथाहि । पृथक्त्ववितर्कं सवीचारम् १ अपृथक्त्ववितर्कमवीचारम् २ सूक्ष्मक्रियमनिवृत्ति ३ समुच्छिन्नक्रियमप्रतिपाति ४ । तल्लक्षणानि चामूनि–"सवितर्कं सवीचारं सपृथक्त्वमुदाहृतम् । त्रियोगयोगिनः साधोराद्यं शुक्लं सुनिर्मलम् ॥ १ ॥ श्रुतचिंता वितर्कः स्याद्वीचारः संक्रमो मतः । पृथक्त्वं स्यादनेकत्वं भवत्येतत्त्रयात्मकम् ॥ २ ॥ स्वशुद्धात्मानुभूत्यात्मभावश्रुतावलंबनात् । अन्तर्जल्पो वितर्कः स्याद्यस्मिंस्तत् सवितर्कजम् ॥ ३ ॥ अर्थादर्थान्तरे शब्दाच्छब्दान्तरे च संक्रमः । योगाद्योगान्तरे यत्र सवीचारं तदुच्यते ॥ ४ ॥ द्रव्याद्द्रव्यान्तरं याति गुणाद्याति गुणान्तरम् । पर्यायादन्यपर्यायं सपृथक्त्वं भवत्यतः ॥ ५ ॥ अपृथक्त्वमवीचारं सवितर्कगुणान्वितम् । स ध्यायत्येकयोगेन शुक्लध्यानं द्वितीयकम् ॥ ६ ॥ निजात्मद्रव्यमेकं वा पर्यायमथवा गुणम् । निश्चलं चिंत्यते यत्र तदेकत्वं विदुर्बुधाः ॥ ७ ॥ यद्व्यंजनार्थयोगेषु परावर्तविवर्जितम् । चिंतनं तदवीचारं स्मृतं सद्ध्यानकोविदैः ॥ ८ ॥ आत्मस्पन्दात्मिका सूक्ष्मा क्रिया यत्रानिवृत्तिका । तत्तृतीयं भवेच्छुक्लं सूक्ष्मक्रियानिवृत्तिकम् ॥ ९ ॥ बादरे काययोगेऽस्मिन् स्थितिं कृत्वा स्वभावतः । सूक्ष्मीकरोति वाक्चित्तयोगयुग्मं सबादरम् ॥ १० ॥ त्यक्त्वा स्थूलं वपुर्योगं सूक्ष्मवाक्चित्तयोः स्थितिम् । कृत्वा नयति सूक्ष्मत्वं काययोगं तु बादरम् ॥ ११ ॥ सुसूक्ष्मकाययोगेऽथ स्थितिं कृत्वा पुनः क्षणम् । निग्रहं कुरुते सद्यः सूक्ष्मवाक्चित्तयोगयोः

॥ १२ ॥ ततः सूक्ष्मवपुर्योगे स्थितिं कृत्वा क्षणं हि सः । सूक्ष्मक्रियं निजात्मानं चिद्रूपं विंदति स्वयम् ॥ १३ ॥ समुच्छिन्ना क्रिया यत्र सूक्ष्मयोगात्मिकापि हि । समुच्छिन्नक्रियं प्रोक्तं तद्द्वारं मुक्तिवेश्मनः ॥ १४ ॥ इति गुणस्थानक्रमारोहे । तत्र च पूर्वपादद्वये ध्याते सति अग्रेतनपादद्वयमप्राप्तस्यैव केवलज्ञानमुत्पद्यते तृतीयपादध्यानं तु शैलेशीकरणारंभ एव भवति नार्वाक् । न च कवलाहारमनभ्युपगच्छद्भिरपि तृतीयपादध्यानं तदानीं सुसाधं बादरकाययोगविरोधित्वात्तस्येति ध्यानविघ्न लक्षणकार्यविरोधनिराकरणम् । अथ शरीरवृद्धिलक्षणकार्यविरोधं निराकरोति-पुद्गलेति । तत्र शरीरवृद्धिः सार्वज्ञ्येन विरुध्यत इत्यत्र किं प्रमाणम् औदारिकशरीरमात्रनिष्ठत्वादित्यनुमानमिति चेत्तर्हि "मम माता च वन्ध्या चेति" न्यायः संपन्नः । यतः किं नामौदारिकशरीरमात्रनिष्ठत्वमौदारिकशरीरत्वावच्छिन्ननिष्ठत्वं तद्वृत्तिमत्त्वे सति तदितरावृत्तित्वं वा । नाद्यः पक्षः सुन्दरो यत एतेन सार्वज्ञ्याविरुद्धत्वमेव साध्यते न तु तद्विपरीतत्वम् । यत्खल्वौदारिकशरीरत्वावच्छिन्ननिष्ठं तत्केवलिशरीरनिष्ठमपि कथं न भवतीति हेतोर्विरुद्धत्वात् । न द्वितीयस्तस्याप्येतदर्थपर्यवसायित्वात् । न हि गोवृत्तित्वे सति गवितरावृत्ति गोत्वं गोत्वावच्छिन्ननिष्ठं न भवतीति वक्तुं पार्यते । अथ परमौदारिकभिन्नौदारिकशरीरमात्रनिष्ठत्वं विवक्षितमिति चेन्न तत्रापि भिन्नत्वं यदि सामान्यतोऽन्योऽन्याभावप्रतियोगित्वं तर्हि स्वरूपासिद्धिः । अवस्थाभेदप्रयोज्यभेदप्रतियोगित्वं चेत्तथापि गत्यादिभिर्दशननखादिभिश्च व्यभिचारः । अथौदारिकशरीरवृद्धिः सार्वज्ञ्यविरुद्धा आहारसंज्ञासमानाधिकरणत्वादिति चेदौदारिकशरीरेणैव व्यभिचारः । कवलाहारजन्यत्वादित्यपि न साधकम् एकेन्द्रियादिशरीराणां कवलाहारजन्यवृद्ध्यदर्शनेन भागासिद्धेः दृष्टान्तीकृतानां निद्रादीनां तज्जन्यत्वासिद्धेर्विपरीतबाधकतर्काभावेनाप्रयो-

जकत्वाच्च । विपर्यये त्विदं प्रमाणम्–औदारिकशरीरवृद्धिःसार्वज्ञ्यसमानाधिकरणा औदारिकशरीरविपाकिधर्मत्वात् । न च परमौदारिकत्वमुपाधिः सार्वज्ञ्यसमानाधिकरणे गतिस्थितिनिषद्यादौ तदभावात् ।सार्वज्ञ्यं चात्र तथाविधसयोगिकेवलित्वावच्छिन्नं विवक्षितमतो न कश्चिद्दोषः । किं च नववर्षादारभ्य पूर्वकोटिपर्यन्तं यदि केवलिनां शरीरं न वर्धेत तर्हि ते सर्वदा शैशवावस्था एव भवेयुरिति व्यवहारादपि किं न बिभेति भवान् । ननु केयं रीतिर्यदलौकिकविचारे वृथैव लौकिकव्यवहारबाधः कल्प्यत इति चेद्भ्रांतोऽसि "पुद्गलैरेव पुद्गलोपचय" इति वचनात्तथाविधकवलाहारपुद्गलैरेव केवलिनां शरीरवृद्धिः संभवतीति सकलसैद्धान्तिकसंमतत्वादेतद्विचारस्य । यदप्यौदारिकलक्षणकार्यविरोधः प्रोद्भावितस्तदप्यविचारितकूपपतनकल्पं यतो यदि परमौदारिकं भवदप्यौदारिकशरीरं सार्वज्ञ्येन विरोधमधिरोहेत्तर्हि बालकौमाराद्यवस्थाऽऽस्थं तवापि शरीरं तावकज्ञानेन सार्धं विरुध्येतेत्यहोवैदग्ध्यविलसितमायुष्मतः । तस्मादौदारिकशरीरं न सार्वज्ञ्यविरुद्धम् परमौदारिकानन्यत्वात्तथाविधौदारिकनामकर्मजन्यत्वप्रतियोगिकान्योऽन्याभावानाधारत्वादित्यर्थः । न चैतदसिद्धम् अन्यथा कायसप्तकत्वापत्तिप्रमुखानेकदूषणप्रसंगादिति श्लोकद्वयार्थः ॥ ८–९ ॥ अथ कवलाहाराभावसाधनतया कल्पितं तदभिमतं परमौदारिकत्वं निराकरोति–

**परमौदारिकांगानां सप्तधातुविवर्जितः । भुक्तिं नापेक्षते कायस्तदसंभवबाधितः ॥ १० ॥**

टीका–परमौदारिकशरीरवतां सयोगिकेवलिनां सप्तधातुरहितः कायो भुक्तिं कवलाहारं नापेक्षते । कवलाहारेण हि धातूपचयः कार्यः स तु केवलिशरीरस्य धातुरहितत्वादेवासिद्धः । ततश्च कथं तेषां कवलाहाराभ्युपगमः प्रामाणिकः ।

न खलु गगनारविन्दस्य प्रसिद्धपुंडरीकातिशायि सौरभ्यमनुमिमीषंति विचारचतुरा इति परेषामाशयस्तन्निरस्यति—तदिति। तत्पूर्वोक्तं पूर्वपक्षवचनं केवलिनां शरीरस्य सप्तधातुरहितत्वासिद्धेरेवाप्रामाणिकमिति समासार्थः । व्यासार्थस्त्वयम्—औदारिकशरीरं १ औदारिकोपांगं २ अस्थिरनामा ३ शुभनाम ४ शुभविहायोगत्य ५ शुभविहायोगती ६ प्रत्येक ७ स्थिर ८ शुभनामानि ९ समचतुरस्रसंस्थानं १० न्यग्रोधसंस्थानं ११ सादिसंस्थानं १२ वामनसंस्थानं १३ कुब्जसंस्थानं १४ हुंडसंस्थानं १५ अगुरुलघुनाम १६ उच्छ्वासनाम १७ उपघातनाम १८ वर्ण १९ गंध २० रस २१ स्पर्श २२ नामानि २३ निर्माणनाम २४ तैजस २५ कार्मण २६ प्रथमसंहननं २७ दुःस्वरनाम २८ सुस्वरनाम २९ सुभगनाम ३० यशोनाम ३१ आदेयनाम ३२ त्रस ३३ बादर ३४ पर्याप्तनामानि ३५ पंचेन्द्रियजातिः ३६ मनुजगतिः ३७ जिननाम ३८ सातावेदनीयं ३९ असातावेदनीयं ४० मनुजायुः ४१ उच्चैर्गोत्र ४२ मित्येता द्विचत्वारिंशत्प्रकृतयः केवलिनामुदयमाश्रित्य प्राप्यन्ते । तत्र ऋषभपट्टकीलिकामर्कटबंधकृतोऽस्थ्नां दृढरचनाविशेषो वज्रर्षभनाराचसंहननं तत्सद्भावे च केवलिनां शरीरं कथं धातुवर्जितमिति वक्तुं पार्यते । अथ मतं तदभावेऽपि केवलिनां तज्जनकप्रकृतेरेवोदयः प्रतिपादित इति तदप्यज्ञानविलसितं तस्यास्तद्विपाकवेद्यत्वात् । अन्यथौदारिकशरीरमपि किं नापह्नोति भवान् तत्रापि पूर्वोक्तयुक्तेरवतारात् । किं च केषांचिन्मते सप्त धातवः अपरेषां च मते दश धातव इति । तथा चाहुः श्रीहेमसूरयः स्वोपज्ञयोगशास्त्रे—रसासृङ्मांसमेदोऽस्थिमज्जाशुक्राणि धातवः । सप्तैव दश चैकेषां रोमत्वक्स्नायुभिः सह ॥ १ ॥ इति । तत्र चान्यतरनिषेधे विनिगमकाभावादुभयप्रामाण्यस्वीकारे त्वक्स्नायूनामप्यभाव आपद्यत इत्यौदारिकशरीरस्यापि दत्तो जलाञ्जलिः । किं च भगवतां रुधिरामिष

गोक्षीरधाराधवले इत्ययमतिशयः केवलज्ञानोत्पत्त्यनंतरं भवति न वा । आद्ये केवलिनां शरीरं निर्धातुकमिति पक्षः काकनाशं पलायित इत्यात्मीय एव बाणो भवन्तं प्रहरति । द्वितीये तु चतुस्त्रिंशदतिशयवत्त्वानुपपत्तिः । किं च यया रसीभूतमाहारं रसासृङ्मांसमेदोऽस्थिमज्जाशुक्रलक्षणसप्तधातुरूपतया परिणमयति सा शरीरपर्याप्तिः सा तु तेषामपि विद्यत एवेति सिद्धं तेषां शरीरस्य धातूपष्टब्धत्वम् । न च देवानामपि शरीरस्य तथात्वापत्तिः, शरीरपर्याप्तिवैचित्र्यात् । किं च छाद्मस्थ्येऽपि तेषां शरीरं निर्धातुकं धातूपष्टब्धं वा । आद्योऽनभ्युपगमदुःस्थः । द्वितीयेऽपि किं घातिकर्मणामपगमात्तेषामपगमः कारणान्तराद्वा । नाद्य उच्छ्वासगत्यादीनामप्युच्छेदापत्तेः । न च गत्युच्छेदोऽस्माकं मत एवेति वाच्यम् । शुभविहायोगत्यशुभविहायोगत्योरुदयसमर्थने वैयर्थ्यापातात्, दुर्गतिकूपपाताच्च तवैव शुभगत्युच्छेदः । न द्वितीयस्तदनिर्वचनात् । कश्चित्तु-"समत्तंतिमसंघयण तिअगछेओ बिसत्तरि अपुव्वे" इति वचनादन्तिमसंहननत्रिकप्रायोग्यानामस्थ्यादीनामष्टमगुणस्थानेऽपगमः । तथा-"रिसहनाराय दुग अंतो" इति वचनाद्द्वादशमगुणस्थाने वज्रर्षभनाराचवर्जशेषसंहननद्वयप्रायोग्यानामस्थ्यादीनामपगम इति पंचसंहननप्रायोग्यानामस्थ्यादीनामपगमात् केवलिशरीरस्य परमौदारिकत्वं मन्यते, स तावन्मूर्खचक्रचक्रवर्ती, यतो यद्येकस्यैव शरीरे षट् संहननानि भवेयुस्तर्हि तस्य वाचाटस्य वचनमवकाशं लभेत । यच्चु अष्टमगुणस्थाने त्रयाणां संहनननानामनुदय उक्तः, द्वादशे च गुणस्थाने संहननद्वयस्य । तेन तु प्रथमसंहननत्रयेणैवोपशमश्रेणिरारुह्यते । क्षपकश्रेणिस्तु प्रथमसंहननेनैवेति सूचयाञ्चक्रुराचार्याः । तथा चोक्तम्-"पूर्वज्ञः शुद्धिमान् युक्तो ह्याद्यैः संहननैस्त्रिभिः । संध्यायन्नाद्यशुक्लांशं स्वां श्रेणीं शमकः श्रयेत् ॥ १ ॥" तथा-"तत्राष्टमे गुणस्थाने शुक्लसद्ध्यानमादि-

मम् । ध्यातुं प्रक्रमते साधुराद्यसंहननान्वितः ॥ १ ॥" क्षपकसाधुस्तत्राष्टमे गुणस्थाने शुक्लनामकं प्रधानध्यानमादिमं प्रथमं पृथक्त्ववितर्कसप्रवीचारलक्षणं वक्ष्यमाणं ध्यातुं प्रक्रमते कथंभूतः साधुराद्यसंहननान्वितो वज्रर्षभनाराचनामकप्रथम-संहननयुक्त इति गुणस्थानक्रमारोहे । तस्मादाध्यात्मिकाभिमते परमौदारिकत्वे निरस्ते केवलिनां शरीरं कवलाहारमपेक्ष्यैव स्थातुं शक्नोति नान्यथा, प्रमाणं चात्र भगवद्देहस्थितिः कवलाहारपूर्विका, भगवद्देहस्थितित्वात्, छद्मस्थावच्छिन्नभगवद्देह-स्थितिवदिति । न च छद्मस्थावस्थाकृतकवलाहारेण सिद्धसाधनं छद्मस्थसंयतत्वावच्छिन्नदेहस्थितेरपि गृहस्थावस्थाकृतकवला-हारेणैव कवलाहारपूर्वकत्वप्रसंगात् । न च घातिकर्मसहकृतत्वमुपाधिः, देवानां देहस्थितेर्घातिकर्मसहकृतत्वेऽपि कवलाहा-रपूर्वकत्वाभावेन साध्यसमव्याप्तत्वाभावात् । एतेन भगवतो देहस्थितिराहारपूर्विका देहस्थितित्वात् अस्मदादिदेहस्थितिव-दित्यनेनाहारमात्रपूर्वकत्वसाधने कर्मनोकर्माहाराभ्युपगमात् सिद्धसाधनं कवलाहारपूर्वकत्वसाधने च देवदेहस्थित्यादिना व्यभिचारः । अथ मनुष्यदेहस्थितित्वादस्मदादिवत् सा तत्पूर्विकेष्यते तर्हि तद्वदेव सर्वदा निःस्वेदत्वाद्यभावः स्यात् । अस्मदा-दावनुपलब्धस्यापि तदतिशयस्य तत्र संभवे भुक्त्यभावलक्षणोऽप्यतिशयः किं न स्यादित्यादिग्रंथमखिलमप्युपासकाध्यय-नटीकाकृद्दिगंबराभिमतः पराकृतः विपरीतबाधकतर्कसहकृतेन प्रकृतानुमानेनैव साध्यसिद्धौ प्रतिबंदीग्रहणस्याकिंचित्करत्वा-त्।तथा यथा तीर्थकृतां निःस्वेदत्वातिशयः सार्वदिक एवं भुक्त्यभावातिशयस्यापि सार्वदिकत्वापत्तेर्यूकापरिभवभयात् परि-धानं मुञ्चत इव नग्नाटस्य त्रपापि किं न बाधत इति निर्दूषणानुमानसिद्धिः केवलिनां कवलाहारः प्रामाणिक एवेति ॥ १०॥

अथ कवलाहारप्रतिबंधकप्रतिबंदीं निरस्यति—

अप्रमत्तगुणस्थानां न ज्जुक्तिश्चेत् कुतः परः । बंदीव प्रतिबंदीयं सिद्धान्तवचनस्य न ॥ ११ ॥

टीका—आध्यात्मिकाः किलेत्थमालपंति यत्सप्तमगुणस्थानवर्तिन्तिः कवलाहारो न क्रियत इति तावत् सकलश्वेतांबरप्रवादः तदिदमस्माकमपि चेतस्सु न्याय्यमिति जाति। यतो निरालंबनधर्मध्यानध्यातुर्यद्यस्य व्यवहाररूपषमावश्यकादिक्रियापि नोपयुक्ता। तथा च गुणस्थानक्रमारोहे श्रीरत्नशेखरसूरयः–"इत्येतस्मिन् गुणस्थाने नो संत्यावश्यकानि षट् । सततध्यानसंद्योगाछुद्धिः स्वाजाविकी यतः॥१॥"इति। ततश्च धर्मध्यानापायजूते प्रमादहेतुनि कवलाहारादावपि प्रवृत्तिर्न युक्तैवेति उत्तरगुणस्थानेष्वपि सा कथंकारं संगछत इति पूर्वार्धेन प्रतिपादयति-अप्रेति ।अप्रमत्तगुणस्थानां "पदैकदेशे पदसमुदायोपचारा"द्गुणेति पदं गुणस्थानपरं सप्तमगुणस्थानवर्तिनीत्यर्थः । चेद्यदि ज्जुक्तिः कवलाहारो"नोक्त"इति शेषस्तर्हि पुरोऽग्रिमगुणस्थानेषु कुतो न कथमपि विशेषकारणानिर्वचनादित्यर्थः । अथैतस्य विचारक्षमतां निराकुर्वन्नाह–बंदीति । इयं तव प्रतिबंदी नोऽस्माकं सिद्धान्तवचनस्य बंदीव दृश्यते । अस्मत्सिद्धांतस्याग्रेऽकिंचित्करमेतदिति समासार्थः । व्यासार्थस्त्वयम्–केवलिनो ज्जुक्तिः समग्रसामग्रीत्वात् पूर्वज्जुक्तिवदिदमनुमानं सप्तमगुणस्थानवर्तिनानेकांतिकं जवति हि तत्रापि पर्याप्तत्वं वेदनीयोदय आहारपक्तिनिमित्तं तैजसशरीरं दीर्घायुष्कत्वं चेति श्वेतांबरपरिकल्पिता समग्रसामग्री ज्जुक्तिश्च न जवतीति तैरपि प्रतिपन्नम्। एवं च तुल्येऽपि सामग्रीसद्भावे सप्तमगुणस्थाने कवलाहारो नान्युपगम्यते त्रयोदशगुणस्थाने चान्युपगम्यत इति तत्र कया प्रकृत्या पुनरावृत्तम् । अथ यदि स्तोककालत्वात्तत्र कवलाहाराजावेऽपि न काचिदनुपपत्तिः त्रयोदशगुणस्थाने तु

किंचिदूनपूर्वकोटिपर्यंतं कथं तदभावे स्थातुं शक्यत इति विवक्षंति विवक्षाविचक्षणाः तदपि न नश्चेतसि समायाति । यतो यदि समग्रसामग्रीसद्भावेऽपि सप्तमगुणस्थाने स्तोककालत्वविवक्षया कवलाहाराभावः कल्प्यते तर्हि समानकक्षत्वात् षष्ठेऽपि गुणस्थाने तदभाव आपतितः । न च तत्र प्रमत्तत्वादाहारः सुसाधः घट्टकुटीन्यायेनास्मत्सिद्धान्तस्यैव श्रयणीयत्वापत्तेरिति पूर्वपक्षः । एवं प्राप्तेऽभिधीयते । यत्तावत्केवलिनां कवलाहारसाधकस्यानुमानस्यानैकांतिकत्वमुद्भावितं तन्मन्दं प्रधानध्यानविरहसहकृतत्वस्य हेतोर्विशेषणात् । न चाहारसंज्ञारूपकारणाभावादेव सप्तमगुणस्थाने कवलाहाराभाव इति सयोगिकेवलिगुणस्थानेऽपि तदभावोऽभ्युपगम्यतामन्यथाहारसंज्ञापि प्रतिपद्यतामिति वाच्यम् । एतस्य मनोरथमात्रत्वात् तथाहि--आहारसंज्ञा किमाहारमात्रं प्रति कारणं कवलाहारमात्रं प्रति वा । नाद्यः केवलिनां लोमाहारस्याप्यभावापत्तेः । द्वितीयेऽपि कवलाहारमात्रं प्रति आहारसंज्ञायाः कारणता किमन्वयव्यतिरेकगम्या विधिगम्या वा । नाद्यः यत्राहारसंज्ञा तत्र कवलाहार इत्यन्वयव्याप्त्यसिद्धेः । "दस सन्ना सव्वजीवाणं" तिवचनादेकेन्द्रियादिष्वाहारसंज्ञायाः सत्वेऽपि कवलाहाराभावात् । नापि द्वितीयः तथाविधविधेरभावात् तस्मादाहारसंज्ञाया आहाराभिलाषमात्रं प्रत्येव कारणत्वम् । न चाभिलाषः खलु प्रार्थना सा च यदीदमहं प्राप्नोमि तदा भव्यमित्याद्यक्षरानुविद्धा । तथा चैकेन्द्रियादिषु अक्षरज्ञानाभावेन व्याप्त्यसिद्धिः । तेषामप्यव्यक्ताक्षरलाभस्यानुज्ञातत्वात् । तथा चागमः--"सव्वजीवाणंपियणं अक्खरस्स अणंतमो भागो निच्चुग्घाडिओ चिट्ठइ सो वि अ जइ आवरेज्जा तेणं जीवो अजीवत्तणं पावेज्जा" इति नंदीसूत्रे ।

१ संज्ञायतेऽभिलष्यत आहारादिकमनया सा संज्ञा.

तथा "अवत्तमक्खरं पुण पंचएहवि थीणगिद्धिसहिएण । नाणावरणुदएणं बेंदियमाई कमविसोही ॥ १ ॥ व्याख्या–पंचानामपि पृथ्व्यादीनां स्त्यानर्द्धिसहितेन ज्ञानावरणोदयेनाव्यक्तं सुप्तमत्तमूर्छितादेरिवास्फुटं ज्ञानं वर्तते न सर्वथावृतम् । तत्रापि पृथ्वीकायिकानामत्यस्फुटं ततोऽप्यप्कायिकतेजस्कायिकवायुकायिकवनस्पतिकायिकानां यथोत्तरं क्रमेण विशुद्धतरम् इदं चूर्णिकारवचनाल्लिखितमित्यादि कल्पवृत्तौ पीठिकायाम् । तस्मादाहारसंज्ञायाः कवलाहारं प्रति न कारणत्वमिति । नन्वाहारसंज्ञाया अभावे कवलाहारवत् केवलिनां मैथुनसंज्ञाभावेऽपि कमनीयकामिनीसेवादिकमपि प्रसज्येतेति चेन्न, तत्कारणस्य मोहनीयकर्मणो निर्मूलकाषंकषणात्, आहारकारणस्य तु वेदनीयोदयस्य प्रतिषेद्धुमशक्यत्वात् । न चाप्रमत्तस्य भगवतः कवलाहारः प्रमादहेतुत्वादेव न कर्तुमुचितः शरीरसद्भावेऽपि प्रमादप्रसंगात् यत्पालनार्थं खलु प्रमादहेतुः कवलाहारो ग्राह्यस्तत्तु सुतरां प्रमादकारणमित्याम्रेडितमेतत् । तस्मादियमाध्यात्मिकपरिकल्पिता प्रतिबंदी अकिंचित्करैवेति ॥ ११ ॥ अथ कवलाहाराभावसाधकमनुमानमुपन्यस्य दूषयति–

**व्यभिचाराकुलं शुक्ललेश्यावत्त्वं प्रमत्तकैः । तद्विशिष्टमलेश्यत्वमसिद्धं चाप्रयोजकम् ॥ १२ ॥**

टीका–केवलिनो न कवलाहारिणः शुक्ललेश्यावत्त्वादिदमाध्यात्मिकपरिकल्पितमनुमानं प्रमत्तैः प्रमत्तकैः प्रमत्तगुणस्थानवर्तिभिः "स्वार्थे कप्रत्ययः' व्यभिचाराकुलमनैकांतिकं यतस्तेषामपि "पन्नरस पमत्तंमी" तिवचनान्मिथ्यात्वाज्ञानासंयमदेवनारकतिर्यग्गतिरूपषड्भावापगमे लेश्याषट्कवेदत्रिककषायचतुष्कासिद्धत्वमनुजगतिलक्षणानां पंचदशौदयिक-

भावानां सद्भावे च शुक्ललेश्यावत्त्वं संप्रतिपन्नं कवलाहारित्वं चापीति । तदेतदेवानुमानं विशिष्टं लेश्यांतरासहचरितत्वेनेति शेषः असिद्धमित्यर्थः । यतो येषां मते योगपरिणामो लेश्या तन्मते विधिकोटिः येषां च मते कषायनिष्पंदो लेश्या तन्मते निषेधकोटिरिति । अलेश्यत्वं च केवलिनो न कवलाहारिणः अलेश्यत्वादित्यनुमानं त्वप्रयोजकं लोमाहारभावस्यापि साधकत्वादिति । संदिग्धासिद्धत्वं च दूषणं पक्षद्वयेऽप्यवतरतीति बोध्यमित्यवयवार्थः । व्यासार्थस्त्वयम्--औदयिकभावस्य तावदेकविंशतिर्भेदाः "अन्नाणमसिद्धत्ता संजम लेसा कसाय गइ वेया । मिच्छं तुरिएत्ति" वचनात्तत्र त्रयोदशगुणस्थाने मनुजगतिशुक्ललेश्यासिद्धत्वरूपास्त्रयो भावाः प्राप्यंते । तथा च देवेन्द्रसूरयः--"चउगयाइ इगवीस मिच्छि साणे य हुंति बीसं च । मिच्छेण विणा मीसे इगुणिसमन्नाणविरहेण ॥ १ ॥ एसेव अविरयंमि, सुरनारगगइ विउंगउं देसे । सत्तरस हुंति ते च्चिय तिरिगइए संजमाभावा ॥ २ ॥ पन्नरस पमत्तंमि अपमत्ते आइलेसतिगविरहे । ते च्चिअ बारससुकेगलेसउं दस अपुव्वंमि ॥ ३ ॥ एवं अनियट्टिंमि वि सुहुमे संजलण लोभमणू अंति अंतिमलेसअसिद्धत्तभावउं जाण चउ भावा ॥ ४ ॥ संजलणलोभविरहा उवसंतरकीणकेवलीण तिगं । लेसाभावा जाणसु अजोगिणो भावदुगमेवेति" ॥ ५ ॥ षडशीतिके । तथा शुक्ललेश्यासद्भावेऽपि कवलाहारः कथं संगच्छते । यतो निरालंबनधर्मध्यानसद्भावेऽपि नायमिष्यत इति । अत्र सिद्धान्तयामः--ध्यानं तावत् परमैकाग्रतारूपं विरुध्यतां नाम कवलाहारेण । लेश्या तु योगपरिणतिरूपा कवलाहारेण कथं विरुध्यते प्रत्युताविरुद्धैव । अन्यथा प्रमत्तगुणस्थानवर्तिनोऽप्याहारो न स्यात् लेश्यान्तरासहचरितायास्तस्यास्तद्विरोधित्वे सप्तमगुणस्थानेऽप्याहारः स्यात् । कथं पुनर्योगपरिणामो लेश्या यस्मात्सयोगिकेवलिशुक्ललेश्यापरिणामेन

---

१ एतेन साध्यासत्वं दर्शितम् ।

विहृत्यान्तर्मुहूर्तशेषे योगनिरोधं करोति ततोऽयोगित्वमलेश्यत्वं च प्राप्नोति, अतोऽवगम्यते योगपरिणामो लेश्येति । स पुनर्योगः शरीरनामकर्मपरिणतिविशेषः । यस्मादुक्तम्—"कर्म हि कार्मणस्य कार्यमन्येषां च शरीराणां कारणमिति" । तस्मादौदारिकादिशरीरयुक्तस्यात्मनो वीर्यपरिणतिविशेषः काययोगः तथौदारिकवैक्रियाहारकशरीरव्यापाराहृतवाग्द्रव्यसमूहसाचिव्याज्जीवव्यापारो यः स वाग्योगः तथैवौदारिकादिशरीरव्यापाराहृतमनोद्रव्यसमूहसाचिव्याज्जीवव्यापारो यः स मनोयोग इति । ततो यथैव कायादिकरणयुक्तस्यात्मनो वीर्यपरिणतिर्योग उच्यते तथैव लेश्यापीति प्रज्ञापनावृत्तिकृतः। एतन्मतमाश्रित्यैव च देवेन्द्रसूरिभिरौदयिकभावत्रयं त्रयोदशगुणस्थान उपन्यस्तम् । अन्ये तु कर्मनिष्पंदो लेश्याः कर्मस्थितिहेतुत्वात् । यथोक्तम्—"ताः कृष्णनीलकापोततैजसीपद्मशुक्लनामानः श्लेष इव वर्णबंधस्य कर्मबंधस्थितिविधात्र्य इति" । योगपरिणामत्वे तु लेश्यानां "जोगा पयडिपएसं ठिति अणुभागं कसायतो कुणतित्ति" वचनात् प्रकृतिप्रदेशबंधहेतुत्वमेव स्यात् न तु कर्मस्थितिबंधहेतुत्वम् कर्मनिष्पंदरूपत्वे तु यावत्कषायोदयस्तावन्निष्पंदस्यापि सद्भावात् कर्मस्थितिहेतुत्वमपि युज्यत एव। अत एवोपशांतक्षीणमोहयोः कर्मबंधसद्भावेऽपि न स्थितिसंभवः।यदुक्तम्--"तं पढमसमए बद्धं बीयसमये वेइयं तइअसमए निज्जिणंति"आह यदि कर्मनिष्पंदो लेश्यास्तदा समुच्छिन्नक्रियशुक्लध्यानं ध्यायतः कर्मचतुष्टयसद्भावेन निष्पंदसंभवेन कथं न लेश्यासद्भावः। उच्यते—नायं नियमो यदुत निष्पंदवतो निष्पंदेन सदा भाव्यम्। कदाचिन्निष्पंदवत्स्वपि वस्तुषु तथाविधावस्थायां तदभावदर्शनात्तन्मते च केवलिनां द्रव्यलेश्या चिंतैव । अपरे त्वाहुः—कार्मणशरीरवत्पृथगेव कर्माष्टकात् कर्मवर्गणानिष्पन्नानि कर्मलेश्याद्रव्याणीत्याध्यात्मिकैः कवलाहाराभावसाधनार्थमुपन्यस्तान्यनुमानानि संदिग्धासिद्धानि विपरीतबाध-

कतर्काभावाच्चाप्रयोजकानि । यदि च प्रतिबंधकाभावसहकृतसकलकारणसमवधानेऽपि भावरूपशुक्ललेश्यावत्त्वेन कवलाहाराभावः साध्यः तर्हि संयतत्वेन हेतुना प्रमत्तगुणस्थानवर्तिनामपि तदभावः साध्यतां सलोमा मंडूकश्चतुष्पात्त्वे सत्युत्प्लुत्य गमनात् मृगवत् । अलोमा वा हरिणः चतुष्पात्त्वे सत्युत्प्लुत्य गमनात् मंडूकवदित्यादिहेतूनां च प्रामाण्यमभ्युपगम्यतामिति बलवत्प्रमाणपरिच्छिन्नः केवलिनां कवलाहारः सुव्यवस्थित इति ॥ १२ ॥ अथ कवलाहारसाधकप्रमाणं प्रमाणांतरेण संवादयति--

**क्षुदादयः केवलिनामेकादश परीषहाः । वेदनीयोदयोद्भूताः कवलाहारसाक्षिणः ॥ १३ ॥**

टीका--अक्षरार्थः स्पष्ट एव । भावार्थस्त्वयम्--सयोगिकेवलिगुणस्थानवर्तिनां क्षुत्पिपासाशीतोष्णदंशचर्यावधमलशय्यारोगतृणस्पर्शलक्षणा एकादश परीषहा भवंति । यदागमः--"एगविहबंधगस्स णं भंते सजोगिभवत्थकेवलिस्स कइ परीसहा पणत्ता । गोयमा एक्कारस परीसहा पणत्ता नव पुण वेदंतित्ति" । तथा "वेयणिज्जेणं भंते कम्मे कइ परीसहा समोअरंति । गोयमा एक्कारस परीसहा समोअरंति पंचेव आणुपुव्वी चरिया सिज्जा तहे व रोगे य । तणफास जल्लमेव य एक्कारसवेयणिज्जमिति" भगवत्याम् । तथा--"बावीसं बादरसंपराय चउदसय सुहुमरायंमि । छउमत्थवीयरागे चउदस एक्कारस जिणंमि ॥ १ ॥ "अस्या अर्थः द्वाविंशतिरपिशब्दस्य लुप्तनिर्दिष्टत्वात् द्वाविंशतिरपि परीषहा बादरसंपरायनाम्नि गुणस्थानके । कोऽर्थः निवृत्तिबादरसंपरायं नवमगुणस्थानं यावत्सर्वेऽपि परीषहाः संभवंतीति । तथा चतुर्दश च शब्दस्यैव-

कारार्थत्वाच्चतुर्दशसंख्या एव च क्षुत् १ पिपासा २ शीत ३ उष्ण ४ दंशमशक ५ चर्या ६ शय्या ७ वध ८ अलाभ ९ रोग १० तृणस्पर्श ११ मल १२ प्रज्ञा १३ अज्ञान १४ रूपाः परीषहाः सूक्ष्मरागे सूक्ष्मसंपरायनाम्नि दशमगुणस्थानक उदयमासादयन्ति मोहनीयस्य क्षपितत्वेनोपशमितत्वेन वा सप्तानां चारित्रमोहनीयप्रकृतिप्रतिबद्धानां दर्शनमोहनीयप्रकृतिप्रतिबद्धस्य चैकस्यासंभवादिति भावः । तथा छद्म आवरणं तत्र स्थितः छद्मस्थो वीतोऽपगतो रागो यस्य समस्तमोहोपशमात्सकलमोहक्षयाच्च स तथा ततः कर्मधारये छद्मस्थवीतरागशब्देनोपशांतमोहक्षीणमोहलक्षणं गुणस्थानकद्वयं परिगृह्यते । तत्राप्युक्तरूपा एव चतुर्दश परीषहाः संभवंति । तथा जिने सयोगिकेवल्ययोगिकेवलिलक्षणे त्रयोदशचतुर्दशगुणस्थानकद्वये परीषहकारणभूतस्य वेदनीयस्यैव सद्भावात्तत्प्रतिबद्धा एवैकादश परीषहाः संभवंति । उक्तं च--“क्षुत् पिपासा च शीतोष्णे दंशाश्चर्या वधो मलाः । शय्यारोगतृणस्पर्शा जिने वेद्यस्य संभवात् ॥ १ ॥” इति प्रवचनसारोद्धारसूत्रवृत्तौ ११९ पत्रे । तत्र क्षुत्परीषहविजयः किं क्षुद्वेदनामुदितामागमविहितेन भक्तेन समयतोऽनेषणीयं परिहरतश्च भवति उत सर्वथाहारपरिहारेणैव भवति । आद्ये केवलिनां कवलाहारसिद्धिः । द्वितीये तु षष्ठगुणस्थानवर्तिनामप्याहाराभाव आपद्यते । ननु भवन्त एव भणंतु प्रथमपक्षांगीकारे किं चतुर्दशेऽपि गुणस्थाने कवलाहारो नापद्यत इति चेन्न लाघवेन ध्यानविरहसहकृत एव गुणस्थाने एतन्नियमस्य बोध्यत्वात् । अन्यथा किंचिदूनपूर्वकोटिपर्यंतं केवलिनां शरीरं कथमवतिष्ठते ? न च परमौदारिकशरीराभ्युपगमे नायं दोष इति वाच्यम् तत्राप्यौदारिकत्वानपगमाद्भवदभिमतस्य निरस्तत्वाच्च । न च भगवतः क्षुद्वेदनीयोदयो मन्दतम एवेति ने कवलाहारचिकित्सामपेक्षते तादृशस्य तस्य परीषहशब्द-

व्यपदेश्यतानर्हत्वात् परीषहशब्दव्यपदेशस्य तु तस्य कवलाहारचिकित्सामंतरेण शरीरबलापचायकत्वस्य सुप्रसिद्धत्वात् । न च भगवतामनन्तवीर्यत्वेनेदं दूषणमसंभवीति वाच्यम् बलं शारीरं स्थाम वीर्यं चान्तरः शक्तिविशेष इति तयोर्भिन्नत्वात् । तस्माज्जिनानां क्षुत्परीषहविजयोऽपि कवलाहारं सिद्धांतयत्येवेति ॥ १३ ॥ अथैतस्यार्याद्वयेन दिगंबरकल्पितविकल्पद्वयनिराकरणेनाप्रयोजकत्वशंकां निरस्यति-

**किं रागहान्यतिशयो यथा तथा नैषु भुक्त्यभावस्य । आहारकथामात्रात् कथं च साधोः प्रमत्तत्वम् ॥ १४ ॥**
**वेद्योदयेऽपि तौल्याद्भुक्तिकथायाश्च मोहजनकत्वात् । प्रतिषेद्धव्य इति लपन्नुपासकाध्ययनटीकाकृत् ॥ १५ ॥**

॥ युग्मम् ॥

टीका-एषु केवलिषु यथा रागहान्यतिशयो रागाभावस्य परमप्रकर्ष आख्यायते तथा भुक्त्यभावस्य कवलाहाराभावस्यातिशय इति शेषः किं नाख्यायते । यदि केवलिनि रागाभावातिशयोऽभ्युपगम्यते तर्हि भुक्त्यभावातिशयोऽप्यभ्युपगम्यतां समानकक्षत्वादित्यर्थः । चः पुनरर्थे । साधोरप्रमत्तस्येति समभिव्याहारगम्यम् । आहारकथामात्रात् प्रमत्तत्वं कथं भवतीत्यवयवार्थः । भावार्थस्त्वयम्--यथा कश्चित् पुरुषस्तीव्ररागस्तदपेक्षया कश्चिन्मन्दरागः कश्चित्पुनर्मन्दतमराग इति विपक्षभावनावशाद्रागादीनां हान्यतिशयदर्शनात् परमप्रकर्षः केवलिनि प्रसिद्धस्तथा भोजनाभावपरमप्रकर्षोऽपि तत्र किं न स्यात् तद्भावनातो भोजनादावपि हान्यतिशयदर्शनाविशेषात् । तथा हि-एकस्मिन् दिने योऽनेकवारं भुंक्ते विपक्ष-

भावनावशात् स एव पुनरेकवारं भुंक्ते कश्चित्पुनरेकदिनाद्यन्तरितभोजनः अन्यः पुनः पक्षमाससंवत्सराद्यंतरितभोजन इति । तथा अप्रमत्तो हि साधुराहारकथामात्रेणापि प्रमत्तो भवति, भुंजाना अपि केवलिनो न तथेति महच्चित्रम्, यत्कथामात्रमेव प्रत्यवायकारणं तदुपभोगे पुनः किं निगाद्यमिति ॥ १४ ॥ अथैतन्निरस्यति–वेद्येति । इति जल्पन् पूर्वोक्तविकल्पद्वयमविचारपूर्वकमुपन्यस्यन् समंतभद्रोपज्ञस्योपासकाध्ययनस्य टीकाकारः प्रभाचंद्रसंज्ञको दिगंबरः प्रतिषेद्धव्यस्तिरस्करणीयः तत्परिकल्पितस्य विकल्पद्वयस्याकिंचित्करत्वादित्यर्थः । तत्र हेतुद्वयमाह–वेद्येति । आद्यविकल्पस्य केवलिनि भुक्त्यभावपरमप्रकर्षाभ्युपगमे वेदनीयोदयाभावपरमप्रकर्षस्यापि प्रसंगात् । आहारकथायाश्च मोहजनकत्वादेव प्रमादहेतुत्वाभ्युपगमादित्यवयवार्थः । भावार्थस्त्वयम्–यत्तावदुक्तं रागहानिपरमप्रकर्षदर्शनाद्भुक्त्यभावपरमप्रकर्षोऽपि केवलिनां सिध्यतीति तदस्मत्प्रतिबंदीप्रचंडमुद्गरप्रहारजर्जरितं स्पंदितुमपि न शक्नोति । यत एकस्य वेदनीयोदयस्तीव्रतरस्तदपेक्षया कस्यचिन्मन्दोऽपरस्य पुनर्मन्दतम इति विपक्षभावनावशाद्वेदनीयोदयाभावातिशयदर्शनात् केवलिनि तदभावपरमप्रकर्षसिद्धेरप्यापत्तेः । न च वाच्यं वेदनीयोदयस्याष्टादशदोषानन्तर्भावात्तदभावपरमप्रकर्षसाधनमयौक्तिकम् । क्षुत्पिपासयोश्चाष्टादशदोषान्तर्भूतत्वात् रागहानिवत्तदभावपरमप्रकर्षसिद्धौ भुक्त्यभावस्तु संभवत्येव । तथा चानुपदमेव व्याख्यातम् । "क्षुत्पिपासाजरातंकजन्मान्तकभयस्मयाः । न रागद्वेषमोहाश्च यस्याप्तः स प्रकीर्त्यते ॥ १ ॥ अस्यार्थः–क्षुच्च बुभुक्षा, पिपासा च तृष्णा, जरा च वृद्धत्वं, आतंकश्च व्याधिः, जन्म च कर्मवशाच्चतुर्गतिषूत्पत्तिः, अन्तकश्च मृत्युः, भयं चेहपरलोकादात्रगुप्तिमरणवेदनाकस्मिकलक्षणं, स्मयश्च जातिकुलादिदर्पः, रागद्वेषमोहाः प्रसिद्धाः । चशब्दाच्चिन्तारतिनि-

ज्ञाविस्मयविषादखेदस्वेदा गृह्यन्ते । एतेऽष्टादशदोषा यस्य न सन्ति स आप्तः प्रकीर्त्यते प्रतिपाद्यत इति । भगवतां क्षु-त्पिपासयोरपह्नोतुमशक्यत्वान्मोहनीयापगमेन तदभावे कल्पनीये औदारिकशरीरादिकमपि किं नापह्नोतुमीहसे । वस्तुतस्तु अष्टादश दोषा अज्ञानादिकाः । तथा चोक्तम्–"अन्नाणकोहमयमाण, माया लोभ रई अ अरई अ । निद्दासोगअलिअव-यण, चोरियामच्छरभया य ॥ १ ॥ पाणवहपेमकीलापसंगहासाइ जस्स इय दोसा । अट्ठारस्स वि पणट्ठा, नमामि देवाहिदेवं तं ॥ २ ॥" इति तत्र क्षुत्पिपासयोरनन्तर्भावेन केवलिनां तदभावसाधनप्रयासो हरिदंबराणां व्यर्थ एवेति । यच्चोक्तम्–"आ-हारकथामात्रेणापि अप्रमत्तो यतिः पतति केवली तं भुंजानोऽपि न तथेति कथं संगच्छते" तत्रेदमुत्तरम्–आहारकथा ता-वदाहारविषयप्रीतिलक्षणमोहजनिकेति तस्याः प्रमादहेतुत्वं न चैवमाहारस्यापि शरीरादेरिव मोहसहकृतस्यैव तस्य तथा-त्वाभ्युपगमात् । न च बुभुक्षालक्षणमोहमन्तरा कवलाहारो न भवत्येवेति वाच्यम् एतस्य निरस्ततरत्वात् क्षुद् बुभुक्षे-ति तादात्म्यप्रतीतिस्तु शाखाग्रेचंद्रमा इतिवदुपचारमात्रनिबन्धनेति । तस्माद्वचनरचनाचातुरीतरंगिणीप्लाव्यमानो दुर्ग-तिभर्ता उपासकाध्ययनटीकाकर्ता न्यायकुमुदचंद्रवचनशीर्णकुशानवलंबमानः न कथमपि स्वात्मानं रक्षितुं प्रभुरित्यार्या-र्थः ॥ १५ ॥ अथैतस्य युक्तिजालस्य फलं प्रकटयति–

**परंपरापराघातसंजातमतिविप्लवाः । तदेवं प्रतिषेद्धव्या युक्तिभिर्हरिदंबराः ॥ १६ ॥**

टीका–हरिदेवांबरं येषां ते हरिदंबरा नग्नाटाः । अथ च "क्वचिच्छब्दसामान्यं विशेषतात्पर्यसहानां विशेषवाचकत्व-मिति" न्यायाद्धरिदिव सूर्योदयावच्छिन्ना प्राचीवांबराणि येषां ते हरिदंबरा रक्तपटा इत्यर्थः । एतेन परेभ्योऽचेलं चारि-

तथा । गात्रसंकुचने चेष्टं तेन पूर्वं प्रमार्जनम् ॥ २ ॥" तथा च–"सन्ति संपातिमाः सत्वाः सूक्ष्माश्च व्यापिनोऽपरे । तेषां रक्षानिमित्तं च विज्ञेया मुखवस्त्रिका ॥ १ ॥ किं च–भवन्ति जन्तवो यस्मादन्नपानेषु केषुचित् । तस्मात्तेषां परीक्षार्थं पात्रग्रहणमिष्यते ॥ १ ॥ अपरं च–सम्यक्त्वज्ञानशीलानि तपश्चेतीह सिद्धये । तेषामुपग्रहार्थाय स्मृतं चीवरधारणम् ॥ १ ॥ शीतवातातपैर्दंशैर्मशकैश्चापि खेदितः । मा सम्यक्त्वादिषु ध्यानं न सम्यक् संविधास्यति ॥ २ ॥ तथा वस्त्राभावे शीतातपदंशमशकादिपीडाव्याकुलितस्याग्निसेवादिदुर्ध्यानसंभवे संयमविराधना स्यात् । तथा पात्राभावे बालग्लानादीनां वैयावृत्यमपि कुतो भवेत् । यः पुनरतिसहिष्णुतया एतदन्तरेणापि न धर्मबाधकस्तस्य नैतदस्ति । तथा चाह–'य एतान् वर्जयेद्दोषान् धर्मोपकरणादृते । तस्य त्वग्रहणं युक्तं यः स्याज्जिन इव प्रभुः ॥ १ ॥' स च प्रथमसंहनन एव न चेदानीं तदस्तीति कारणाभावात्कार्यस्याप्यभावः तस्माद्यथा संयमोपग्रहार्थं भैक्षादिकं गृह्यते एवं वस्त्रादिधारणमप्युचितमेवे" त्यादियुक्त्या प्रज्ञाप्यमानोऽप्यसौ तथाविधकषायमोहनीयकर्मोदयान्न स्वकदाग्रहान्न्यवर्तत किंतु चीवरादिकं त्यक्त्वा निर्गतः। ततश्च बहिरुद्याने स्थितस्य तस्य वंदनार्थमुत्तरानाम्नी भगिनी समागता । सा च तथाविधं स्वं भ्रातरमवलोक्य स्वयमपि चीवराणि त्यक्तवती । ततो भिक्षार्थं नगरमध्ये प्रविष्टा सा गणिकयाऽवलोकिता । तत "एवंविधामपि बीभत्सामिमां दृष्ट्वा नागरिकलोको मास्मासु विरंसीदिति" विचिंत्य तया परिधापितासौ । तत एष व्यतिकरोऽनया शिवभूतये निवेदितस्ततोऽनेन "विवस्त्रा योषिन्नितरां बीभत्सा भवतीति" विचिंत्य तां प्रत्युक्तम्–"इत्थमेव त्वं तिष्ठ एतद्वस्त्रं त्वया न त्यक्तव्यं, देवतया हि तवेदं प्रदत्तमिति" । ततः शिवभूतिना कौण्डिन्यकोट्टवीरौ दीक्षितौ ताभ्यामाचार्यशिष्यलक्षणा-

मुद्घाटितं भवति तत्र गच्छ ।" ततश्च सोऽपि कोपाहंकारप्रेरितो निर्गतः । पर्यटता च तेनोद्घाटितद्वारः साधूपाश्रयो दृष्टः । तत्र च तेन साधवः कालग्रहणं कुर्वन्तो वंदित्वा व्रतग्रहणं याचिताः । तैश्च मात्रादिभिरननुज्ञातोऽयमिति कृत्वा व्रतं न दत्तं ततः खेलमल्लकाद्भस्मां गृहीत्वा स्वयमेव लोचमकरोत् । साधवश्च लिंगं समर्पयामासुः सर्वेऽपि च ते साधवोऽन्यत्र विहृताः । कालांतरेण पुनरपि तत्रागताः । राज्ञा च शिवभूतये कंबलरत्नमर्पितं गुरुभिश्च शिवभूतिं प्रत्युक्तं "साधूनामध्वादिष्वनर्थसार्थनिबंधनं किमस्माभिरेतद्गृहीतमिति" । ततस्तेन गुर्वाज्ञामनादृत्यापि मूर्च्छया प्रच्छन्नतया तद्विधृतम् । प्रत्यहं च तदयं संभालयति न च कस्यचिदग्रे प्रदर्शयति । ततश्च "मूर्च्छितोऽयमिति" गुरुभिरवगत्य तमनापृच्छ्यैव तत्कंबलरत्नं विदार्य साधूनां प्रोंछनकानि कृतानि । सोऽप्यवगतव्यतिकरः प्रच्छन्नकषायकलुषितहृदयस्तिष्ठति । एकदा च सूरयो जिनकल्पिकान् वर्णयंति । तथा हि-"जिणकप्पिआ य दुविहा पाणीपाया पडिग्गहधरा य । पाउरणमपाउरणा इक्किक्का ते भवे दुविहा ॥ १ ॥ दुग ति चउक्क पणगं नव दस इक्कारसेव बारसगं । एए अठ विगप्पा जिणकप्पे हुंति उवहिस्स ॥ २ ॥ इत्यादि" । तदेतन्निशम्य शिवभूतिरुवाच-"हन्त यद्येवं तर्हि किमिदानीमेतावानुपधिः परिगृह्यते स एव जिनकल्पः किं नाद्रियते" । गुरुभिरुक्तं-"जंबूस्वामिनि व्युच्छिन्नोऽसौ सांप्रतं तथाविधसंहननाद्यभावात्कर्तुं न शक्यते" । ततः शिवभूतिरलपत्-"मयि जाग्रति कथमयं व्युच्छिद्यते नन्वहमेव तं करिष्यामि । परलोकार्थिना हि स एव निष्परिग्रहो जिनकल्पोऽङ्गीकार्यः किमनेन मूर्च्छादिदोषहेतुना परिग्रहेणेति ।" सूरिभिरुक्तं-"धर्मोपकरणमेवैतन्न तु परिग्रहः । तथा-"जन्तवो बहवः सन्ति दुर्दर्श्या मांसचक्षुषाम् । तेभ्यः स्मृतं दयार्थं तु रजोहरणधारणम् ॥ १ ॥ आसने शयने स्थाने निक्षेपे ग्रहणे

तथा । गात्रसंकुचने चेष्टं तेन पूर्वं प्रमार्जनम् ॥ २ ॥" तथा च–"सन्ति संपातिमाः सत्वाः सूक्ष्माश्च व्यापिनोऽपरे । तेषां रक्षानिमित्तं च विज्ञेया मुखवस्त्रिका ॥ १ ॥ किं च–भवन्ति जन्तवो यस्मादन्नपानेषु केषुचित् । तस्मात्तेषां परीक्षार्थं पात्रग्रहणमिष्यते ॥ १ ॥ अपरं च–सम्यक्त्वज्ञानशीलानि तपश्चेतीह सिद्धये । तेषामुपग्रहार्थाय स्मृतं चीवरधारणम् ॥ १ ॥ शीतवातातपैर्दंशैर्मशकैश्चापि खेदितः । मा सम्यक्त्वादिषु ध्यानं न सम्यक् संविधास्यति ॥ २ ॥ तथा वस्त्राभावे शीतातपदंशमशकादिपीडाव्याकुलितस्याग्निसेवादिदुर्ध्यानसंभवे संयमविराधना स्यात् । तथा पात्राभावे बालग्लानादीनां वैयावृत्यमपि कुतो भवेत् । यः पुनरतिसहिष्णुतया एतदन्तरेणापि न धर्मबाधकस्तस्य नैतदस्ति । तथा चाह–'य एतान् वर्जयेद्दोषान् धर्मोपकरणादृते । तस्य त्वग्रहणं युक्तं यः स्याज्जिन इव प्रभुः ॥ १ ॥' स च प्रथमसंहनन एव न चेदानीं तदस्तीति कारणाभावात्कार्यस्याप्यभावः तस्माद्यथा संयमोपग्रहार्थं भैक्षादिकं गृह्यते एवं वस्त्रादिधारणमप्युचितमेवे" त्यादियुक्त्या प्रज्ञाप्यमानोऽप्यसौ तथाविधकषायमोहनीयकर्मोदयान्न स्वकदाग्रहान्न्यवर्तत किंतु चीवरादिकं त्यक्त्वा निर्गतः । ततश्च बहिरुद्याने स्थितस्य तस्य वंदनार्थमुत्तरानाम्नी भगिनी समागता । सा च तथाविधं स्वं भ्रातरमवलोक्य स्वयमपि चीवराणि त्यक्तवती । ततो भिक्षार्थं नगरमध्ये प्रविष्टा सा गणिकयाऽवलोकिता । तत "एवंविधामपि बीभत्सामिमां दृष्ट्वा नागरिकलोको मास्मासु विरंसीदिति" विचिंत्य तया परिधापितासौ । तत एष व्यतिकरोऽनया शिवभूतये निवेदितस्ततोऽनेन "विवस्त्रा योषिन्नितरां बीभत्सा भवतीति" विचिंत्य तां प्रत्युक्तम्–"इत्थमेव त्वं तिष्ठ एतद्वस्त्रं त्वया न त्यक्तव्यं, देवतया हि तवेदं प्रदत्तमिति" । ततः शिवभूतिना कौण्डिन्यकोट्टवीरौ दीक्षितौ ताभ्यामाचार्यशिष्यलक्षणा-

परंपरा प्रवृत्तेत्यादि । तस्मात्सिद्धान्तप्रामाण्यमभ्युपगच्छद्भिः परंपराप्रामाण्यमेवानुसर्तव्यमिति मिथ्यात्वमोहनीयकर्मोदयवशाद्विपरीतप्ररूपणाप्रवणा दिगंबराः तन्मतानुयायिनश्चाध्यात्मिका दूरतः परिहरणीया इत्यस्माकं हितोपदेश इति ॥ १६ ॥

**एवं सांप्रतमुद्भवदाध्यात्मिकमतनिर्दलनदक्षमारचितमिदं स्थलममलं विकचयतु सतां हृदयकमलम् १७**

**समजनि यत्स्थलमेतत्सुकृतं सृजतोऽनुसृत्य वृद्धवचः । मम तेन भव्यलोको बोधिमणेः सुलभतां लभताम्**

टीका--सुगममिदमार्याद्वयम् ॥ १७ ॥ १८ ॥ ॥ ॥ ॥ ॥ ॥

विबुधनिकरसेव्यः शोभते प्रौढिमाब्धिस्तपगणसुरशाखी भूरिशाखाभिरामः । अजनि रजनिनाथस्पर्द्धिकीर्त्तिप्रतानो मतिजितसुरसूरिर्हीरसूरिस्तदीशः ॥ १ ॥ अकलयदथ लीलां तस्य पट्टोदयाद्रौ महति विजयसेनः सूरिराजः सभानोः । प्रसरति घनगौरे यस्य कीर्तिप्रताने विधुरभवदुडूनां लक्ष्ममात्रोपलक्ष्यः ॥ २ ॥ विजयिविजयदेवः सूरिराट् तस्य पट्टे स जयति यतिकोटीमौलिकोटीरकल्पः । कलयति न सपत्नीर्वीक्ष्य गौरीकृता यद्विधुधवलयशोभिः शैलपुत्रीदिशः किम् ॥ ३ ॥ श्रीविजयसिंहसूरिस्तत्पट्टवियन्नभोमणिर्जयति । यस्य प्रतापपूषा दुर्वादितमः शमं नयति ॥ ४ ॥ वाचकपरिषत्तिलकश्रीमत्कल्याणविजयशिष्याणाम् । गंगाजलविमलधियां शिष्या बुधलाभविजयानाम् ॥५॥ श्रीजीतविजयविबुधास्तेषां गच्छे जयंति शुद्धधियः । राजंति तत्सतीर्थ्याः श्रीनयविजयाभिधा विबुधाः ॥ ६ ॥ तच्चरणकमलसेवामधुकरकल्पेन यशोविजयगणिना । स्वोपज्ञाध्यात्मिकमतखंडनवृत्तिर्विरचितेयम् ॥ ७ ॥ ॥ ॥ ॥ ॥ ॥

इति श्रीसकलपण्डितचक्रचक्रवर्तिपण्डितश्रीजीतविजयगणिसतीर्थ्यपण्डितश्रीनयविजयगणिशिष्यगणियशो-
विजयकृतं संघदत्ताध्यात्मिकमतपरीक्षापरनामकमाध्यात्मिकमतखण्डनप्रकरणं संपूर्णम् ॥

## ॥ अथ यतिलक्षणसमुच्चयप्रकरणम् ॥

सिद्धत्थरायपुत्तं तित्थयरं पणमिऊण भत्तिए। सुत्तोऽणीइए सम्मं जइलक्खणं वुच्छम् ॥ १ ॥ उस्सग्गववायाणं जयणाजुत्तो जई सुए भणिउ। बिंति अ पुव्वायरिआ सत्तविहं लक्खणं तस्स ॥ २ ॥ मग्गाणुसारिकिरिया पन्नवणिज्जत्तमुत्तमा सद्धा। किरिआसु अप्पमाउ आरंभो सक्कणुट्ठाणे ॥ ३ ॥ गरुउ गुणाणुराउ गुरुआणाराहणं तहा परमं। अक्खय चरणधणाणं सत्तविहं लक्खणं एयं ॥ ४ ॥ सुत्तायरणाणुगया सयला मग्गणुसारिणी किरिया। सुद्धालंबणपुन्ना जं भणिअं धम्मरयणंमि ॥ ५ ॥ मग्गो आगमणीई अहवा संविग्गबहुजणाइन्नं। उभयाणुसारिणी जा सा मग्गणुसारिणी किरिया ॥ ६ ॥ अन्नह भणिअं पि सुए किंची कालाइ कारणाविक्खं। आइन्नमन्नहच्चिय दीसइ संविग्गगीएहिं ॥ ७ ॥ कप्पाणं पावरणं अग्गोअरचाउ झोलिआभिक्खा। उवग्गहिअकडाहय तुंबयमुहदाणदोराई ॥ ८ ॥ सिक्किगनिक्खिवणाई पज्जोसवणाइ तिहिपरावत्तो। भोअणविहिअन्नत्तं एमाई विविहमन्नं पि॥ ९ ॥ जं सव्वहा न सुत्ते पडिसिद्धं नेव जीववहहेऊ। तं सव्वंपि पमाणं चारित्तधणाण भणिअं च ॥ १० ॥ अवलंबिऊण कज्जं जं किंचि समायरंति गीयत्था। थोवावराहबहुगुणं सव्वेसिं तं पमाणं तु ॥ ११ ॥ जं पुण पमायरूवं गुरुलाघवचिंतविरहियं सवहं। सुहसीलसढाइन्नं चरित्तिणो तं न सेवंति ॥ १२ ॥ जह सड्ढेसु ममत्तं राढाइ असुद्धमुवहिभत्ताइ। निद्दिज्जवसहि तूली मसूरगाईण परिभोगो ॥ १३ ॥ इच्चाई असमंजसमणेगहा खुद्दचिट्ठिअं लोए। बहुएहिवि आयरिअं न पमाणं सुद्धचरणाणं ॥ १४ ॥ सारसिउ परिणामो

अहवा उत्तमगुणप्पणप्पवणो । हंदि भुजंगमनलिआयामसमाणो मओ मग्गो ॥ १५ ॥ इत्थं सुहोहनाणा सुत्तायरणा य नाणविरहे वि । गुरुपरतंतमईणं जुत्तं मग्गाणुसारित्तं ॥ १६ ॥ एयारिसस्स जमिह गमणमणाभोगओ वि मग्गंमि । अन्नप्प-चिंतएहिं सदंधणीईइ भवइ ॥ १७ ॥ लद्धेऽवंचकजोए गलिए अ असग्गहंमि भवमूले । कुसलाणुबंधजुत्तं एअं धन्नाण संभवइ ॥ १८ ॥ एयंमि नाणफलओ हेमघडसमा मया परेहिंपि । किरिया जं भग्गा वि हु एसा मुंचइ ण तब्भावं ॥ १९ ॥ नणु भावचरणलिंगं कह मग्गणुसारिणी भवे किरिया । जं अपुणबंधगाणं दव्वजईणं पि सा इट्ठा ॥ २० ॥ जायइ अ भावचरणं दुवालसण्हं खए कसायाणं । मग्गणुसारित्तं पुण हविज्ज तम्मंदयाए वि ॥२१॥ लहुअत्ते कम्माणं तीए जणिअं तयं च गुणबीअं । ववहारेणं भण्णइ नाणाइजुअं च णिच्छयओ ॥ २२ ॥ नाणाइविसेसजुअं णय तं लिंगं तु भावचरणस्स । तयभावे तब्भावा मासतुसाईण जं भणियं ॥२३॥ गुरुपारतंतनाणं सद्दहणं एयसंगयं चेव । इत्तो उ चरित्तीणं मासतुसाईण णिद्दिट्ठं ॥ २४ ॥ तेसिं पि दव्वनाणं णय रुइमित्ताओ दव्वदंसणओ । गीयन्नणिस्सिआणं चरणाभावप्पसंगाओ ॥ २५॥ दुविहो-पुणो विहारो भावचरित्तीण भगवया भणिओ । एगो गीयत्थाणं बितिओ तन्निस्सिआणं च ॥ २६ ॥ संखेवावित्थाए रुइरूवे दंसणे य दव्वत्तं । भन्नइ जेणुवगिज्जइ अयाणमाणे वि सम्मत्तं ॥२७॥ सव्वएसा भन्नइ लिंगं अप्पंतरस्स चरणस्स । जं दलरूवं दव्वं कज्जावन्नं च जं भावो ॥ २८ ॥ ण उक्कडरूवसरिसं भावविरहीण भवाभिणंदीणं । अहव कहं पि विसिट्ठं लिंगं सा भावचरणस्स ॥ २९ ॥ इक्खुरसगुडाईणं महुरत्ते जह फुडं विभिन्नत्तं । तह अपुणबंधचरणाइभावभेओ वि सुपसिद्धो ॥ ३० ॥ मग्गणुसारिकिरिया भाविअचित्तस्स भावसाहुस्स । विहिपडिसेहेसु भवे पन्नवणिज्जत्तमुजुभावा ॥३१॥

विहिउज्जमवन्नयभयउस्सग्गववायतदुभयगयाइं । सुत्ताइं बहुविहाइं समए गंभीरभावाइं ॥ ३२ ॥ पिंडेसणाउ सपत्तयरि च्छिमियाइनरयसंसाई । उज्जीवणविहारा वाहितिगिच्छा य णायाइं ॥ ३३ ॥ तेसिं विसयविभागं मुज्झइ कुग्गहरओ अयाणंतो । बोहेइ तं च णाउं पन्नवणिज्जं सुसीलगुरू ॥ ३४ ॥ अवसिट्ठं ठवित्ता चिंतिय अप्पयरपरकमायं से । परिणामेइ स सम्मं जं भणियं कप्पभासंमि ॥ ३५ ॥ संविग्गभाविआणं लुद्धयदिट्ठंतभाविआणं च । मुत्तूण खित्तकालं भावं च कहेंति सुद्धुंछं ॥ ३६ ॥ सो वि य सम्मं जाणइ गुरुदिन्नं निरवसेसपन्नवणं । णय उस्सग्गमईए पल्लवभित्ते हवइ इट्ठो ॥ ३७ ॥ जह बोडिआइवयणं सोउं आवायरम्मसूढनयं । ववहाराइपहाणा तं कोइ सुआ विसेसेइ ॥ ३८ ॥ ण य जाणइ अइपरिणइ अपरिणइभया कयम्मि मूढनए । कालियसुअंमि पायं उवउगं तिण्ह जं भणियं ॥ ३९ ॥ मूढनइअं सुअं कालिअं तु न णया समोअरंति इहं । अपुहत्ते समोआरो णत्थि पुहत्ते समोआरो ॥ ४० ॥ तआ । एयहिं दिट्ठिवाए परूवणा सुत्त-अत्थकहणाय । इह पुण अणप्पुवगमो अहिगारो तीहि उसन्नं ॥ ४१ ॥ पायं पसिद्धमग्गो अपरिणई नाइपरिणई वा वि । अपसिद्धे तब्भावो बुहेहिं ता सुट्ठुदिट्ठमिणं ॥ ४२ ॥ वक्कत्थाइदिसाए अन्नेसु वि एवमागमत्थेसु । पडिवज्जइ भावत्थं निउणेणं पन्नविज्जंतो ॥ ४३ ॥ जो नय पन्नवणिज्जो गुरुवयणं तस्स पगइमहुरंपि । पित्तज्जरगहिअस्स व गुरुखंडकडुअमाभाइ ॥ ४४ ॥ पन्नवणिज्जस्स पुणो उत्तमसद्धा हवे फलं जीसे । विहिसेवा य अनन्ना सुदेसणा खलिअपरिसुद्धी ॥ ॥ ४५ ॥ सद्धालू सत्तिजुउ विहिसारं चेव सेवए किरियं । तप्परकवायहीणो ण हवे दवाइदोसे वि ॥ ४६ ॥ जह सम्ममुट्ठिआणं समरे कंभाइणाभमाइणं । भावो न परावत्तइ एमेव महाणुभावस्स ॥ ४७ ॥ मालइगुणसुणोमहुअरस्स तप्प-

खवायहीणत्तं । पडिबंधे वि न कइआ एमेव मुणिस्स सुहजोगे ॥ ४८ ॥ अपयट्टो वि पयट्टो भावेणं एस जेण तस्सत्ती । अखलिआ निविडाओ कम्मखओवसमजोगाओ ॥ ४९ ॥ निरओ भुज्जरसन्नू किंचि अवत्थंगओ असुहमन्नं । भुंजइ तम्मि न रज्जइ सुहभोअणलालसो धणिअं ॥ ५० ॥ इय सुद्धचरणसहिओ सेवंतो दव्वओ विरुद्धं पि । सद्धागुणेण एसो न भाव-चरणं अइक्कमइ ॥ ५१ ॥ अवहपइन्नाजणिअं भावं पालेउमायरखाए । तीए चेव ण हाणी सुअकेवलिणा जओ भणिअं ॥ ५२ ॥ चिक्खिल्लबालमावयसरेणुकंटगतणे बहुअजले अ । लोगो वि निच्छइ पहे को णु विसेसो भयंतस्स ॥ ५३ ॥ जयणाजयणं च गिही सच्चित्तमीसे परित्तणंते अ । न विजाणंति णयासिं अवहपइन्ना अह विसेसो ॥ ५४ ॥ अविअ जणे मरणभया परिस्समभयाउ ते विवज्जेइ । ते गुणदयापरिणया मुक्खत्थमिसी परिहरंति ॥ ५५ ॥ अविसिट्ठंमि वि जोगंमि बाहिरे होइ विहुरया इहरा । सुद्धस्स उ संपत्ती अफला जं देसिआ समए ॥ ५६ ॥ इक्कंमि वि पाणिवहंमि देसिअं सुमहंतरं समए । एमेव णिज्जरफला परिणामवसा बहुविहीआ ॥ ५७ ॥ जे जत्तिआ य हेऊ भवस्स ते चेव तत्तिआ मुक्खे । गणणाईआ लोगा दुण्हवि पुन्ना भवे तुल्ला ॥ ५८ ॥ इरिआवहिआईआ जे चेव हवंति कम्मबंधाय । अजयाणं ते चेव उ जयाण णिव्वाणगमणाय ॥ ५९ ॥ एगंतेण णिसेहो जोगे स ण देसिओ विही वा वि । दलिअं पप्प णिसेहो हुज्ज विही वा जहा रोगे ॥ ६० ॥ जंमि णिसेविज्जंते अइआरो हुज्ज कस्सइ कया वि । तेणेव य तस्स पुणो कयाइ सोही हविज्जाहि ॥ ६१ ॥ अणुमित्तो वि न कस्सइ बंधो परवत्थुपच्चओ भणिओ । तह वि खलु जयंति जई परिणामविसोहिमिच्छंता ॥ ६२ ॥ जो पुण हिंसाययणाइएसु वट्टइ तणुपरीणामो । दुट्ठो णय त लिंग होइ विसुद्धस्स जोगस्स ॥ ६३ ॥

तम्हा सया विसुद्धं परिणामं इच्छया सुविहिएणं । हिंसाययणा सव्वे परिहरिअव्वा पयत्तेणं ॥ ६४ ॥ एएण पबंधेणं विहि-
सेवालक्खणाइसज्झाए । भावजइत्तं भणिअं अइप्पसंगो फुडो इहरा ॥ ६५ ॥ पाउणइ णेव तित्तिं सद्धालू नाणचरण-
कज्जेसु । वेयावच्चतवाइसु अपुव्वगहणे य उज्जमइ ॥ ६६ ॥ उग्गयवरवरयणलाहतुट्ठं खु धम्मकिच्चं ति । अहिआहिअ-
लाभत्थी अणुवरइओ हवइ तंमि ॥ ६७ ॥ बुहिअस्स जहा खणमवि विज्झाइ णेव भोअणे इच्छा । एवं मोक्खत्थीणं
विज्झाइ इच्छा ण कज्जंमि ॥६८॥ इत्तो चेव असंगं हवइ अणुट्ठाणमो पहाणयरं । तम्मत्तगुणट्ठाई संगो तित्तीउ एगत्थ ॥६९॥
सुपरिचिअआगमत्थो वउगयसुयगुरुअणुन्नाउ । मज्झत्थो हिअकंखी सुविसुद्धं देसणं कुणइ ॥ ७० ॥ ण परिचिआ जेण
सुआ समयत्था तस्स णत्थि अणुओगो । सो सत्तूपयणिट्ठो जं भणिअं संमईइ इमं ॥ ७१ ॥ जह जह बहुस्सुओ संमओ
अ सीसगणसंपरिवुडो । अविणिच्छिओ अ समए तह तह सिद्धंतपडिणीओ ॥ ७२ ॥ भासाइ जो विसेसं न जाणए इयर-
सत्थकुसलो वि । मिच्छा तस्सुवएसो महाणिसीहंमि जं भणिअं ॥ ७३ ॥ सावज्जणवज्जाणं वयणाणं जो न जाणइ विसेसं ।
वुत्तुं पि तस्स ण खमं किमंग पुण देसणं काउं ॥ ७४ ॥ दाणपसंसणिसेहे जह किर दुहउ वि भासणं विसमं । सक्कइ
गीयत्थेहिं सुआणुरूवं तु दोएहं जं ॥ ७५ ॥ पत्तंमि जं पदिन्नं अणुकंपासंगयं च जं दाणं । जं च गुणंतरहेऊ पसंसणिज्जं
तयं होइ ॥ ७५ ॥ अन्नस्स य पडिसेहे सुत्तविरोहो ण लेसओवि भवे । जेणं परिणामवसा वित्तिच्छेओ वहित्था व ॥७७॥पत्तं
च होइ तिविहं दरसव्वजया य अजयसुद्दिट्ठी । पढमिल्लुअं च धम्मिअ महिगिच्च वयट्ठिउ लिंगी ॥७८॥ववहारणएण पुणो
पत्तमपत्तं च होइ पविभत्तं । णिच्छयउ पुण बज्झं पत्तमपत्तं च णो णिययं ॥७९॥ जं पुण अपत्तदाणे पावं भणिअं धुवं भगवईए ।

तं खलु फुडं अपत्ते पत्ताभिणिवेसमहिगिच्चा ॥ ८० ॥ इहरा उ दाणधम्मे संकुइए होइ पवयणुड्डाहो । मिच्छत्तमोहजणओ इय एसा देसणासुद्धा ॥८१॥ इयरेसु वि विसएसु भासा गुणदोसजाणओ एवं । भासइ सव्वं सम्मं जह भणिअं खीणदोसेहिं ॥८२॥ गुरुणा य अणुण्णाओ गुरुभावं देसओ लहुं जम्हा । सीसस्स हुंति सीसा ण हुंति सीसा असीसस्स ॥ ८३ ॥ सत्थगुणा वि तीरइ मज्झत्थेणेव सासिउं सव्वं । सच्छंदं नो जंपइ जमेस आहच्च भणिअं च ॥ ८४ ॥ जं च ण सुत्ते विहिअं ण य पडिसिद्धं जणंमि चिररूढं । समइविगप्पियदोसा तं पि ण दूसंति गीयत्था ॥ ८५ ॥ संविग्गा गीयतमा विहिरसिआ पुव्वसूरिणो आसी । तददूसिअमायरिअं अणइसई को णिवारेइ ॥ ८६ ॥ अइसाहसमेअं जं उस्सुत्तपरूवणाकडुविवागं । जाणंतेहि विहिज्जइ णिद्दोसा सुत्तबज्झत्थे ॥ ८७ ॥ णिययावासाईअं गारवरसिआ गहित्तु मुद्धजणं । आलंबणं अपुट्ठं पाडंति पमायगत्तंमि ॥ ८८ ॥ आलंबणाण भरिओ लोगो जीवस्स अजयकामस्स । जं जं पिच्छइ लोए तं तं आलंबणं कुणइ ॥ ८९ ॥ जो जं सेवइ दोसं संणिहिपमुहं तु सो अभिणिविट्ठो । ठावेइ गुणमहेउं अववायपयं पुरो काउं ॥ ९० ॥ परिहरइ जं च दोसं सच्छंदविहारओ अभिणिविट्ठो । कप्पियसेवाण वि हु लुंपइ तं कोइ पडिणीओ ॥ ९१ ॥ तं पुण विसुद्धसद्धा सुअसंवायं विणा ण संसंति । अवहीरिऊण नवरं सुआणुरूवं परूविंति ॥ ९२ ॥ उवइसइ धम्मगुज्झं हिअकंखी अप्पणो परेसिं च । पत्तापत्तविवेगो हिअकंखित्तं च णिव्वहइ ॥ ९३ ॥ पत्तंमि देसणा खलु णियमा कल्लाणसाहणं होइ । कुणइ अ अपत्तपत्ता विणिवायसहस्सकोडीओ ॥ ९४ ॥ विफला इमा अपत्ते दुस्सक्खप्पा तओ जओ भणिआ । पढमे दुट्ठे बितिए मूढे वुग्गाहिए तइए ॥ ९५ ॥ आमे घडे णिहत्तं जहा जलं तं घडं विणासेइ । इय सिद्धंतरहस्सं अप्पाहारं

॥ ७२ ॥

विणासेइ ॥ ९६ ॥ णय एवं संकोए ण जुज्जए तत्थ पुण तुच्छत्तं । जं तं मज्झत्थत्तं अविरुकणाउ सवतुल्लत्तं ॥ ९७ ॥ के य पु-
रिसेइच्छाइ वयणउच्चिय ववठियं एयं । इय देसणा विसुद्धा इयरा मिच्छत्तगमणाई ॥ ९८ ॥ आउट्टिआइजणिअं कयाइ चर-
णस्स कहवि अइआरं । णाऊण विअडणाए सोहेंति मुणी विमलसद्धा ॥ ९९ ॥ आउट्टिआ उविच्चा दप्पो पुण होइ
वग्गणाईउ । विगहाइउ पमाउ कप्पो पुण कारणे करणं ॥ १०० ॥ सद्धालू अपमत्तो हविज्ज किरियासु जेण तेणेव ।
किरियाणं साफल्लं जं भणियं धम्मरयणंमि ॥ १०१ ॥ पवज्जं विज्जं पि व साहंतो होइ जो पमाइल्लो । तस्स ण सिज्झइ एसा
करेइ गरुअं च अवयारं ॥ १०२ ॥ पडिलेहणाई चिट्ठा छक्कायविघाइणी पमत्तस्स । भणिआ सुअंमि तम्हा अपमाई
सुविहिउ हुज्जा ॥ १०३ ॥ रक्खइ वएसु खलिअं उवउत्तो होइ समिइगुत्तीसु । वज्जइ अवज्जहेउं पमायचरिअं सुधिर-
चित्तो ॥ १०४ ॥ कालंमि अणूणहिअं किरियंतरविरहिउ जहा सुत्तं । आयरइ सव्वकिरियं अपमाई जो इह चरित्ती
॥ १०५ ॥ जह णिव्विग्घं सिग्घं गमणं मग्गन्नुणो णगरलाभे । हेऊ तह सिवलाभे णिच्चं अपमायपरिवुड्ढी ॥ १०६ ॥
कम्माणं अपमाया अणुबंधावणयणं च होज्जाहि । तत्तो अकरणणियमो दुक्खक्खयकारणं होइ ॥ १०७ ॥ पडिबंधाउवि
अउ कंटगजरमोहसंनिभाउअ । हवइ अणुबंधविगमा पयाणभंगो ण दीहयरो ॥ १०८ ॥ खाउवसमिगभावे दढजत्तकयं
सुहं अणुट्ठाणं । परिवडिअं पि य हुज्जा पुणो वि तब्भाववुड्ढिकरं ॥ १०९ ॥ अज्जमहागिरिचरिअं भावंतो माणसंमि उज्ज-
मइ । अणिगूहिय णियथामं अपमायस्सेस कसवट्टो ॥ ११० ॥ संजमजोगेसु सया जे पुण संतविरिया वि सीअंति । कह ते वि-
सुद्धचरणा वाहिरकरणालसा हुंति ॥ १११ ॥ अणुबंधजुअं कुसलो णिबोढुं अप्पणो अ अपमायं । आयगुरुलिंगपच्चयसुद्धं

सक्कं चिय कुणंतो ॥ ११२ ॥ सहसा असक्कचारी पउरपमायंमि जो पडइ पच्छा । खलमित्तिव्व ण किरिया सलाहणिज्जा हवे तस्स ॥ ११३ ॥ दव्वाइनाणनिउणं अवमन्नंतो गुरुं असक्कचारि जो । सिवभूइव्व कुणंतो हिंडइ संसाररन्नंमि ॥११४॥ हवइ असक्कारंभो अत्तुक्करिसजणएण कम्मेण । निउणेण साणुबंधं णज्जइ पुण एसणिज्जं च ॥ ११५ ॥ संघयणादणुरूवे सक्कारंभे अ साहए बहुअं । चरणं निवडइ न पुणो असंजमो तेणिमो गरुओ ॥ ११६ ॥ संघयणाईआलंबणं तु सिढिलाण जं चरणघाई । सक्कारंभाण तयं तव्वुड्ढिकरं जओ भणियं ॥ ११७ ॥ संघयणकालबलदूसमारयालंबणाइ घित्तूणं । सव्वं चिय णियमधुरं णिरुज्जमाओ पमुच्चंति ॥ ११८ ॥ कालस्स य परिहाणी संजमजुग्गाइ णत्थि खित्ताइं । जयणाइ वट्टिअव्वं ण उ जयणा भंजए अंगं ॥ ११९ ॥ जायइ गुणेसु रागो पढमं संपत्तदंसणस्सेव । किं पुण संजमगुणओ अहिए ता तंमि वत्तव्वं ॥ १२० ॥ गुणवुड्ढिइ परगयगुणरत्तो गुणलवं पि संसेइ । तं चेव पुरो काउं तग्गयदोसं उवेहेइ ॥ १२१ ॥ जह अइमुत्तयमुणिणो पुरो कयं आगमेसिभद्दत्तं । थेराण पुरो न पुणो वयखलिअं वीरणाहेणं ॥ १२२ ॥ एत्तोच्चिय किइकम्मे अहिगिच्चालंबणं सुअब्भुदयं । गुणलेसो वि अहिगओ जं भणिअं कप्पभासंमि ॥ १२३ ॥ दंसणनाणचरित्तं तवविणयं जत्थ जत्तिअं पासे । जिणपन्नत्तं भत्तिइ पूअए तं तहिं भावं ॥ १२४ ॥ परगुणसंसा उचिया अनन्नसाहारणत्तणेव तहा । जह विहिआ जिणवइणा गुणनिहिणा गोअमाईणं ॥ १२५ ॥ परगुणगहणावेसो भावचरित्तिस्स जह भवे पवरो । दोसलवेण वि निअणं जहा गुणे निग्गुणे गुणइ ॥ १२६ ॥ पडिबंधस्स न हेऊ णियमा एयस्स होइ गुणहीणो । सयणो वा सीसो वा गणिव्वओ वा जओ भणिअं ॥१२७॥ सीसो सज्झिलओ वा गणिव्वओ वा न सोग्गइं णेइ । जे तत्थ नाणदंसणचरणा ते

सुग्गईमग्गो ॥ १२८ ॥ करुणावसेण नवरं ठावइ मग्गंमि तं पि गुणहीणं । अच्चंताजुग्गं पुण अरत्तदुट्ठो उवेहेइ ॥ १२९ ॥
गुणरागी य पवट्टइ गुणरयणनिहीण पारतंतंमि । सव्वेसु वि कज्जेसु सासणमालिन्नमिहरा उ ॥ १३० ॥ तेण खमासमणाणं
हत्थेणं ति य भणंति समयविऊ । अविअत्तलद्धिजुत्ता सव्वत्थ वि पुण्णमज्झाया ॥ १३१ ॥ ण वहइ जो गुणरायं दोसलवं
कड्ढिउं गुणड्ढे वि । तस्स णियमा चरित्तं नत्थि त्ति भणंति समयन्नू ॥ १३२ ॥ गुणदोसाण य भणियं मज्झत्थत्तं वि निचि-
यमविवेए । गुणदोसो पुण लीला मोहमहारायआणाए ॥ १३३ ॥ सयणप्पमुहेहिं ता जस्स गुणड्ढंमि णाहिओ रागो ।
तस्स न दंसणसुद्धी कत्तो चरणं च निव्वाणं ॥ १३४ ॥ उत्तमगुणाणुराया कालाईदोसओ अपत्ता वि । गुणसंपया
परत्थ वि न दुल्लहा होइ भव्वाणं ॥ १३५ ॥ गुणरत्तस्स य मुणिणो गुरुआणाराहणं हवे णियमा । बहुगुणरयणनिहाणा
तओ ण अहिओ जओ को वि ॥ १३६ ॥ तिण्हं दुप्पडिआरं अम्मापिउणो तहेव भट्टिस्स । धम्मायरियस्स पुणो भणिअं
गुरुणो विसेसेउं ॥ १३७ ॥ अणवत्थाई दोसा गुरुआणाराहणे जहा हुंति । हुंति य कयन्नुआए गुणा गरेठा जओ
भणिया ॥ १३८ ॥ नाणस्स होइ भागी थिरयरओ दंसणे चरित्ते य । धन्ना आवकहाए गुरुकुलवासं न मुंचंति ॥ १३९ ॥
सव्वगुणमूलभूओ भणिओ आयारपढमसुत्तंमि । गुरुकुलवासो तत्थ य दोसा वि गुणा जओ भणिअं ॥ १४० ॥ एयस्स
परिच्चाया सुद्धुंगाइवि णेव हिययाणि । कम्माइ वि परिसुद्धं गुरुआणावत्तिणो बिंति ॥ १४१ ॥ आयत्तया महागुण कालो
विसमो सपक्खया दोसा । आइतिगभंगेण वि गहणं भणिअं पकप्पंमि ॥ १४२ ॥ गुरुआणाए चाए जिणवरआणा न
होइ णियमेण । सच्छंदविहाराणं हरिभद्देणं जओ भणिअं ॥ १४३ ॥ एअम्मि परिच्चत्ते आणा खलु भगवओ परिच्चत्ता ।

तीए अ परिच्चाए दुण्ह वि लोगाण चाउ त्ति ॥ १४४ ॥ नणु एवं कह भणिउं दिट्ठंतो गामभोइनरवइणो । भन्नइ अप-
त्तविसए गुरुणो भग्गा न भावाण ॥ १४५ ॥ तित्थयरवयणकरणे आयरिआणं पए कयं होइ । एत्तोच्चिय भणिअमिणं
इयरेअरभावसंवेहा ॥ १४६ ॥ जिणकप्पाइपवित्ती गुरुआणाए विरोहिणी न जहा । तह कज्जंतरगमणे विसेसकज्जस्स
पडिबंधो ॥ १४७ ॥ भावस्स हु णिक्खेवे जिणगुरुआणाण होइ तुल्लत्तं । सरिसं णासा भणियं महाणिसीहंमि फुडमेयं
॥ १४८ ॥ गुणपुण्णस्स वि वुत्तो गोअमणाएण गुरुकुले वासो । विणयसुदंसणरागा किमंग पुण वच्चमिअरस्स ॥ १४९ ॥
ण य मोत्तव्वो एसो कुलवहुणाएण समयभणिएणं । बज्झाभावे वि इह संवेगो देसणाईहिं ॥ १५० ॥ खंताइगुणुक्करिसो सुवि-
हियसंगेण बंभगुत्ती य । गुरुवेयावच्चेण य होइ महाणिज्जरालाहो ॥१५१॥ मूढो इमस्स चाए एएहिं गुणेहिं वंचिउ होइ ।
एगागिविहारेण य णस्सइ भणिअं च उहंमि ॥१५२॥ जह सागरंमि मीणा संखोहं सागरस्स असहंता । निंति तउ सुह-
कामी निग्गयमित्ता विणस्संति ॥ १५३ ॥ एवं गच्छसमुद्दे सारणमाईहिं चोइआ संता । निंति तउ सुहकामी मीणा व
जहा विणस्संति ॥ १५४ ॥ भणिआ आयारंमि वि दुट्ठा दोसेण णावरियन्ति । तद्दिट्ठीए इच्चाइवयणउ गुरुकुलं गरुअं
॥ १५५ ॥ जं पुण नया लभिज्जा इच्चाईसुत्तमेगचारित्ते । तं पुण विसेसविसयं सुनिउणबुद्धिहि दट्ठव्वं ॥ १५६ ॥ पावं
विवज्जयंतो कामेसु तहा असज्जमाणो अ । तत्थुत्तो एसो पुण गीयत्थो चेव संभवइ ॥ १५७ ॥ णागीउ अन्नाणी किं का-
हिच्चाइवयणउ णेउ । अवियत्तस्स विहारो अविय णिसिद्धो फुडं समए ॥ १५८ ॥ गीयत्थो अ विहारो बीउ गीयत्थनी-
सिउ भणिउ । एत्तो तइअविहारो नाणुन्नाउ जिणवरेहिं ॥ १५९ ॥ एगागियस्स दोसा इत्थी साणे तहेव पडिणीए ।

भिक्खविसोहि महव्वय तम्हा सविइज्जए गमणं ॥ १६० ॥ जाओ अ अजाओ य दुविहो कप्पो य होइ विन्नेओ । इक्किक्को
पुण दुविहो सम्मत्तकप्पो असमत्तो ॥ १६१ ॥ गीयत्थजायकप्पो अगीओ पुण भवे अजाओ अ । पणगं समत्तकप्पो तदू-
णगो होइ असमत्तो ॥ १६२ ॥ उउबद्धे वासासु अ सत्त समत्तो तदूणगो इयरो । असमत्ताजायाणं ओहेण न होइ आभव्वं
॥ १६३ ॥ ता गीयंमि इमं खलु वयणं लाभंतरायविसयंति । सुत्तं अवगंतव्वं णिउणेहिं तंतणीईए ॥ १६४ ॥ इक्कस्स
पुणो तस्स वि विसमे काले तहा वि ण विहारे । जणववायभयाओ ववच्छिओ एस तंतंमि ॥ १६५ ॥ कालंमि संकिलिट्ठे
छक्कायदयावरो वि संविग्गो । जयजोगीणमलंभे पणगन्नयरेण संवसइ ॥ १६६ ॥ इय एगागिविहारे अइदंपज्जत्थओ सुपरि-
सुद्धे । गुरुकुलवासच्चाओ लेसेण वि भावओ णत्थि ॥१६७॥ गुणवं च गुरू सुत्ते जहत्थगुरुसद्दभायणं इट्ठो। इयरो पुण विव-
रीओ गच्छायारंमि जं भणिअं ॥१६८॥ तित्थयरसमो सूरी सम्मं जो जिणमयं पयासेइ। आणं च अइक्कंतो सो कापुरिसो ण सप्पु
रिसो ॥ १६९ ॥ भट्ठायारो सूरी भट्ठायाराणुविक्खओ सूरी । उम्मग्गट्ठिओ सूरी तिन्नि वि मग्गं पणासंति ॥ १७० ॥ एए
गुरुणो अगुणा पव्वज्जारिहगुणेहिं पव्वज्जा । गुरुकुलवासो अ सया अक्खयसीलत्तमवि सम्मं ॥ १७१ ॥ खंती समो दमो वि
अ तत्तणुत्तं च सुत्तअब्भासो । सत्तहिअंमि रयत्तं पवयणवच्छल्लया गरुई ॥ १७२ ॥ भवाणुवत्तयत्तं परमं धीरत्तमविय सो-
हग्गं । णियगुरुणाणुन्नाए पयंमि सम्मं अवट्ठाणं ॥ १७३ ॥ अविसाओ परलोए थिरहत्थोवगरणोवसमलद्धी । निउणं
धम्मकहित्तं गंभीरत्तं च इच्चाई ॥ १७४ ॥ उभयनूचियकिरियापरो इमो पवयणाणुरागी य । ससमयपण्णवओ परिणओ अ
पन्नोय अच्चत्थं ॥ १७५ ॥ जो हेउवायपक्खंमि हेउओ आगमे अ आगमिओ । सो समयपन्नवओ सिद्धंतविराहगो अन्नो

॥ १७६ ॥ कलिदोसंमि अ णिविडे एगाइगुणुज्झिओ वि होइ गुरू । मूलगुणसंपया जइ अक्खलिआ होइ जं भणिअं
॥ १७७ ॥ गुरुगुणरहिओ वि इहं दट्ठव्वो मूलगुणविउत्तो जो । न उ गुणमित्तविहूणोत्ति चंडरुद्दो उदाहरणं ॥ १७८ ॥ मू-
लगुणसंजुअस्स य गुरुणो वि य उवसंपया जुत्ता । दोसलवे वि अ सिक्खा तस्सुचिआ णवरि जं भणिअं ॥ १७९ ॥ मूल-
गुणसंपउत्तो न दोसलवजोगओ इमो हेओ । महुरोवक्कमओ पुण पवत्तिअव्वो जहुत्तंमि ॥ १८० ॥ पत्तो सुसीससद्दो एव
कुणंतेण पंथगेणावि । गाढप्पमाइणो वि हु सेलगसूरिस्स सीसेण ॥ १८१ ॥ नणु सेलगसेवाए जइ लद्धं सेलगस्स सीसत्तं ।
तं मुत्तूण गयाणं ता पंचसयाण तमलद्धं ॥ १८२ ॥ तस्स य मूलगुणेसु संतेसु[1] गमणठाणाइं । तेसिं तस्स य जुत्तिक्खमाइ
कह होंति वेहम्मा ॥ १८३ ॥ मूलगुणसंजुअस्स य दोसे वि अवजाणं उवक्कमिउं । धम्मरयणंमि भणिअं पंथगणायंति
चिंतमिणं ॥ १८४ ॥ भन्नइ पंचसयाणं चरणं तुल्लं च पंथगस्सावि । अहिगिच्च उ गुरुरायं विसेसिओ पंथओ तहवि ॥१८५॥
णियमेण चरणभावा पंचसयाणं पि जइ वि गुरुराओ । तहविअ परिणामवसा उक्किट्ठो पंथगस्सेसो ॥ १८६ ॥ णय एअं
दुस्सेयं जं गोसालोवसग्गिए णाहे । अप्पाविक्खाइ सुओ बाढं रत्तो सुणक्खत्तो ॥ १८७ ॥ पहुअणुरत्तेण तहा रुन्नं सीहेण मा-
लुआकच्छे । तब्भावपरिणयप्पा पहुणा सद्दाविओ अ इमो ॥ १८८ ॥ कस्स वि कत्थइ पीई धम्मोवायंमि दढयरा होइ । णय-
असुहावाहा मूलच्छेआवहा एवं ॥ १८९ ॥ अन्नेहिं पंथगस्स उ गुरुरागुक्करिसओ ण संगारो । गुरुसेवाइ स रत्तो अन्ने
अप्पुज्जयविहारे ॥१९०॥ सेलयमापुच्छित्ता ठवित्ता पंथगं च अणगारं । गुरुवेयावच्चकरं विहरंताणं पि को दोसो ॥ १९१ ॥

१ संतेसुविदुण्हगमणठाणाई ।

गच्छे वि धम्मविणयं जत्थुत्तरियं लभिज्ज अण्णत्थ । आपुच्छित्तु विहारो तत्थ जओ भासिओ कप्पे ॥ १९२ ॥ संविग्गविहारीणं
किं पुण तेसिं महाणुभावाणं । अह उवसंपयाणं कप्पिअभवोवयाराणं ॥ १९३ ॥ धम्मविणओ वि तेसिं आपुच्छिय पडि-
आए जह परमो । तह तेहिं गविअस्सवि णायव्वो पंथगमुणिस्स ॥ १९४ ॥ एसो वि अ सिढिलोत्ति य पडिमारिमयं हयं
हवइ इत्तो । जं साहूहि ण सिढिलो तक्कज्जे अणुमओ होइ ॥ १९५ ॥ कप्पिअसेवालद्धावगासदप्पेण सेलगस्सावि । सिढि-
लत्तं ण उ भंगे मूलपइन्नाइ जं भणिअं ॥ १९६ ॥ सिढिलिअसंजमकज्जावि होइउं उज्जमंति जइ पच्छा । संवेगाओ तो
सेलओ व्व आराहया होंति ॥ १९७ ॥ पासत्थयाइदोसा सिज्जायरपिंडभोअणाईहिं । उववाइआ य इत्तो णायज्झयणस्स वि-
त्तीए ॥ १९८ ॥ अब्भुज्जओ विहारो एत्तोच्चिय मुत्तु तेण पडिबंधं । पडिवन्नो मूलाई वयभंगो पुण जओ भणिअं ॥ १९९ ॥
छेअस्स जाव दाणं तावयमेगं पि णो अइक्कमइ । एगं अइक्कमंतो अइक्कमे पंच मूलेणं ॥ २०० ॥ उववज्जइ उत्तरगुण-
विराहणाए अहीलणिज्जत्तं । जह उ सुकुमालिआए ईसाणुववायजोग्गाए ॥ २०१ ॥ णिक्कारणपडिसेवा चरणगुणं णासइ-
त्ति जं भणिअं । अज्झवसायविसेसा पडिबंधो तस्स पच्छित्ते ॥ २०२ ॥ इय गुणजुयस्स गुरुणो छउमवत्थं कयाइ पत्तस्स ।
सेवा पंथगणाया णिद्दोसा होइ णायव्वा ॥ २०३ ॥ जे पुण गुणेहि हीणा मिच्छद्दिट्ठी य सव्वपासत्था । पंथगणाया मुद्धे सीसे
बोलंति ते पावा ॥ २०४ ॥ चरणधरणाखमो वि अ सुद्धं मग्गं परूवए जो सो । तेण गुणेण गुरुच्चिय गच्छायारंमि जं
भणियं ॥ २०५ ॥ सुद्धं सुसाहुमग्गं कहमाणो भवइ तइअपक्खंमि । अप्पाणं इयरे पुण गिहत्थधम्माओ चुक्कंति ॥ २०६ ॥
जइ वि न सक्कं काउं सम्मं जिणभासिअं अणुट्ठाणं । तो सम्मं भासिज्जा जह भणिअं खीणरागेहिं ॥ २०७ ॥ ओसन्नो य-

विहारो कम्मं सोहेइ सुलहबोहीअ । चरणकरणं विसुद्धं उववूहंतो परूवंतो ॥ २०८ ॥ सम्मग्गमग्गसंपट्ठिआण साहूण कुणइ वच्छल्लं । ओसहभेसज्जेण य सयमन्नेणं तु कारेई ॥ २०९ ॥ एयारिसो ण पावो असंजओ संजउ त्ति जंपंतो । भणिओ तित्थयरेणं जं पावो पावसमणिज्जो ॥ २१० ॥ किं पुण तित्थपभावणवसेण एसो पसंसणिज्जगुणो । सद्धाणुमोअणाए इच्छाजोगा य जं भणियं ॥ २११ ॥ नाणाहिओ वरतरो हीणो वि हु पवयणं पभावंतो । ण य दुक्करं करंतो सुट्ठु वि अप्पागमो पुरिसो ॥ २१२ ॥ हीणस्स वि सुद्धपरूवगस्स नाणाहिअस्स कायवा । इय वयणाओ तस्स वि सेवा उचिया सुसाहूणं ॥ २१३ ॥ तम्हा सुद्धपरूवगमासज्जगुरुं ण चेव मुंचंति । तस्साणाइ सुविहिआ सविसेसं उज्जमंति पुणो ॥ २१४ ॥ एअं अवमन्नंतो वुत्तो सुत्तंमि पावसमणुत्ति । महमोहबंधगो वि अ खिंसंतो अपरितप्पंतो ॥ २१५ ॥ सविसेसं पि जयंतो तेसिमवन्नं विवज्जए सम्मं । तो दंसणसोहीओ सुद्धं चरणं लहइ साहू ॥ २१६ ॥ इय सत्तलक्खणधरा आणाजोगेण गलिअपावमला । पत्ता अणंतजीवा सासयसुक्खं अणाबाहं ॥ २१७ ॥ सिज्झिस्संति अणंता सिज्झंति अपरिमिआ विदेहंमि । सम्मं पसंसणिज्जो तम्हा एयारिसो साहू ॥ २१८ ॥ एयारिसो अ साहू महासओ होइ दूसमाए वि । गीयत्थपारतंते दुप्पसहंतं जओ चरणं ॥ २१९ ॥ जो पुण अइविरलत्तं दट्ठुं साहूण भणइ वुच्छेअं । तस्स उ पायच्छित्तं एयं समयंमि उवइट्ठं ॥ २२० ॥ जो भणइ णत्थि धम्मो ण य सामइअं ण चेव य वयाइं । सो समणसंघबज्झो कायव्वो सवसंघेण ॥२२१॥ बहुमुंणाइवयणओ आणाजुत्तेसु गहिअपडिबंधो । विहरंतो वि मुणिच्चिय अगहिलगहिलस्स णीईए ॥२२२॥ अत्थपयभावणाणं अरत्तदुट्ठस्स सुद्धचित्तस्स । दोसलवे वि विणस्सइ ण भावचरणं जओ भणिअं ॥२२३॥ बकुसकुसीलेहि तित्थं दोसलवा तेसु णियम-

संव्वविणो । जइ तेहिं वज्जणिज्जो अवज्जणिज्जो तओ णत्थि ॥२२४॥ आसयसुद्धिइ तओ गुरुपरतंतस्स सुद्धलिंगस्स न्नावजइत्तं जुत्तं अव्वप्पव्वाणणिरयस्स ॥ २२५ ॥ इय सत्तलक्खणत्थो संगहिओ सुबहुतंतवक्कत्थं । फुरुविअो वि य न्नाणिओ सपरेसिमणुग्गहट्ठाए ॥२२६॥ तवगणरोहणसुरगिरिसिरिणयविजयाभिहाणविबुहाण । सीसेणं पि अ रइअं पगरणमेअं सुहं देउ ॥२२७॥

## ॥ इति श्रीयतिलक्खणसमुच्चयप्रकरणम् ॥

॥ इति श्रीयतिलक्षणसमुच्चयप्रकरणम् ॥

# ॥ अथ नयरहस्यप्रकरणम् ॥

## ऐन्द्रश्रेणिनतं नत्वा वीरं तत्त्वार्थदेशिनम् ॥ परोपकृतये ब्रूमो रहस्यं नयगोचरम् ॥

प्रकृतवस्त्वंशग्राही तदितरांशाप्रतिक्षेपी अध्यवसायविशेषो नयः । दुर्नयस्याप्यधिकृतांशाप्रतिक्षेपित्वात्तत्रातिव्याप्तिवारणाय प्रकृतवस्त्वंशग्राहीति । एवं च तत्पदे तद्भिन्नप्रतिपंथिधर्मोपस्थिते न दोषः । प्रकृतवस्त्वंशग्राहित्वमपि दुर्नयेऽतिव्याप्तमेवेति तदितरांशाप्रतिक्षेपीति । सप्तभंगात्मकशब्दप्रमाणप्रदीर्घसन्तताध्यवसायैकदेशेऽतिव्याप्तिवारणायाध्यवसायपदम् । रूपादिग्राहिणि रसाद्यप्रतिक्षेपिण्यपायादिप्रत्यक्षप्रमाणेऽतिव्याप्तिवारणाय विशेषपदम् । नयाः प्रापकाः साधका निवर्तका निर्भासका उपलंभका व्यञ्जका इत्यनर्थान्तरमिति भाष्यम् । अत्र प्रापकत्वं प्रमाणप्रतिपन्नप्रतियोगिप्रतियोगिमभावापन्ननानाधर्मैकतरमात्रप्रकारकत्वम् । साधकत्वं तथाविधप्रतिपत्तिजनकत्वम् । निवर्तकत्वमनिवर्तमाननिश्चितस्वाभिप्रायकत्वम् । निर्भासकत्वं शृंगग्राहिकया वस्त्वंशज्ञापकत्वम् । उपलंभकत्वं प्रतिविशिष्टक्षयोपशमापेक्षसूक्ष्मार्थावगाहित्वम् । व्यञ्जकत्वं च प्राधान्येन स्वविषयव्यवस्थापकत्वम् । एवं च पदार्थं प्रतिपादयन्नपि भाष्यकारस्तत्त्वतो लक्षणान्येव सूत्रितवान् । यद्येवं नयानामध्यवसायरूपता, कथं तर्हि "उवएसो सो णओ णाम त्ति" सत्यं, नयजन्योपदेशे नयपदोपचारात् । तथाप्येते तंत्रान्तरीयाः, स्वतंत्रा वा चोदकपक्षग्राहिणो मतिभेदेन विप्रधाविता, उभयथापि मिथ्यात्वमिति चेन्न, प्रमाणापेक्षत्वेनैतेषामुभयवैलक्षण्यात् । स्वविषयप्राधान्यरूपस्वतंत्रतायाश्च मिथ्यात्वाप्रयोजकत्वात् । गौणत्वमुख्यत्वयोर्हस्वत्वदी-

र्घत्वयोरिवापेक्षिकवस्तुधर्मत्वात् । प्रपञ्चितं चेदमन्यत्रेति नेह प्रतन्यते । अत एव नैकस्मिन्नर्थे नानाध्यवसायरूपाणामेतेषां विप्रतिपत्तित्वमप्याशंकनीयम्, सत्त्वजीवाजीवात्मकत्वद्रव्यगुणपर्यायात्मकत्वचतुर्दर्शनविषयत्वपञ्चास्तिकायावरुद्धत्वषड्द्रव्यक्रोडीकृतत्वधर्मैरेकत्वद्वित्वत्रित्वचतुष्ट्वपञ्चत्वषट्त्वाध्यवसायानामिव पर्यायविशुद्धिवशात् पृथगर्थग्राहिणां मतिज्ञानादीनामिवैकत्रार्थे प्रतिनियतविषयविभागशालिनां प्रत्यक्षादीनामिव वा नैगमाद्यध्यवसायानामविरुद्धनानाधर्मग्राहित्वेऽप्यविप्रतिपत्तिरूपत्वादिति संप्रदायः । अत्र च त्रिभिर्निदर्शनैर्विरुद्धधर्मग्राहित्वांशग्राहित्वप्रमितिवैलक्षण्यत्वानां विप्रतिपत्तित्वसाधकहेतूनामसिद्धिव्यभिचारप्रदर्शनादिष्टसिद्धिरिति विभावनीयम् । स्यादेतत्, एकत्वादिकं न वास्तवसंख्यारूपं, किं तु विभिन्नधर्मप्रकारकबुद्धिविषयत्वरूपं, तच्च मिथो न विरुद्धं, नयविषयीभूतं भेदाभेदादिकं तु विरुद्धमेवेति । मैवम् । सतामेवैकत्वादीनां बुद्धिविशेषेणाभिव्यक्तेः, अन्यथा तद्विषयत्वायोगादेकत्रप्रमीयमाणत्वेन चाविरोधात्, तद्वदेव भेदादीनामविरोध इति भावनीयम् । एकैकपक्षोक्तदोषापत्तिस्तु जात्यन्तरत्वाभ्युपगमान्निरसनीया । दृष्टा हि वैकल्यपरिहारेण तत्प्रयुक्तायाः परस्परानुवेधेन जात्यन्तरमापन्नस्य गुडशुंठीद्रव्यस्य कफपित्तदोषकारिताया निवृत्तिः। नेयं जात्यन्तरनिमित्ता, किं तु मिथो माधुर्यकटुकत्वोत्कर्षहानिप्रयुक्तेति चेन्न, द्वयोरेकतरबलवत्त्व एवान्यापकर्षसंभवात्, तन्मन्दतायामपि मन्दपित्तादिदोषापत्तेश्च । एतेनेतरेतरप्रवेशादेकतरगुणपरित्यागोऽपि निरस्तः अन्यतरदोषापत्तेरनुभवबाधाच्च । अथ समुदितगुडशुंठीद्रव्यं प्रत्येकगुडशुंठीभ्यां विभिन्नमेकस्वभावमेव द्रव्यान्तरं, न तु मिथोऽभिव्याप्यावस्थितोभयस्वभावं जात्यन्तरमिति चेन्न, तस्या द्रव्यान्तरत्वे विलक्षणमाधुर्यकटुकत्वाननुभवप्रसंगात्, एकस्वभावत्वे दोषद्वयोपशमाहेतुत्व-

प्रसंगात्, उभयजननैकस्वभावस्य चानेकत्वगर्भत्वेन सर्वथैकत्वायोगादेकया शक्त्योभयकार्यजननेऽतिप्रसंगाद्विभिन्नस्वभावानुभवाच्च। तस्मान्माधुर्यकटुकत्वयोः परस्परानुवेधनिमित्तमेवोभयदोषनिवर्तकत्वमित्यादरणीयम्। ननु जात्यन्तरत्वेऽपि प्रत्येकदोषनिवृत्तिरिति नैकान्तः, पृथक्स्निग्धोष्णयोः कफपित्तकारित्ववत् समुदितस्निग्धोष्णस्यापि माषस्य तथात्वादिति चेन्न, माषे स्निग्धोष्णत्वयोर्जात्यन्तरात्मकत्वाभावादन्योन्यानुवेधेन स्वभावान्तरभावनिबन्धनस्यैव तत्त्वात्, अत्र च स्निग्धोष्णत्वयोर्गुञ्जाफले रक्तत्वकृष्णत्वयोरिव खंडशोव्याप्त्याऽवस्थानात्, जात्यन्तरात्मकस्निग्धोष्णत्ववशादिति च दाडिमे श्लेष्मपित्तोभयदोषाकारित्वमिष्टमेव, "स्निग्धोष्णं दाडिमं रम्यं श्लेष्मपित्ताविरोधि चेति" वचनादिति संप्रदायः। यद्यपि जात्यन्तरत्वं न प्रत्येककार्याकारित्वेन नियतं, भेदाभेदेन भेदाभेदव्यवहारात्, तथापि विभिन्नधर्मयोरभिव्याप्य समावेश एवोक्तनिदर्शनमन्यत्रोक्तम्। नृसिंहनिदर्शनं तु समावेशमात्र एव, तत्र नृत्वसिंहत्वयोरन्यान्यभागावच्छेदेनैव समावेशात्। न च भेदाभेदाद्यसमावेश एव, अनुभवबाधात्। न च सामान्यतोऽसमावेशव्याप्तिकल्पनादनुभवभ्रान्तत्वम्, प्रतियोग्यादिगर्भतया विशिष्यैव भेदाभेदाद्यसमावेशव्याप्तिकल्पनादिति तु तत्त्वम्। द्रव्यपर्याययोर्वास्तवोऽभेद एव संख्यासंज्ञालक्षणकार्यभेदात्त्वस्वाभाविको भेद इति तु न रमणीयम्, भेदस्यास्वाभाविकत्वे संख्यादीनां निरालंबनत्वात्। कथं तर्ह्येकत्रैव कदाचिद्गुरुरित्येकवचनं,कदाचिच्च गुरव इति बहुवचनम्। उच्यते।द्रव्यपर्याययोर्यथाक्रममुद्भूतानुद्भूतत्वविवक्षणाच्छाब्दन्यायानुसरणात्। यदा तूभयोरप्युद्भूतत्वं विवक्ष्यते, तदा भवतु। नन्वेवं पर्यायनयोद्भूतत्वप्रयुक्तविवक्षयैकत्रापि घटे "घटा" इति प्रयोगापत्तिः, द्रव्यनयोद्भूतत्त्वप्रयुक्तैकत्वविवक्षया च"आपो दारा" इत्यादावप्येकवचनापत्तिः, उभयविवक्षया च "मनुष्यो

गच्छन्ती"त्यादिप्रयोगापत्तिः । एकत्वधर्मितावच्छेदकत्वबहुत्वप्रकारकप्रत्यये इच्छाहेतुत्वेऽप्येकत्वद्वित्वन्यायेनैकत्वबहुत्वबोधस्याप्रत्यूहत्वादेतादृशशब्दासाधुत्वान्नैता आपत्तय इति चेत्तथापि साधुत्वभ्रान्त्या जायमानेदृशज्ञानप्रामाण्योपपत्तिरितिचेदत्र वदन्ति–नयविवक्षायां यद्धर्मप्रकारेणैकत्वबहुत्वविषयत्वं, तज्जन्यशाब्दबोधेऽपि तद्धर्मप्रकारेणैवेति नोक्तदोषः । [१]घटरूपादय एवेति द्रव्यार्थिकविवक्षया तच्चैवंशाब्दबोधाद्घटो रूपादय एवेति पर्यायार्थविवक्षया च तथैव शाब्दबोधात् । यदा तु द्रव्यपर्यायनययोरेकत्वबहुत्वाभ्यां नोद्देशो, न वा विधानं, किं तु तदुपरागेण सत्वाद्येव प्रतिपिपादयिषितम्, तदा ताभ्यां "घटोऽस्ति" "रूपादयः सन्ति" इत्येवाभिलापः । यदा तूभयगोचरयोर्धर्मधर्मिभावेन प्रतिपिपादयिषा, तदा घटस्य रूपादय इत्येवाभिलापः । अवच्छेदकविनिर्मोकेनैकत्र बहुत्वं त्वनुशासनोपग्रहेणैव नयः प्रकाशयतीति नैकघटादौ "घटा" इत्यादिप्रयोगापत्तिः । साधुत्वभ्रान्त्या जायमानज्ञाने च विषयाबाधरूपप्रामाण्यसत्त्वेऽपि स्वावच्छेदकधर्मानवधारणेन स्वपरव्यवसायित्वलक्षणं न प्रामाण्यं । घटस्य रूपादय इत्येकदैवैकवचनबहुवचनप्रयोगः, अत एव शबलरूपत्वे कथमेकतरप्रतिपत्तिरिति परास्तम् । सन्निकर्षविप्रकर्षादिवशात् यथाक्षयोपशमं द्रव्यपर्यायप्रधानभावेनार्थन्यायात्, भावेनाप्रधानगुणभूतेऽपि वस्तुनि सत्त्वघटत्वादिप्रतिपत्तेः, तदिदमुक्तमर्पितानर्पितसिद्धेरित्यधिकं त्रिसूत्र्यालोके । द्वौ मूलभेदौ द्रव्यार्थिकः पर्यायार्थिकश्च । तत्र द्रव्यमात्रग्राही नयो द्रव्यार्थिकः, अयं हि द्रव्यमेव तात्त्विकमभ्युपैति, उत्पादविनाशौ पुनरतात्त्विकौ आविर्भावतिरोभावमात्रत्वात् । पर्यायमात्रग्राही पर्यायार्थिकः, अयं ह्युत्पादविनाशपर्यायमात्राभ्युपगमप्रवणः, द्रव्यं तु सजातीयक्षणपरंपरातिरिक्तं न मन्यते, तत एव प्रत्यभिज्ञाद्युत्पत्तेः । न चैवमितरांशप्रतिक्षेपित्वाद्दुर्नयत्वम्,

१ घट एव रूपादय इति ।

तत्प्रतिक्षेपस्य प्राधान्यमात्र एवोपयोगात्, एतद्विषयविस्तरस्तु नात्राभिधीयते ग्रन्थान्तरप्रसंगात्। आद्यस्य चत्वारो भेदा "नैगमः संग्रहो व्यवहार ऋजुसूत्रश्चेति" जिनभद्रगणिक्षमाश्रमणप्रभृतयः। ऋजुसूत्रो यदि द्रव्यं नाभ्युपेयात्तदा "उज्जुसुअस्स एगे अणुवउत्ते एगं दव्वावस्सयं पुहत्तं णेच्छइ त्ति" सूत्रं विरुध्येत। "ऋजुसूत्रवर्जास्त्रय एव द्रव्यार्थिकभेदा" इति तु वादिनः सिद्धसेनस्य मतम्। अतीतानागतपरकीयभेदपृथक्त्वपरित्यागादृजुसूत्रेण स्वकार्यसाधकत्वेन स्वकीयवर्तमानवस्तुन एवोपयोगमात्रस्य तुच्छांशध्रुवांशलक्षणद्रव्याभ्युपगमः, अत एव नास्यासद्घटितभूतभाविपर्यायकारणत्वरूपद्रव्यत्वाभ्युपगमोऽपि। उक्तसूत्रं त्वनुयोगांशमादाय वर्तमानावश्यकपर्याये द्रव्यपदोपचारात्समाधेयम्। पर्यायार्थिकेन मुख्यद्रव्यपदार्थस्यैव प्रतिक्षेपादध्रुवधर्माधारांशद्रव्यमपि नास्य विषयः शब्दनयेष्वतिप्रसंगादित्येतत्परिष्कारः। पर्यायार्थिकस्य त्रयो भेदाः "शब्दः समभिरूढ एवंभूतश्चेति" संप्रदायः। ऋजुसूत्राद्याश्चत्वार इति तु वादी सिद्धसेनः। तदेवं सप्तोत्तरभेदाः। शब्दपदेनैव सांप्रतसमभिरूढैवंभूतात्मकनयभेदत्रयोपसंग्रहात्पंचेत्यादेशान्तरम्। ते च प्रदेशप्रस्थकवसतिदृष्टान्तैर्यथाक्रमं शुद्धिभाजः। तथाहि—नैगमनयस्तावद्धर्माधर्माकाशजीवस्कन्धानां तद्देशस्य चेति षण्णां प्रदेशमाह। देशप्रदेशो नातिरिच्यते, "दासेन मे" इत्यादिन्यायाद्देशस्य स्वीयत्वेन तत्प्रदेशस्यापि स्वीयत्वाव्यभिचारात्पंचानामेव प्रदेश इति संग्रहः। व्यवहारस्त्वाह—पञ्चानां प्रदेशस्तदा स्याद्यदि साधारणः स्यात्, यथा "पंचानां गोष्ठिकानां हिरण्यमिति" प्रकृते तु प्रत्येकवृत्तिः प्रदेश इति पञ्चविधः प्रदेश इति भणितव्यम्। नन्वेवं घटपटयो रूपमित्यपि न स्यात्, द्वित्वाश्रयवृत्तित्वबोधे तयोर्घटरूपमित्यस्यापि आपत्तेः. द्विवृत्तित्वबोधे च प्रकृतप्रयोगस्याप्यनापत्तेरिति चेन्न स्यादेवैतादृशस्थले समुदि-

तद्वृत्तित्वबोध एव व्यवहारसामर्थ्यात्, संग्रहाश्रयणात्तु सामान्यत एव साकांक्षत्वात् स्यादपि। ऋजुसूत्रस्तु ब्रूते–पंचविधप्रदेश इत्युक्ते प्रतिस्वं पंचविधत्वान्नयात् पंचविंशतिविधत्वप्रसंगः। न च सामान्यतस्तदन्वयान्न बाध इति वाच्यम्, विशेषविनिर्मोकेण तदसिद्धेः। किं च, किमत्र पंचविधत्वम्, पंचप्रकारत्वमिति चेत् कः प्रकारः, संख्या वा, बुद्धिविशेषविषयत्वं वा, भेदो वा। नाद्यः, अनन्तेषु प्रदेशेषु पंचसंख्यावधारणासिद्धेः। न द्वितीयः, पंचप्रकारकबुद्धिविषयत्वस्य प्रत्येकमभाविनः पंचस्वप्यभावात्। न च गेहेषु शतमश्वा इतिवत्प्रत्येकं प्रत्येकधर्मप्रकारकबुद्धिविषयत्वं, तत्सामान्यविश्रामेऽनन्वयात्, विशेषविश्रामे च भजनानामान्तरत्वात्। न तृतीयः, अतिरिक्तभेदानिरुक्तेः। ततो भाज्यः प्रदेशः स्याद्धर्मास्तिकायस्य, स्यादधर्मास्तिकायस्येत्यादि। शब्दनयस्तु प्रतिजानीते–अयुक्तमुक्तमेतदृजुसूत्रेण, भजनाया विकल्परूपत्वेनैकतरमादाय विनिगन्तुमशक्यत्वात्, धर्मास्तिकायप्रदेशस्यापि अधर्मास्तिकायत्वेन भजनीयत्वप्रसंगात्। तदेवमभिधेयं–धर्मे धर्म इति वा प्रदेशो धर्मः, अधर्मेऽधर्म इति वा प्रदेशोऽधर्मः, आकाश आकाश इति वा प्रदेश आकाशः, जीवे जीव इति वा प्रदेशो नोजीवः, स्कन्धे स्कन्ध इति वा प्रदेशो नोस्कन्ध इति। अत्र धर्माधर्मास्तिकायादेरैक्यात्तत्प्रदेशस्य धर्मास्तिकायादिरूपतानतिप्रसक्तेति तथोक्तिः। जीवस्कन्धयोस्तु प्रतिस्वमनन्तत्वात् कथमधिकृतप्रदेशस्य सकलसन्तानात्मकत्वसंभव इति विवक्षितप्रदेशे सकलसन्तानैकदेशविवक्षितसन्तानात्मकत्वप्रतिपादनाय नोजीवत्वनोस्कन्धत्वोक्तिरिति ध्येयम्। समभिरूढस्त्वाह–शब्देनापि न सूक्ष्ममीक्षाञ्चक्रे "धर्मे प्रदेश" इत्यादिवाक्यात् "कुण्डे बदरमित्यादे"रिव भेदप्रसंगात्। क्वचिदभेदे सप्तमीप्रयोगेऽप्यभेदे प्रकारकबोधार्थं कर्मधारयस्यैवावश्याश्रयणीयत्वाद्द्वितीयपक्ष एव युक्त इति। एवंभूतस्त्वाह–देशप्रदेशकल्पनारहितमखण्डमेव वस्तु अ-

भिधानीयम्, देशप्रदेशयोरसत्त्वात्, भेदे संबन्धानुपपत्तेः, अभेदे सहोक्त्यनुपपत्तेः । न च वन्ध्यहिमवदादिभावाभावावच्छेदकतयाकाशादिदेशसिद्धिः, परेण समं संबन्धस्यैवानुपगमात् तादात्म्यतदुत्पत्त्यन्यतरानुपपत्तेरिति दिक् ॥ प्रस्थको मगधदेशप्रसिद्धो धान्यमानविशेषः, तदर्थं वनगमनदारुच्छेदनतक्षणोत्किरणलेखनप्रस्थकपर्यायाभिधानेषु यथोत्तरशुद्धा नैगमभेदाः । अतिशुद्धनैगमस्त्वाकुट्टितनामानं प्रस्थकमाह । व्यवहारेऽप्ययमेव पन्थाः । संग्रहस्तु विशुद्धत्वात्कारणे कार्योपचारं कार्याकरणकाले च प्रस्थकं नांगीकुरुते । न च तदा घटाद्यात्मकत्वप्रसंगः, तदर्थक्रियां विना तत्त्वायोगात् । घटादिशब्दार्थक्रिया तत्राप्यस्त्येवेति चेन्न, असाधारणतदर्थक्रियाकारित्वस्यैव तदात्मकत्वप्रयोजकत्वात् । तथापि प्रस्थकक्रियाविरहे नायं प्रस्थको घटाद्यनात्मकत्वाच्च नाप्रस्थक इत्यनुभयरूपः स्यात् । न स्यात्, प्रतियोगिकोटौ स्वस्यापि प्रवेशेन यावद्घटाद्यनात्मकत्वासिद्धेः । अर्थक्रियाभावाभावाभ्यां द्रव्यभेदाभ्युपगमे ऋजुसूत्रमतानुप्रवेश इति चेन्न, नैगमोपगतसंग्रहणाय क्वाचित्कतथोपगमेन तदननुप्रवेशात् । इत्थं च व्यक्तिभेदात्तद्व्यक्तिगतं प्रस्थकत्वसामान्यमपि नास्तीति नात्र कश्चिद्दोषो विना व्यवहारबाधमिति दिक् । ऋजुसूत्रस्तु निष्पन्नस्वरूपोऽर्थक्रियाहेतुः प्रस्थकः, तत्परिच्छिन्नं च धान्यमपि प्रस्थक इत्याह, उभयसमाजादेव मानोपपत्तेरेकतरविनाभावे परिच्छेदासंभवात् । कथं तर्हि प्रस्थकेन धान्यं मीयत इति करणरूपानुप्रविष्टस्य क्रियारूपाप्रवेशादिति चेत्, सत्यम्, विवक्षाभेदादुभयरूपानुप्रवेशोपपत्तेरिति दिक् । शब्दसमभिरूढैवंभूतास्तु प्रस्थकाधिकारज्ञगतात् प्रस्थककर्तृगताद्वा प्रस्थकोपयोगादतिरिक्तं प्रस्थकं न सहन्ते । निश्चयमानात्मकप्रस्थकस्य जडवृत्तित्वायोगात्, बाह्यप्रस्थकस्याप्यनुपलंभकालेऽसत्त्वेनोपयोगानतिरेकाश्रयणात्, अन्ततो ज्ञानाद्वैतनयानुप्रवेशाद्वा ।

न च ज्ञानाज्ञानात्मकत्वोभयनयविषयसमावेशविरोधात् प्रत्येकमनयत्वमाशंकनीयम्, तादात्म्येनोभयरूपासमावेशेऽपि विषयत्वतादात्म्याभ्यां तदुभयसमावेशात्। विषयत्वमपि कथंचित्तादात्म्यमिति तु नयान्तराकूतम्, यदाश्रयणेनार्थाभिधानप्रत्ययानां तुल्यार्थत्वमुक्तमिति दिक्॥ वसतिराधारता, सा च यथोत्तरशुद्धानां नैगमभेदानां लोके तिर्यग्लोके जंबूद्वीपे भरतक्षेत्रे तद्दक्षिणार्धे पाटलिपुत्रे देवदत्तगृहे तन्मध्यगृहे चावसेया। अतिशुद्धनैगमस्तु वसन् वसतीत्याह। न चाधारताधारस्वरूपा तत्संयोगस्वरूपा वा, उभयथापि गृहकोण इव लोकेऽप्येकक्षेत्रतया तदविशेषात् किं विशुद्धितारतम्यं न ह्यत्र प्रस्थकन्यायवद्गौणमुख्यविषयकृतो विशेषोऽस्तीति चेत् सत्यम्, देवदत्तसंयोगपर्यायपरिणतगृहकोणक्षेत्रस्याखंडक्षेत्राद्धर्मभेदावेशेन पृथक्कृतस्य यथाक्रमं गुरुगुरुतरविषये भेदोपचारेण विशुद्ध्यपकर्षसंभवात्, अन्यथा लोके वसामीत्यन्वयस्यैवानुपपत्तिः। न हि कृत्स्ने लोके देवदत्तवसतिरस्ति, न च विनोपचारं कृत्स्नलोकरूढाल्लोकपदात्तद्देशोपस्थितिरस्ति। हन्तैवं वृक्षे कपिसंयोग इत्यत्राप्युपचारः स्यादिति चेत्, कः किमाह, स्यादेवम्। कार्त्स्न्यविनिर्मोकेणान्वयोपपत्तौ किमुपचारेणेति चेत्, देशाग्रहे तद्विनिर्मोक एव कथं। पदशक्त्यनुपग्रहादिति चेन्न, स्कन्धपरस्य वृक्षपदस्यैकत्वपरिणतिरूपस्कन्धपदार्थेनैवोपग्रहात्,। भेदविनिर्लुठित एव वृक्षपदार्थ आश्रीयत इति चेन्नानुभवबाधेन तथाश्रयणायोगादिति दिक्। प्रयोगे क्वेत्याद्याकांक्षाबाहुल्याबाहुल्यकृतं विशुद्ध्यविशुद्धिवैचित्र्यम्। अत एव वसन् वसतीति प्रयोगस्य व्युपरताकांक्षत्वात्सर्वविशुद्धनैगमभेदत्वमित्यपि वदन्ति। व्यवहारेऽप्ययमेवानुसरणीयः पन्थाः। न चात्र कथं वसन् वसतीति भेदः, पाटलिपुत्रादन्यत्र गतस्यापि पाटलिपुत्रवासित्वेनैव व्यवहारादिति चेत् सत्यम्, तत्र बहुकालप्रतिबद्धतत्कृतगृहकुटुंबस्वामित्वाद्यर्थे

वासित्वपदोपचारेण तथाप्रयोगात् । वस्तुतो वसन्नेव वसतीति व्यवहारेणाभ्युपगमात्, अन्यथा नाद्य सोऽत्र वसतीति व्यवहारो न स्यात् । व्यवहारबलवत्त्वाबलवत्त्वेऽभ्यासानभ्यासाधीने इति नात्र निर्बलत्वाशंकापि युक्तेति दिक् । संग्रहस्तु संस्तारकारूढ एव वसतीत्यभ्युपैति, अन्यत्र हि वासार्थ एव तस्य न घटते । न चायं प्राग्वदुपचारमप्याश्रयते । अत एव मूले वृक्षः कपिसंयोगीत्यत्राप्येतन्मते मूलाभिन्नो वृक्षः कपिसंयोगीत्येवार्थ इति दिक् । ऋजुसूत्रस्तु येष्वाकाशप्रदेशेषु देवदत्तोऽवगाढस्तेष्वेव तद्वासमभ्युपैति । संस्तारके तद्वसत्युपगमे तु गृहकोणादावपि तदुपगमप्रसंगः । संस्तारकावच्छिन्नव्योमप्रदेशेषु तु संस्तारक एवावगाढो न तु देवदत्तोऽपीति न तत्रापि तद्वसतिभणितिः । संस्तारकगृहकोणादौ देवदत्तवसतिव्यवहारस्तु प्रत्यासत्तिदोषाद्भ्रान्तिमूलकः । विवक्षिताकाशप्रदेशेष्वपि च वर्तमानसमय एव देवदत्तवसतिः नातीतानागतयोः, तयोरसत्त्वात्, प्रतिसमयं चलोपकरणतया तावदाकाशप्रदेशमात्रावगाहनासंभवाच्चेति दिक् । शब्दसमभिरूढैवंभूतास्तु स्वात्मन्येव वसतिमंगीकुर्वते । न ह्यन्यस्यान्यत्र वसतिसंभवः, संबन्धाभावात्, असंबद्धयोराधाराधेयभावे चातिप्रसंगादिति दिक् ।

एवमेभिः श्रुतोपदर्शितनिदर्शनैरेतेषां यथाक्रमं विशुद्धत्वमवसेयम् । अथैतेषां लक्षणानि वक्ष्यामः । निगमेषु भवोऽध्यवसायविशेषो नैगमः, तद्भवत्वं च लोकप्रसिद्धार्थोपगन्तृत्वम्, लोकप्रसिद्धिश्च सामान्यविशेषाद्युभयोपगमेन निर्वहति । अथ स्वतंत्रसामान्यविशेषोभयाभ्युपगमे कणादवद्दुर्नयत्वम्, शबलतदभ्युपगमे च प्रमाणत्वमेव, यथास्थानं प्रत्येकं गौणमुख्यभावेन तदुपगमे च संग्रहव्यवहारान्यतरप्रवेश इति चेन्न, तृतीयपक्षाश्रयणे दोषाभावात्, उपधेयसांकर्येऽप्युपाध्योरसां-

कर्यात् । आह अतिरिक्तसामान्यविशेषानभ्युपगमे कथमनुवृत्तिव्यावृत्तिबुद्धी, न हि ते अहेतुके, न वैकहेतूद्भवे, न वा निर्विषय एव दोषजे इति मैवम्, वस्तुत एव मृदादितुल्यपरिणामेनानुवृत्तिबुद्धेरूर्ध्वताद्यतुल्यपरिणामेन च व्यावृत्तिबुद्धेरुपपत्तेरतिरिक्तकल्पने मानाभावात् । तदुक्तम्–" वस्तुत एव समानः, परिणामोऽयं स एव सामान्यम् । असमानस्तु विशेषो, वस्त्वेकमनेकरूपं तु " ॥ १ ॥ इति । अतिरिक्तं तु सामान्यं व्यक्तिष्वेकदेशेन समवेयात्, कार्त्स्न्येन वा । आद्ये सावयवत्वप्रसंगः, अन्त्ये च प्रतिव्यक्ति नानात्वापत्तिः । न च व्यक्तिवृत्तित्वं सामान्यस्योपगम्यत एव, देशकार्त्स्न्ययोस्त्वनुपगमादनुक्तोपालंभ इति वाच्यम्, उक्तान्यतरप्रकारव्यतिरेकेणान्यत्र वृत्त्यदर्शनात्, अत्रान्यतरप्रकाराश्रयणेऽन्यतरदोषापत्तेर्वज्रलेपत्वादिति संमतिटीकाकृतामभिप्रायः । प्रतिव्यक्तिपर्याप्तत्वे प्रतिव्यक्ति परिसमाप्त्यापत्तिः, अन्यथा तु द्वित्वादितुल्यतापत्तिरिति न्यायालोके समर्थितमस्माभिः । समानपरिणामरूपसामान्याभ्युपगमेऽपि प्रतिविशेषं तदन्यत्वाद्विशेषादविशेष इति चेन्न, स्वभावभेदेन तद्विशेषात्, अत एव समानत्वं सामान्यगर्भम्, तच्च तद्ग्रहे दुर्ग्रहमिति परास्तम् । तथाप्यनुवृत्तिधीजननस्वभावपरिणामत्वेनानुवृत्तिधीजनकतात्माश्रयादिति चेन्न, वस्तुनस्तत्स्वभावस्य मृत्परिमाणत्वादिना जनकत्वेऽदोषात्, जनकताया अपि परिणामरूपत्वेन नानात्वस्य दोषानावहत्वादेकत्वसंभवेन कार्यानुमानानुच्छेदादिति दिक् । अविषय एवायं सामान्याकार इत्यपि न युक्तम्, बीजाभावात् । अनादिवासनादोषो बीजमिति चेन्न, वासनाया बोधरूपत्वे समनन्तरज्ञानेपि तत्प्रसंगात् । विशिष्टबोधरूपत्वेन च किं वैशिष्ट्यमिति वाच्यम्, अनादिहेतुपरंपराजन्यत्वमिति चेन्न, तत्रापि तन्मात्राविशेषात्, समुद्रोर्मिकल्पनाया अपि चित्रहेतुस्वभावांगीकारं विना वक्तुमशक्यत्वादिति विवेचितमन्यत्र । विशे-

षातिरेकेऽपि न प्रमाणमस्ति, विशेषाणामिव नित्यद्रव्याणामपि स्वत एव व्यावृत्तत्वात्, अन्यथा नित्यगुणेष्वपि तत्कल्पनप्रसंगात्। आश्रयविशेषेणाश्रितव्यावृत्तेर्नायं दोष इति चेदाश्रितविशेषेणाश्रयव्यावृत्तिरित्येव किमिति नाद्रियते, सद्विशिष्टमेव सर्वं भेदप्रतियोगित्वानुयोगित्वादेः स्वरूपसंबन्धात्मकत्वेनाप्यन्ततो जगदैक्यपर्यवसानात्, भेदस्याविद्योपकल्पितत्वात् तथैव श्रुतिस्वरसादित्यद्वैतवादिश्रीहर्षमतमपि न रमणीयम्, भेदस्यावास्तवत्वे तदभावरूपाभेदस्यापि तथात्वात्, तादात्म्यस्यापि जगतः पौनरुक्त्याद्यापत्त्या सर्वथा वक्तुमशक्यत्वाच्चेत्यन्यत्र विस्तरः। "णेगेहिं माणेहिं मिणइत्ति य णेगमस्स य निरुत्ति त्ति" सूत्रम्। नैकमानमेयविषयोऽध्यवसायो नैगम इत्येतदर्थः। नैगमेष्वभिहिताः शब्दास्तेषामर्थः शब्दार्थपरिज्ञानं च देशसमग्रग्राही नैगम इति तत्त्वार्थभाष्यम्। अत्र पूर्वदलं मडुकलक्षणकथनाभिप्रायम्, उत्तरदलं च विषयविभागविधानिरूपणाभिप्रायमात्रं। देशग्राहित्वं विशेषप्रधानत्वं, समग्रग्राहित्वं च सामान्यप्रधानत्वं पारिभाषिकम्। अन्यथा सामान्यविशेषयोर्द्वयोरपि वस्त्वेकदेशत्वात् किं द्वैरूप्यं स्यात्। एवमस्य प्रमाणत्वं स्यात, न स्यात्प्रत्येकं भेदशस्तदुभयविशेषत्वेऽपि संभूयोभयविषयत्वायोगात्। अस्य च चत्वारोऽपि निक्षेपा अभिमता नाम स्थापना द्रव्यं भावश्चेति। घट इत्यभिधानमपि घट एव "अर्थाभिधानप्रत्ययास्तुल्यनामधेया" इति वचनात, वाच्यवाचकयोरत्यन्तभेदे प्रतिनियतपदशक्त्यनुपपत्तेश्च। घटाकारोऽपि घट एव, तुल्यपरिणामत्वात्। अन्यथा तत्त्वायोगात्, मुख्यार्थमात्राभावादेव तत्प्रतिकृतित्वोपपत्तेः। मृत्पिण्डादिर्द्रव्यघटोपि घट एवान्यथा परिणामपरिणामिभावानुपपत्तेः। भावघटपदं चासंदिग्धवृत्तिकमेव। ननु नामादीनां सर्ववस्तुव्यापित्वमुपगम्यते, न वा। आद्ये व्यभिचारः, अनभिलाप्यभावेषु नामनिक्षेपाप्रवृत्तेः,

द्रव्यजीवद्रव्यद्रव्याद्यसिद्ध्याभिलाप्यभावव्यापिताया अपि वक्तुमशक्यत्वाच्च । अन्त्ये “ जत्थवि य ण जाणिज्जा चउक्कयं णिक्खिवे तत्थ त्ति ” सूत्रविरोधः, अत्र यत्तत्पदाभ्यां व्याप्त्युपस्थितेरिति चेदत्र वदन्ति, तत्तद्व्यभिचारस्थानान्यत्वविशेषणान्न दोषः । तदिदमयुक्तम्, यद्येकस्मिन्न संभवति, नैतावता भवत्यव्यापितेति । अपरे त्वाहुः, केवलिप्रज्ञारूपमेव नामानभिलाप्यभावेष्वस्ति, द्रव्यजीवश्च मनुष्यादिरेव, भाविदेवादिजीवपर्यायहेतुत्वात् । द्रव्यद्रव्यमपि मृदादिरेव, आदिष्टद्रव्यत्वानां घटादिपर्यायाणां हेतुत्वादिति । एतच्च मतं नातिरमणीयम्, द्रव्यार्थिकेन शब्दपुद्गलरूपस्यैव नाम्नोऽभ्युपगमात् । मनुष्यादीनां द्रव्यजीवत्वे च सिद्धस्यैव भावजीवत्वप्रसंगात्, आदिष्टद्रव्यहेतुद्रव्यद्रव्योपगमे भावद्रव्योच्छेदप्रसंगाच्च । गुणपर्यायवियुक्तः प्रज्ञास्थापितो द्रव्यजीव इत्येकेषां मतं, एतदपि न सूक्ष्मम्, सतां गुणपर्यायाणां बुद्ध्यापनयनस्य कर्तुमशक्यत्वात् । न हि यादृच्छिकज्ञानायत्तार्थपरिणतिरस्ति, जीवशब्दार्थज्ञस्तत्रानुपयुक्तो जीवशब्दार्थज्ञस्य शरीरं वा जीवरहितं द्रव्यजीव इति नाव्यापिता नामादीनामित्यपि वदन्ति । ननु तथापि नैगमेन नामादिचतुष्टयाभ्युपगमे तस्य द्रव्यार्थिकत्वव्याहतिः स्यात्, द्रव्यार्थिकेन द्रव्यस्यैवाभ्युपगमात्, द्रव्यं पर्यायतया, पर्यायं च गौणतयाभ्युपगच्छन् द्रव्यार्थिकोऽपि भावनिक्षेपसह इति । हन्त तर्हि त्वदुक्तरीत्या शब्दनया अपि द्रव्यनिक्षेपसहा इति कथम् “ भावं चिय सद्दणया सेसा इच्छंति सव्वणिक्खेवे त्ति ” भाष्योक्तव्यवस्था । एतेन द्रव्यार्थिकपर्यायार्थिकयोर्द्वयोस्तुल्यवादेनोभयाभ्युपगमः, परमाद्यस्य सर्वथाऽभेदेनान्त्यस्य तु सर्वथा भेदेन ततो नैकस्योभयविषयत्वे विषयान्तरग्रहार्थमन्यकल्पनानुपपत्तिः, भेदाभेदोपरागेणोभयग्रहार्थमुभयकल्पनावश्यकत्वादिति द्रव्यार्थिकस्यापि पर्यायसहत्वमित्यपास्तम् । एवं सति पर्यायार्थिकस्य

शब्दादेरपि द्रव्यसहत्वापत्तेरत्यन्तभेदाभेदग्राहिणोर्द्वयोः समुदितयोरपि मिथ्यादृष्टित्वादत्यन्ताभेदे पर्यायद्वयासहोक्तिप्रसंगात्, तथा च गुणो द्रव्यमिति द्रव्यार्थिकनयाभिलापानुपपत्तेः, अत्यन्तभेदेऽपि पर्यायार्थिकेन द्रव्यग्रहे द्रव्यार्थिकस्यान्तर्भूतत्वप्रसक्तेः, एकस्मिन्द्रव्यपदे पर्यायार्थिकनयमतेऽपि द्रव्यसामायिकमित्यस्याविरोधप्रसंगात्, एतन्मतस्य भाष्यकृतैव निरस्तत्वाच्चेति चेदत्रोच्यते–अविशुद्धानां नैगमभेदानां नामाद्यभ्युपगमप्रवणत्वेऽपि विशुद्धनैगमभेदस्य द्रव्यविशेषणतया पर्यायाभ्युपगमान्न तत्र भावनिक्षेपानुपपत्तिः । अत एवाह भगवान् भद्रबाहुः–" जीवो गुणपडिवन्नो णयस्स दव्वट्ठियस्स सामइयं ति " । न चैवं पर्यायार्थिकत्वापत्तिः, इतराविशेषणत्वरूपप्राधान्येन पर्यायानभ्युपगमात् । शब्दादीनां पर्यायार्थिकनयानां तु नैगमवदविशुद्धभावान्न नामाद्यभ्युपगन्तृत्वम् । वास्तवतद्विषयत्वं तु नोक्तविभागव्याघातायेति पर्यालोचयामः । ननु तथापि " णामाइतियं दव्वट्ठियस्स भावो अ पज्जवणयस्स त्ति " पूर्वमभिधाय पश्चात् " भावं चिय सद्दणया सेसा इच्छंति सव्वणिक्खेवे " तथा " सव्वणया भावमिच्छंति त्ति " वदतां भाष्यकृतां कोऽभिप्राय इति चेदयमभिप्रायः–पूर्वं शुद्धचरणोपयोगरूपभावमंगलाधिकारसंबन्धान्नैगमादिना जलाहरणादिरूपभावघटाभ्युपगमेऽपि घटोपयोगरूपभावघटानभ्युपगमात्तथोक्तिः, पृथगनिक्षेपाच्च न प्रत्ययस्याभिधानतुल्यता, अग्रे तु व्यवस्थाधिकाराद्विशेषोक्तिरिति मुख्यत्वरूपस्वातंत्र्येण नामादित्रयविषयत्वमेव द्रव्यार्थिकस्येत्यभिप्रेत्य, मतान्तरेण वा तथोक्तिः, अत एव तत्त्वार्थवृत्तावपि अत्र चाद्या नामादयस्त्रयो विकल्पा द्रव्यार्थिकस्य तथा तथा सर्वार्पितत्वात् । पाश्चात्यः पर्यायनयस्य तथापरिणतिविज्ञानाभ्यामिति । एतन्मतावष्टम्भेनैव " जीवो गुणपडिवन्नो णयस्स दव्वट्ठियस्स सामइयं । सो चेव पज्जवणयट्ठियस्स जीवस्स एस गुणो " ॥ १ ॥

इत्यावश्यकगाथा किं द्रव्यं गुणो वा सामायिकमिति चिन्तायां द्रव्यार्थिकनयमते गुणं प्रतिपन्नो जीवः सामायिकम्, पर्यायार्थिकनयमते तु जीवस्य गुण एव सामायिकमित्युत्तरम्, अत्र च द्रव्यपर्यायनययोः शुद्धद्रव्यपर्यायावेव विषयौ, तत्र पर्यायद्रव्ययोर्विभिन्नयोः कल्पितयोः कुंडलतापन्नं स्वर्णं पत्रस्य नीलतेत्यादाविव, विशेषणतयाभिधानं तु न स्वविषयव्याघातायेत्यभिप्रायेण महता प्रबन्धेन भाष्यकृता व्याख्याता। मतान्तराभिप्रायेण तु पर्यायार्थिक एव द्रव्यस्य कल्पितस्य विशेषणत्वम्, द्रव्यार्थिके तु प्रागुपदर्शितदिशा[1] पर्यायस्याकल्पितस्यापि विशेषणत्वं न्याय्यमेव। न च नये विशेषणं कल्पितमेवेति नियमः "सावज्जजोगविरओ तिगुत्तो छसु संजओ। उवउत्तो जयमाणो आया सामाइयं होइ" ॥ १ ॥ इत्यत्र संग्रहनयस्वीकृतात्मसामान्यसामायिकविधिनियमनाय प्रवृत्तानां पर्यायशुद्धिमतां व्यवहारादिनयानां यावदेवंभूतमुत्तरोत्तरपर्यायकदंबकविशेषणोपरागेणैव प्रवृत्तिदर्शनात्। न च तत्र पर्यायनयानां संग्रहस्वीकृतविधिविशेषपर्यवसानार्थं पर्यायविशेषणमुद्रया प्रवृत्तावपि सविशेषण इत्यादिन्यायाच्छुद्धपर्यायविधावेव तात्पर्यात्, अन्यनयविधिनियमानुद्देशलक्षणस्वातंत्र्येण नयानां स्वविषयनिर्देशे विशेषणस्य कल्पितत्वनियम एवेति वाच्यम्। तथाप्यन्यत्वस्य स्वविषयविलक्षणविषयत्वरूपस्य निवेशेन नैगमभेदेषु विशुद्धनैगमे विशेषणस्य पर्यायस्याकल्पितत्वसिद्धेरप्रत्यूहत्वादित्यस्माभिरनुशीलितः पन्थाः समाकलितस्वसमयरहस्यैर्दिव्यदृशा निभालनीयः। नैगमाद्युपगतार्थसंग्रहप्रवणोऽध्यवसायविशेषः संग्रहः। सामान्यनैगमवारणाय नैगमाद्युपगतार्थपदम्। संग्रहश्च विशेषविनिर्मोकोऽशुद्धविषयविनिर्मोकश्चेत्यादिर्यथासंभवमुपादेयः। तेन न

१ प्राण्युपदर्शितेति.

प्रस्थकस्थले सामान्यविधेर[1]ऽसंग्रहादनुपपत्तिस्तत्प्रवणत्वं च तन्नियतबुद्धिव्यपदेशजनकत्वम्, तेन न नानार्थरूपसंग्रहस्य नयजन्यत्वानुपपत्तिदोषः। "संगहियपिंडियत्थं संगहवयणं समासओ बिंति त्ति" सूत्रम्। अत्र संगृहीतं सामान्याभिमुखग्रहणगृहीतं पिंडितं च विवक्षितैकजात्युपरागेण प्रतिपिपादयिषितमित्यर्थः। संगृहीतं महासामान्यं, पिंडितं तु सामान्यविशेष इति वार्थः। "अर्थानां सर्वैकदेशसंग्रहणं संग्रह" इति तत्त्वार्थभाष्यम्। अत्र सर्वं सामान्यमेकदेशश्च विशेषस्तयोः संग्रहणं सामान्यैकशेषः स्वीकार इत्यर्थः। अयं हि घटादीनां भवनानर्थान्तरत्वात्तन्मात्रत्वमेव स्वीकुरुते, घटादिविशेषविकल्पस्त्वविद्योपजनित एवेत्यभिमन्यते। जगदैक्ये घटपटादिभेदो न स्यादिति चेन्न स्यादेव वास्तवः, रज्जौ सर्पभ्रमनिबन्धनसर्पादिवदविद्याजनितः निर्वचनीयस्तु स्यादेवेत्याद्या एतन्मूलिका औपनिषदादीनां युक्तयः। अस्यापि चत्वारो निक्षेपा अभिमताः। ये त्वाहुर्नायं स्थापनामिच्छति, संग्रहप्रवणेनानेन नामनिक्षेप एव स्थापनाया उपसंग्रहात्। न च "नामं आवकहियं होज्जा ठवणा इत्तरिआ वा होज्जा आवकहिया वा होज्ज त्ति" सूत्र एवानयोर्विशेषाभिधानात्कथमैक्यरूप्यमित्याशंकनीयम्, पाचकयाचकादिनाम्नामप्ययावत्कथिकत्वात्तदव्यापकत्वात्। स्थूलभेदमात्रकथनम् पदप्रकृतिकृतिभ्यां नामस्थापनयोर्भेद इति चेत् कथं तर्हि गोपालदारके नामेन्द्रत्वम्। अथ नामेन्द्रत्वं द्विविधं इन्द्र इति पदत्वमेकमपरं चेन्द्रपदसंकेतविषयत्वम्, आद्यं नास्ति, द्वितीयं च पदार्थ इति न दोष इति चेत्तर्हि व्यक्त्याकृतिजातीनां पदार्थत्वेनेन्द्रस्थापनाया अपीन्द्रपदसंकेतविषयत्वात् कथं गोपालदारकवन्नामेन्द्रत्वम्। नामभावनिक्षेपसांकर्य-

---

१ विधयोऽसंग्रहादिति.

परिहारायेन्द्रपदसंकेतविषयत्वं नामेन्द्रत्वं निरुच्यत इति चेद्धन्त तर्हि सोऽयं विशेषो नामस्थापनासाधारण एव संगृह्यतामिति तेन विचारचंचुरधियो देवानांप्रियाः उपचाररूपसंकेतविशेषग्रहे द्रव्यनिक्षेपस्याप्यनतिरेकप्रसंगात्, याद्दच्छिकविशेषोपग्रहस्य चाप्रामाणिकत्वात्, पित्रादिकृतसंकेतविशेषस्यैव ग्रहणान्नामस्थापनयोरैक्यायोगात्। एवं च बहुषु नामादिषु प्रातिस्विकैक-रूपाभिसन्धिरेव संग्रहव्यापार इति प्रतिपत्तव्यम्। यद्दच्छयैव संग्रहस्वीकारे तु नाम्नोऽपि भावकारणतया कुतो न द्रव्यान्तर्भाव इति वाच्यम्। द्रव्यं परिणामितया भावसंबद्धं, नाम तु वाच्यवाचकभावेनेत्यस्ति विशेष इति चेत्तर्हि स्थापनाया अपि तुल्य-परिणामतया भावासंबद्धत्वात् किं न नाम्नो विशेष इति पर्यालोचनीयम्। स्यादेतत्, षण्णां प्रदेशास्वीकर्तुर्नैगमात् पञ्चानां तत्स्वीकार इवात्रापि चतुर्निक्षेपस्वीकर्तुस्ततस्त्रयस्वीकारेणैव संग्रहस्य विशेषो युक्त इति, मैवम्, देशप्रदेशवत् स्थापनाया उपचरितविभागाभावेन संग्रहविशेषादिति दिक्। लोकव्यवहारौपयिकोऽध्यवसायविशेषो व्यवहारः। "वच्चइ विणिच्छियत्थं ववहारो सव्वदव्वेसुत्ति" सूत्रविनिश्चितार्थप्राप्तिश्चास्य सामान्यानभ्युपगमे सति विशेषाभ्युपगमात्। अत एव विशेषेणावह्रियते निराक्रियते सामान्यमनेनेति निरुक्त्युपपत्तिः। जलाहरणाद्युपयोगिनो घटादिविशेषानेवायमंगीकरोति नतु सामान्यमर्थक्रि-याऽहेतोस्तस्य शशशृंगप्रायत्वाद्। ननु घटोयं द्रव्यमित्यादौ घटत्वद्रव्यत्वादिकं कथमपह्नोतुं शक्यमिति चेन्न कथंचिदन्यापो-हरूपं तत्, न त्वतिरिक्तमित्येव परमुच्यते, अखंडाभावनिवेशाच्च नान्योन्याश्रयः। यदि चैवमप्यभावसामान्याभ्युपगमाप-त्तिस्तदा तु सर्वत्र शब्दानुगमादेवानुगतव्यवहारः कारणत्वव्याप्त्यादौ परेणापीत्थमेवाभ्युपगमादित्यादिकं प्रपञ्चितमन्यत्र। "लौकिकसम उपचारप्रायो विस्तृतार्थो व्यवहार इतितत्वार्थभाष्यं"। विशेषप्रतिपादनपरमेतत्। यथाहि लोको

निश्चयतः पंचवर्णेऽपि भ्रमरे कृष्णवर्णत्वमेवांगीकरोति तथायमपीति लौकिकसमः। न च कृष्णो भ्रमर इत्यत्र विद्यमाने-तरवर्णप्रतिषेधाद्भ्रान्तत्वम्, अनुद्भूतत्वेनेतराविवक्षा, तदुदासेऽतात्पर्यात्, उद्भूतवर्णविवक्षाया एवाभिलापादिव्यवहार-हेतुत्वात्। कृष्णादिपदस्योद्भूतकृष्णादिपरत्वाद्वाऽतात्पर्यग्रं प्रत्येतस्याप्रामाण्येऽपि तात्पर्यग्रं प्रति प्रामाण्यात्, लोकव्यव-हारानुकूलत्वात्। नापि निश्चयतः, अवधारणाद्यमत्वादित्यसत्यमेव। ननु कृष्णो भ्रमर इति वाक्यवत् पंचवर्णो भ्रमर इति वाक्यमपि कथं न व्यवहारनयानुरोधि, तस्यापि लोकव्यवहारानुकूलत्वात्, आगमबोधितार्थेऽपि व्युत्पन्नलोकस्य व्यवहारदर्शनात्, लोकबाधितार्थबोधकवाक्यस्याव्यवहारकत्वे चात्माऽरूपवानित्यादिवाक्यस्याप्यव्यवहारकत्वापातात्तस्या-प्यात्मगौरत्वादिबोधकलोकप्रमाणबोधकत्वादभ्रान्तलोकबाधितार्थबोधकत्वं चोभयत्र तुल्यम्। प्रत्यक्षनियतैव व्यवहारवि-षयता, न त्वागमादिनियतेति तु व्यवहारदुर्नयस्य चार्वाकदर्शनप्रवर्तकस्य मतम्, न तु व्यवहारनयस्य जैनदर्शनस्पर्शिन इति चेत्सत्यम्। यद्यपि क्वचिददृष्टार्थे नैश्चयिकविषयतासंवलितैव व्यावहारिकविषयता स्वीक्रियते, तथापि लोकप्रसि-द्धार्थानुवादस्थले क्वचिदेव सेति कृष्णो भ्रमर इति वाक्ये स्वजन्यबोधे भ्रमरविषयतानिरूपितपंचवर्णत्वाख्यविषयतायां व्यावहारिकत्वाभावान्न तथात्वमिति दिक्। कुंभिका स्रवति, पन्था गच्छतीत्यादौ बाहुल्येन गौणप्रयोगादुपचारप्रायः, विशेषप्रधानत्वाच्च विस्तृतार्थ इति। अयमपि सकलनिक्षेपाभ्युपगमपर एव। स्थापनां नेच्छत्ययमिति केचित्तेषामाशयं न जानीमः। न हीन्द्रप्रतिमायां नेन्द्रव्यवहारो भवति, न वा भवन्नपि भ्रान्त एव, न वा नामादिप्रतिपक्षव्यवहारसांकर्यम-

---

१ गौरखरवदरण्यमितिवत्. २ गौरकवादि.

स्तीत्यर्धजरतीयमेतत् यदुत लोकव्यवहारानुरोधित्वं स्थापनानभ्युपगन्तृत्वं चेति ॥ प्रत्युत्पन्नग्राह्यध्यवसायविशेष ऋजुसूत्रः " पच्चुप्पण्णग्गाही उज्जुसुओ णयविही मुणेयव्वो त्ति " सूत्रम् । प्रत्युत्पन्नग्राहित्वं च भावत्वेऽतीतानागतसंबन्धाभावव्याप्यत्वोपगन्तृत्वम् । नातोऽतिप्रसंगः । वर्तमानक्षणसंबन्धवदतीतानागतक्षणसंबन्धोऽपि कथं न भावानामिति चेद्विरोधात् । अतीतत्वानतीतत्वयोरेव विरोधो, न त्वतीतत्वानागतत्वयोरिति चेन्न, अनागतत्वेनानतीतत्वाक्षेपात् । अतीतानागताकारज्ञानदर्शनादविरोधादिति चेन्न, प्रत्यक्षे तथाकारानुपरागात्, प्रबुद्धे वासनादोषजनिततथाविकल्पाच्च । वस्त्वसिद्धेरनुभवाविशेषे विकल्पाविशेष इति चेन्न, उपादानव्यक्तिविशेषेणोपादेयव्यक्तिविशेषादित्यन्यत्र विस्तरः । सतां सांप्रतानामर्थानामभिधानपरिज्ञानमृजुसूत्र इति तत्त्वार्थभाष्यम् । व्यवहारातिशायित्वं लक्षणमभिप्रेत्य तदतिशयप्रतिपादनार्थमेतदुक्तम् । व्यवहारो हि सामान्यं व्यवहारानंगत्वान्न सहते, कथं तर्ह्ययमपि परकीयमतीतमनागतं चाप्यभिधानमपि तथाविधार्थवाचकम्, ज्ञानमपि च तथाविधार्थविषयमविचार्य सहेतेत्यस्याभिमानः । न चायं वृथाभिमानः, स्वदेशकालयोरेव सत्ताविश्रामात्, यथाकथंचित् संबन्धस्य सत्ताव्यवहारांगत्वेऽतिप्रसंगात् । न च देशकालयोः सत्त्वं विहायान्यदतिरिक्तं सत्त्वमस्ति यदयोगिता प्रकृते स्यात्, असत्ताबोधोऽपि चास्ति, तन्न, सत्ताननुवेधात्, अन्यथा खरशृंगादीनामसत्ता न सिद्ध्येत् । उद्देश्यासिद्ध्या क्व विधेया सत्तेति चेत्, कथं तर्हि खरशृंगमसदिति व्यवहारः । खरवृत्त्यभावप्रतियोगि शृंगमिति तदर्थइति चेन्न, एतस्यार्थस्यास्वारसिकत्वात् । तथाप्ययोगतानिश्चये कथं स्वारसिको यथाश्रुतार्थबोध इति चेद्रूपादिस्थल इवाहार्ययोग्यतानिश्चयात्, विकल्पात्मकज्ञाने तस्याप्रतिबंधकत्वाच्च । तथा चोक्तं श्रीहर्षेणापि—अत्यं-

तासत्यपि ह्यर्थे ज्ञानं शब्दः करोति हि । अबाधात्तु प्रमामत्र स्वतःप्रामाण्यनिश्चलाम् ॥ १ ॥ इति । अथासतो भावाश्रयत्वमभावप्रतियोगित्वं च भावधर्मरूपं न संभवतीति न तन्निषेधो युक्तः । शशशृंगमस्ति न वेति पृच्छतो धर्मिवचनव्याघातेनैव निग्रहात्तत्रान्यतराभिधानेनोभयनिषेधेन तूष्णींभावेन वा पराजयाभावादिति चेन्न, यथा परेषां विशिष्टस्यातिरिक्तस्यासत्त्वेऽपि तत्राभावाश्रयत्वस्याभावप्रतियोगित्वस्य वा व्यवहारस्तथास्माकमपि सदुपरागेणासत्यपि विशिष्टे वैज्ञानिकसंबंधविशेषरूपतद्व्यवहारोपपत्तेः । शशशृंगमस्ति न वेति जिज्ञासुप्रश्ने शशशृंगं नास्तीत्येवाभिधातुं युक्तत्वात्, आनुपूर्वीभेदादुद्देश्यसिद्धेः । इत्थमेव पीतः शंखो नास्तीत्यादेरपि प्रामाण्योपपत्तेः । काल्पनिकस्याप्यर्थस्य परप्रतिबोधार्थतया कल्पिताहरणादिवद्व्यवहारतः प्रामाण्यात् । इत्थमेव नयार्थरुचिविशेषोपादानाय तत्र तत्र नयस्थले दर्शनान्तरीयपक्षग्रहस्य तांत्रिकैरिष्टत्वादिति दिक् । अस्यापि चत्वारो निक्षेपा अभिमताः द्रव्यनिक्षेपं नेच्छत्ययमिति वादिसिद्धसेनमतानुसारिणः । तेषामुक्तसूत्रविरोधः । न चोक्त एवैतत्परिहार एतन्मतपरिष्कार इति वाच्यम्, नामादिवदुपचरितद्रव्यनिक्षेपदर्शनपरत्वादुक्तसूत्रस्य तदनुपपत्तेरधिकमन्यत्र । आदेशान्तरे यथार्थाभिधानं शब्द इति त्रयाणामेकं लक्षणम् । भावमात्राभिधानप्रयोजकोऽध्यवसायविशेष इत्येतदर्थः । तेन नातिप्रसंगादिदोषोपनिपातः । तत्रापि प्रसिद्धपूर्वाच्छब्दादर्थप्रत्ययः सांप्रत इति सांप्रतलक्षणम् । प्रतिविशिष्टवर्तमानपर्यायापन्नेषु नामादिष्वपि गृहीतसंकेतस्य शब्दस्य भावमात्रबोधकत्वपर्यवसायीति तदर्थः । तथात्वं च भावातिरिक्तविषयांश उक्तसंकेतस्याप्रामाण्यग्राहकतया निर्वहति । तज्जातीयाध्यवसायत्वं च लक्षणमिति न क्वचिदनीदृशस्थलेऽव्याप्तिः, समभिरूढाद्यतिव्याप्तिश्च अध्यवसाये च तत्तदन्यत्वविशेषणदानान्निराकरणीया ।

संप्रदायेऽपि विशेषिततर ऋजुसूत्राभिमतार्थग्राही अध्यवसायविशेष इतिशब्द इत्यापादितसंज्ञान्तरस्यास्य लक्षणम् । " इच्छइ विसेसियतरं पच्चुप्पण्णं णओ सद्दो त्ति " सूत्रम् । अत्रापि तरप्रत्ययमहिम्ना विशेषिततमाधोवर्तिविषयग्रहणान्न समभिरूढाद्यतिव्याप्तिरिति स्मर्तव्यम् । ऋजुसूत्राद्विशेषः पुनरस्येत्थं भावनीयः । यदुत संस्थानादिविशेषात्मा भावघट एव परमार्थः सन् तदितरेषां तत्तुल्यपरिणत्यभावेनाघटत्वात् । घटव्यवहारादन्यत्रापि घटत्वासिद्धिरिति चेन्न, शब्दाभिलापरूपव्यवहारस्य संकेतविशेषप्रतिसन्धाननियंत्रितार्थमात्रवाचकतास्वभावनियम्यताविषयतथात्वेऽतंत्रत्वात्, प्रवृत्त्यादिरूपव्यवहारस्य चासिद्धेः । घटशब्दार्थत्वाविशेषे भावघटे घटत्वं नापरत्रेत्यत्र किं नियामकमिति चेत्, अर्थक्रियैवेति गृहाण । अत एवात्रानुपचरितं घटपदार्थत्वम्, अन्यत्र तूपचरितमिति गीयते विशेषः । अथवा ऋजुसूत्रस्य प्रत्युत्पन्नो विशेषितः कुम्भ एवाभिमतः, अस्य तु मत ऊर्ध्वग्रीवत्वादिस्वपर्यायैः सद्भावेनार्पितः कुम्भः कुम्भ इति भण्यते । इदंत्वकुम्भत्वाद्यवच्छेदेन स्वशिष्यनिष्ठस्वपर्यायावच्छिन्नतत्त्वसत्ताबोधप्रयोजकप्रकृतवाक्येच्छारूपगुर्वर्पणयाऽयमूर्ध्वग्रीवत्वादिना कुम्भ एव कुम्भ ऊर्ध्वग्रीवत्वादिना कुम्भ एवोष्णादिवाक्यप्रयोगात् । इत्थमेवोद्देश्यसावधारणप्रतीतेर्वादान्तरोत्थापितविपरीताभिनिवेशनिरासस्य च सिद्धेः इदमेव भंगान्तरेऽप्यर्पणप्रयोजनं बोध्यम् ॥ १ ॥ पटादिगतैस्त्वक्त्राणादिभिः परपर्यायैरसद्भावेनार्पितोऽकुम्भो भण्यते, कुम्भे कुम्भत्वानवच्छेदकधर्मावच्छिन्नाकुम्भत्वासत्त्वात् । नन्वेवं कुम्भत्वानवच्छेदकप्रमेयत्वावच्छेदेनाप्यकुम्भत्वापत्तिः, नानाधर्मसमुदायरूपकुम्भत्वे प्रमेयत्वस्याप्यवच्छेदकत्वात् ॥ २ ॥ तथा सर्वोऽपि घटः स्वपरोभयपर्यायैः सद्भावासद्भावाभ्यामर्पितोऽवक्तव्यो भण्यते, स्वपरपर्यायसत्त्वासत्त्वाभ्यामेकेन केनापि शब्देन सर्वस्यापि तस्य युगपद्वक्तुमशक्यत्वात् । अथैकपद-

वाच्यत्वं घटस्य स्वपर्यायावच्छिन्नत्वोपरागेणापि नास्तीति तदवच्छेदेनाप्यवाच्यतापत्तिः, वस्तुतः स्वपर्यायावच्छिन्नस्यैकपदवाच्यत्वेनाव्यक्तत्वाभावे वस्तुतः कथंचिदुभयपर्यायावच्छिन्नस्याप्येकपदवाच्यत्वेन तथात्वापत्तेः, अन्यथा परपर्यायावच्छिन्नस्याव्यक्तत्वापत्तेः । विधेयांश एकपदजन्यस्वपरपर्यायोभयावच्छिन्नप्रकारकशाब्दबोधाविषयकत्वमेवावक्तव्यत्वमिति न दोष इति चेन्न, उभयपदजन्यस्याप्येकपदजन्यत्वाव्यभिचारात् । कुंभनभपदाभ्यामकुंभत्वबोधके द्वितीयभंगे पर्यायावच्छेदेनाप्यव्यक्तत्वोल्लेखापत्तेः । प्रकृतेऽप्येकेन तदुभयादिसांकेतिकपदेन बोधसंभवाद्बाधाच्च । अथ स्वपरपर्यायोभयावच्छिन्नैकविधेयताकशाब्दबोधाविषयत्वमेवावक्तव्यत्वम् । द्वितीयभंगे च कुंभनभपदाभ्यामपि तात्पर्यवशादेकविधेयकबोधस्यैवोद्देश्यत्वान्नातिप्रसंगः, उभयादिपदाच्च बुद्धिस्थशक्तादुभयविधेयकबोधस्यैवोद्देशान्न बाध इति चेन्न, अप्रसिद्धेः । विकल्पबलात्कथंचित्प्रसिद्धावप्यनापेक्षिकत्वेन तत्र स्यात्पदप्रयोगानुपपत्तेः । तथा चापेक्षिकविशेषविश्रान्तवक्तव्यत्वप्रतिपक्षावक्तव्यत्वासिद्धौ वक्तव्यत्वविषयस्याष्टमभंगस्यापत्तेः । अवक्तव्यत्वप्रतिपक्षस्य विशेषविश्रान्तत्वादेव नाष्टमभंगापत्तिरिति हि संप्रदाय इति चेन्न, प्रकृतिविधिनिषेधसंसर्गावच्छिन्नैकविधेयताकशाब्दबोधाविषयत्वरूपस्यावक्तव्यत्वस्य स्वपरपर्यायोभयावच्छेदेन तृतीयभंगोपस्थित्या दोषाभावादवच्छिन्नान्तोपादानादवक्तव्यत्वायैकविधेयतामादाय न बाध इति दिक् ॥ ३ ॥ एकस्मिन् देशे स्वपर्यायसत्त्वेनापरस्मिंश्च परपर्यायासत्त्वेन विवक्षितो घटोऽघटश्च भण्यते । एकस्मिन् धर्मिणि देशभेदेन भिन्नतया विवक्षिते एकवाक्याद्उभयबोधतात्पर्येण तथा बोधात् ॥४॥ एकस्मिन् देशे स्वपर्यायैः सत्त्वेनार्पितोऽन्यत्र तु देशे स्वपरोभयपर्यायैः सत्त्वासत्त्वाभ्यामर्पितोऽकुंभोऽवक्तव्यश्च भण्यते । देशभेदेनैकत्र सत्त्वावक्तव्यत्वोभयबोधनतात्पर्यैकवाक्येण तथा बोधात् ॥ ५ ॥

एकदेशो परपर्यायैरसद्भावेनार्पितोऽन्यस्मिंस्तु स्वपरपर्यायैः सत्त्वासत्त्वाभ्यामेकेन शब्देन वक्तुमभिप्रेतोऽकुंभोऽवक्तव्यश्च भण्यते। देशभेदेनैकत्रासत्त्वादवक्तव्यत्वोभयबोधनतात्पर्यैकवाक्येन बोधात् ॥६॥ तथैकस्मिन् देशे स्वपर्यायैः सद्भावेनार्पितोऽन्यस्मिंस्तु परपर्यायैरसद्भावेनार्पितोऽपरस्मिंस्तु स्वपरोभयपर्यायैः सद्भावासद्भावाभ्यामेकेन शब्देन वक्तुमिष्टः कुंभोऽकुंभोऽवक्तव्यश्च भण्यते। देशभेदेनैकत्र त्रयबोधनतात्पर्यैकवाक्येन तथाबोधादिति विशेषः॥७॥तथा च बभाषे भाष्यकारः। "अहवा पच्चुप्पन्नो, रिजुसुत्तस्साविसेसिओ चेव। कुंभी विसेसिओ चेव, ऽकुंभोऽविसेसियतरोउ ॥ १ ॥ सब्भावादि हि सद्दस्स सब्भावासब्भावोभयप्पिओ। कुंभाकुंभावत्तव्वोभयरूवाइभेओ सो ॥२॥ त्ति" अत्र कुंभाकुंभेत्यादिगाथार्धेन षड् भंगाः साक्षादुपात्ताः सप्तमस्त्वादिशब्दात्, तथाहि कुंभोऽकुंभोऽवक्तव्यः कुंभश्चाकुंभश्च कुंभश्चावक्तव्यश्चाकुंभश्चावक्तव्यश्चेति त्रिविध उभयरूपः, आदिशब्दसंगृहीतश्च कुंभोऽकुंभोऽवक्तव्यश्चेति सप्तभेदो घट इति। अत्र च सकलधर्मिविषयत्वात्त्रयो भंगा अविकलादेशाः, चत्वारश्च देशावच्छिन्नधर्मिविषयत्वाद्विकलादेशा इति यद्यपीदृशसप्तभंगपरिकरितं संपूर्णं वस्तु स्याद्वादिन एव संगिरन्ते, तथापि ऋजुसूत्रकृताभ्युपगमापेक्षया एतदन्यतरभंगाधिक्याभ्युपगमाच्छब्दनयस्य विशेषिततरत्वमदुष्टमिति संप्रदायः। अथवा लिंगवचनसंख्यादिभेदेनार्थभेदाभ्युपगमादृजुसूत्रादस्य विशेषः। अयं खल्वेतस्याशयः—यदि ऋजुसूत्रेण "पलालं न दहत्यग्निर्भिद्यते न घटः क्वचित्। नासंयतः प्रव्रजति भव्यो ऽसिद्धो न सिध्यति ॥ १ ॥ इत्यादौ विकाराविकाराद्यर्थकक्रियानामादिपदानां सामानाधिकरण्यानुपपत्त्या किं न तथाकल्पने अभिनिविश्येतेति। अस्य चोपदर्शिततत्त्वो भावनिक्षेप एवाभिमतः। असंक्रमगवेषणपरोऽध्यवसायविशेषः समभिरूढः। "वत्थूओ संकमणं, होइ अवत्थू णए

समभिरूढे त्ति " सूत्रम् । सत्स्वर्थेष्वसंक्रमः समभिरूढ इति तत्त्वार्थभाष्यम् । तत्त्वं च यद्यपि न संज्ञाभेदेनार्थभेदाभ्युपगन्तृत्वम्, घटपटादिसंज्ञाभेदेन नैगमादिभिरप्यर्थभेदाभ्युपगमात्, तथापि संज्ञाभेदनियतार्थभेदाभ्युपगन्तृत्वं तत् । एवंभूतान्यत्वविशेषणाच्च न तत्रातिव्याप्तिः । अयं खल्वस्याभिमानः, यदुत यदि शब्दो लिंगादिभेदेनार्थभेदं प्रतिपद्यते तर्हि संज्ञाभेदेनापि किमित्यर्थभेदं न स्वीकुरुते, अनुशासनबलाद् घटकुटादिशब्दानामेकत्र संकेतग्रहादिति चेदृजुसूत्रेणैव तेनान्यथागृहीतोऽपि संकेतो विशेषपर्यालोचनया किमिति न परित्यज्यते । अथ येन रूपेण यत्पदार्थबोधस्तेनैव रूपेण तत्पदशक्तिः, भवति च घटपदादिव कुटपदादपि घटत्वेनैवार्थबोधः इति घटकुटपदयोः पर्यायत्वमेव युक्तमिति चेन्न, घटनकुटनादिविभिन्नक्रियापुरस्कारेणैव घटकुटादिपदेभ्योऽर्थबोधात् । तेषामर्थभेदनियमादसमानाधिकरणपदत्वापेक्षया लाघवात् भिन्नपदत्वावच्छेदेनैव भिन्नार्थत्वकल्पनात् पर्यायपदाप्रसिद्धेः । व्युत्पत्त्यर्थबोधं विनापि दृश्यते पदार्थबोधादिति चेन्न, अन्यत्र विपरीतव्युत्पन्नात्तदसिद्धेः । हन्तैवं पारिभाषिकशब्दस्यानर्थकत्वमापन्नमिति चेदापन्नमेव किं हन्तेति पूत्कारेण । तदुक्तं तत्र " पारिभाषिकी नार्थतत्त्वं ब्रवीतीति " । अथार्थबोधकत्वमात्रे यदि पदत्वभावस्तदा यदृच्छाशब्दसंकेतादपि तदभिव्यक्तेः किं वैषम्यमिति चेन्न, पदानां व्युत्पत्तिनिमित्तोपकारेणैवार्थबोधकत्वस्वाभाव्यात्, यदृच्छासंकेतोपप्लवादस्वभावभूतस्यैव धर्मस्य ग्रहेण वैषम्यात् । अथ नानार्थकपदेऽर्थसंक्रमवदर्थेऽपि पदसंक्रमः किं न स्यादिति चेन्न, अर्थस्येव पदस्यापि क्रियोपरागेण भेदाथ्रासंक्रमस्वीकारात्, । हरीत्यादौ च पदसारूप्येणैवैकशेषः, न त्वर्थसारूप्येणेति दिक् । अस्याप्युपदर्शिततत्त्वो भावनिक्षेप एवाभिमतः । व्यंजनार्थविशेषान्वेषणपरोऽध्यवसायविशेष एवंभूतः । " वंजण अत्थ तदुभए

एवंभूअं विसेसेइ ” इति सूत्रम् । व्यञ्जनार्थयोरेवंभूत इति तत्त्वार्थभाष्यम् । तत्त्वं च पदानां व्युत्पत्त्यर्थान्वयनियतार्थ-बोधकत्वाभ्युपगन्तृत्वम् । नियमश्च कालतो देशतश्चेति न समभिरूढातिव्याप्तिरपि । अयं खल्वस्य सिद्धान्तः—यदि घटपद-व्युत्पत्त्यर्थाभावात् कुटपदार्थोऽपि न घटपदार्थस्तदा जलाहरणादिक्रियाविरहकाले घटोऽपि न घटपदार्थोऽविशेषादिति । नन्वेवं प्राणधारणाभावात् सिद्धोऽपि न जीवः स्यादिति चेदेतन्नये न स्यादेव । तदाह भाष्यकारः—“ एवं जीवं जीवो, संसारी पाणधारणाणुभवा । सिद्धो पुण अजीवो जीवणपरिणामरहिउ त्ति ॥ १ ॥ अत एव जीवो नोजीवोऽजीवो नोऽजीव इत्याकारिते नैगमदेशसंग्रहव्यवहारर्जुसूत्रसांप्रतसमभिरूढा जीवं प्रत्यौपशमिकादिभावपंचकग्राहिणः । तन्मते व्युपत्तिनिमित्तजीवनलक्षणौदयिकभावोपलक्षितात्मत्वरूपपरिणामभावविशिष्टस्य जीवस्य भावपंचकात्मनः पदार्थत्वादि-त्यमी पंचस्वपि गतिषु जीव इति जीवद्रव्यं प्रतियन्ति । नोजीव इति च नोशब्दस्य सर्वनिषेधार्थपक्षेऽजीवद्रव्यमेव, देश-निषेधार्थपक्षे च देशस्याप्रतिषेधाज्जीवस्यैव देशप्रदेशौ । अजीव इति नकारस्य सर्वप्रतिषेधार्थत्वात्पर्युदासाश्रयणाच्च जीवा-दन्यत् पुद्गलद्रव्यादिकमेव । नोऽजीव इति सर्वप्रतिषेधाश्रयणे जीवद्रव्यमेव, देशप्रतिषेधाश्रयणे चाजीवस्यैव देशप्रदेशौ । एवंभूतस्तु जीवं प्रत्यौदयिकभावग्राहकः, तन्मते क्रियाविशिष्टस्यैव पदार्थत्वादित्ययं जीव इत्याकारिते भवस्थमेव जीवं गृह्णाति, न तु सिद्धम्, तत्र जीवनार्थानुपपत्तेः । नोजीव इति चाजीवद्रव्यं सिद्धं वा । अजीव इति चाजीवद्रव्यमेव । नोऽजीव इति च भवस्थमेव । जीवदेशप्रदेशौ तु संपूर्णग्राहिणानेन न स्वीक्रियेत इत्यस्माक प्रक्रिया । केचित्त्वेवंभूताभि-प्रायेण सिद्ध एव जीवो भावप्राणधारणात्, न तु संसारीति परिभाषन्ते । तदाहुः—तिक्काले च दुपाणा, इंदियबलमाउआ-

णपाणो अ । ववहारा सो जीवो, णिच्छयदो दुचेदणा जस्स ॥ १ ॥ इति । न च चिच्चेतनाशाली संसार्यपि जीव एवेति वाच्यम्, शुद्धचैतन्यरूपनिश्चयप्राणस्य सिद्धेनैव धरणात् । न च संसारिचैतन्यमपि निश्चयतः शुद्धमेवोपरागस्य तेन प्रतिक्षेपात्, तदुक्तम्—" मग्गणगुणठाणेहि अ चउदस य हवंति तह असुद्धणया । विण्णेया संसारी सव्वे सुद्धाउ सुद्धणया ॥ १ ॥ इतीति वाच्यम् एकीकृतनिश्चयेन तदग्रहणेऽपि पृथक्कृतनिश्चयभेदेन तदग्रहणादिति, तच्चिन्त्यम् । एवंभूतस्य जीवं प्रत्यौदयिकभावग्राहकत्वात् । न चास्य क्रियाया एव प्रवृत्तिनिमित्तत्वाद्धात्वर्थ एव भावनिक्षेपाश्रयणे शुद्धधर्मग्राहकत्वमप्यनाबाधमिति वाच्यम्, यादृशधात्वर्थमुपलक्षणीकृत्येतरनयार्थप्रतिसन्धानं तादृशधात्वर्थप्रकारकजिज्ञासयैव प्रसंगसंगत्यैवंभूताभिधानस्य सांप्रदायिकत्वात् । अन्यथा तत्रापि निक्षेपान्तराश्रयणेऽनवस्थानात्, प्रकृतमात्रापर्यवसानाददद्वैते, शून्यतायां वा पर्यवसानात् । किंचैतादृगुपरितनैवंभूतस्य प्राक्तनैवंभूताभिधानपूर्वमेवाभिधानं युक्तम् । अन्यथाऽप्राप्तकालत्वप्रसंगात् । तस्माद्व्यवहाराद्यभिमतव्युत्पत्त्यनुरोधेनौदयिकभावग्राहकत्वमेवास्य सूरिभिरुक्तं चैतदिति स्मर्तव्यम् । न चेन्द्रियरूपप्राणानां क्षायोपशमिकत्वात् कथमेवंभूतस्यौदयिकभावमात्रग्राहकत्वमित्याशंकनीयम्, प्राधान्येनायुःकर्मोदयलक्षणस्यैव जीवनार्थस्य ग्रहणात्, उपहतेन्द्रियेऽप्यायुरुदयेनैव जीवननिश्चयात् । ननु यदि जीवं प्रत्यौदयिकभाव एव गृह्यत एवंभूतेन, कथं तर्हि भावप्राणयोगाद्भवतामपि सिद्धस्य जीवत्वं. मलयगिरिप्रभृतिभिरुक्तमिति चेत्, भावपञ्चकग्राहिनैगमाद्यभिप्रायेणेति गृहाण । अत एव प्रज्ञापनादौ जीवनपर्यायविशिष्टतया जीवस्य शाश्वतिकत्वमभिदधे । यदि पुनः प्रस्थकन्यायाद्विशुद्धतरनैगमभेदमाश्रित्य प्रागुक्तस्वग्रन्थगाथा व्याख्यायते परैः, तदा न किंचिदस्माकं दुष्यतीति

 

किमल्पीयसि दृढतरक्षोदेन। सिद्धोऽप्येतन्नये सत्त्वयोगात्सत्त्वः, अतति सततमपरापरपर्यायान् गच्छतीत्यात्मा च स्यादेव। अस्याप्युपदर्शिततत्त्वो भावनिक्षेप एवाभिमतः। तदेवं लक्षिताः सप्तापि नयाः ॥ एतेषु च यद्यपि क्षणिकत्वादिसाधने नित्यत्वादिपराकरणमेकान्तानुप्रवेशादप्रमाणम्, तथापि परेषां तर्क इव प्रमाणानां स्वरुचिशेषरूपाणामनुग्राहकत्वादुपयुज्यत इति संभाव्यते। तत्त्वं तु बहुश्रुता विदन्ति। एतेषु च बलवत्त्वाबलवत्त्वादिविचारेऽपेक्षैव शरणम्। निश्चयव्यवहाराभिमतकारणानामानंतर्यपारंपर्यव्यवस्थितानामप्यपेक्षाऽविशेषात्। पूर्वेण परस्योपक्षयाद्विशेष इति चेन्न, इच्छामात्रशरणत्वात्। क्रियानये स्वविषयसमवधाननियतेतरविषयसमवधानं विशेष इति चेन्न, चरमकारणीभूतक्रियाजनकज्ञानविषयत्वात् ज्ञाननयस्यापि विशेषात्। क्रियानये कार्योपयिको विशेषो, ज्ञाननये तु व्यवहारोपयिक इति चेन्न, ज्ञाननयविशेषस्यापि परंपरया कार्योपयिकत्वात्, पारंपर्यानन्तर्ययोर्विशेषश्चेच्छामात्रादेवेत्युक्तम्। अत एवेतरकारणविशिष्टं चरमकारणं सामग्रीति सामग्रीलक्षणमन्यत्र निराकृतम्, विनिगमनाविरहात्। न च संबन्धलाघवं विनिगमकं, विशेष्य इव विशेषणे तत्संबन्धग्रहावश्यकत्वे तदसिद्धेरिति दिक् ॥ स्यादेतत्। कुर्वद्रूपत्वाच्चरमकारणमेव क्रियानयाभिमतं कारणं युक्तं, नान्यत्, अत एव क्रियासिद्ध्येव कुर्वद्रुपत्वोपपत्तौ क्रियमाणं कृतमेवेति वदन्ति। न चैवं कृतकरणासमाप्तिः, सिद्धस्यापि साधने करणव्यापारानुपरमादिति वाच्यम्, कार्यमुत्पाद्य क्रियोपरमेण तत्समाप्तेः। न च यादृशव्यापारवतां दण्डादीनां पूर्वं सत्त्वं, तादृशानामेव तेषां क्वचिद् घटोत्पत्त्यनन्तरमपि संभवेत्, तदा तदुत्पत्तिप्रसंग इति वाच्यम्, स्थूलतत्सत्त्वेऽपि सूक्ष्मक्रियाविगमात्। न च तत्क्रियायां घटोत्पत्तेः प्राक् सत्त्वे तदापि तदुत्पत्तिप्रसंगोऽसत्त्वे च कार्याव्यवहितपूर्ववृत्तित्वाभावेन कारणत्वानुपपत्ति-

रिति वाच्यम्, कार्यव्याप्यतावच्छेदकपरिणामविशेषरूपकारणतायाः कार्यसहवृत्तितानियमात् । अत एव कुर्वद्रूपत्वमप्रामाणिकम्, बीजत्वादिना सांकर्याज्जातिरूपतदसिद्धेरिति निरस्तम् । अथैवं चक्रभ्रमणाद्युपलक्षितदीर्घक्रियाकाले कुतो न दृश्यते घटः, यदि क्रियमाणः कृत एवेति चेन्न, क्रियाया दीर्घकालत्वासिद्धेश्चरमसमये तदभ्युपगमात् । घटगताभिलाषोत्कर्षवशादेव मृन्मर्दनाद्यान्तरालिककार्यकरणवेलायां घटं करोमीति व्यवहारात् । तदुक्तम्–"पइसमयकज्जकोडी, णिरवेक्खो घडगयाहिलासोसि । पइसमयकज्जकोडिं, थूलमई घडं मिलाएसि ॥ १ ॥ इति" । कृतस्यैव करणे क्रियावैफल्यमित्यपि न रमणीयम्, क्रिययैव निष्ठां जनयित्वा कार्यस्य कृतत्वोपपादनात् । कृतमेव क्रिया जनयति, नाकृतम्, असत्त्वात्, क्रियाजनितत्वाच्च कृतमित्यन्योन्याश्रय इति चेन्न, घटत्वादिनैव घटादिक्रियाजन्यत्वात्तत्र कृतत्वाप्रवेशादार्थादेव समाजात् कृतत्वोपपत्तेः । यदि च क्रियमाणं न कृतं, तदा क्रियासमये कार्याभावात्तत्पूर्वं तत्पश्चाच्च कारणाभावात्तत्कार्यं न भवेदेव । सामग्र्यास्तदुत्तरसमय एव कार्यव्याप्यत्वोपगमान्नैष दोष इति चेन्न, सामग्रीसमयस्यैव कार्यव्याप्यत्वोपगमौचित्यात्, व्याप्तावुत्तरत्वाप्रवेशेन लाघवात्, कारणाभावस्यैव कार्याभावव्याप्यत्वेन कारणोत्तरकालेऽपि कार्यासिद्धेश्च । अथ क्रियमाणमित्यत्र वर्तमानत्वमानशोऽर्थः कृतमित्यत्र चातीतत्वं निष्ठार्थः, तत्र वर्तमानत्वं विद्यमानकालवृत्तित्वं, अतीतत्वं च विद्यमानध्वंसप्रतियोगिकालवृत्तित्वम्, विद्यमानत्वं च तत्तत्प्रयोगाधारत्वं, प्रयोगत्वं च तत्तदर्थोपस्थित्यनुकूलव्यापारत्वम्, तिप्युच्चारणादिसाधारणं, तदादेर्बुद्धिस्थत्ववदक्षरादेः शक्यतावच्छेदकतत्तत्कालानुगमकं, तच्च वर्तमानत्वमतीतत्वं वा धात्वर्थेऽन्वेति, धातूत्तरप्रत्ययजन्यकालप्रकारकबोधे समानविशेष्यत्वप्रत्यासत्त्या धातुजन्योपस्थितेर्हेतुत्वात्, अत एव नातीतघट-

ज्ञा नये घटं जानातीति प्रयोगप्रसंगः, न चैवमारंभसमये पचतीति प्रयोगो न स्यात्तदा पाकाभावादिति वाच्यम्, स्थूल-
का ादाय तत्समाधानात्, तस्मात् क्रियमाणं कृतमित्यन्वयानुपपत्तिरिति चेन्न । एवं सत्यारंभकाल इव तत्पूर्वकालेऽप्येक-
स्थ ालसंभवेन पचतीति प्रयोगप्रसंगाद्व्यवहारानुकूलप्रयोगादरस्य वस्त्वसाधकत्वात्, अन्यथा पुरुषो व्याघ्र इति प्रयो-
गा पुरुषस्यापि व्याघ्रत्वप्रसंगः । किं चैवं नष्टो घटो, नश्यन् घट इत्यादिप्रयोगव्यवस्थायां तव का गतिः, नाशस्योक्तातीत-
तत ोगात् । नष्टेऽपि घटे विद्यमाननाशप्रतियोगित्वाद्वा । अथ तत्रातीतत्वं वर्तमानत्वं च कृत्प्रत्ययार्थोत्पत्तावेवान्वेतीति
न इति चेन्न, उक्तनियमभंगप्रसंगात् । धातुत्वप्रत्ययत्वादेर्नानात्वात् तन्नियमस्य विशिष्य विश्रान्तिरिति चेन्न, अ-
न्त धातुपदवत्त्वादिनापि तदनुगमात् । अथान्यत्राप्येकपदोपात्तत्वप्रत्यासत्त्या कृत्यादिस्वार्थ एव स्वार्थकालान्वययोः
व् त्तिवैचित्र्यात्, न च पचत्यपि भाविकृतिना प्रागभावमाद्यकृतिध्वंसं चादाय पक्ष्यत्यपाक्षीदिति प्रयोगप्रसंग इति वाच्यं,
अ कृतिप्रागभावचरमकृतिध्वंसयोर्भविष्यदतीतप्रत्ययार्थत्वादिति चेन्न । जानातीत्यादौ धात्वर्थकालान्वयदर्शनात् ।
अ वा । तथापि कृत्प्रत्ययार्थोत्पत्तेः प्रातिपदिकार्थे घटे कथमन्वयोऽयोग्यत्वात् । परंपरासंबन्धेन तत्र तदन्वयोपपत्तिरिति
चे विद्यमानघटे न नष्टो घट इति प्रयोगानापत्तेः । वृत्त्यनियामकसंबन्धस्याभावप्रतियोगितानवच्छेदकत्वात्, उत्पत्तेः
ध र्थे तस्य च प्रातिपदिकार्थेऽन्वयान्न दोष इति चेन्न, नामार्थयोः साक्षाद्भेदसंबन्धेनान्वयायोगात् । अन्यथा तंडुलं पच-
र्त त्रापि कर्मत्वासंसर्गेण प्रातिपदिकार्थस्य धात्वर्थेऽन्वयप्रसंगात्, अभेदेन निपातान्यनामार्थप्रकारकबोधे समानविशे-
ष प्रत्यासत्त्या निपातप्रत्ययान्यतरजन्योपस्थितेर्हेतुत्वात् । नामार्थप्रकारकधात्वर्थविशेष्यकबोधासंभवेऽपि धात्वर्थप्रकार-

कनामार्थविशेष्यकबोधः प्रकृतेऽनपाय एवेति चेन्न, चैत्रः पाक इत्यादौ कर्तृत्वादिसंसर्गेण पाकादेश्चैत्रादावन्वयावोधाय धात्वर्थप्रकारकबोधेऽपि निपातप्रत्ययान्यतरजन्योपस्थितेर्हेतुत्वान्तरकल्पनाकत्वात् । स्यादेतत् । अत्र नशधातोर्नाशवति लक्षणयाऽभेदेनैवास्तु प्रातिपदिकार्थेन समभन्वयः । न च धात्वर्थस्याख्याताद्यर्थ एवान्वयनियमात् कथमेवमिति वाच्यं, शक्त्यैव धात्वर्थप्रकारकबोधे आख्यातादिजन्योपस्थितेर्हेतुत्वात्, अत एव जानातीत्यादौ ज्ञानधातोर्ज्ञानवति लक्षणया प्रातिपदिकार्थेनान्वयसंभवे आख्यातार्थोऽयोग्यत्वान्नभासत इति चिंतामणिकृतोक्तं युक्तम् । अन्यथा निरूपितत्वसंसर्गेण ज्ञानप्रकारकाश्रयत्वविशेष्यकावान्तरशाब्दबोधतद्धेतुत्वादिकल्पने गौरवात् । न च सामान्यतो हेतुत्वं क्लृप्तमेवेति क्व गौरवमिति वाच्यम्, तथापि तत्तदाकांक्षाज्ञानादिहेतुताकल्पने गौरवादिति । मैवम् । तथा सति जानातीत्यत्राख्यातार्थसंख्यान्वयप्रसंगात्, ज्ञावनान्वयित्वे वाख्यातार्थसंख्यान्वयात् । अथाख्यातार्थसंख्यान्वयो ज्ञावनाविशेष्यत्वं न तंत्रं, किं तु प्रथमान्तपदोपस्थाप्यमेवेति न दोष इति चेन्न, धात्वर्थप्रकारकबोधसामान्य एवाख्यातादिजन्योपस्थितेर्हेतुत्वाच्चक्येतिप्रवेशोगौरवात्, प्रजयतीत्यादावनन्वयप्रसंगाच्च । पाकोऽयमित्यादौ तु स्तोकं पचति स्तोकः पाक इति प्रयोगयोर्विशेषाय घञादीनां धात्वर्थतावच्छेदकविशिष्टे शक्तिस्वीकारान्न दोष इति दिक् । अथ ज्ञातो घट इत्यत्र विषयस्येव नष्टो घट इत्यत्र प्रतियोगिनोऽपि प्रत्ययविशेषार्थत्वान्नान्वयानुपपत्तिरिति चेत्तथापि नाशोत्पत्तिकालेऽपि निष्ठार्थाविरोधात् क्रियमाणं कृतमित्यन्वयोपपत्तेः पक्व इत्यादाविव सर्वत्र कालवृत्तिता विशेषरूपसिद्धत्वस्य निष्ठार्थत्वात् । तस्य चाद्यसमयावच्छेदेन साध्यत्वेन सममविरोधात् । सिद्धत्वविशिष्टसाध्यतायां वर्तमानार्थत्वात्, प्रारब्धोऽपरिसमाप्तश्च वर्तमान इति हि वैयाकरणाः, चिर-

नष्टे इदानीं नष्ट इति, चिरोत्पन्ने चेदानीमुत्पन्न इति च प्रतीतिः समभिव्याहारविशेषादेतत्कालावच्छिन्नसाध्यत्वविशिष्टसिद्धत्वोपस्थित्यैव न भवति । इत्थमेव क्रियमाणं कृतमेव, कृतं च क्रियमाणत्वेन भजनीयमिति सिद्धान्तः संगच्छते । सिद्धत्वविशिष्टसाध्यतायाः सिद्धत्वनियतत्वात्, शुद्धसिद्धतायाश्च विशिष्टसाध्यताऽनियतत्वात् । अस्तु वा विपरिणामस्वरूपनिष्पत्त्यादिरूपाननुगतैव निष्ठा, समभिव्याहारविशेषादेव बोधविशेषोपपत्तेः । परमुक्तयुक्तेः क्रियाकालो निष्ठाकालं न विरुणद्धीति गम्भीरनयमतं कियदिह विविच्यत इति, सत्यम्, निश्चयत इत्थमेव, तत्त्वव्यवस्थायामपि व्यवहारतोऽकुर्वतोऽपि नियतपूर्ववर्तिनः कारणत्वाभ्युपगमात् । अन्यथा पूर्वं कुर्वत्त्वानिश्चये प्रवृत्त्यनुपपत्तिप्रसंगात् । किं चेदं कुर्वद्रूपत्वमपि सहकारिसंपत्तावेव नान्यथेत्यवस्थितकारणादेव सहकारिचक्रानुप्रवेशात् कार्योपपत्तौ किं कुर्वदकुर्वतोर्भेदाभ्युपगमकष्टेन । न चोपादानोपादेयभावनियतैः क्षणैरेव कुर्वद्रूपत्वं नियम्यत इति वाच्यम्, क्षणत्वेन सर्वेषामविशेषादेकस्वभावस्य कुतोऽपि विशेषायोगात् । किं चैवं कार्ये न कारणानुमानोच्छेदः, सामान्यतः कारणताग्रहाभावात् । न च सादृश्येन तथाग्रहाददोषः, पूर्वापराननुसंधानेन क्षणिकपक्षे सादृश्यस्यैव ग्रहीतुमशक्यत्वादित्यादिकं व्युत्पादितमनेकान्तजयपताकादौ पूर्वसूरिभिः । अत एव क्रियमाणमेतन्नयेन कृतं, कारणचक्रसंपत्त्युत्तरमेव कार्यसिद्धेः । अन्यथा समसमयभावित्वे कार्यकारणभावव्यवस्थायोगादुपादानोपादेयभावस्यापि परस्परोपमर्दनियतस्य क्षणभेदनियतत्वात् । न च वर्तमानत्वमतीतत्वं चैकत्र व्यवहारसिद्धं, न चानीदृशेऽर्थे प्रमाणावतारः, न च यत्किंचिद्व्यवहारदर्शनात् सर्वत्र तदनाश्वासो न्याय्य इत्यादिकं व्यवहारनिश्चययोर्मिथो विवादमवलोक्य वस्तुस्थितिरन्वेषणीया । फलं पुनर्विचित्रनयवादानां जिनप्रवचनविषयरुचिसंपादनद्वारा राग-

द्वेषविलय एव। अत एवायं भगवदुपदेशोऽपि–"सव्वेसिंपि णयाणं, बहुविहवत्तव्वयं णिसामित्ता । तं सव्वणयविसुद्धं, जं चरणगुणट्ठिओ साहू ॥ १ ॥ त्ति चरणगुणस्थितिश्च परममाध्यस्थ्यरूपा, न रागद्वेषविलयमन्तरेणेति तदर्थमवश्यं प्रयतितव्यमित्युपदेशसर्वस्वम् ॥

यस्यासन् गुरवोऽत्र जीतविजयप्राज्ञाः प्रकृष्टाशया, भ्राजन्ते सनया नयादिविजयप्राज्ञाश्च विद्याप्रदाः ।
प्रेम्णां यस्य च सद्म पद्मविजयो जातः सुधीः सोदरः, सोयं न्यायविशारदः स्म तनुते कांचिन्नयप्रक्रियाम् ॥ १ ॥
ग्रन्थे दूषणदर्शने निविशते दुर्मेधसां वासना, भावाभिज्ञतया मुदं तु दधते ये केपि तेभ्यो नमः ।
मन्दारद्रुमपल्लवेषु करभाः किं नो भृशं द्वेषिणो, ये चास्वादविदस्तदेकरसिकाः श्लाघ्यास्त एव क्षितौ ॥ २ ॥
कृत्वा प्रकरणमेतत्प्रवचनभक्त्या यदर्जितं सुकृतम् । रागद्वेषविरहतस्ततोऽस्तु कल्याणसंप्राप्तिः ॥ ३ ॥

कृतं च भट्टारकश्रीहीरविजयसूरिशिष्यमहोपाध्यायश्रीकल्याणविजयगणिशिष्यपंडितश्रीलाभविजयगणिशिष्यपंडितजीतविजयसतीर्थ्यपंडितनयविजयगणिशिष्यपंडितयशोविजयगणिना ॥

॥ इति नयरहस्यप्रकरणम् ॥

## ॥ अथ नयप्रदीपः ॥

ॐ श्रीवीतरागाय नमः ॥

ऐन्द्रादिप्रणतं देवं ध्यात्वा सर्वविदं हृदि । सप्तभंगनयानां च वक्ष्ये विस्तरमाश्रुतम् ॥ १ ॥

अथ सप्तभङ्गी प्रारभ्यते । जैनानां तावत्सप्तभङ्गी विजिज्ञासितव्या । सैव तेषां प्रमाणभूमिमारचयति । दुर्दमपरवादिवादमतङ्गजान् परिजिघृक्षवः सम्यक् स्वीयसिद्धान्तरहस्यं विजिज्ञासवो वादिमतल्लिकाः सम्यक्तामवश्यमभ्यस्यन्ति । यदुक्तम्–"या प्रश्नाद्विधिपर्युदासभिदया बाधच्युता सप्तधा, धर्मं धर्ममपेक्ष्य वाक्यरचना नैकात्मके वस्तुनि । निर्दोषा निरदेशि देव भवता सा सप्तभङ्गी यया, जल्पञ्जल्परणाङ्गणे विजयते वादी विपक्षं क्षणात् ॥ १ ॥" तथा चायं शब्दः यत्किञ्चित्सदंशासदंशभागाभ्यां च स्वीयमर्थं प्रतिपादयन् सप्तभङ्गानेव प्रत्यवतिष्ठते । "सर्वत्रायं ध्वनिर्विधिनिषेधाभ्यां स्वार्थमभिदधानः सप्तभङ्गीमनुगच्छतीति" सूत्रम् । सा कीदृक्स्वरूपेति लक्षणमाह–"एकत्र वस्तुनि एकैकधर्मपर्यनुयोगवशादविरोधेन व्यस्तयोः समस्तयोश्च विधिनिषेधयोः कल्पनया स्यात्काराङ्कितः सप्तधा वाक्प्रयोगः सप्तभंगीति" सूत्रम् । एतस्यार्थः–एकस्य जीवाजीवादेः पदार्थस्य एकशो धर्मविषयपरिप्रश्ने सकलप्रमाणाबाध्यत्वेन भिन्नाभिन्नविधिप्रतिषेधविभागाभ्यां प्रयुक्तः स्याच्छब्दांकितः सप्तविधत्वेन वाक्योपन्यासः सा सप्तभंगी विज्ञेया । विधिः सदंशः । प्रतिषेधोऽसदंशः । पदार्थसार्थस्य सदंशासदंशधर्माद्यनेकप्रकारविभजनयाऽनन्तभंगीप्रसंगः तन्निरायासायैकपदोपादानं । विधिनिषेधाद्यनन्तध-

र्माध्यासिते एकस्मिन् जीवाजीवादिवस्तुनि अनन्तधर्मपरिप्रश्नकालेऽनन्तभंगसंभवः तद्व्यावृत्त्यर्थं एकैकधर्मपर्यनुयोगस्योपादानम् । एतेनानन्तधर्माध्यासितेष्वनन्तपदार्थेषु सत्स्वपि प्रतिपदार्थं प्रतिधर्मं परिप्रश्नकाले एकैकशो वस्तुधर्मे एकैकैव सप्तभंगी भवतीति नियमः । अनन्तधर्मविवक्षया सप्तभंगीनामपि नानाकल्पनमभीष्टमेव, एतत्तु सूत्रकारेणैव ज्ञापितं । तथाहि–विधिनिषेधप्रकारापेक्षया प्रतिपर्यायं वस्तुन्यनन्तानामपि सप्तभंगीनां संभवात् प्रतिपर्यायं प्रतिपाद्यपर्यनुयोगानां सप्तानामेव संभवादिति । अथ सप्तभंगी स्वरूपतः प्रदर्श्यते, तथाहि–स्यादस्त्येव सर्वमिति सदंशकल्पनाविभजनेन प्रथमो भंगः । स्यान्नास्त्येव सर्वमिति पर्युदासकल्पनाविभजनेन द्वितीयो भंगः । स्यादस्त्येव स्यान्नास्त्येवेति क्रमेण सदंशासदंशकल्पनाविभजनेन तृतीयो भंगः । स्यादवक्तव्यमेवेति समसमये विधिनिषेधयोरनिर्वचनीयख्यापनाकल्पनाविभजनया चतुर्थो भंगः। स्यादस्त्येव स्यादवक्तव्यमेवेति विधिप्राधान्येन युगपद्विधिनिषेधानिर्वचनीयख्यापनाकल्पनाविभजनया पञ्चमो भंगः । स्यान्नास्त्येव स्यादवक्तव्यमेवेति निषेधप्राधान्येन युगपद्विधिनिषेधानिर्वचनीयकल्पनाविभजनया षष्ठो भंगः। स्यादस्त्येव स्यान्नास्त्येव स्यादवक्तव्यमिति क्रमात् सदंशासदंशप्राधान्यकल्पनया युगपद्विधिनिषेधानिर्वचनीयख्यापनाकल्पनाविभजनया च सप्तमो भंगः । अथार्थतः प्रथमभंगं प्रचिकटयिषुराह–विधिप्राधान्यविवक्षायामयं भंगः। स्यादित्यनेकान्तद्योतकमव्ययं। स्यादित्यनेन कथञ्चित्स्वकीयद्रव्यक्षेत्रकालभावचतुष्टयरूपेणास्त्येव घटादिवस्तु नास्त्येवान्यदीयद्रव्यक्षेत्रकालभावचतुष्करूपेण । तथाहि–घटो द्रव्यतः पार्थिवत्वरूपेण, नास्ति जलादिरूपेण । क्षेत्रतः पाटलिपुत्रकत्वेन नास्ति कान्यकुब्जत्वेन । कालतः शैशिरत्वेन, नास्ति वासन्तिकत्वेन । भावतो रक्तत्वेन, नास्ति पीतत्वेन । एवं सर्वमन्यदेव ज्ञातव्यम् । स्वद्रव्यादिचतुष्टयापे-

क्षया कथञ्चिदस्ति, परद्रव्यादिचतुष्टयापेक्षया नास्ति च घट इत्युल्लेखः। अन्यस्यान्यदीयरूपापत्तौ स्वरूपहानिप्रसक्तिः। एवकारेण त्वीदृगुल्लेखको भंग इत्यवधारणं स्यात्। अवधारणं च कर्तव्यम्। अन्यथाऽनुक्तसमत्वात्तस्य कुत्रचित् तथाप्यस्त्येव कुंभ इत्येतावन्मात्रोपादानेन कुंभस्य स्तंभाद्यस्तित्वेनापि सर्वप्रकारेणास्तित्वप्राप्तेः प्रतिनियतस्वरूपानुपपत्तिः स्यात् तत्प्रतिपत्तये स्यादित्यव्ययं प्रयुज्यते। कथञ्चिद्रूपेण स्वद्रव्यचतुष्टयापेक्षयाऽस्ति, परद्रव्यचतुष्टयापेक्षया नास्तीतिप्रयोगप्रतिपत्तये। तस्य तु प्रयोगो व्यवच्छेदफलैवकारवदनुक्तोऽपि द्रष्टव्यः। यदुक्तम्--"सोऽप्यप्रयुक्तो वा तज्ज्ञैः सर्वत्रार्थात् प्रतीयते। यथैवकारोऽयोगादिव्यवच्छेदप्रयोजनः॥ १॥" तत् एवकारस्यात्कारयोः सप्तस्वपि भंगेषु ग्रहणं प्रतिपत्तव्यम्। विधिप्रधानत्वाद्विधिरेव भंगः। अथार्थतो द्वितीयं प्रदर्शयन्ति--स्यान्नास्त्येवेति निषेधप्रधानकल्पनयाऽयं भंगः। यदेव नियतं साध्यसद्भावेऽस्तित्वं तदेव साध्याभावे साधनस्य नास्तित्वमभिधीयते। यथा घटः स्वद्रव्यचतुष्टयैरस्तित्वेन सिद्धः तथा मुद्गरसंयोगादिना नष्टः सन् नास्तित्वरूपेण सिद्धो भवति, अस्तित्वस्य नास्तित्वाविनाभावित्वात्। तथा च क्षणविनश्वराणां भावानामुत्पत्तिरेव विनाशे कारणमिष्यते। तदुक्तम्--" उत्पत्तिरेव भावानां विनाशे हेतुरिष्यते। योजाश्च न च ध्वस्त" इति उत्पत्तिरस्तित्वस्य सिद्धिं करोति। सैव विनाशापरपर्यायनास्तित्वस्य मूलकारणत्वादविनाभावः सिद्धश्च। न च तेनैव स्वरूपेणास्तित्वनास्तित्वयोरेकत्र स्थाने निरूपणाद्भावाभावयोरैक्यापत्तेरनिष्टप्रसंग इति। भिन्नभिन्नसमयप्ररूपणायां नैष दोषः। प्रतिसमयक्षयित्वाद्भावानां। नापि यस्मिन् समये उत्पादस्तस्मिन् समये विनाश इति मन्यतेऽस्माभिः, ततोऽस्तित्वस्याविनाभावि नास्तित्वं सिद्धम्। एवं सर्वं वस्तु स्वपरद्रव्यचतुष्टयापेक्षयाऽस्ति नास्ति, अस्तित्वप्रधानदशायां प्रथमो भंगः। निषेधद-

शायां तु द्वितीयो भंगः। अथार्थतस्तृतीयभंगं प्रकटयन्ति--स्यादस्त्येवं स्यान्नास्त्येवेति। सर्ववस्तु क्रमेण एव स्वपरद्रव्यादिच-तुष्टयाधारानाधारविवक्षया प्राप्तपूर्वापरभावाभ्यां विधिनिषेधाभ्यां प्रधानतया विशेषितं तृतीयभंगभाग्वस्तु भवतीति, घटवत्। यथा घटः स्वीयद्रव्याद्यपेक्षया कथञ्चिदस्त्येव स्यात्, परद्रव्यापेक्षया नास्त्येव स्यात्। विधिप्रतिषेधप्रधानोऽयं तृतीयभंगः। अथार्थतश्चतुर्थभंगं व्यक्तीकुर्वन्ति--स्यादवक्तव्यं युगपद्विधिनिषेधकल्पनया चतुर्थ इति सदंशासदंशयोर्द्वयोः समकालप्ररूपणानिषेधप्रधानोऽयं भंगः। तथाहि--विधिप्रतिषेधधर्मयोर्युगपत्प्रधानभूतयोरेकस्य पदार्थस्य युगपद्विधिनिषेध-द्वय इति प्रधानविधानविवक्षायां तादृक्शब्दस्यानिर्वचनीयत्वादवक्तव्यं घटादिवस्तु, तस्य विधिप्रतिषेधधर्माक्रान्तस्यापि युगपद्द्वयधर्मस्यावक्तव्यरूपत्वात् युगपद्विरुद्धद्वयधर्मस्याप्रयोगः शीतोष्णयोरिव सुखदुःखयोरिवानयोः क्रमेणैवार्थप्रत्यायने सामर्थ्यात् न तु युगपदिति, क्तक्तवतुसंकेतितनिष्ठाशब्दवत्। अथवा पुष्पदन्तशब्देन संकेतितवत्। निष्ठाशब्देन पुष्पद-न्तशब्देन वा क्रमेणैव क्तक्तवत्वोः सूर्यचन्द्रमसोश्चार्थप्रत्ययः, तेन द्वन्द्वादिपदानामपि युगपदर्थप्रत्यायकत्वमपास्तम्। धव-खदिरौ स्त इत्यत्र क्रमेणैव ज्ञानं न युगपदिति। तथैव प्रत्ययत्वात्, समकालावाचकत्वात्। अवक्तव्यं जीवाजीवादि वस्तु युगपद्विधिप्रतिषेधविकल्पनया संक्रान्तमेव प्रत्यवतिष्ठते। अस्तित्वनास्तित्वधर्मविशिष्टोऽपि समकालं अस्तित्वनास्तित्वाभ्यां वक्तुमनिर्वचनीयो घट इति फलितार्थः चतुर्थो भङ्गः। अथार्थतः पञ्चमभंगं प्रादुष्कुर्वन्ति--स्यादस्त्येव स्यादवक्तव्यमिति सदंशपूर्वको युगपत्सदंशासदंशानिर्वचनीयकल्पनाप्रधानोऽयं भंगः। स्वस्वद्रव्यादिचतुष्टयैर्विद्यमानत्वेऽपि सदंशोऽसदंश इति प्ररूपणां कर्तुमसमर्थेऽस्मिन् भंगे सर्वं वस्तु जीवादिस्वद्रव्यचतुष्टयापेक्षया समस्त्यपि विधिप्रतिषेधरूपाभ्यां वक्तुमनि-

वचनीयं । अस्त्यत्र प्रदेशे घटः सद्रूपासद्रूपाभ्यां यौगपद्येन स्वरूपं निर्देष्टुमसमर्थत्वात् विधित्वेऽपि अवक्तव्य इति फलितार्थः पंचमो भंगः । अथार्थतः षष्ठं भंगं प्रकटयन्ति–स्यान्नास्त्येव स्यादवक्तव्यमिति निषेधपूर्वको युगपद्विधिनिषेधानिर्वचनीयप्रधानोऽयं भंगः । परद्रव्यादिचतुष्टयैरविद्यमानत्वेऽपि सदंशासदंश इति प्ररूपणां कर्तुमसमर्थेऽस्मिन् भंगे सर्वं वस्तु जीवाजीवादिपरद्रव्यचतुष्टयापेक्षया नास्त्यपि विधिप्रतिषेधरूपाभ्यां वक्तुमनिर्वचनीयम् । नास्त्यत्र प्रदेशे घटः सद्रूपासद्रूपाभ्यां यौगपद्येन स्वरूपं निर्देष्टुमसमर्थत्वान्नास्तित्वेऽपि अवक्तव्य इति फलितार्थः षष्ठो भंगः । इदानीमर्थतः सप्तमभंगमाविष्कुर्वन्ति–स्यादस्त्येव स्यान्नास्त्येव स्यादवक्तव्यमिति अनुक्रमेणास्तित्वनास्तित्वपूर्वको युगपद्विधिनिषेधप्ररूपणानिषेधप्रधानोऽयं भंगः । इतिः सप्तभंगीसमाप्तौ । स्वद्रव्यादिचतुष्टयापेक्षयाऽस्तित्वेऽपि परद्रव्यादिचतुष्टयापेक्षया नास्तित्वेऽपि 'विधिर्वा प्रतिषेधो वेति' प्रतिपादयितुमसमर्थेऽस्मिन् भंगे सर्वं जीवादिवस्तु स्वद्रव्यापेक्षयाऽस्ति, परद्रव्यापेक्षया नास्त्यपि समसमयं विधिप्रतिषेधरूपाभ्यां सह युगपत्प्रतिपादयितुमसमर्थम् । यथा स्वद्रव्यापेक्षया नास्त्यत्र घटः, परद्रव्यापेक्षया नास्त्यत्र घटः विधिनिषेधरूपाभ्यां यौगपद्येन स्वरूपं निर्देष्टुमशक्यत्वादवक्तव्यमिति स्फुटार्थः । इत्यतः स्यादस्त्येव स्यान्नास्त्येव स्यादवक्तव्यमितिभंगेनोपदर्श्यत इति ॥

नन्वेकस्मिन् वस्तुनि अनन्तधर्मकल्पनाऽङ्गीकारादनन्तभंगीप्रसंग इति तत्रोक्तं प्रमाणनयतत्त्वालोकालंकारे–"एकत्रवस्तुनि विधीयमाननिषिध्यमानानन्तधर्माभ्युपगमेनानन्तभंगीप्रसंगादसंगतैव सप्तभंगीति न विधेयं चेतसि, विधिप्रतिषेधप्रकारापेक्षया प्रतिपर्यायं वस्तुन्यनन्तानामपि सप्तभंगीनामेव संभवात् प्रतिपर्यायं प्रतिपाद्यपर्यनुयोगानां सप्तानामेव संभ

वादिति ” । तथा च तत्रैव–“ इयं सप्तभंगी प्रतिभंगं सकलादेशस्वभावा विकलादेशस्वभावा च प्रमाणप्रतिपन्नानन्तधर्मात्मकवस्तुनः कालादिभिरभेदवृत्तिप्राधान्यादभेदोपचाराद्वा यौगपद्येन प्रतिपादकं वचः सकलादेशः, तद्विपरीतस्तु विकलादेशः । के पुनः कालादयः । काल आत्मस्वरूपं अर्थः सबन्धः उपकारः गुणिदेशः संसर्गः शब्दः इत्यष्टौ । संग्रहश्च–“ कालात्मरूपसंबन्धाः संसर्गोपक्रिये तथा । गुणिदेशार्थशब्दाश्चेत्यष्टौ कालादयः स्मृताः ॥ १ ॥ ” विशेषार्थजिज्ञासुभिः स्याद्वादरत्नाकरे लघुवृत्तौ च द्रष्टव्यमिति ॥

यदत्र रभसात् किंचिद्दुरुक्तं मयका बुधैः । सप्तभंगीविवक्षायां शोध्यं शास्त्रानुसारतः ॥ १ ॥

## ॥ इति सप्तभंगीसमर्थनः प्रथमः सर्गः ॥

अथानुसप्तभंगं नयलक्षणान् प्रारभन्ते । नानास्वभावेभ्यो व्यावृत्यैकस्मिन् स्वभावे वस्तु नयति प्राप्नोतीति नयः । प्रमाणेन संगृहीतार्थैकांशो नयः । ज्ञातुरभिप्रायः श्रुतविकल्पो वा इत्येके । अनुयोगवृत्तिकृतस्तु सर्वत्रानन्तधर्माध्यासिते वस्तुनि एकांशग्राहको बोधो नय इति “ नीयते येन श्रुताख्यप्रमाणविषयीकृतस्यार्थस्यांशस्तदितरांशौदासीन्यतः सप्रतिपत्तुरभिप्रायविशेषो नयः ” एतस्यार्थः–येन प्रत्यक्षादिप्रमाणेन शब्दप्रमाणेन विषयीकृतस्य पदार्थस्यांशो अंशा वा नीयते प्राप्यते इतरांशौदासीन्यभावेन स नयः । अंश इत्येकवचनं जातावेकवचनम् । तदितरांशप्रतिक्षेपे तु तदाभासताप्रसंगः । तदुक्तं पंचाशति–“ निःशेषांशजुषां प्रमाणविषयीभूयं समासेदुषां, वस्तूनां नियतांशकल्पन-

पराः सप्तश्रुता भंगिनः । औदासीन्यपरायणास्तदपरे चांशे भवेयुर्नया, श्चेदेकान्तकलंकपंककलुषास्ते स्युस्तदा दुर्नयाः ॥ १ ॥ " जिनमते यत्किंचिन्नयैर्विहीनं न भवति । यदुक्तं विशेषावश्यके–" नत्थि नएहिं विहुणं सुत्तं अत्थो अ जिणमए किंचि । आसज्ज उ सोयारं नए नयविसारउ बूया ॥ १ ॥ " प्रसंगान्नयाभासलक्षणमाह–स्वाभिप्रेतादंशादितरांशापलापी नयाभासः । स्वस्येप्सितादर्थांशादन्यार्थं प्रतिपद्यमानो नयवदाभासमान इत्यर्थः न तु नयः यथान्यतीर्थिकानां नित्यानित्याद्यन्यतरैकान्तप्रदेशकवाक्यमिति । ते च नया विस्तारविवक्षायामनेकधा भवन्ति, नानावस्तुन्यनन्तांशानामेकैकांशविधायिनो ये वक्तुरुपन्यासाः । यदुक्तम्–" जावइया वयणपहा तावइया चेव हुंति नयवादा " इति व्यासतो नयान् प्रवक्तुं न शक्यते । समासतो नयं प्रकटयन्ति–स द्वेधा द्रव्यार्थिकः पर्यायार्थिकश्च । यदुक्तम्–" णिच्छयववहारनया मूलिमभेदा णयाण सव्वाणं । णिच्छयसाहणहेऊ दव्वय पज्जत्थिया मुणह ॥ १ ॥ " अथ द्रव्यलक्षणमाह–सत् द्रव्यलक्षणं, सीदति स्वकीयान् गुणपर्यायान् व्याप्नोतीति सत्, उत्पादव्ययध्रौव्ययुक्तमर्थक्रियाकारि च सत् । " यदेवार्थक्रियाकारि तदेव परमार्थसत् । यच्च नार्थक्रियाकारि तदेव परतोऽप्यसत् ॥ १ ॥ " इति निजनिजप्रदेशसमूहैरखंडवृत्त्या स्वभावविभावपर्यायान् द्रवति, द्रोष्यति, अदुद्रुवदिति द्रव्यं, गुणपर्यायवद्द्रव्यं वा, गुणाश्रयो द्रव्यं वा । यदुक्तं विशेषावश्यकवृत्तौ–"दवए दुयए दोरवयवो विगारो गुणाण संवादो (सब्भावो)। दव्वं भव्वं भावस्स भूयभावं च जं जोग्गं ॥१॥ " द्रवति तांस्तान् पर्यायान् प्राप्नोति मुंचति वा, द्रूयते स्वपर्यायैरेव प्राप्यते मुच्यते वा, द्रुः सत्ता तस्या एवावयवो विकारो वेति द्रव्यम् । अवान्तरसत्तारूपाणि द्रव्याणि महासत्ताया अवयवो विकारो वा भवन्त्येवेति भावः । गुणा रूपरसादयस्तेषां सद्भावः समूहः घटा-

दिरूपो द्रव्यम्। तथा 'भव्वं भावस्स त्ति' भविष्यतीति भावस्तस्य भाविनः[1] पर्यायस्य योग्यं यद्द्रव्यं तदपि द्रव्यं राज्यपर्यायार्हकुमारवत्। तथा भूतं हि पश्चात्कृतो भावः पर्यायो यस्य तदपि द्रव्यमनुभूतघृताधारत्वपर्यायरिक्तघृतघटवत्। चशब्दाद्भूतभविष्यत्पर्यायं द्रव्यं भूतभविष्यद्घृताधारत्वपर्यायरिक्तघृतघटवत्। यद्योग्यं भूतस्य भावस्य भूतभविष्यतोश्च भावयोरिदानीमसत्त्वेऽपि यद्योग्यमर्हं तदेव द्रव्यमुच्यते नान्यत्, अन्यथा सर्वेषामपि पर्यायाणामनुभूतत्वादनुभविष्यमाणत्वाच्च सर्वस्यापि पुद्गलादेर्द्रव्यत्वप्रसंगादिति गाथार्थः। प्रसंगायातौ स्वभावविभावौ पर्यायौ प्रदर्शयते–तत्रागुरुलघुद्रव्यविकाराः स्वभावपर्यायाः, तद्विपरीतः स्वभावादन्यथाभवनं विभावः। तत्रागुरुलघुद्रव्यं स्थिरं सिद्धिक्षेत्रम्। यदुक्तं समवायांगवृत्तौ–"गुरुलघुद्रव्यं यत्तिर्यग्गामि वाय्वादि, अगुरुलघु यत् स्थिरं सिद्धिक्षेत्रं घंटाकारव्यवस्थितज्योतिष्कविमानादीनीति"। गुणविकाराः पर्यायास्ते च द्वादशधा–अनन्तासंख्यातसंख्यातभागगुणवृद्धिभ्यां तथानन्तासंख्यातसंख्यातभागगुणहानिभ्यां च षट् षट् इति। विभावपर्यायास्तु नरनारकादिचतुर्गतिरूपाश्चतुरशीतिलक्षयोनयो वा। गुणान् विभजते अस्तित्वं, वस्तुत्वं, सामान्यविशेषात्मकं[2], द्रव्यत्वं, प्रमेयत्वं, अगुरुलघुत्वं, प्रदेशत्वं[3], चेतनत्वं, अचेतनत्वं, मूर्तत्वं, अमूर्तत्वं, चेति द्रव्याणां सामान्यगुणा दश। प्रत्येकमष्टौ अष्टौ सर्वेषां। ज्ञानदर्शनसुखवीर्यस्पर्शरसगन्धवर्णगतिहेतुत्वस्थितिहेतुत्वावगाहनहेतुत्वं वर्तमानहेतुत्वं चेतनत्वमचेतनत्वं मूर्तत्वममूर्तत्वं चेति द्रव्याणां षोडश विशेषगुणाः। प्रत्येकं जीवपुद्गलयोः षट्, इतरेषां त्रयो गुणाः, अन्त्याश्चत्वारो गुणाः, स्वजातिविजातिभ्यां सामान्यविशेषाश्च। प्रसंगतो जीवादिद्रव्याणां

---

१ भावस्य. २ विशेषात्मकत्वं. ३ प्रदेशवत्त्वं.

स्वभावाः प्ररूप्यन्ते—अस्तिस्वभावः, नास्तिस्वभावः, नित्यस्वभावः, अनित्यस्वभावः, एकस्वभावः, अनेकस्वभावः, भेदस्वभावः, अभेदस्वभावः, भव्यस्वभावः, अभव्यस्वभावः, परमस्वभावः (च) एते स्वभावा द्रव्याणां सामान्याः। चेतनाचेतनमूर्तामूर्तैकप्रदेश एतान् मुक्त्वा धर्मादित्रयाणां ( षोडश ) १६ स्वभावाः। बहुप्रदेशस्वभावं मुक्त्वा कालस्य १५ ( पंचदश ) स्वभावाः। संग्रहश्च-" एकविंशतिभावाः स्युर्जीवपुद्गलयोर्मताः। धर्मादीनां षोडश स्युः काले पंचदश स्मृताः ॥ १ ॥ " स्वभावा अपि गुणपर्यायेयोरन्तर्भूता एव द्रष्टव्याः, अन्यथा द्रव्यलक्षणे तयोरिव तेषामपि ग्रहणमभविष्यत्। उक्ता गुणाः, गुणविकाराः पर्यायास्तेऽप्युक्ता एव। एतच्च द्रव्यनयमिश्रितं विशेषार्थप्रतिपत्तये भवति। यदुक्तम्—"नानास्वभावसंयुक्तं द्रव्यं ज्ञात्वा प्रमाणतः। तच्च सापेक्षसिद्ध्यर्थं स्यान्नयैर्मिश्रितं कुरु ॥ १ ॥" तदेव द्रव्यमर्थः प्रयोजनं यस्यासौ द्रव्यार्थिकः। सोऽपि युक्तिकल्पनया दशधा। तथाहि—अन्वयद्रव्यार्थिकः, यथा गुणपर्यायस्वभावं द्रव्यम्। स्वद्रव्यादिग्राहको वा, यथा स्वद्रव्यचतुष्टयापेक्षया द्रव्यमस्ति। परद्रव्यादिग्राहको वा, यथा परद्रव्यादिचतुष्टयापेक्षया द्रव्यं नास्ति। परमभावग्राहको वा, यथा ज्ञानमय आत्मा, अत्रानेकेषां स्वभावानां मध्याज्ज्ञानाख्यपरमस्वभावो गृहीतः। कर्मोपाधिनिरपेक्षः शुद्धद्रव्यार्थिको वा, यथा जीवः सिद्धसदृशः शुद्धात्मा। उत्पादव्ययगौणत्वेन सत्ताग्राहकः शुद्धद्रव्यार्थिकः, यथा द्रव्यं नित्यम्। भेदकल्पनानिरपेक्षः शुद्धद्रव्यार्थिको वा, यथा निजपर्यायस्वभावत्वादभिन्नं द्रव्यम्। कर्मोपाधिसापेक्षोऽसावशुद्धद्रव्यार्थिकः, यथा क्रोधादिकर्मजभाव आत्मा। उत्पादव्ययसापेक्षोऽसावशुद्धद्रव्यार्थिकः, यथैकस्मिन् समये द्रव्यमुत्पादव्ययध्रौव्ययुक्तम्। भेदकल्पनासापेक्षोऽसावशुद्धद्रव्यार्थिकः, यथात्मनो दर्शनज्ञानादयो गुणाः। उक्ता द्रव्यार्थिकस्य भेदाः।

सांप्रतं पर्यायार्थिकनयं व्याचिख्यासुराह–पर्येति उत्पादमुत्पत्तिं विपत्तिं च प्राप्नोतीति पयार्यः। यदुक्तम्–" अनादिनिधने द्रव्ये स्वपर्यायाः प्रतिक्षणम्। उन्मज्जन्ति निमज्जन्ति कूलकल्लोलवज्जले ॥ १ ॥" पूर्वोक्ता अपि षट् हानिवृद्धिरूपा नरनारकादिरूपाश्चेह पर्यायशब्देन गृह्यन्ते। पर्यायो हि द्वेधा–सहभाविपर्यायोऽथवा क्रमभाविपर्यायः। तदुक्तम्–" पर्यायो द्विविधः, क्रमभावी सहभावी च, सहभावी गुण इत्यभिधीयते, पर्यायशब्देन तु पर्यायसामान्यस्य स्वव्यक्तिव्यापिनोऽभिधानान्न दोष इति "। तत्र सहभाविपर्याया गुणाः, यथात्मनो विज्ञानव्यक्तिशक्त्यादयः। क्रमभाविनः पर्यायास्त्वात्मनः, यथा सुखदुःखशोकहषादयः। पर्याया अपि स्वभावविभावाभ्यां द्रव्यगुणाभ्यां च चतुर्भेदाः। तथाहिस्वभावद्रव्यव्यंजनपर्यायाश्चरमशरीरात् किंचिन्न्यूनसिद्धपर्यायाः ॥ १ ॥ स्वभावगुणव्यंजनपर्यायाः, यथा जीवस्यानन्तचतुष्टयरूपाः ॥ २ ॥ विभावद्रव्यव्यंजनपर्याया यत्यादयः ॥ ३ ॥ विभावगुणव्यंजनपर्याया मत्यादयः ॥ ४ ॥ पुद्गलस्यापि द्व्यणुकादयो विभावद्रव्यव्यंजनपर्यायाः ॥ ५ ॥ रसरसान्तरगन्धगन्धान्तरादयो विभावगुणव्यंजनपर्यायाः ॥ ६ ॥ अविभागिपुद्गलपरमाणवः स्वभावद्रव्यव्यंजनपर्यायाः ॥ ७ ॥ वर्णगन्धरसैकैकाविरुद्धस्पर्शद्वये च स्वभावगुणव्यंजनपर्यायाः ॥ ८ ॥ एवमेकत्वपृथक्त्वादयोऽपि पर्यायाः। उक्तं च–" एगत्तं च पुहत्तं च संखा संठाणमेव च। संजोगो य विभागो य पज्जवाणं तु लक्खणम् ॥ १ ॥" पर्याय एवार्थः प्रयोजनमस्यासौ पर्यायार्थिकः। सोऽपि षड्विधस्तद्यथा–अनादिनित्यपर्यायार्थिको यथा पुद्गलपर्यायो मेर्वादिर्नित्यः ॥ १ ॥ सादिनित्यपर्यायार्थिको यथा सिद्धपर्यायो नित्यः ॥ २ ॥ सत्तागौणत्वेनोत्पादव्ययग्राहकस्वभावोऽनित्यशुद्धपर्यायार्थिको यथा समयं समयं प्रति पर्याया विनाशिनः ॥ ३ ॥ सत्तासापेक्षस्वभावो

नित्याशुद्धस्वभावो नित्याशुद्धपर्यायार्थिको यथैकस्मिन् समये उत्पादव्ययध्रौव्यात्मकः पर्यायः ॥ ४ ॥ कर्मोपाधिनिरपेक्षस्वभावो नित्यशुद्धपर्यायार्थिको यथा संसारी जीवः सिद्धसदृक् शुद्धात्मा ॥ ५ ॥ कर्मोपाधिसापेक्षस्वभावोऽप्यनित्याशुद्धपर्यायार्थिको यथा संसारिणामुत्पत्तिमरणे स्तः ॥ ६ ॥ इत्युक्ताः पर्यायार्थिकस्य युक्तितः षड्भेदाः ।

' अथ तयोः स्थानप्रधानमाह–द्रव्यास्तिकनयो हि नित्यस्थानमेवाह, द्रव्यस्य नित्यत्वात् सकलकालभावित्वाच्च । पर्यायार्थिकस्त्वनित्यमेव स्थानमाह, पर्यायाणामनित्यत्वात्प्रायशः । तदुक्तं राजप्रश्नीयवृत्तौ–" द्रव्यार्थनये नित्यं पर्यायार्थनये त्वनित्यं " द्रव्यास्तिकनयो द्रव्यमेव तात्विकमभिमन्यते न तु पर्यायान्, द्रव्यं चान्वयिपरिणामित्वात् सकलकालभावि भवति । ननु गुणप्रधानस्तृतीयो गुणार्थिकनामा नयः कथं न स्यादिति चेन्न, गुणानां पर्यायग्रहणेनैव ग्रहणसंभवात् । ननु द्रव्याणामेव पर्यायास्तर्हि द्रव्यार्थिकपर्यायार्थिकनयद्वयं कथमिति चेत्सत्यं, द्रव्यपर्याययोः स्वरूपविवक्षायां कश्चिद्विशेषः, राहोः शिर इति कथंचिद्भेदे षष्ठी । तथा हि–द्रव्यादपि सूक्ष्मः पर्यायः, एकस्मिन् द्रव्येऽनन्तानां पर्यायाणां संभवात् । द्रव्ये वर्धमाने पर्याया नियमाद्वर्धन्ते, प्रतिद्रव्यं संख्येयानामसंख्येयानामवधिना परिच्छेदात् । पर्याये वर्धमाने च द्रव्यं भाज्यं " भयणाए खेत्तकाला परिवड्ढंतेसु दव्वभावेसु । दव्वे वड्ढइ भावो भावे दव्वं तु भयणिज्जं ॥ १ ॥ " पुनश्च क्षेत्रादपि चानन्तगुणं द्रव्यं द्रव्यादपि चावधिविषयाः पर्यायाः संख्येयगुणा असंख्येयगुणा वा " खित्तविसेसेहिंतो दव्वमणंतगुणियं पएसेहिं । दव्वेहिं तो भावो संखगुणोऽसंखगुणिओ वा ॥ १ ॥ " एतत्सर्वं नन्दिटीकायां सविस्तरमभिहितं । तस्माद्द्रव्यपर्याययोः स्वरूपविवक्षातो भिन्नत्वाद्भिन्ना नया द्रव्यार्थिकाः पर्यायार्थिकाश्च । ते च यद्यपि स्वभावभेदैः पर-

स्परं मिलन्तोऽपि स्वस्वपृथग्भावं न त्यजन्ति उक्तं च—"अन्नोन्नं पविसंता दिंता ओगास मन्नमन्नस्स । मेलंता वि अ णिच्चं सगसगभावं न वि जहंति ॥ १ ॥" स्वभावभेदोऽग्रेवक्ष्यते । ननु द्रव्यपर्यायव्यतिरिक्तौ सामान्यविशेषौ विद्येते तत्कथं न सामान्यार्थिकविशेषार्थिकनामानौ नयौ भवतः इति चेन्न, द्रव्यपर्यायव्यतिरिक्तसामान्यविशेषाप्रसिद्धेः, तद्यथा । प्रसंगात्सामान्यं दर्शयति—सामान्यं द्विधा, एकं तिर्यक्सामान्यमपरमूर्ध्वतासामान्यम् । आद्यलक्षणमाह—प्रतिव्यक्तितुल्या परिणतिस्तिर्यक्सामान्यं शबलशाबलेयपिंडेषु गोत्वमिति । तिर्यक् सामान्यं च गवादौ गोत्वादिस्वरूपतुल्यपरिणतिरूपं, उदाहरणं च तज्जातीय एवायं गोपिंडो वा गोसदृशो गवय इति वा । द्वितीयलक्षणमाह—पूर्वापरपरिणामसाधारणद्रव्यमूर्ध्वतासामान्यं, यथा कटककंकणाद्यनुगामि कांचनमिति । ऊर्ध्वतासामान्यं च परापरविवर्तव्यापि मृत्स्नादिद्रव्यं, त्रिकालगामि चैतत् । तदुक्तम्— "पूर्वापरपर्याययोरनुगतमेकं भवति तांस्तान् पर्यायान् गच्छतीति व्युत्पत्त्या त्रिकालानुयायी यो वस्त्वंशस्तदूर्ध्वतासामान्यमित्यभिधीयत इति" । कटके कंकणे च तत्तत्कांचनमेवाथवा स एवायं जिनदत्त इत्युदाहरणम् । तत्र तिर्यक्सामान्यं तु प्रतिव्यक्तिसादृश्यपरिणतिलक्षणं व्यंजनपर्याय एव स्थूलाः कालान्तरस्थायिनः शब्दानां संकेतविषया व्यंजनपर्याया इति प्रावचनिकप्रसिद्धेः । ऊर्ध्वतासामान्यं तु द्रव्यमेव विवक्षितं विशेषोऽपि सामान्यवैसदृश्यविवर्तनलक्षणे व्यक्तिरूपः पर्याय एवान्तर्भवतीति न ताभ्यामधिकावकाशो नयस्य ।

अथ सप्तनयसंख्यामाह—आद्यो द्रव्यार्थिकनयस्तस्य त्रयो भेदा नैगमसंग्रहव्यवहारभेदात्, द्वितीयः पर्यायार्थिकनयस्तस्य ऋजुसूत्रशब्दसमभिरूढैवंभूतनयभेदाच्चत्वारो भेदाः । तदुभयोर्भेदसंग्रहे च सप्तैव नयाः । पंचैव नयाः, षडेव नयाः,

चत्वार एव मूलनयाः प्रवचनसारोद्धारवृत्तौ । सविस्तरमग्रे वक्ष्यन्ते । यदुक्तमनुयोगद्वारवृत्त्यादिषु—" णेगेहिं माणेहिं मिणइ त्ति णेगमस्स य निरुत्ती, सेसाणंपि नयाणं लक्खणमिणमो सुणह वोच्छं ॥ १ ॥ संगहियपिंडियत्थं संगहवयणं समासओ बिंति । वच्चति विणिच्छियत्थं ववहारो सव्वदव्वेसु ॥ २ ॥ पच्चुप्पन्नग्गाही उज्जुसुओ णयविही मुणेयव्वो । इच्छति विसेसियतरं पच्चुप्पन्नं नओ सद्दो ॥ ३ ॥ वत्थुओ संकमणं होइ अवत्थू णए समभिरूढे । वंजण-अत्थ-तदुभए एवंभूओ विसेसेति ॥ ४ ॥ नायंमि गिण्हियव्वे, अगिण्हियव्वे य इत्थ अत्थंमि। जइयव्वमेव इइ जो उवएसो सो नओ नाम ॥५॥ " तत्र नैगमद्रव्यार्थिकनयः धर्मधर्मिद्रव्यपर्यायादिप्रधानाप्रधानादिगोचरत्वेन गृहीतस्य वस्तुनः संपिंडितार्थं वदतीति संग्रहः । द्रव्यार्थिकस्त्वभेदरूपतया वस्तुजातं समेकीभावेन गृह्णातीति संग्रहेण वा गृहीतस्य गोचरीकृतस्यार्थस्य भेदरूपतया वस्तुव्यवहरणं व्यवहारद्रव्यार्थिकः । नैगमव्यवहारौ चाशुद्धद्रव्यानुभविकत्वेनाशुद्धौ, संग्रहः शुद्धद्रव्यवादित्वाच्छुद्धः । तदुक्तमनुयोगवृत्तौ—" नैगमव्यवहाररूपोऽविशुद्धः कथं यतो नैगमव्यवहारौ अनन्तद्व्यणुकाद्यनेकव्यक्त्यात्मकं कृष्णाद्यनेकगुणाधारं त्रिकालविषयं चाविशुद्धं द्रव्यमिच्छतः, संग्रहश्च परमाण्वादिसामान्यादेकं तिरोभूतगुणकलापमविद्यमानपूर्वापरविभागं नित्यं सामान्यमेव द्रव्यमिच्छत्येव, तच्च किलानेकताभ्युपगमकलंकेनाकलंकितत्वाच्छुद्धं, ततः शुद्धद्रव्याभ्युपगमपरत्वाच्छुद्धमेवायमिति " ।

अथ नैगमनयं प्ररूपयन्ति—नैके गमा बोधमार्गा यस्यासौ नैगमो नाम नयः स्यात् । पृषोदरादित्वात् ककारलोपः । स त्रेधा—धर्मद्वयगोचरः, धर्मिद्वयगोचरः, धर्मधर्मिगोचरः । अत्र धर्मिधर्मशब्देन द्रव्यं व्यंजनपर्यायं च वदन्ति । अथाद्योदाहरणमाह—सच्चैतन्यमात्मनीति । अत्र चैतन्याख्यस्य व्यंजनपर्यायस्य विशेष्यत्वात् मुख्यतया विवक्षणं, सत्त्वा-

ख्यव्यंजनपर्यायस्य तु विशेषणत्वादमुख्यतयेति धर्मद्वयगोचरो नैगमः प्रथमः। द्वितीयस्योदाहरणमाह–वस्तुपर्यायवद्द्रव्यमत्र द्रव्याख्यस्य धर्मिणो विशेष्यत्वेन प्राधान्यं, वस्त्वाख्यस्य तु धर्मिणो विशेषणत्वेनाप्राधान्यमिति धर्मिद्वयगोचरो नैगमो द्वितीयः। अथ तृतीयोदाहरणं–क्षणमेकं सुखी विषयासक्तजीव इति, अत्र हि विषयासक्तजीवस्य द्रव्यस्य विशेष्यत्वात् प्राधान्यं, सुखलक्षणस्य पर्यायस्याप्राधान्यं तद्विशेषणत्वादिति धर्मिधर्मालंबनो नैगमस्तृतीयः। अथवा निगमो विकल्पस्तत्र भवो नैगमः, स त्रिविधः, भूतभविष्यद्वर्तमानकालभेदात्। अतीतस्य वर्तमानवत्कथनं यत्र स भूतनैगमो यथा तदेवाद्य दीपोत्सवपर्व यस्मिन् वर्धमानस्वामी मोक्षं गतवान्। भाविनि भूतवदुपचारो यत्र स भविष्यन्नैगमो यथार्हन्तः सिद्धतां प्राप्ता एव। कर्तुमारब्धमीषन्निष्पन्नं वा वस्तु कथ्यते यत्र स वर्तमाननैगमो यथा ओदनः पच्यते। नैगमनयेन धर्मधर्मिणोरन्यतरस्यैव प्राधान्यमनुभवतीति प्राधान्येन द्रव्यपर्याययोः संपिंडितार्थं जानद्विज्ञानं प्रमाणत्वेन प्रतिपत्तव्यं नान्यदिति।

अथ नैगमाभासं प्ररूपयन्ति–धर्मद्वयादीनामैकान्तिकपार्थक्याभिसंधिर्नैगमाभास इति। आदिपदेन द्रव्यद्वयद्रव्यपर्याययोर्ग्रहणम्। उदाहरणं यथा–आत्मनि सच्चैतन्ये परस्परमत्यन्तं पृथग्भूते इत्यादिरिति। आदिशब्देन वस्तुपर्यायवद्द्रव्ययोः क्षणमेकं सुखीति सुखजीवलक्षणयोर्द्रव्यपर्याययोर्ग्रहणम्। तयोर्द्वयोः सर्वथा भिन्नताप्ररूपणायां नैगमाभासो दुर्नय इत्यर्थः। नैयायिकवैशेषिकदर्शनमप्येतदाभासतया ज्ञेयमिति।

अथ द्रव्यार्थिकनयस्य द्वितीयभेदं संग्रहनामानमुपवर्णयन्ति–सामान्यमात्रग्राही परामर्शः संग्रहः। मात्रं कार्त्स्न्येऽवधारणे च। सामान्यमशेषविशेषरहितं सत्त्वद्रव्यत्वादिकं गृह्णातीत्येवं शीलः, समेकीभावेन पिंडीभूततया विशेषराशिं गृह्णा-

तीति संग्रहः । अयमर्थः-स्वजातेर्दृष्टेष्टाभ्यामविरोधेन विशेषाणामेकरूपतया यद्ग्रहणं स संग्रह इत्येतस्यार्थः । विशेष-
राहित्येन पिण्डीभूतसामान्यविशेषवद्वस्तु शुद्धसत्त्वभवन् ज्ञानविशेषः संग्रहतयाख्यायते । संग्रहोऽपि परापरभेदाद्द्विविधः ।
तत्र परलक्षणमाह-अशेषविशेषेष्वौदासीन्यं भजमानः शुद्धद्रव्यं सन्मात्रमभिमन्यमानः परसंग्रहः, यथा विश्वमेकं सदवि-
शेषात्, अत्र हि विश्वस्यैकत्वं सदितिज्ञानसामान्यहेतुजनितसत्ताकत्वाभेदरूपेण गृह्यते । परसंग्रहाभासलक्षणमाह-सत्ता-
द्वैतं स्वीकुर्वाणः सकलविशेषान्निराचक्षाणस्तदाभासः । उदाहरणं यथा-सत्तैव तत्त्वं ततः पृथग्भूतानां विशेषाणामदर्श-
नादिति अद्वैतवादिनां निखिलानि दर्शनानि तदाभासतया ज्ञेयानि । द्वितीयापरसंग्रहलक्षणमाह-द्रव्यत्वादीन्यवान्तरसामा-
न्यानि मन्वानस्तद्भेदेषु गजनिमीलिकामवलंबमानः पुनरपरसंग्रहः, यथा धर्माधर्माकाशकालपुद्गलजीवद्रव्याणामैक्यं,द्रव्यत्वा-
भेदादिति, अत्र हि द्रव्यत्वसामान्यज्ञानेनाभेदरूपेण षण्णां द्रव्याणामेकत्वं संगृह्यते । धर्मादिविशेषभेदेषु च गजनिमीलिका-
वदुपेक्षा । एवं चैतन्याचैतन्यपर्यायाणामैक्यं, पर्यायत्वसाधर्म्यात् । चैतन्यं ज्ञानं-"चैतन्यमनुभूतिः स्यात् सक्रियारूप-
मेव च । क्रिया मनोवचःकायैरन्विता वर्तते ध्रुवम् ॥ १ ॥ तद्विपरीतमचैतन्यं, तयोरैक्यं कथमिति विशेषविवक्षाणां काक्ष-
णमुपेक्षा द्रव्यत्वेनाभेदबुद्धिविवक्षणात् । तदाभासलक्षणमाह द्रव्यत्व । द्विकं प्रतिजानानः तद्विशेषान्निह्नुवानस्तदाभासो
यथा द्रव्यत्वमेव तत्त्वमिति, नास्ति च धर्मादिद्रव्यमित्यपह्नवः । यथा वस्तु वर्तते परं सामान्यविशेषत्वं क वर्तत इत्यपह्नवः ।
एवं सामान्यविशेषात्मनो वस्तुनो द्रष्टव्यम् । अथवा संग्रहः सामान्यविशेषाभ्यां द्विधा सामान्यसंग्रहोदाहरणं सर्वाणि-
द्रव्याणि परस्परमविरोधीनि । विशेषसंग्रहो यथा-सर्वे जीवाः परस्परमविरोधिनः । इति संग्रहनयः ।

अथ व्यवहारद्रव्यार्थिकनयं प्ररूपयन्ति—संग्रहेण गृहीतानां गोचरीकृतानामर्थानां विधिपूर्वकमवहरणं येनाभिसंधिना क्रियते स व्यवहार इति । एतस्यार्थः—संग्रहगृहीतस्य सत्त्वाद्यर्थस्य विधीयमानो यो ज्ञानविशेषस्तमेव विवेचयति स व्यवहारनामा नयः कथ्यते बुधैः । उदाहरणं यथा—यत् सत् तद्द्रव्यं पर्यायो वेति । अपरसंग्रहगृहीतार्थव्यवहारस्याप्युदाहरणमादिपदाद्बद्ध्यं, यथा—यद्द्रव्यं तज्जीवादिषड्विधमिति । पर्यायो द्वेधा क्रमभावी सहभावी चेति । एवं जीवा मुक्ताः संसारिणश्च । ये क्रमभाविनः पर्यायास्ते क्रियारूपाः अक्रियारूपाश्चेति । अथ व्यवहाराभासं लक्षयन्ति*यः पुनरपारमार्थिकं द्रव्यपर्यायविभागमभिप्रैति स व्यवहाराभासः, यथा चार्वाकदर्शनमिति । नास्तिको हि जीवद्रव्यादिर्नाभिमन्यते, स्थूलदृष्ट्या च भूतचतुष्टयं यावद्दृष्टिगोचरमिति। स्वकल्पितत्वेनातथ्यात्वाद्व्यवहाराभासमिति । अथ कतिपयमन्यतो लिख्यते—भेदोपचारतया वस्तु व्यवह्रियत इति व्यवहारः, गुणगुणिनोर्द्रव्यपर्याययोः संज्ञासंज्ञिनोः स्वभावतद्वतोः कारकतद्वतोः क्रियातद्वतोर्भेदाद्भेदकः सद्भूतव्यवहारः ॥१॥ शुद्धगुणगुणिनोः शुद्धपर्यायद्रव्ययोर्भेदकथनं शुद्धसद्भूतव्यवहारः ॥२॥ सोपाधिगुणगुणिनोर्भेदविषय उपचरितसद्भूतव्यवहारः, यथा जीवस्य मतिज्ञानादयो गुणाः ॥ ३ ॥ निरुपाधिगुणगुणिनोर्भेदकोऽनुपचरितसद्भूतव्यवहारः यथा केवलज्ञानादयो गुणाः ॥ ४ ॥ अशुद्धगुणगुणिनोरशुद्धद्रव्यपर्याययोर्भेदकथनमशुद्धसद्भूतव्यवहारः ॥ ५ ॥ स्वजात्यसद्भूतव्यवहारो यथा परमाणुर्बहुप्रदेशीति कथनम् ॥ ६ ॥ विजात्यसद्भूतव्यवहारो यथा मूर्तिमन्मतिज्ञानं मूर्तजनितत्वात् ॥ ७ ॥ उभयासद्भूतव्यवहारो यथा ज्ञेये जीवे चाजीवे ज्ञानमिति कथनं तयोर्ज्ञानविषयत्वात् ॥ ८ ॥ स्वजात्युपचरितासद्भूतव्यवहारो यथा पुत्रदारादि मम ॥ ९ ॥ विजात्युपचरितासद्भूतव्यवहारो यथा

॥ १०२ ॥

वस्त्रभूषणहेमरत्नादि मम ॥ १० ॥ तद्भयोपचरितासद्भूतव्यवहारो यथा देशराज्यदुर्गादि मम ॥ ११ ॥ अन्यत्र प्रसिद्धस्य धर्मस्यान्यत्र समारोपणमसद्भूतव्यवहारः ॥ १२ ॥ असद्भूतव्यवहार एवोपचारः, य उपचारादप्युपचारं करोति स उपचरितासद्भूतव्यवहारो यथा देवदत्तस्य धनमित्यत्र संश्लेषरहितं वस्तु संबन्धसहितवस्तुसंबन्धविषयः ॥ १३ ॥ संश्लेषसहितवस्तुसंबन्धविषयोऽनुपचरितासद्भूतव्यवहारो यथा जीवस्य शरीरमिति ॥ १४ ॥ उपचारोऽपि नवधा । तद्यथा-हि-द्रव्ये द्रव्योपचारः, १ गुणे गुणोपचारः, २ पर्याये पर्यायोपचारः, ३ द्रव्ये गुणोपचारः, ४ द्रव्ये पर्यायोपचारः, ५ गुणे द्रव्योपचारः,६ गुणे पर्यायोपचारः,७ पर्याये द्रव्योपचारः, ८ पर्याये गुणोपचारः,९ इति सर्वोऽप्यसद्भूतव्यवहारस्यार्थो द्रष्टव्यः। अत एवोपचारः पृथङ्नयो न भवतीति। मुख्याभावे सति प्रयोजने निमित्ते चोपचारः प्रवर्तते।सोऽपि संबन्धोऽविनाभावः-संश्लेषसंबन्धः, परिणामपरिणामिसंबन्धः श्रद्धाश्रद्धेयसंबन्धः, ज्ञानज्ञेयसंबन्धश्चेति। उपचरितासद्भूतव्यवहारस्त्रेधा–सत्यार्थः, असत्यार्थः, उभयार्थश्चेति । व्यवहारनयास्यार्थाः १४ भेदा ज्ञेयाः, भेदविषयो व्यवहार इति द्रव्यार्थिकस्य तृतीयो भेदः ।

इदानीं पर्यायार्थिकस्य चतुर्भेदप्ररूपणायां तावदृजुसूत्रं विवेचयन्ति–ऋजु वर्तमानक्षणस्थायि पर्यायमात्रं प्राधान्यतः सूत्रयन्नभिप्राय ऋजुसूत्र इति । एतस्यार्थः–भूतभविष्यद्वर्तमानक्षणत्रयविशिष्टलक्षणकोटिद्वयविमुक्तत्वादृजु सरलमेव द्रव्यस्याप्राधान्यतया पर्यायाणां क्षणक्षयिणां प्राधान्यतया दर्शयतीति ऋजुसूत्रः । उदाहरणं यथा–सुखविवर्तः संप्रत्यस्तीति, अनेन वाक्येन क्षणिकं सुखाख्यं पर्यायमात्रं मुख्यतया दर्श्यते, तदधिकरणं जीवद्रव्यं गौणत्वेनापि न प्रतीयत इति । एतदाभासं निरूपयन्ति-सर्वथा द्रव्यापलापी तदाभास इति। उदाहरणं यथा तथागतमतमिति। बौद्धो हि क्षणक्षयिणः पर्यायानेव प्रधानत-

॥ १०३ ॥

या प्ररूपयति तत्तदाधारभूतानि द्रव्याणि नाभिमन्यतेऽतस्तन्मतं तदाभासतया ज्ञेयम्। ऋजुसूत्रो द्विधा—सूक्ष्मऋजुसूत्रो यथैकसमयावस्थायी पर्यायः, स्थूलऋजुसूत्रो यथा मनुष्यादिपर्यायास्तदायुःप्रमाणकालं तिष्ठन्ति। इति पर्यायार्थिकस्य प्रथमो भेदः।

अथ द्वितीयभेदं प्रभेदयन्ति—कालादिभेदेन ध्वनेरर्थभेदं प्रतिपद्यमानः शब्द इति। एतस्यार्थः--संकेताद्व्याकरणात्प्रकृतिप्रत्ययसमुदायेन सिद्धः कालकारकलिंगसंख्यापुरुषोपसर्गभेदेनार्थं पर्यायमात्रं प्रतीयते स शब्दनयः। कालभेद उदाहरणं यथा—बभूव भवति भविष्यति सुमेरुरिति, अत्र कालत्रयविभेदात्सुमेरोरपि भेदत्वं शब्दनयेन प्रतिपाद्यते, द्रव्यत्वेन त्वभेदोऽस्योपेक्ष्यते। कारकभेदे उदाहरणं—करोति कुंभं, क्रियते कुंभ इति। लिंगभेदे—तटस्तटी तटमिति। संख्याभेदे—दाराः कलत्रं गृहाः। पुरुषभेदे—एहि, मन्ये, रथेन यास्यसि, न हि यास्यति, यातस्ते पिता। अथवा-- एहि, मन्ये, ओदनं भोक्ष्यसे, भुक्तः सोऽतिथिभिः। एतं एनं वा, मन्ये, ओदनं भोक्ष्येथे भोक्ष्यध्वे भोक्ष्ये भोक्ष्यावहे भोक्ष्यामहे इत्यादिः, मन्यसे मन्येथे इत्यादिरर्थः "प्रहासे च मन्योपपदे मन्यतेरुत्तम एकवच्च" इति सूत्रेणेयं पुरुषव्यवस्था प्रहास एव, यथार्थकथने तु—एहि, त्वं मन्यसे, ओदनमहं भोक्ष्ये, भुक्तः सोऽतिथिभिरिति। उपसर्गभेदे—संतिष्ठते, अवतिष्ठते। क्वचिदर्थभेदस्यापि ग्रहणं—संशय्य कर्णादिषु तिष्ठते यः, इति "प्रकाशनस्थेयाख्ययोश्चेत्यर्थे सूत्रेणात्मनेपदम्। एतदाभासं प्रकटयन्ति—तद्भेदेन तस्य तमेव समर्थयमानस्तदाभास इति। कालादिभेदविभिन्नस्य शब्दस्यार्थस्यापि भिन्नत्वमभिमन्यमानःशब्दाभास इत्यर्थः। उदाहरणं—बभूव भवति भविष्यति सुमेरुरित्यादयो भिन्नकालाः शब्दा भिन्नमेवार्थमभिदधति, भिन्नकालशब्दत्वात्ताद्दृक्सिद्धान्यशब्दवदिति, अनेन वाक्येनैकार्थस्यैक्यादर्थभेदस्तुशब्दाभासः। इति पर्यायार्थिकस्य द्वितीयभेदः।

अथ तृतीयभेदं समभिरूढं समर्थयन्ति–पर्यायशब्देषु निरुक्तिभेदेन भिन्नमर्थं समभिरोहन् समभिरूढ इति । एतस्यार्थः शब्दनयो हि शब्दपर्यायभिन्नत्वेऽपि द्रव्यस्यार्थस्याभेदत्वमभिलपति, समभिरूढनयेन हि शब्दपर्यायभेदे भिन्नं द्रव्यार्थमभिमन्यते, पर्यायशब्दानामर्थेन एकत्वमुपेक्षते इति । उदाहरणं–इन्दनादिन्द्रः, शकनाच्छक्रः, पूर्दारणात्पुरन्दर इत्यादि । अनेन वाक्येनेन्द्रे शक्रे च पुरन्दरे चेत्याद्येकार्थपर्यायशब्देऽपि व्युत्पत्तिभेदेनैतदर्थस्यापि भेदः समाश्रियते, शब्दभेदादर्थभेद इति फलितार्थः । एवमन्यत्र कलशघटकुंभादिषु द्रष्टव्यः । समभिरूढाभासमाह–पर्यायध्वनीनामभिधेयनानात्वमेव कक्षीकुर्वाणस्तदाभासः । उदाहरणं यथा–इन्द्रः, शक्रः, पुरन्दर इत्यादयः शब्दा भिन्नाभिधेया एव भिन्नशब्दत्वात्, करिकुरंगतुरंगकरभशब्दवदित्यादिरिति । अत्र हीन्द्रे शक्रे पुरन्दरे च नामैक्येऽपि भिन्नशब्दत्वाद्भिन्नवाच्या एते शब्दाः, यथा कुरंगतुरंगादयो भिन्नवाच्यास्तथैतेऽपि, ततः समभिरूढाभासतया । इति पर्यायार्थिकस्य तृतीयो भेदः ।

अथ चतुर्थभेदं समाख्यान्ति–शब्दानां स्वप्रवृत्तिनिमित्तभूतक्रियाविशिष्टमर्थं वाच्यत्वेनाभ्युपगच्छन्नेवंभूत इति । एतस्यार्थः–समभिरूढनयेनेन्दनादिक्रियाविशिष्टमिन्द्रस्य पिंडं भवतु वा मा वा भवतु, परमिन्द्रादिव्यपदेशः लोके व्याकरणे च तथैव रूढित्वात् समभिरूढः । तथा च रूढशब्दानां व्युत्पत्तिः शोभामात्रमेव " व्युत्पत्तिरहिताः शब्दा रूढा " इति वचनात् । एवंभूतनयो हि यस्मिन् समय इन्दनादिक्रियाविशिष्टमर्थं पश्यति तस्मिन् समय एवेन्द्रशब्दवाच्योऽयमिति मनुते न तु तद्रहितकाल इत्यर्थः । एतन्नयमते तु क्रियाशब्द एव । यद्यपि भाष्यादिषु जातिगुणक्रियासंबन्धियदृच्छालक्षणा पंचतयी शब्दप्रवृत्तिरुक्ता सा व्यवहारमात्रतोऽवगन्तव्या न निश्चयादित्ययं नयः स्वीकुरुते । तथाहि–जातिशब्दाः

क्रियाशब्दा एव ( यथा ) गच्छतीति गौः, आशुगामित्वादश्वः गुणशब्दा यथा शुचीभवतीति शुक्लः, नीलभवनान्नीलः । यदृच्छाशब्दा यथा देव एनं देयात्, यज्ञ एनं देयात् । संयोगसमवायिशब्दा यथा दण्डोऽस्यास्तीति दण्डी, विषाणमस्यास्तीति विषाणी अस्तिक्रियाप्रधानत्वादस्त्यर्थे प्रत्ययाश्च । एते सर्वे क्रियाशब्दा एव, अस्ति भू इत्यादिक्रियासामान्यस्य सर्वव्यापित्वात्, उदाहरणं यथा--इन्दनमनुभवन्निन्द्रः,- शकनक्रियापरिणतः शक्रः, पूर्दारणप्रवृत्तः पुरन्दर इत्युच्यत इति । एतदाभासं लक्षयन्ति--क्रियानाविष्टं वस्तु शब्दवाच्यतया प्रतिक्षिपंस्तु तदाभास इति । स्वकीयक्रियारहितं तद्वस्त्वपि शब्दवाच्यतया प्रतिक्षिपति तच्छब्दवाच्यमिदं न भवत्येवैतादृश एवंभूताभासः । उदाहरणं यथा--विशिष्टचेष्टाशून्यं घटाख्यं वस्तु न घटशब्दवाच्यं घटशब्दप्रवृत्तिनिमित्तभूतक्रियाशून्यत्वात्पटवदित्यादिरिति । अनेन हि वाक्येन स्वक्रियारहितस्य घटादेर्वस्तुनो घटादिशब्दवाच्यतानिषेधः क्रियते स च प्रमाणबाधित इत्येवंभूतनयाभासतयोक्तमिति ।

एतेषु के पुनरर्थनयाः के पुनः शब्दनयास्तद्दर्शयति--एषु चत्वार आद्या नया अर्थनिरूपणायां प्रवीणत्वादर्थनयाः, अग्रेतनास्त्रयो नयाः शब्दवाच्यार्थगोचरतया शब्दनया इति । के पुनर्भेदास्तानाह--" एक्केक्को य सयविहो सत्त नयसया हवंति एमेव । अन्नो वि अ आएसो पंचेव सया नयाणं तु ॥ १ ॥ " व्याख्या सप्तानां नैगमादिनयानामेकैकप्रभेदतः शतभेद एवं सर्वैरपि भेदैः सप्त शतानि भवन्ति, प्रकारान्तरे पंचापि नयाः कदा? यदा शब्दादिभिस्त्रिभिर्नयैरेक एव शब्दनयो विवक्ष्यते तदैकैकस्य शतविधत्वात् पंच शतानि नयानाम्, अपिशब्दः पुनरर्थे । षट् चत्वारि द्वे वा नयानां कदा? यदा सामान्यग्राहिनैगमस्य संग्रहेऽन्तर्भावः, विशेषग्राहिनैगमस्य तु व्यवहारेऽन्तर्भावो यदा विवक्ष्यते तदा मूलन-

यानां षड्विधत्वात् षट् शतानि । कदा चत्वारीति ? यदा एको नैगमः, संग्रहव्यवहारऋजुसूत्रलक्षणास्त्रयोऽर्थनयाः, एकस्तु शब्दनयः, पर्यायास्तिकनयः, तदा चत्वारो नयाः । कदा द्वे इति? एको द्रव्यार्थिकः,पर्यायार्थिकश्चेति द्वे शते कुत्रापि-"णिच्छय ववहारणया मूलिमभेदा नयाण सव्वाणं । निच्छयसाहणहेऊ दव्वयपज्जट्ठिया मुणह ॥ १ ॥" इति । उत्कृष्टतोऽसंख्याता अपि भवन्ति-" जावंतो वयणपहा तावंतो वा नयाविसद्दाओ । ते चेवय परसमया सम्मत्तं समुदिया सव्वे ॥ १ ॥" व्याख्या-यावन्तो वचनप्रकाराः शब्दात्मगृहीताः सावधारणास्ते सर्वे नयाः परसमयास्तीर्थिकसिद्धान्ताः,ये च निरवधारणाः स्याच्छब्दलांछितास्ते नयाः समुदिताः सम्यक्त्वं प्रतिपद्यन्ते । न च प्रत्येकावस्थायां मिथ्यात्वहेतुत्वात्समुदिताः सर्वे महामिथ्यात्वहेतवः कथं न भवन्तीति वाच्यम्, प्रचुरविषलवसमुदाये विषप्राचुर्यवत् । तत्र प्रत्युत्तरयन्नाह-सत्थे समिंति सम्मं वेगवसाओ नया विरुद्धा वि । निच्चववहारिणो इव राओ दासाण वसवत्ती ॥ १ ॥ " व्याख्या--परस्परविरुद्धा अपि सर्वे नयाः समुदिताः सम्यक्त्वं भवन्ति, एकस्य जिनसाधोर्वशवर्तित्वात् यथा नानाभिप्रायभृत्यवर्गवत्, यथा धनधान्यभूम्याद्यर्थं परस्परं विवदमाना वहवोऽपि सम्यग्न्यायवता केनाप्युदासीनेन युक्तिभिर्विवादकारणान्यपनीय मील्यन्ते, तथेह परस्परविरोधिनोऽपि नयान् जैनसाधुर्विरोधं भंक्त्वा एकत्र मीलयति । तथा प्रचुरविषलवा अपि प्रौढमंत्रवादिना निर्विषीकृत्य कुष्टादिरोगिणे दत्ता अमृतरूपत्वं प्रतिपद्यन्त एवेति सर्वं विशेषावश्यकटीकायां स्फुटमेव ।

अत्रेदं--एषु पूर्वः पूर्वो नयः प्रचुरगोचरः, परः परस्तु परिमितविषय इति बोध्यम् ।

॥ इति नयप्रदीपः ॥ ॥

## ॥ अथ नयोपदेशः ॥

ऐन्द्रधाम हृदि स्मृत्वा नत्वा गुरुपदांबुजम् । नयोपदेशः सुधियां विनोदाय विधीयते ॥ १ ॥ सत्त्वासत्त्वाद्युपेतार्थेष्वपेक्षावचनं नयः । न विवेचयितुं शक्यं विनापेक्षां हि मिश्रितम् ॥ २ ॥ यद्यप्यनन्तधर्मात्मा वस्तु प्रत्यक्षगोचरः । तथापि स्पष्टबोधः स्यात् सापेक्षो दीर्घतादिवत् ॥ ३ ॥ नानानयमयो व्यक्तो मतभेदो ह्यपेक्षया । कोऽप्यन्तरनिषेधस्तु प्रस्तुतोत्कटकोटिकृत् ॥ ४ ॥ तेन सापेक्षभावेषु प्रतीत्यवचनं नयः । अभावाभावरूपत्वात् सापेक्षत्वं विधावपि ॥ ५ ॥ सप्तभंग्यात्मकं वाक्यं प्रमाणं पूर्णबोधकृत् । स्यात्पदादपरोल्लेखि वचो यच्चैकधर्मगम् ॥ ६ ॥ यथा नैयायिकैरिष्टा चित्रे नैकैकरूपधीः । नयप्रमाणभेदेन सर्वत्रैव तथार्हतैः ॥ ७ ॥ अयं न संशयः कोटेरैक्यान्न च समुच्चयः । न विभ्रमो यथार्हत्वादपूर्णत्वाच्च न प्रमा ॥ ८ ॥ न समुद्रोऽसमुद्रो वा समुद्रांशो यथोच्यते । नाप्रमाणं प्रमाणं वा प्रमाणांशस्तथा नयः ॥ ९ ॥ स्वार्थे सत्याः

---

स्मृत्वा श्रीशारदामन्त्र श्रीमानप्रभसूरिभिः । स्मृत्यर्थं लिख्यते कश्चित्पर्यायो ह्यस्य वृत्तितः ॥ १ ॥ इति । इन्द्र आत्मा तस्य संबंधि ऐन्द्रं धाम तेजः । 'ऐं' इति वाग्बीजमपि स्मृतम् ॥ १ ॥ सत्त्वासत्त्वनित्यानित्यभेदाभेदादयो ये तैरुपेता येऽर्था जीवपुद्गलादयस्तेषु अपेक्षावचनं प्रतिनियतधर्मप्रकारकापेक्षाख्यशाब्दबोधजनकं वचनं नयवाक्यमित्यर्थः । इदं वचनरूपस्य नयस्य लक्षणं हि निश्चितं मिश्रितं नानाधर्मैः कर्बुरितं वस्तु अपेक्षां विना विवेचयितुं न शक्यम् ॥ २ ॥ वस्तु घटादिकं आदीयतेऽनेनेत्यादि ज्ञानं दीर्घताया आदि ज्ञानं दीर्घताप्रत्यक्षवदित्यर्थः ॥ ३ ॥ बौद्धोपनिषदादिदर्शनो नानानयमयः कोऽप्यन्तरस्येतरनयार्थस्य निषेधो निराकरणं । कथंभूतो निषेधः? प्रस्तुता या उत्कटकोटिस्तत्कृत्, प्रस्तुतकोटेरुत्कटत्वकृदित्यर्थः ॥ ४ ॥ तेन हेतुना परस्परप्रतियोगिकेषु भावेषु विधौ अस्तित्वादिभावेऽपि अभावाभावरूपत्वान्नास्तित्वाद्यभावस्वरूपत्वात् ॥ ५ ॥ सप्तभंग्यात्मकं स्यादस्त्येव स्यान्नास्त्येवेत्यादिकं वाक्यं प्रमाणं । यतः पूर्णबोधकृत् स्यात्कारपदात् ॥ ६ ॥ आर्हतैः जैनसूरिभिः ॥ ७ ॥ अयं नयाख्यो बोधः कोटेः प्रकारस्यैक्यात् संशयो न ॥ ८ ॥ ९ ॥ स्वार्थे स्वविषये सत्या निश्चायकाः परैर्नयैर्नुन्ना अप्रामाण्याशंकाविषयीकृताः ।

परैर्नुन्ना असत्या निखिला नयाः । विदुषां तत्र नैकान्ता इति दृष्टं हि संमतौ ॥ १० ॥ बौद्धादिदृष्टयोऽप्यत्र वस्तुस्पर्शेन नाप्रमाः । उद्देश्यसाधने रत्नप्रज्ञायां रत्नबुद्धिवत् ॥ ११ ॥ अयं संक्षेपतो द्रव्यपर्यायार्थतया द्विधा । द्रव्यार्थिकमते द्रव्यं तत्त्वं नेष्टमतः पृथक् ॥ १२ ॥ तिर्यगूर्ध्वप्रचयिनः पर्यायाः खलु कल्पिताः । सत्यं तेष्वन्वयि द्रव्यं कुण्डलादिषु हेमवत् ॥ १३ ॥ आदावन्ते च यन्नास्ति मध्येऽपि हि न तत्तथा । वितथैः सदृशाः सन्तोऽवितथा इव लक्षिताः ॥ १४ ॥ अयं द्रव्योपयोगः स्याद्विकल्पेऽन्त्ये व्यवस्थितः । अन्तरा द्रव्यपर्यायधीः सामान्यविशेषवत् ॥ १५ ॥ पर्यायार्थमते द्रव्यं पर्यायेभ्योऽस्ति न पृथक् । यत्तैरर्थक्रिया दृष्टा नित्यं कुत्रोपयुज्यते ॥ १६ ॥ यथा लूनपुनर्जातनखादावेकतामतिः । तथैव क्षणसादृश्याद् घटादौ द्रव्यगोचरा ॥ १७ ॥ तार्किकाणां त्रयो भेदा आद्या द्रव्यार्थिनो मताः । सैद्धान्तिकानां चत्वारः पर्या-

---

असत्या अनिश्चायका निखिला नया नैगमादयो विदुषां नैकान्ता वक्तुं युक्ता इति दृष्टं परीक्षितं संमतिग्रन्थे ॥ १० ॥ अत्र नयग्रन्थे उद्देश्यं यदभिनिविष्टेतरनयखंडनं तत्साधने तत्साधननिमित्तं बौद्धादिदृष्टयोऽपि बोद्धादिनयपरिग्रहा अपि वस्तुस्पर्शेन शुद्धपर्यायादिवस्तुप्राप्त्या नाप्रमाः फलतो न मिथ्यारूपा इत्यर्थः ॥ ११ ॥ अयं सामान्यलक्षणलक्षितो नयो द्रव्यार्थिकः पर्यायार्थिकः ॥ १२ ॥ तेषु पर्यायेषु द्रव्यं सत्यं, कल्पिता वासनाविशेषप्रभवविकल्पसिद्धा अपारमार्थिका इति यावत् ॥ १३ ॥ किंतु वितथैः शशविषाणादिभिः काल्पनिकत्वेन सदृशाः सन्तोऽनादिलौकिकव्यवहारवासनावशात्, अवितथा इव लक्षिता लोकैरिति शेषः ॥ १४ ॥ अयं द्रव्योपयोगो द्रव्यार्थिकनयजन्यो बोधोऽन्त्ये विकल्पे शुद्धसंग्रहाख्ये व्यवस्थितः पर्यायबुद्ध्याऽविचलितः स्यात्, अन्तरा शुद्धसंग्रहशुद्धर्जुसूत्रविषयमध्ये द्रव्यपर्यायधीरेव स्यात् सामान्यविशेषबुद्धिवत् ॥ १५ ॥ पर्यायार्थमते द्रव्यं द्रव्यपदार्थः सदृशक्षणसन्ततिरेव न तु पर्यायेभ्यः पृथगस्ति यद्यस्मात्कारणात्तैः पर्यायैरर्थक्रिया जलाहरणादिरूपा दृष्टा नित्यमप्रच्युतानुत्पन्नस्थिरैकस्वभावं वस्तु कुत्रोपयुज्यते न कुत्रचिदित्यर्थः ॥ १६ ॥ १७ ॥ तार्किकाणां वादिसिद्धसेनमतानुसारिणामाद्याः त्रयो भेदाः नैगमसंग्रहव्यवहारलक्षणा द्रव्यार्थिका इति, सैद्धान्तिकानां तु जिनभद्रगणिक्षमाश्रमणवचनानुसारिणां चत्वार आद्या ऋजुसूत्रसहिता द्रव्यार्थिका इति । ऋजुसूत्रादयश्चत्वारः पर्यायार्थिका वादिनामिति, शब्दादयः त्रय एव च क्षमाश्रमणानामिति । ऋजुसूत्रो यदि द्रव्यं नाभ्युपेयात्तदा उक्तं " उज्जुसुयस्स एगे अणुवउत्ते एगं दव्वावस्सयं पुहत्तेणं " इति

यार्थगताः परे ॥ १८ ॥ नैगमः संग्रहश्चैव व्यवहारर्जुसूत्रकौ । शब्दः समभिरूढाख्य एवंभूतश्च सप्त ते ॥ १९ ॥ निगमेषु भवो बोधो नैगमस्तत्र कीर्तितः । तद्भवत्वं पुनर्लोकप्रसिद्धार्थोपगन्तृता ॥ २० ॥ तत्प्रसिद्धिश्च सामान्यविशेषाद्युभयाश्रया । तदन्यतरसंन्यासे व्यवहारो हि दुर्घटः ॥२१॥ संग्रहः संगृहीतस्य पिण्डितस्य च निश्चयः । संगृहीतं परा जातिः पिण्डितं त्वपराः स्मृता ॥ २२ ॥ एकद्वित्रिचतुःपंचषड्भेदा जीवगोचराः । भेदाभ्यामस्य सामान्यविशेषाभ्यामुदीरिताः ॥ २३ ॥ उपचारा विशेषाश्च नैगमव्यवहारयोः । इष्टा ह्यनेन नेष्यन्ते शुद्धार्थे पक्षपातिना ॥ २४ ॥ उपचारेण बहुलो विस्तृतार्थश्च लौकिकः । यो बोधो व्यवहाराख्यो नयोऽयं लक्षितो बुधैः ॥ २५ ॥ दह्यते गिरिरध्वासौ याति स्रवति कुण्डिका । इत्यादिरुपचारोऽस्मिन् बाहुल्येनोपलभ्यते ॥ २६ ॥ विस्तृतार्थो विशेषस्य प्राधान्यादेव लौकिकः । पंचवर्णादि भृंगादौ श्यामत्वादि विनिश्चयात् ॥ २७ ॥ पंचवर्णाभिलापेऽपि श्रुतव्युत्पत्तिशालिनाम् । न तद्बोधे विषयताऽपरांशे व्यावहारिकी ॥ २८ ॥ भावत्वे वर्तमानत्वव्याप्तिधीरविशेषिता । ऋजुसूत्रः श्रुतः सूत्रे शब्दार्थस्तु विशेषितः ॥ २९ ॥ इष्यतेऽनेन नैकत्रावस्थान्तरसमागमः । क्रियानिष्ठाभिदाधारद्रव्याभावाद्यथोच्यते ॥ ३० ॥ पलालं न दहत्यग्निर्भिद्यते न घटः क्वचित् । नासंयतः प्रव्रजति

---

सूत्रं विरुध्येतेति सैद्धान्तिकाः, तार्किकानुसारिणस्तु अतीतानागतपरकीयभेदपृथक्त्वपरित्यागादृजु० सूत्रेणेत्यादि ज्ञेयम् ॥ १८ ॥ १९ ॥ निगमेषु लोकेषु भवो बोधो नैगमः. तद्भवत्वं तदाश्रयेणोत्पत्तिकत्वं लोकप्रसिद्धार्थस्वीकर्तृत्वम् ॥ २० ॥ लोकप्रसिद्धिः सामान्यविशेषाद्युभययुता तेषां भेदानां मध्येऽन्यतरस्य संन्यासे परित्यागे॥२१॥ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ गिरिस्थतृणदग्धत्वं, अध्वनि मार्गे गच्छन्नरे लक्षणा, कुंडीस्थजलादि ॥ २६ ॥ २७ ॥ अपरांशे कृष्णेतरवर्णांशे व्यावहारिकी विषयता नास्ति ॥ २८ ॥ २९ ॥ अनेन ऋजुसूत्रनयेन एकत्र धर्मिणि अवस्थान्तरसमागमो भिन्नावस्थावाचकपदार्थान्वयो नेष्यते न स्वीक्रियते, कुतः ? क्रिया साध्यावस्था, अन्या च निष्ठा सिद्धावस्था तयोर्या भिदा भिन्नकालसंबन्धस्तदाधारस्यैकद्रव्यस्याभावात्, अत्रार्थेऽभियुक्तसंमतिमाह ॥ ३० ॥ पलालमिति–अत्र दहनादिक्रियाकाल

भव्योऽसिद्धो न सिध्यति ॥ ३१ ॥ दह्यमानेऽपि शाट्येकदेशे स्कन्धोपचारतः । शाटी दग्धेति वचनं ज्ञेयमेतन्नयाश्रयम् ॥ ३२ ॥ विशेषिततरः शब्दः प्रत्युत्पन्नाश्रयो नयः । तरप्प्रत्ययनिर्देशाद्विशेषिततमेऽगतिः ॥ ३३ ॥ ऋजुसूत्राद्विशेषोऽस्य भावमात्राभिमानतः । सप्तभंग्यर्पणाल्लिंगभेदादेवार्थभेदतः ॥ ३४ ॥ सामानाधिकरण्यं चेन्न विकारापरार्थयोः । भिन्नलिंग-वचःसंख्यारूपशब्देषु तत्कथम् ॥३५॥ नयः समभिरूढोऽसौ यः सत्स्वर्थेष्वसंक्रमः । शब्दभेदेऽर्थभेदस्य व्याप्त्यभ्युपगमश्च सः ॥ ३५ ॥ तटस्तटं तटीत्यादौ शब्दभेदोऽर्थभिद्यदि । तद् घटः कुंभ इत्यादौ कथं नेत्यस्य मार्गणा ॥ ३७ ॥ संज्ञार्थतत्त्वं न ब्रूते त्वन्मते पारिभाषिकी । अनादिसिद्धः शब्दार्थो नेष्टा तत्र निबन्धनम् ॥ ३८ ॥ एवंभूतस्तु सर्वत्र व्यञ्जनार्थविशेषणः । राजचिह्नैर्यथा राजा नान्यदा राजशब्दभाक् ॥ ३९ ॥ सिद्धो न तन्मते जीवः प्रोक्तः सत्त्वादिसंज्ञ्यपि । महाभाष्ये

---

एव तन्निष्ठाकाल इति दह्यमानादेर्दग्धत्वाद्यव्यभिचारात् तदवस्थाविलक्षणपलालाद्यवस्थावच्छिन्नेन समं दहनादिक्रियान्वयस्यायोग्यत्वात्पलालं न दहत्यग्निरित्यादयो व्यवहारा निषेधमुखा उपपद्यन्ते । विधिमुखस्तु व्यवहारोऽत्रापलालं दह्यते, अघटो भिद्यते, संयतः प्रव्रजति, सिद्धः सिध्यतीत्येवमाकार एव द्रष्टव्यः । अत एव "सो समणो पव्वईओ" इत्यादि क्रियमाणं कृतमेव कृतंतु क्रियमाणत्वे भजनीयमिति सिद्धान्तः संगच्छते । तदाह भाष्यकारः–" तेणेह कज्जमाणं णियमेण कयं कयं तु भयणिज्जं । किंचिदिह कज्जमाणं उवरयकिरियं च होज्जाहि ॥ १ ॥ इति " ॥ ३१ ॥ शाटी दग्धेति कथं तदानीं शाटीदाहक्रियाकालसंवलितस्य तन्निष्ठाकालस्याभावा-दिति ? उत्तरं–शाट्येकदेशे दह्यमानेऽपि तत्र स्कन्धोपचारतः शाटीस्कन्धवाचकशाटीपदोपचाराच्छाटी दग्धेति वचनमेतन्नयाश्रयमृजुसूत्राभिप्रायकं ज्ञेयम् ॥ ३२ ॥ विशेषिततरः प्रत्युत्पन्नाश्रयः ऋजुसूत्राभिमतग्राही नयः शब्द इति । अत्र तरप्प्रत्ययात्तमप्प्रत्ययो विशेषस्तेन समभिरूढ एवंभूते चागतिरतिव्याप्तिर्न ॥ ३३ ॥ अस्य शब्दनयस्य ऋजुसूत्राद्विशेष उत्कर्षः भावमात्रस्याभिमानात् जलाहारादिक्रियाक्षमं प्रसिद्धं भावघटमेवेच्छति ॥ ३४ ॥ विकाराविकारार्थकशब्दयोः पलालं दहः भिन्न-लिंगादिरूपाणि येषु तादृशेषु शब्देषु कथं सामानाधिकरण्यं न कथंचिदित्यर्थः ॥ ३५ ॥ यः सत्स्वर्थेषु घटादिष्वसंक्रमो घटाद्यन्यशब्दवाच्यत्वं स समभिरूढः ॥ ३६ ॥ ॥ ३७ ॥ परिभाषिकी संज्ञा डित्थडवित्थादिका ॥ ३८ ॥ व्यञ्जनं शब्दस्तेनार्थं विशेषयति स एवंभूतः ॥ ३९ ॥ जीवति प्राणान् बिभर्तीति धात्वर्थः ॥ ४० ॥

च तत्त्वार्थभाष्ये धात्वर्थबाधतः ॥ ४० ॥ जीवोऽजीवश्च नो जीवो नोअजीव इतीहिते । जीवः पंचस्वपि गतिष्विष्टो भावैर्हि पंचभिः ॥ ४१ ॥ नञि सर्वनिषेधार्थे पर्युदासे च संश्रिते । पुद्गलप्रभृतिद्रव्यमजीव इति संज्ञितम् ॥ ४२ ॥ नोजीव इति नोशब्दे जीवसर्वनिषेधके । देशप्रदेशौ जीवस्य तस्मिन् देशनिषेधके ॥ ४३ ॥ जीवो वा जीवदेशो वा प्रदेशो वाप्यजीवगः । अनयैव दिशा ज्ञेयो नोअजीवपदादपि ॥ ४४ ॥ नैगमो देशसंग्राही व्यवहारर्जुसूत्रकौ । शब्दः समभिरूढश्चेत्येवमेव प्रचक्षते ॥ ४५ ॥ भावमौदयिकं गृह्णन्नेवंभूतो भवस्थितम् । जीवं प्रवक्त्यजीवं तु सिद्धं वा पुद्गलादिकम् ॥४६॥ नोअजीवश्च नोजीवो न जीवाजीवयोः पृथक् । देशप्रदेशौ नास्येष्टाविति विस्तृतमाकरे ॥ ४७ ॥ सिद्धो निश्चयतो जीव इत्युक्तं यद्दिगंबरैः । निराकृतं तदेतेन यन्नयेऽन्त्येऽन्यथा प्रथा ॥ ४८ ॥ आत्मत्वमेव जीवत्वमित्ययं सर्वसंग्रहः । जीवत्वप्रतिभूः सिद्धेः साधारण्यं निरस्य न ॥ ४९ ॥ यज्जीवत्वं क्वचिद्द्रव्यभावप्राणान्वयात् स्मृतम् । विचित्रनैगमाकूतं तज्ज्ञेयं न

---

जीवः,अजीवः, नोजीवः,नोअजीवः,एषां लक्षणानि–औदयिकक्षायिकक्षायोपशमिकौपशमिकपारिणामिकलक्षणैः पंचभिर्लक्षितो जीवः॥४१॥नञि सर्वत्र निषेधार्थेऽत्राजीवः पुद्गलादिकं द्रव्यम्॥४२॥नोजीव इत्यत्र तु नोशब्दे देशनिषेधके जीवस्य देशप्रदेशौ अंगीकर्तव्यौ॥४३॥नोअजीवो नोशब्दे देशनिषेधकेऽजीवदेशो वा अजीवः अजीवाश्रितः प्रदेशो वा इति। अत्रनञ्अभावार्थःनोशब्दस्यत्वभावएकदेशोवा इत्यर्थः।पुनर्विपरीतोऽप्यर्थो नोजीवो नोशब्दे सर्वनिषेधके विवक्षितेऽजीव एव कथ्यते तृतीयभंगे।एवं नोअजीवपदाज्जीवो जीवपदार्थो वा बोध्य इति चतुर्थभंगे । अयं भावार्थः–जीवः, अजीवः पुद्गलादिकं द्रव्यं, नोजीवोऽजीवो जीवस्य देशप्रदेशौ वा, नोअजीवो जीवो जीवदेश जीवप्रदेशो वा अजीवदेशो वा अजीवप्रदेशो वा इति॥४४॥उक्तं मतं कियन्तां नयानामाह देशसंग्राही ॥४५॥ एवंभूतो भवस्थितं संसारिणं जीवं प्रवक्ति, सिद्धं पुद्गलादिकं चाजीवं प्रवक्ति॥४६॥नोजीवो नोअजीवश्चैतन्नये एवंभूते जीवाजीवयोर्वक्तव्ययोः सतोर्न पार्थक्यमापद्यते, यतोस्य नयस्य देशप्रदेशौ नेष्टौ इति नोशब्दः सर्वनिषेधार्थ एव घटत इत्येतदाकरेऽनुयोगद्वारादौ विस्तृतम्॥४७॥इत्येतेन पूर्वोक्तेन सिद्धो निश्चयतो जीव इति यद्दिगंबरैरुक्तं तन्निराकृतं, यस्मादन्त्ये एवंभूतनयेऽन्यथा प्रथा सिद्धोऽजीव इत्येव प्रसिद्धिः, शुद्धनिश्चयश्च सएवेति ॥ ४८ ॥ आत्मत्वमेव जीवत्वं निश्चयान्न साधारण्यम् ॥ ४९ ॥ एवं निश्चयतः सिद्धस्याजीवत्वं प्रोक्तं तर्हि कथं–" जीवा मुत्ता

तु निश्चयात् ॥ ५० ॥ धात्वर्थे भावनिक्षेपात् परोक्तं न च युक्तिमत् । प्रसिद्धार्थोपरोधेन यन्नयान्तरमार्गणा ॥ ५१ ॥
शैलेश्यन्त्यक्षणे धर्मो यथा सिद्धस्तथाऽसुमान् । वाच्यं नेत्यपि यत्तत्र फले चिन्तेह धातुगा ॥ ५२ ॥ उक्ता नयार्थास्तेषां ये
शुद्ध्यशुद्धी वदेत् सुधीः । ते प्रदेशप्रस्थकयोर्वसतेश्च निदर्शनात् ॥ ५३ ॥ तथाहि–धर्माधर्माकाशजीवस्कन्धानां नैगमो
नयः । तद्देशस्य प्रदेशश्चेत्याह षण्णां तमुच्चकैः ॥ ५४ ॥ दासेन मे खरः क्रीतो दासो मम खरोऽपि मे । इति स्वदेशस्वाभे-
दात् पंचानामाह संग्रहः ॥५५॥ व्यवहारस्तु पंचानां साधारण्यं न वित्तवत् । इति पंचविधो वाच्यः प्रदेश इति मन्यते॥५६॥
पंचप्रकारः प्रत्येकं पंचविंशतिधा भवेत्।प्रत्येकवृत्तौ प्राक्पक्षः स्याद्गेहेष्विव वाजिनाम्॥५७॥ प्रत्येकवृत्तिः साकांक्षा बहुत्वेनेति
सोऽप्यसन् । ऋजुसूत्रस्ततो ब्रूते प्रदेशभजनीयताम् ॥ ५८ ॥ भजनाया विकल्पत्वाद्व्यवस्थैवमर्पैति तत् । धर्मे धर्मः प्रदेशो

---

संसारिणो य " इत्यादि? तदुपर्याह–यज्जीवत्वं क्वचिद्ग्रन्थे द्रव्यप्राणानां भावप्राणानां चान्वयादेकीकरणात् स्मृतं संसारिसिद्धसाधारणमिति शेषः, तद्विचित्रो विविधावस्थो यो नैगमस्तस्याभिप्रायाज्ज्ञेयम् ॥ ५० ॥ धात्वर्थे जीवत्यर्थे भावप्राणारोपणात् परोक्तं निश्चयतः सिद्ध एव जीव इति दिगंबरोक्तं नैव युक्तिमत् ॥ ५१ ॥ यथा शैलेशीचरमसमये निश्चयतो धर्मस्तस्मादर्वाग्व्यवहारतो धर्मः, तथाऽसुमान् जीवोऽपि निश्चयतः सिद्ध एव भविष्यति इत्यपि न वाच्यं । यतो धारयति सिद्धिगतावात्मानमिति धर्म इति फले फलरूपे धात्वर्थे चिन्ता ॥ ५२ ॥ ये शुद्ध्यशुद्धी स्तः सुधीः पंडितस्ते शुद्ध्यशुद्धी वदेत् प्रदेशप्रस्थकवसतिदृष्टान्तैः ॥ ५३ ॥ नैगमो नयो धर्मास्तिकायादिस्कन्धानां तद्देशस्य प्रदेश इति षण्णां तं प्रदेशमुच्चकैः स्वमतनिर्बन्धेनाह ॥ ५४ ॥ संग्रहनयस्तु स्वदेशे धर्मास्तिकायादिदेशे स्वाभेदाद्धर्मास्तिकायाद्यभेदात् पंचानां प्रदेशमाह यथा संग्रहस्यान्वर्थत्वं क्रयजन्यं दासनिष्ठं खरस्वामित्वम् ॥ ५५ ॥ व्यवहारनयस्तु इति मन्यते यथा पंचानां वित्ते द्रव्ये साधारणं स्वामित्वं तथा प्रदेशे न साधारणं पंचवृत्तित्वं पंचानां प्रदेश इति न वाच्यं, किं तु पंचविधः प्रदेश इति वाच्यम् ॥ ५६ ॥ पंचप्रकारः पंचविधः प्रदेशः, यदि च गेहेषु शतमश्वा इत्यत्रेवप्रत्येकवृत्तित्वान्वयः प्रकृते स्वीक्रियते तदा प्राक् पक्षः पंचानां प्रदेश इति संग्रहनयपक्ष एव परिष्कृतः ॥ ५७ ॥ ५८ ॥ व्यवहारनयः प्राह–धर्मे धर्मास्तिकाये यः प्रदेशः स धर्मे धर्मास्तिकाय इति सप्तमीतत्पुरुषेण, धर्मास्तिकायश्चासौ प्रदेशो धर्मास्तिकाय इति कर्मधारयेण वा निर्णयः कर्तव्यः, एवमधर्मास्तिकाय

वा धर्मे इत्यादिनिर्णयः ॥ ५९ ॥ जीवे स्कन्धेऽप्यनन्ते नोशब्दाद्देशावधारणम् । इति शब्दनयं प्राह समासद्वयशुद्धिमान्
॥ ६० ॥ ब्रूते समभिरूढस्तु भेदाप्तेरत्र सप्तमीम् । देशप्रदेशनिर्मुक्तमेवंभूतस्य वस्तु सत् ॥ ६१ ॥ प्रस्थकार्थं व्रजामीति
वने गच्छन् ब्रवीति यत् । आदिमो ह्युपचारोऽसौ नैगमव्यवहारयोः ॥ ६२ ॥ अत्र प्रस्थकशब्देन क्रियाविष्टवनैकधीः ।
प्रस्थकेऽहं व्रजामीति ह्युपचारोऽपि च स्फुटः ॥ ६३ ॥ छिनद्मि प्रस्थकं तक्ष्णोम्युत्किराम्युल्लिखामि च । करोमि चेति तद-
नूपचाराः शुद्धताभृतः ॥ ६४ ॥ तमेतावति शुद्धौतूत्कीर्णनामानमाहतुः । चितं मितं तथा मेयारूढमेवाह संग्रहः ॥ ६५ ॥
प्रस्थकश्चर्जुसूत्रस्य मानं मेयमिति द्वयम् । न कर्तृगताद्भावाच्छब्दानां सोऽतिरिच्यते ॥ ६६ ॥ लोके च तिर्यग्लोके च जंबू-
द्वीपे च भारते । क्षेत्रे तद्दक्षिणार्द्धे च पाटलीपुत्रपत्तने ॥ ६७ ॥ गृहे च वसतिः कोणे नैगमव्यवहारयोः । अतिशुद्धौ तु
निवसन् वसतीत्याहतुः स्म तौ ॥ ६८ ॥ तदर्थस्तत्र तत्कालावच्छिन्ना तस्य वृत्तिता । वसत्यद्य न सोऽत्रेति व्यवहारौचिती

---

आकाशास्तिकायश्च ज्ञेयौ ॥ ५९ ॥ अपिश्चार्थः, जीवे स्कन्धे च अनन्ते नोशब्दाद्देशावधारणं कर्तव्यं, जीवे जीव इति वा प्रदेशो नोजीवः स्कन्ध इति वा प्रदेशो
नोस्कन्ध इति ॥ ६० ॥ समभिरूढनयस्तु धर्मे प्रदेश इत्यादि सप्तमीसमासं ब्रूते । अत्र कुंडे जलवद्भेदे सप्तमी, घटे घटस्वरूपं इत्यादौ क्वचिदभेदे सप्तमी । एवंभूत
नयस्य मते देशप्रदेशनिर्मुक्तं देशप्रदेशकल्पनारहितमखंडमेव वस्तु सत्, देशप्रदेशकल्पना तु भ्रममात्रमिति तन्मते नास्त्येव प्रदेश इत्यर्थः ॥ ६१ ॥ ६२ ॥ ६३
॥ ६४ ॥ एतावति शुद्धौ नैगमव्यवहारनयौ तं प्रस्थकं प्रस्थकपर्यायवन्तमाहतुः । संग्रहनयस्तु चितमासादितप्रस्थकपर्यायमितमाकुट्टितनामानं मेयं धान्य-
विशेषमारूढं च प्रस्थकमाह ॥ ६५ ॥ ऋजुसूत्रस्य मानं मेयं चेति द्वयमेव तत्परिच्छेदासंभवान्मेयारूढप्रस्थकः प्रस्थकत्वेन व्यपदिश्यत इति । शब्दानां शब्दसम-
भिरूढैवंभूतानां त्रयाणां नयानां मते स प्रस्थको ज्ञकर्तृगताद्भावान्नातिरिच्यते न भिद्यते, ज्ञः कर्ता च ज्ञकर्तारौ, ज्ञकर्त्रोर्गतो ज्ञकर्तृगतस्तस्मादिति समासः,
प्रस्थकाकारज्ञगतात्प्रस्थककर्तृगताद्वा प्रस्थकोपयोगादतिरिक्तं प्रस्थकं न सहते इति प्रस्थकदृष्टान्तः ॥ ६६ ॥ अथ वसतिदृष्टान्तः—कुत्र भवान् वसतीति पृष्टे
॥ ६७ ॥ ६८ ॥ तदर्थो वसन् वसतीत्यस्यार्थः, तत्र पाटलीपुरे तस्य देवदत्तस्य वर्तमानकालावच्छिन्नवृत्तितालक्षणयार्थः कर्तव्यः पाटलीपुरादेकस्मिन् दिनेऽन्यत्र गते-

ततः ॥ ६९ ॥ यत्र तत्र गतस्यापि तद्वासित्वं निगद्यते । तद्वासवृत्तिभागित्वे ज्ञेयं तत्त्वौपचारिकम् ॥ ७० ॥ संग्रहो वसतिं ब्रूते जन्तोः संस्तारकोपरि । ऋजुसूत्रः प्रदेशेषु स्वावगाहनकृत्सु खे ॥ ७१ ॥ तेष्वप्यभीष्टसमये न पुनः समयान्तरे । चलो-पकरणत्वेनान्यान्यक्षेत्रावगाहनात् ॥ ७२ ॥ स्वस्मिन् स्ववसतिं प्राहुस्त्रयः शब्दनयाः पुनः । एषानुयोगद्वारेषु दृष्टान्तमययो-जना ॥ ७३ ॥ शुद्धा ह्येतेषु सूक्ष्मार्था अशुद्धा स्थूलगोचराः । फलतः शुद्धतां त्वाहुर्व्यवहारे न निश्चये ॥ ७४ ॥ क्रियाक्रि-याफलौचित्यं गुरुः शिष्यश्च यत्र न । देशनानिश्चयस्यास्य पुंसां मिथ्यात्वकारणम् ॥ ७५ ॥ परिणामे नयाः सूक्ष्मा हिता नापरिणामके । न वातिपरिणामे च चक्रिणो भोजनं यथा ॥ ७६ ॥ आमे घटे यथा न्यस्तं जलं स्वघटनाशकृत् । तथाऽ-परिणते शिष्ये रहस्यं नयगोचरम् ॥ ७७ ॥ पृथक्त्वे नाधिकारस्तन्नयानां कालिकश्रुते । अधिकारस्त्रिभिः प्रायो नयैर्व्युत्प-त्तिमिच्छताम् ॥ ७८ ॥ तेनादौ निश्चयोद्ग्राहो नग्नानामपहस्तितः । रसायनीकृतविषप्रायोऽसौ न जगद्धितः ॥ ७९ ॥ जन्मा-

---

देवदत्तेऽद्य सोऽत्र न वसतीतिव्यवहारस्यौचित्यं ॥ ६९ ॥ ॥ ७० ॥ ७१ ॥ तेषु स्वावगाहकाकाशप्रदेशेष्वपि अभीष्टसमये विवक्षितवर्तमानकाले वसतिर्न पुन-र्भिन्नकाले, वीर्यसंयोगसद्द्रव्यकरणचापल्येन प्रतिसमयमन्यान्यक्षेत्रस्यापरापराकाशप्रदेशानामवगाहनादिति ॥ ७२ ॥ त्रयः शब्दनयाः शब्दसमभिरूढैवंभूताख्याः स्वप्रदेशेष्वेव वसतिं प्राहुः, स्वस्य मुख्याया वसतेः संभवात्, आकाशप्रदेशानामपि परद्रव्यत्वेन स्वसंबन्धस्याघटनात् ॥ ७३ ॥ एतेषु नयेषु ये यतः सूक्ष्मार्थास्ते ततः शुद्धाः, ये च यतः स्थूलगोचरास्ते ततोऽशुद्धाः शुद्धाः स्वरूपतः शुद्धतां प्राहुर्व्यवहारनये न तु निश्चये ॥७४॥ तथाहि–क्रियाक्रियाफलयोरौचित्यमित्यादि यत्र निश्चयनये-न हि, यतः दूहो–"नहि निश्चयइ शिष्य गुरु, क्रियाक्रियाफलयोग । दाता नहि भोक्ता नहि निष्फल सवइ संयोग ॥ १ ॥" ७५ ॥ परिणाम ऐदंपर्यार्थश्रद्धायां सूक्ष्मार्था नया हिताः, पुनरपरिणामके उत्सर्गैकरुचौ पुरुषे न हिताः तथातिपरिणामकेऽपवादैकरुचौ पुरुषे न हिताः ॥ ७६ ॥ ७७ ॥ तत्तस्मात्कार णान्निश्चयनयः स्तोकानामुपकारकत्वाद्बहूनां चापकारकत्वाच्चक्रिभोजनवत् सूक्ष्मनयानां च बहूनामुपकारकत्वात्कालिकश्रुते पृथक्त्वेऽनुयोगचतुष्टयपृथक्करणे सति नयानां सर्वेषां नयानामधिकारो नास्ति योजनायां इति शेषः, किं तु त्रिभिर्नैगमसंग्रहव्यवहारैर्नयैर्व्युत्पत्तिमिच्छतां शिष्याणां हि तां प्राप्नोति प्राप्ताधिकार इति ॥ ७८ ॥ तेन सूत्रोक्तरीतिलंघनेनादौ निश्चयनयोपन्यासो दिगंबराणामपहस्तितो निराकृतः, असौ निश्चयो न जगद्धितः, यथा रसायनीकृतंविषं सर्वेषां न हि हिताय ॥ ७९ ॥ पर-

र्गकारणं पापं परस्थाने हि देशना । बालादेर्नान्ययोग्यं च वचो भेषजवद्धितम् ॥ ८० ॥ ये सीदन्ति क्रियाभ्यासे ज्ञानमात्राभिमानिनः । निश्चयानिश्चयं नैते जानन्तीति श्रुते स्मृतम् ॥ ८१ ॥ इष्टः शब्दनयैर्भावो निक्षेपा निखिलाः परैः । मतं मंगलवादेऽन्यद्भिदां द्रव्यार्थिके त्रये ॥ ८२ ॥ द्रव्यार्थे गुणवाञ्जीवः पर्यायार्थे च तद्गुणः । सामायिकमिति प्रोक्तं यद्दिशावश्यकादिषु ॥ ८३ ॥ घटोपयोगरूपो वा भावो द्रव्यार्थिकेऽमतः । तेन तत्र त्रयं प्रोक्तमिति जानीमहे वयम् ॥ ८४ ॥ तत्र नामघटः प्रोक्तो घटनाम्ना पटादिकः । तच्चित्रं स्थापनाद्रव्यं मृद्भावो रक्तिमादिकः ॥ ८५ ॥ एकद्रव्येऽप्यात्मनामाकृतिकारणकार्यताः । पुरस्कृत्य महाभाष्ये दिष्टा पक्षान्तरेण ते ॥ ८६ ॥ अप्रज्ञाप्याभिधाद्रव्यजीवद्रव्याद्ययोगतः । न

---

स्थाने स्वाधिकारिभिन्नाधिकारिणि निमित्ते हि निश्चितं देशनोन्मार्गकारणमिति हेतोः पापं इति । न च बालादेर्मध्येऽन्ययोग्यं वचोऽन्यस्य भेषजवद्धितम् ॥ ८० ॥ ॥ ८१ ॥ अथ निक्षेपाधिकारः शब्दनयैर्भावनिक्षेप इष्टः पर्यायार्थिके भावनिक्षेप एव परैः, द्रव्यार्थिकेन निखिलाश्चत्वारोऽपि निःक्षेपास्तत्कथं संगच्छते मंगलवादे यदुक्तं भाष्यकृता द्रव्यार्थिके भिदां त्रये नामस्थापनाद्रव्यलक्षणे मंगलवादेऽभिहितेऽन्यन्मतं पुरस्कृतमिति शेषः तत्त्वार्थवृत्तावपि ॥ ८२ ॥ आवश्यकादिषु ग्रन्थेषु द्रव्यार्थिकनये गुणवान् जीवः सामायिकं, पर्यायार्थिकनये च जीवस्य गुणः सामायिकमिति प्रोक्तं, तन्मतमेतदित्यर्थः ॥ ८३ ॥ इति मतान्तरमग्रेतनवचनेन सहाविरोधं समर्थयन्नाह–वेति पक्षान्तरे घटोपयोगरूपो भावो द्रव्यार्थिकेऽमतोऽनिष्टस्तेन तत्र मंगलवादे द्रव्यार्थिके त्रयं नामादिनिक्षेपत्रयं प्रोक्तं, न तु सर्वथा भावानभ्युपगमाभिप्रायेण जलाहरणादिपरिणतिरूपभावघटस्य द्रव्यार्थिकेनाभ्युपगमादिति वयं जानीमहे । तथा च भाष्ये पूर्वं शुद्धचरणरूपभावमंगलाधिकारप्रवृत्तेर्नैगमादिना जलाहरणादिरूपभावघटाभ्युपगमेऽपि घटोपयोगरूपभावघटानभ्युपगमात्तन्निषेधोक्तिः, अग्रे तु व्यवस्थाधिकाराद्विशेषोक्तिरिति न विरोधः॥८४॥ऊक्तं निक्षेपचतुष्टयं तत्र निक्षेपचतुष्टयमध्ये घटनाम्ना क्लृप्तः पटादिकोऽपि नामघट उच्यते, शेषं स्पष्टम्॥८५॥एकस्मिन्नपि द्रव्ये आत्मनो विवक्षितपदार्थस्य नामाभिधायकं पदं नाम,आकृतिः संस्थानं, कारणता तत्पर्यायजननशक्तिर्द्रव्यं, कार्यता तद्रूपेणाभिव्यक्तिर्भावः, एताः पुरस्कृत्य मेलयित्वा भिन्नपक्षाभिप्रायेण ते नामादयश्चत्वारोऽपि निक्षेपा महाभाष्ये दिष्टाः प्रतिपादिताः ॥ ८६ ॥ एतेषां नामादीनां निक्षेपाणामप्रज्ञाप्ये वस्तुनि अभिधाया नाम्नोऽप्रयोगाज्जीवद्रव्ययोश्च जीवत्वेन द्रव्यत्वेन च भूतभविष्यत्पर्यायाभावेन तत्कार-

चाव्यापित्वमेतेषां तत्तद्भेदनिवेशतः ॥ ८७ ॥ इतीयं प्रायिकी व्याप्तिरभियुक्तैर्निरूप्यते । यत्तत्पदाभ्यां व्याप्तिश्चानुयोगद्वा-
रनिश्चिता ॥ ८८ ॥ आदिष्टजीवद्रव्याभ्यां द्रव्यन्यासस्य संभवम् । अप्रज्ञाप्ये जिनप्रज्ञानाम्नश्च ब्रुवते परे ॥ ८९ ॥ तच्चि-
न्त्यमुपयोगो यन्नाम द्रव्यार्थिकस्य न । नरादेर्द्रव्यजीवत्वे सिद्धे स्याद्भावजीवता ॥ ९० ॥ आदिष्टद्रव्यहेतुत्वाद्द्रव्यद्रव्यप्रति-
श्रुतौ । भावद्रव्यं न किंचित् स्याद्गुणेऽपि द्रव्यतार्पणात् ॥ ९१ ॥ अन्ये तु द्रव्यजीवो धीसंन्यस्तगुणपर्ययः । तदसन्नधिया
तेषां संन्यासः स्यात्सतां यतः ॥ ९२ ॥ संग्रहे स्थापना नेष्टा तस्या नाम्नैव संग्रहात् । किं नेन्द्रचित्रं नामेन्द्र इन्द्रनामक-
पिंडवत् ॥ ९३ ॥ नामातिरिक्तो नामेन्द्रो लक्ष्य इन्द्रपदस्य हि । तस्य मुख्यार्थसादृश्यवैसादृश्ये च नाग्रहः ॥ ९४ ॥ इदं
कैश्चिन्मतं तच्च भाष्ये दूषितमुच्चकैः । नाम्नैव द्रव्यनिक्षेपेऽप्येवं संग्रहसंभवात् ॥ ९५ ॥ परिणामितया द्रव्यं वाचकत्वेन
नाम च । भावस्थमिति भेदश्चेन्नाम्नेन्द्रे दुर्वचं ह्यदः ॥ ९६ ॥ परिणामित्वभिन्नश्चेन्नामनिक्षेपलक्षकः । संबन्ध इष्टः साम्या-

---

णत्वाभावाद्द्रव्यनिक्षेपस्यायोगात्, न चाव्याप्तिः ॥ ८७ ॥ कुतः प्रायिकी अभियुक्तैः पंडितैर्निरूप्यते, व्याप्तिश्च यत्तत्पदाभ्यामनुयोगद्वारसूत्रादेव निश्चिता " जत्थय जं जाणिज्जा णिक्खेवं णिक्खिवे णिरवसेसं । जत्थविय न जाणिज्जा चउक्कयं णिक्खिवे तत्थ॥१॥इति तत्पाठादिति श्लोकद्वयं यद्येकस्मिन्न संभवति नैतावति भवत्यव्याप्तिता ॥ ८८ ॥ परे आचार्या अप्रज्ञाप्ये वस्तुनि जिनप्रज्ञारूपनामनिक्षेपस्य संभवं ब्रुवते, तत्र केवलिप्रज्ञैव नामतयैव तत्कार्यकरणात् आदिष्टद्रव्यत्वानां घटादिपर्यायाणां हेतुत्वाद्द्रव्यं ॥ ८९ ॥ यद्यस्माद्द्रव्यार्थिकस्य नयस्य मत उपयोगो नाम न भवति ॥ ९० ॥ आदिष्टद्रव्यहेतुत्वाद्धेतोर्द्रव्यद्रव्यस्य प्रतिश्रुतौ स्वीकारे च भावद्रव्यं किमपि न स्यात् ॥ ९१ ॥ अन्ये त्वाचार्या धिया बुद्ध्या संन्यस्ता गुणपर्याया यस्य स तथा गुणपर्यायवियुक्तः प्रज्ञास्थापितः तदसत्, यतः सतां तेषां गुणपर्यायाणां धिया संन्यासो न स्यात् तदेवं प्रायिकव्याप्त्या नामादिचतुष्टयं सर्वत्रेच्छन्ति सर्वेऽपि द्रव्यार्थिकनया इति व्यवस्थापितम् ॥ ९२ ॥ संग्रहनये स्थापना नेष्टा, स्थापनाया नामनिक्षेपेणैव संग्रहात्, इन्द्रप्रतिमा इन्द्रनामकपिंडवत् किं नामेन्द्रो न भवति ? अपि तु भवत्येव ॥ ९३ ॥ वैसदृश्ये सादृश्ये वा निमित्ते नाग्रहः कर्तव्यः ॥ ९४ ॥ इदं मतं भाष्ये दूषितम् ॥९५॥ परिणामितया द्रव्यं भावे संबद्धं, नाम च वाचकत्वेन वाच्यवाचकभावेन संबद्धं चेत्, अदो नियामकं नामेन्द्र गोपालदारके दुर्वचम् ॥९६॥ नाम-

दिभिन्नः किं न तथेष्यते ॥ ९७ ॥ अतिप्रसंगो नैवं चाभिप्रायाकारयोगतः । यच्छ्रुतोक्तमनुल्लंघ्य स्थापना नाम चान्यतः ॥ ९८ ॥ अत एव न धीरर्हत्प्रतिमायामिवार्हतः । भावसाधोः स्थापना या द्रव्यलिंगिनि कीर्तिता ॥ ९९ ॥ सा हि स्थाप्या स्मृतिद्वारा भावादरविधायिनी । न चोत्कटतरे दोषे स्थाप्यस्थापकभावना ॥ १०० ॥ यद्वा प्रतिष्ठाविधिना स्वात्मन्येव परात्मनः ॥ स्थापना स्यात् समापत्तिर्बिंबे सा चोपचारतः ॥ १०१ ॥ प्रतिष्ठितप्रत्यभिज्ञासमापन्नपरात्मनः । आहार्यारोपतः स्याच्च द्रष्टृणामपि धर्मभूः ॥ १०२ ॥ तत्कारणेच्छाजनकज्ञानगोचरबोधकाः । विधयोप्युपयुज्यन्ते तेनेदं दुर्मतं हतम् ॥ १०३ ॥ प्रतिष्ठाद्यनपेक्षायां शाश्वतप्रतिमार्चने । अशाश्वतार्चापूजायां को विधिः किं निषेधनम् ॥ १०४ ॥ पूजादिवि-

निक्षेपलक्षणः परिणामित्वभिन्न एव द्रष्टव्यस्तदा स्थापनाया अपि स्वाम्यादिभिन्नः संबन्धः ॥ ९७ ॥ एवमुक्तासंकरप्रकारेण चातिप्रसंगो न भवति, यच्छ्रुतोक्तं सिद्धान्तवचनमनुल्लंघ्याक्षादौ एवाभिप्रायसंबन्धं प्रतिमादौ चाकारसंबन्धं पुरस्कृत्य स्थापनाद्रियतेऽन्यतोऽन्यस्थले च नामनिक्षेप इति ॥ ९८ ॥ अत एवार्हत्प्रतिमायामर्हतो धीरिव द्रव्यलिंगिनि प्रकटप्रतिषेविणि पार्श्वस्थादौ स्थापना भावसाधोर्धीः सिद्धान्ते न कीर्तिता ॥ ९९ ॥ सा स्थापनाधीः ॥ १०० ॥ यद्वा पक्षान्तरे प्रतिष्ठाविधिना प्रतिष्ठाकारयितुः स्वात्मन्येव परात्मनः परमत्रिभुवनभर्तुर्ध्यानरूपा समापत्तिरेव स्थापना स्यात्, निश्चयतः सा प्रतिष्ठा, बिंबे चोपचारतः ॥ १०१ ॥ स्थापना प्रतिष्ठितप्रतिज्ञया समापन्नो यः परमात्मा भगवांस्तस्याहार्यारोपतो द्रष्टृणामुपलक्षणाद्वन्दकानां पूजकानां च धर्मभूर्धर्मकारणं भवति ॥१०२॥ तस्याहार्यारोपस्य कारणं या इच्छा तज्जनकं यत्प्रतिष्ठितप्रतिमाभगवदभेदेनाध्यारोपयेदिति विधिजनितं ज्ञानं तद्गोचरीभूताः प्रतिष्ठाया बोधका इष्टसाधनत्वबोधनादिद्वारा तदुत्पतिहेतव इति यावत्, विधयो विधिवाक्यान्यप्युपयुज्यन्ते फलवन्तो भवन्ति, तेनेदं वक्ष्यमाणं दुर्मतमाध्यात्मिकाभासानां हतं निराकृतम् ॥ १०३ ॥ किं तदित्याह-शाश्वत इति स्पष्टं, प्रतिष्ठितप्रतिमां पूजयेदिति विधिरप्रतिष्ठितां न पूजयेदिति निषेधनं च, किं, विधिनिषेधार्थान्वयस्यायोग्यत्वादिति ॥ १०४ ॥ कथं निरस्तं तदाह--पूजादिविधयः प्रतिष्ठितां प्रतिमां पूजयेदित्यादिवाक्यलक्षणा ज्ञानविधेः प्रतिष्ठितां प्रतिमां भगवदभिन्नत्वेनाध्यरोपयेदित्यंगवाक्यात्मकस्यांगित्वं प्रधानत्वमाश्रिताः शाश्वताशाश्वतार्चासु विभेदेनभिन्नरूपेण व्यवस्थिता विधिविषयनिर्वाहत्वं अशाश्वतप्रतिमास्थले, अन्यत्र त्वनादिप्रतिष्ठितत्वप्रत्यभिज्ञाया एव तथात्वं, तादृशशिष्टाचारेण तथैव विधिबोधनादिति

धयो ज्ञानविध्यंगित्वं यदाश्रिताः । शाश्वताशाश्वतार्चासु विभेदेन व्यवस्थिताः ॥ १०५ ॥ एतेन व्यवहारेऽपि स्थापनानाग्रहो हतः । तत्रार्धजरतीयं किं नाम्नापि व्यवहर्तरि ॥ १०६ ॥ ऋजुसूत्रेऽपि ये द्रव्यनिक्षेपं प्रवदन्ति न । व्याख्येया तैः कथं तत्र द्रव्यावश्यकसूत्रगीः ॥ १०७ ॥ तस्माद्यथोक्तनिक्षेपविभागो भाष्यसंमतः । इतीयं मुहुरालोच्या निक्षेपनययोजना ॥ १०८ ॥ जातं द्रव्यास्तिकाच्छुद्धाद्दर्शनं ब्रह्मवादिनाम् । तत्रैके शब्दसन्मात्रं चित्सन्मात्रं परे जगुः ॥ १०९ ॥ अशुद्धाद्व्यवहाराख्यात्ततोऽभूत् सांख्यदर्शनम् । चेतनाचेतनद्रव्यानन्तपर्यायदर्शकम् ॥ ११० ॥ यद्यप्येतन्मतेऽप्यात्मा निर्लेपो निर्गुणो विभुः । अध्यासाद्व्यवहारश्च ब्रह्मवादेऽपि संमतः ॥ १११ ॥ प्रत्युतात्मनि कर्तृत्वं सांख्यानां प्रातिभासिकम् । वेदान्तिनां त्वनिर्वाच्यं मतं तद्व्यावहारिकम् ॥ ११२ ॥ अनुत्पन्नत्वपक्षश्च निर्युक्तौ नैगमे श्रुतः । नेति वेदान्तिसांख्योक्त्योः संग्रहव्यवहारता ॥ ११३ ॥ तथाप्युपनिषद्दृष्टिः सृष्टिवादात्मिका परा । तस्यां स्वप्नोपमे विश्वे व्यवहारलवोऽपि न ॥११४॥ सांख्यशास्त्रे च तन्नात्मव्यवस्था व्यवहारकृत् । इत्येतावत्पुरस्कृत्य विवेकः संमतावयम् ॥११५॥ हेतुर्मतस्य कस्यापि शुद्धोऽशुद्धो न नैगमः । अन्तर्भावो यतस्तस्य संग्रहव्यवहारयोः ॥ ११६ ॥ द्वाभ्यां नयाभ्यामुन्नीतमपि शास्त्रं कणाशिना ।

---

॥ १०५ ॥ एतेन युक्तिकदंबकेन संग्रहे स्थापनाव्यवस्थापनेन व्यवहारेऽपि स्थापनाया अनाग्रहोऽस्वीकारो हतो निरस्तः केषांचिदाचार्याणां, यतस्तत्र व्यवहारे नाम्नापि नामनिक्षेपेणापि व्यवहर्तरि व्यवहारमभ्युपगच्छति, किमिदमर्धजरतीयं यदुपनया ( यदुपमया ) न व्यवहार इति, न हीन्द्रप्रतिमायां नेन्द्रव्यवहारो भवति ॥ १०६ ॥ ऋजुसूत्रेपि ये द्रव्यनिक्षेपं न स्वीकुर्वते तान् दूषयति--अनुपयोगं द्रव्यमिति, तत्र तैर्द्रव्यावश्यकगीः कथं व्याख्येया ॥ १०७ ॥१०८॥ एके ब्रह्मवादिनः शब्दसन्मात्रमिच्छन्ति अन्ये चित्सन्मात्रमिच्छन्ति ॥ १०९ ॥ व्यवहाराख्यादशुद्धात् ततो द्रव्यार्थिकनयात् सांख्यदर्शनमभूत्, कीदृशं तत् ? चेतनश्चाचेतनद्रव्यंचानन्तपर्यायाश्चाविर्भावतिरोभावात्मकास्तेषां दर्शकं प्रतिपादकमिति ॥ ११० ॥ एतन्मते सांख्यमते आत्मा कर्तृत्वादिलेपरहितो गुणस्पर्शशून्यः ॥ १११ ॥ ११२ ॥ ११३ ॥ तथाप्युपनिषद्वेदान्तदर्शनप्रवृत्तिः ॥ ११४ ॥ तात्पर्यविषयीकृत्य अयम् ॥ ११५ ॥ ११६ ॥ द्वाभ्यां सामान्यविशेषग्राहिभ्यां संग्रहव्यवहाराभ्यां नयाभ्याम् ॥ ११७ ॥

॥ १११ ॥

अन्योऽन्यनिरपेक्षत्वान्मिथ्यात्वं स्वमताग्रहात् ॥ ११७ ॥ स्वतंत्रव्यक्तिसामान्यग्रहा येऽत्र तु नैगमे । औलूक्यसमयोत्पत्तिं
ब्रूमहे तत एव हि ॥ ११८ ॥ ऋजुसूत्रादितः सौत्रान्तिकवैभाषिकौ क्रमात् । अब्रूवन् सौगता योगाचारमाध्य-
मिकाविति ॥ ११९ ॥ नयसंयोगजः शब्दालंकारादिश्च विस्तरः । कियान् वाच्यो वचस्तुल्यसंख्या ह्यभिहितानया ॥१२०॥
स्याद्वादनिरपेक्षैश्च तैस्तावन्तः परागमाः । ज्ञेयोपयुज्य तदियं दर्शने नययोजना ॥ १२१ ॥ नास्ति नित्यो न नो कर्ता न
भोक्तात्मा न निर्वृतिः । तदुपायश्च नेत्याहुर्मिथ्यात्वस्थानकानि षट् ॥ १२२ ॥ षडेतद्विपरीतानि सम्यक्त्वस्थानकान्यपि ।
मार्गत्यागप्रवेशाभ्यां फलतस्तत्त्वमिष्यते ॥ १२३ ॥ स्वरूपतस्तु सर्वेऽपि स्युर्मिथोऽनिश्रिता नयाः । मिथ्यात्वमिति को
भेदो नास्तित्वास्तित्वनिर्मितः ॥ १२४ ॥ धर्म्यंशे नास्तिको ह्येको बार्हस्पत्यः प्रकीर्तितः । धर्मांशे नास्तिका ज्ञेयाः सर्वेऽपि

---

॥११८॥ ऋजुसूत्रादित ऋजुसूत्रतः सौत्रान्तिकः, शब्दतो वैभाषिकः, समभिरूढतो योगाचारः, एवंभूततो माध्यमिक, इति चत्वारः सौगता अभूवन् । अत्र काव्यम् । "अर्थो ज्ञानसमन्वितो मतिमता वैभाषिकेणेक्ष्यते, प्रत्यक्षो न हि बाह्यवस्तुवसरः सौत्रान्तिकैराश्रितः । योगाचारमतानुगैरभिमता साकारबुद्धिः परा, मन्यन्ते बत मध्यमाः कृतधियः स्वस्थां परां संविदम् ॥ १ ॥ इति" ॥ ११९॥ १२० ॥ नयैः स्याद्वादनिरपेक्षैः स्याद्वादैकवाक्यतारहितैस्तावन्तो वचस्तुल्यसंख्या एव परागमाः परसिद्धान्ता भवन्ति । अभिनिवेशान्वितनयत्वस्यैव परसमयलक्षणत्वादिति । तदिदमुक्तं संमतौ । इयं दर्शने नययोजना ज्ञेया ॥ १२१ ॥ नास्त्यात्मेति चार्वाकमते, न नित्य आत्मेति क्षणिकवादिमते, न कर्ता न भोक्तात्मेति सांख्यमते, यद्वा न कर्तेति सांख्यमते । न भोक्तेति वेदान्तिमते, नास्ति निर्वृतिः सर्वदुःखविमोक्षलक्षणा नास्तिकप्रायाणां यज्वनां मते,अस्ति मुक्तिः परं तदुपायो नास्ति सर्वभावानां नयतत्वेनाकस्मादेव भावादिति नियतिवादिमते,इत्येतानि षड् मिथ्यात्वस्थानकान्याहुः पूर्वसूरयः ॥१२२॥एतेभ्यः प्रागुक्तेभ्यो विपरीतानि षड् सम्यक्त्वस्थानकानि भवन्ति । गाथा–"अत्थि जिओ णिच्चो कत्ता भुत्ता सपुन्नपावाणं।अत्थि धुवं निव्वाणं तस्सोवाओ अ-छट्ठाणा ॥१॥ इति" को विशेष इत्यत आह–नास्तित्ववादे गुरुशिष्यक्रियाक्रियाफलादिव्यवहारलोपान्मार्गत्यागः, अस्तित्ववादे चोक्तव्यवहारप्रामाण्यविश्वासे तत्प्रवेशः, इत्येताभ्यां हेतुभ्यां फलतस्तत्त्वं सम्यक्त्वमिथ्यास्थानकत्वमिष्यते॥१२३॥मिथोऽनिश्रिता इति स्याद्वादमुद्रया परस्पराकांक्षारहिता इति तेषां भेदो भविष्यतीत्यत आह॥१२४॥

परतीर्थिकाः ॥ १२५ ॥ इत्थमेव क्रियावादे सम्यक्त्वोक्तिर्न दुष्यति । मिथ्यात्वोक्तिस्तथाऽज्ञानाक्रियाविनयवादिषु ॥ १२६ ॥ क्रियायां पक्षपातो हि पुंसां मार्गाभिमुख्यकृत् । अन्त्यपुद्गलभावित्वादन्येन्यस्तस्य मुख्यता ॥ १२७ ॥ क्रियानयः क्रियां ब्रूते ज्ञानं ज्ञाननयः पुनः । मोक्षस्य कारणं तत्र भूयस्यो युक्तयोर्द्वयोः ॥ १२८ ॥ विज्ञप्तिः फलदा पुंसां न क्रिया फलदा मता । मिथ्याज्ञानात्प्रवृत्तस्य फलासंवाददर्शनात् ॥ १२९ ॥ क्रियैव फलदा पुंसां न ज्ञानं फलदं मतम् । यतः स्त्रीभक्ष्य-भोगज्ञो न ज्ञानात्सुखितो भवेत् ॥ १३० ॥ ज्ञानमेव शिवस्याध्वा मिथ्यासंस्कारनाशनात् । क्रियामात्रं त्वभव्यानामपि नो दुर्लभं भवेत् ॥ १३१ ॥ तंदुलस्य यथा वर्म यथा ताम्रस्य कालिका । नश्यति क्रिययामुत्र पुरुषस्य तथा मलः ॥ १३२ ॥ बठरश्च तपस्वी च शूरश्चाप्यकृतव्रणः । मद्यपा स्त्री सती चेति राजन्न श्रद्दधाम्यहम् ॥ १३३ ॥ ज्ञानवान् शीलहीनश्च त्यागवान् धनसंग्रही । गुणवान् भाग्यहीनश्च राजन्न श्रद्दधाम्यहम् ॥ १३४ ॥ इति युक्तिवशात्प्राहुरुभयोस्तुल्यक-क्षताम् । मंत्रेऽप्याह्वानंदेवादेः क्रियायुग्ज्ञानमिष्टकृत् ॥ १३५ ॥ ज्ञानं तुर्ये गुणस्थाने क्षायोपशमिकं भवेत् । अपेक्षते फले षष्ठगुणस्थानजसंयमम् ॥ १३६ ॥ प्रायः संभवतः सर्वगतिषु ज्ञानदर्शने । तत्प्रमादो न कर्तव्यो ज्ञाने चारित्रवर्जिते ॥ १३७ ॥ क्षायिकं केवलज्ञानमपि मुक्तिं ददाति न । तावन्नाविर्भवेद्यावच्छैलेश्यां शुद्धसंयमः ॥ १३८ ॥ व्यव-



---

धर्मिण आत्मनोंऽशे नास्तित्वभागे एकश्चार्वाको नास्तिकः प्रोक्तः, धर्माणामात्मनः शरीरप्रमाणत्वनानात्वादीनामंशे नास्तित्वपक्षे सर्वेऽपि नैयायिकवैशेषिकवेदान्तिसांख्यपातंजलजैमिनीयादयः परतीर्थिका नास्तिका ज्ञेयाः ॥१२५॥१२६॥ क्रियायां पक्षपातो मोक्षेच्छया आवेशो हि पुंसां मार्गानुसारिता । तदुक्तं दशाचूर्णौ–"जो अकिरियावाई सो भविओ अभविओ वा कण्हपक्खिओ सुक्कपक्खिओ वा, जो किरियावाई सो णियमा भविओ णियमा सुक्कपक्खिओ अंतो पुग्गलपरियट्टस्स सिज्झइ इत्यादि । असियसयं किरियाणं अकिरियवाईण होइ चुलसीई । अन्नाणिय सत्तट्ठी वेणईयाणं तु बत्तीसा ॥ १ ॥" इति गाथा । अत्र च क्रियावाद्यादीनां त्रिषष्ट्यधिकशतत्रयभेदा इति॥१२७॥

हारे तपोज्ञानसंयमा मुक्तिहेतवः । एकः शब्दर्जुसूत्रेषु संयमो मोक्षकारणम् ॥ १३९ ॥ संग्रहस्तु नयः प्राह जीवो मुक्तः सदा शिवः । अनवाप्तिभ्रमात्कंठस्वर्णन्यायात् क्रिया पुनः ॥ १४० ॥ अनन्तमार्जितं ज्ञानं त्यक्ताश्चानन्तविभ्रमाः । न चित्रं कलयाप्यात्मा हीनोऽभूदधिकोऽपि वा ॥ १४१ ॥ धावन्तोऽपि नयाः सर्वे स्युर्भावे कृतविश्रमाः । चारित्रगुणलीनः स्यादिति सर्वनयाश्रितः ॥ १४२ ॥

सुनिपुणमतिगम्यं मन्दधीदुःप्रवेशं प्रवचनवचनं न क्वापि हीनं नयौघैः ।
गुरुचरणकृपातो योजयंस्तान् पदे यः परिणमयति शिष्यांस्तं वृणीते यशःश्रीः ॥ १४३ ॥
गच्छे श्रीविजयादिदेवसुगुरोः स्वच्छे गुणानां गणैः प्रौढिं प्रौढिमधाम्नि जीतविजयप्राज्ञाः परामैयरुः ।
तत्सातीर्थ्यभृतां नयादिविजयप्राज्ञोत्तमानां शिशुस्तत्त्वं किंचिदिदं यशोविजय इत्याख्याभृदाख्यातवान् ॥ १४४ ॥

॥ इति नयोपदेशप्रकरणम् ॥

# ॥ अथ जैनतर्कपरिभाषा प्रारभ्यते ॥

ऐन्द्रवृन्दनतं नत्वा जिनं तत्त्वार्थदेशिनम् । प्रमाणनयनिक्षेपैस्तर्कभाषां तनोम्यहम् ॥ १ ॥

तत्र स्वपरव्यवसायि ज्ञानं प्रमाणम् । स्वमात्मा ज्ञानस्यैव स्वरूपमित्यर्थः । परस्तस्मादन्योऽर्थ इति यावत् । तौ व्यवस्यति यथास्थितत्वेन निश्चिनोतीत्येवंशीलं स्वपरव्यवसायि । अत्र दर्शनेऽतिव्याप्तिवारणाय ज्ञानपदम् । संशयविपर्ययानध्यवसायेषु तद्वारणाय व्यवसायिपदम् । परोक्षबुद्ध्यादिवादिनां मीमांसकादीनां बाह्यार्थापलापिनां ज्ञानाद्यद्वैतवादिनां च मतनिरासाय स्वपरेति स्वरूपविशेषणार्थमुक्तम् । ननु यद्येवं सम्यग्ज्ञानमेव प्रमाणमिष्यते तदा किमन्यत्तत्फलं वाच्यमिति चेत्सत्यं स्वार्थव्यवसितेरेव तत्फलत्वात् । नन्वेवं प्रमाणे स्वपरव्यवसायित्वं न स्यात्, प्रमाणस्य परव्यवसायित्वात् फलस्य च स्वव्यवसायित्वादिति चेन्न, प्रमाणफलयोः कथंचिदभेदेन तदुपपत्तेः । इत्थं चात्मव्यापाररूपमुपयोगेन्द्रियमेव प्रमाणमिति स्थितम् । न ह्यव्यापृत आत्मा स्पर्शादिप्रकाशको भवति, निर्व्यापारेण कारकेण क्रियाजननायोगात् मसृणतूलिकादिसन्निकर्षेण सुषुप्तस्यापि तत्प्रसंगाच्च । केचित्तु–"ततोऽर्थग्रहणाकारा शक्तिर्ज्ञानमिहात्मनः । करणत्वेन निर्दिष्टा न विरुद्धा कथञ्चन ॥ १ ॥" इति लब्धीन्द्रियमेवार्थग्रहणशक्तिलक्षणं प्रमाणं संगिरन्ते, तदपेशलं, उपयोगात्मना करणेन लब्धेः फले व्यवधानात्, शक्तीनां परोक्षत्वाभ्युपगमेन करणफलज्ञानयोः परोक्षप्रत्यक्षत्वाभ्युपगमे प्राभाकरमतप्रवेशाच्च । अथ ज्ञानशक्तिरप्यात्मनि स्वाश्रये परिच्छिन्ने द्रव्यार्थतः प्रत्यक्षेति न दोष इति चेन्न द्रव्यद्वारा प्रत्यक्षत्वेन सुखादिवत् स्वसंविदित-

त्वाव्यवस्थितेः, ज्ञानेन घटं जानामीति करणोल्लेखानुपपत्तेश्च । न हि कलशसमाकलनवेलायां द्रव्यार्थतः प्रत्यक्षाणामपि कुशूलकपालादीनामुल्लेखोऽस्तीति । तद्विभेदं प्रत्यक्षं परोक्षं च । अक्षमिन्द्रियं प्रति गतं कार्यत्वेनाश्रितं प्रत्यक्षं,अथवाऽश्नुते ज्ञानात्मना सर्वार्थान् व्याप्नोतीत्यौणादिकनिपातनादक्षो जीवस्तं प्रतिगतं प्रत्यक्षम् । न चैवमवध्यादौ मत्यादौ च प्रत्यक्षव्यपदेशो न स्यादिति वाच्यम्, यतो व्युत्पत्तिनिमित्तमेवैतत् प्रवृत्तिनिमित्तं त्वेकार्थसमवायिनाऽनेनोपलक्षितं स्पष्टतावत्त्वमिति । स्पष्टता चानुमानादिभ्योऽतिरेकेण विशेषप्रकाशनमित्यदोषः । अक्षेभ्योऽक्षाद्वा परतो वर्तत इति परोक्षं, अस्पष्टं ज्ञानमित्यर्थः । प्रत्यक्षं द्विविधं सांव्यवहारिकं पारमार्थिकं चेति । समीचीनो बाधारहितो व्यवहारः प्रवृत्तिनिवृत्तिलोकाभिलापलक्षणः संव्यवहारस्तत्प्रयोजनकं सांव्यवहारिकमपारमार्थिकमित्यर्थः । यथाऽस्मदादिप्रत्यक्षं । तद्धीन्द्रियानिन्द्रियव्यवहितात्मव्यापारसंपाद्यत्वात्परमार्थतः परोक्षमेव, धूमादग्निज्ञानवद्व्यवधानाविशेषात् । किं चासिद्धानैकान्तिकविरुद्धानुमानाभासवत्संशयविपर्ययानध्यवसायसंभवात्सदनुमानवत्संकेतस्मरणादिपूर्वकनिश्चयसंभवाच्च परमार्थतः परोक्षमेवैतत् ।[1] एतच्च द्विविधमिन्द्रियजमनिन्द्रियजं च,तत्रेन्द्रियजं चक्षुरादिजनितं,अनिन्द्रियजं च मनोजन्म।यद्यपीन्द्रियजज्ञानेऽपि मनो व्यापिपर्ति,तथापि तत्रेन्द्रियस्यैवासाधारणकारणत्वाददोषः । द्वयमपीदं मतिश्रुतभेदाद्द्विधा, तत्रेन्द्रियमनोनिमित्तं श्रुताननुसारि ज्ञानं, मतिज्ञानं, श्रुतानुसारि च श्रुतज्ञानम् । श्रुतानुसारित्वं च संकेतविषयपरोपदेशं श्रुतग्रन्थं वाऽनुसृत्य वाच्यवाचकभावेन संयोज्य घटो घट इत्याद्यन्तर्जल्पाकारग्राहित्वम् । नन्वेवमवग्रह एव मतिज्ञानं स्यान्न त्वीहादयः, तेषां शब्दोल्लेखसहितत्वेन श्रुतत्वप्रसंगादिति

१ व्यावहारिकं ।

चेन्न, श्रुतनिश्रितानामप्यवग्रहादीनां संकेतकाले श्रुतानुसारित्वेऽपि व्यवहारकाले तदननुसारित्वात्, अभ्यासपाटववशेन श्रुतानुसरणमन्तरेणापि विकल्पपरंपरापूर्वकविविधवचनप्रवृत्तिदर्शनात् अङ्गोपाङ्गादौ शब्दाद्यवग्रहणे च श्रुताननुसारित्वान्मतित्वमेव। यस्तु तत्र श्रुतानुसारी प्रत्ययस्तत्र श्रुतत्वमेवेत्यवधेयम्। मतिज्ञानमवग्रहेहापायधारणाभेदाच्चतुर्विधम्। अवकृष्टो ग्रहोऽवग्रहः, स[1] द्विविधः, व्यञ्जनावग्रहोऽर्थावग्रहश्च। व्यज्यते प्रकटीक्रियतेऽर्थोऽनेनेति व्यञ्जनं कदंबपुष्पगोलकादिरूपाणामन्तर्निर्वृत्तीन्द्रियाणां शब्दादिपरिणतद्रव्यनिकुरंबं तदुभयसंबन्धश्च, ततो व्यञ्जनेन व्यञ्जनस्यावग्रहो व्यञ्जनावग्रह इति मध्यमपदलोपी समासः। अथाज्ञानमयं बधिरादीनां श्रोत्रशब्दादिसंबन्धवत्तत्काले ज्ञानानुपलंभादिति चेन्न, ज्ञानोपादानत्वेन तत्र ज्ञानत्वोपचारादन्तेऽर्थावग्रहरूपज्ञानदर्शनेन तत्कालेऽपि चेष्टाविशेषाद्यनुमेयस्वप्नज्ञानादितुल्याव्यक्तज्ञानानुमानाद्वा एकतेजोऽवयववत्तस्य तनुत्वेनानुपलक्षणात्। स[2] च नयनमनोवर्जेन्द्रियभेदाच्चतुर्धा। नयनमनसोरप्राप्यकारित्वेन व्यञ्जनावग्रहासिद्धेः। अन्यथा तयोर्ज्ञेयकृतानुग्रहोपघातपात्रत्वे जलानलदर्शनचिन्तनयोः क्लेददाहापत्तेः। रविचन्द्राद्यवलोकने चक्षुषोऽनुग्रहोपघातौ दृष्टावेवेति चेन्न, प्रथमावलोकनसमये तददर्शनात्। अनवरतावलोकने च प्राप्तेन रविकिरणादिनोपघातस्य नैसर्गिकसौम्यादिगुणे चन्द्रादौ चावलोकिते उपघाताभावादनुग्रहाभिमानस्योपपत्तेः। मृतनष्टादिवस्तुचिन्तने इष्टसंगमविभवलाभादिचिन्तने च जायमानौ दौर्बल्योरःक्षतादिवदनविकाशरोमाञ्चोद्गमादिलिङ्गकावुपघातानुग्रहौ न मनसः, किं तु मनस्त्वपरिणतानिष्टेष्टपुद्गलनिचयरूपद्रव्यमनोऽवष्टंभेन हृन्निरुद्धवायुतद्भेषज्याभ्यामिव जीवस्यैवेति न ताभ्यां मनसः प्राप्यका-

१ अवग्रहः। २ व्यंजनावग्रहः।

रित्वसिद्धिः । ननु यदि मनो विषयं प्राप्य न परिच्छिनत्ति तदा कथं प्रसुप्तस्य मेर्वादौ गत मे मन इति प्रत्ययः ? इति चेन्न, मेर्वादौ शरीरस्येव मनसो गमनस्वप्नस्यासत्यत्वात्, अन्यथा विबुद्धस्य कुसुमपरिमलाद्यध्वजनितपरिश्रमाद्यनुग्रहोपघातप्रसंगात् । ननु स्वप्नानुभूतजिनस्नात्रदर्शनसमीहितार्थलाभयोरनुग्रहोपघातौ विबुद्धस्य सतो दृश्येते एवेति चेद्दृश्येतां स्वप्नविज्ञानकृतौ तौ । स्वप्नविज्ञानकृतं क्रियाफलं तु तृप्त्यादिकं नास्ति, यतो विषयप्राप्तिरूपा प्राप्यकारिता मनसो युज्येतेति ब्रूमः । क्रियाफलमपि स्वप्ने व्यञ्जनविसर्गलक्षणं दृश्यत एवेति चेत्तत्तीव्राध्यवसायकृतं, न तु कामिनीनिधुवनक्रियाकृतमिति को दोषः ? ननु स्त्यानर्धिनिद्रोदये गीतादिकं शृण्वतो व्यञ्जनावग्रहो मनसोऽपि भवतीति चेन्न, तदा स्वप्नाभिमानिनोऽपि श्रवणाद्यवग्रहेणैवोपपत्तेः । ननु च्यवमानो न जानातीत्यादिवचनात् सर्वस्यापि छद्मस्थोपयोगस्यासंख्येयसमयमानत्वात्प्रतिसमयं च मनोद्रव्याणां ग्रहणाद्विषयमसंप्राप्तस्यापि मनसो देहादनिर्गतस्य तस्य च स्वसन्निहितहृदयादिचिन्तनवेलायां कथं व्यञ्जनावग्रहो न भवतीति चेत्, शृणु, ग्रहणं हि मनो, न तु ग्राह्यं । ग्राह्यवस्तुग्रहणे च व्यञ्जनावग्रहो भवतीति न मनोद्रव्यग्रहणे तदवकाशः । सन्निहितहृदयादिदेशग्रहवेलायामपि नैतदवकाशः । बाह्यार्थापेक्षयैव प्राप्यकारित्वाप्राप्यकारित्वव्यवस्थानात् । क्षयोपशमपाटवेन मनसः प्रथममर्थानुपलब्धिकालासंभवाद्वा । श्रोत्रादीन्द्रियव्यापारकालेऽपि मनोव्यापारस्य व्यञ्जनावग्रहोत्तरमेवाभ्युपगमात् । मनुतेऽर्थान् मन्यन्तेऽर्था अनेनेति वा मन इति मनःशब्दस्यान्वर्थत्वादर्थभाषणं विना भाषाया इवार्थमननं विना मनसोऽप्रवृत्तेः । तदेवं नयनमनसोर्न व्यञ्जनावग्रह इति स्थितम् । स्वरूपनामजातिक्रियागुणद्रव्यकल्पनारहितं सामान्यग्रहणमर्थावग्रहः कथं तर्हि तेन शब्द इत्यवगृहीत इति सूत्रार्थस्तत्र शब्दाद्यु

ल्लेखराहित्याभावादिति[1] चेन्न, शब्द इति वक्त्रैव भणनात् रूपरसादिविशेषव्यावृत्त्यनवधारणपरत्वाद्वा[*] । यदि च शब्दोऽयमित्यध्यवसायोऽवग्रहे भवेत्तदा शब्दोल्लेखस्यान्तर्मुहूर्तिकत्वादर्थावग्रहस्यैकसामायिकत्वं भज्येत । स्यान्मतं शब्दोऽयमिति सामान्यविशेषग्रहणमप्यर्थावग्रह इष्यतां, तदुत्तरं प्रायो माधुर्यादयः शंखशब्दधर्मा इह, न तु शार्ङ्गधर्माः खरकर्कशत्वादय इतीहोत्पत्तेरिति, मैवम्, अशब्दव्यावृत्त्या विशेषप्रतिभासेनास्यापायत्वात्। स्तोकग्रहणस्योत्तरभेदापेक्षयाऽव्यवस्थितत्वात्। किं च शब्दोऽयमिति ज्ञानं शब्दगतान्वयधर्मेषु रूपादिव्यावृत्तिपर्यालोचनरूपामीहां विनाऽनुपपन्नं । सा च नागृहीतेऽर्थे संभवतीति तद्ग्रहणं अस्मदभ्युपगतार्थावग्रहकालात् प्राक् प्रतिपत्तव्यम् । स च व्यंजनावग्रहकालोऽर्थपरिशून्य इति यत्किंचिदेतत् । नन्वनन्तरं क एष शब्द इति शब्दत्वावान्तरधर्मविषयकेहानिर्देशाच्छब्दोऽयमित्याकार एवावग्रहोऽभ्युपेय इति चेन्न, शब्दः शब्द इति भाषकेणैव भणनात् अर्थावग्रहेऽव्यक्तशब्दश्रवणस्यैव सूत्रे निर्देशात् । अव्यक्तस्य च सामान्यरूपत्वादनाकारोपयोगरूपस्य चास्य तन्मात्रविषयत्वात् । यदि च व्यञ्जनाग्रह एवाव्यक्तशब्दग्रहणमिष्येत, तदा सोऽप्यर्थावग्रहः स्यात् अर्थस्य ग्रहणात् । केचित्तु संकेतादिविकल्पविकलस्य जातमात्रस्य बालस्य सामान्यग्रहणं । परिचितविषयस्य त्वाद्यसमय एव विशेषज्ञानमित्येतदपेक्षया तेन शब्दइत्यवगृहीत इति नानुपपन्नमित्याहुः। तन्न,एवं हि व्यक्ततरस्य व्यक्तशब्दज्ञानमतिक्रम्यापि सुबहुविशेषग्रहप्रसंगात् । न चेष्टापत्तिर्न पुनर्जानाति क एष शब्द इति सूत्रावयवस्याविशेषेणोक्तत्वात् । प्रकृष्टमतेरपि शब्दं धर्मिणमगृहीत्वोत्तरोत्तरसुबहुधर्मग्रहणानुपपत्तेश्च । अन्ये त्वालोचनपूर्वकमर्थावग्रहमाचक्षते, तत्रालो-

१ राहित्यादिति । * व्यावृत्त्यवधारणपरत्वाद्वा ।

चनमव्यक्तसामान्यग्राहि, अर्थावग्रहस्त्वितरव्यावृत्तवस्तुस्वरूपग्राहीति न सूत्रानुपपत्तिरिति, तदसत्, यत आलोचनं व्यञ्जनावग्रहात् पूर्वं स्यात् ? पश्चाद्वा ? स एव वा ? नाद्यः अर्थव्यञ्जनसंबंधं विना तदयोगात् । न द्वितीयः व्यञ्जनावग्रहान्त्यसमयेऽर्थावग्रहस्यैवोत्पादादालोचनानवकाशात्। न तृतीयः व्यञ्जनावग्रहस्यैव नामान्तरकरणात्। तस्य चार्थशून्यत्वेनार्थालोचनानुपपत्तेः। किं चालोचनेनेहां विना झटित्येवार्थावग्रहः कथं जन्यतां। युगपच्चेहावग्रहौ पृथगसंख्येयसमयमानौ कथं घटेतामिति विचारणीयम्।नन्ववग्रहेऽपि क्षिप्रेतरादिभेदप्रदर्शनादसंख्यसमयमानत्वं विशेषविषयत्वं चाविरुद्धमिति चेन्न,तत्त्वतस्तेषामपायभेदत्वात्,कारणे कार्योपचारमाश्रित्यावग्रहभेदत्वप्रतिपादनात्, अविशेषविषये विशेषविषयत्वस्यावास्तवत्वात्। अथवाऽवग्रहो द्विविधो नैश्चयिको व्यावहारिकश्च।आद्यः सामान्यमात्रग्राही,द्वितीयश्च विशेषविषयः,तदुत्तरमुत्तरोत्तरधर्माकांक्षारूपेहाप्रवृत्तेः, अन्यथाऽवग्रहं विनेहानुत्थानप्रसंगादत्रैव क्षिप्रेतरादिभेदसंगतिः, अत एव चोपर्युपरि ज्ञानप्रवृत्तिरूपसन्तानव्यवहार इति द्रष्टव्यम् । अवग्रहीतविशेषाकांक्षणमीहा। व्यतिरेकधर्मनिराकरणपरोऽन्वयधर्मघटनप्रवृत्तो बोध इति यावत् । यथा श्रोत्रग्राह्यत्वादिना प्रायोऽनेन शब्देन भवितव्यं। मधुरत्वादिधर्मयुक्तत्वाच्छांखादिना वेति । न चेयं संशय एव, तस्यैकत्र धर्मिणि विरुद्धनानार्थज्ञानरूपत्वात्, अस्याश्च निश्चयाभिमुखत्वेन विलक्षणत्वात् ॥ ईहितस्य विशेषनिर्णयोऽवायः । यथा शब्द एवायं शांख एवायमिति वा । स एव दृढतमावस्थापन्नो धारणा । सा च त्रिविधाऽविच्युतिः स्मृतिर्वासना च । तत्रैकार्थोपयोगसातत्यानिवृत्तिरविच्युतिः, तस्यैवार्थोपयोगस्य कालान्तरे तदेवेत्युल्लेखेन समुन्मीलनं स्मृतिः, अपायाहितः स्मृतिहेतुः संस्कारो वासना । द्वयोरवग्रहयोरवग्रहत्वेन च तिसृणां धारणानां धारणात्वेनोपग्रहान्न विभागव्याघातः । केचित्त्वपनयन

मपायः, धरणं च धारणेति व्युत्पत्त्यर्थमात्रानुसारिणोऽसद्भूतार्थविशेषव्यतिरेकावधारणमपायः सद्भूतार्थविशेषावधारणं च धारणेत्याहुस्तन्न, क्वचित्तदन्यव्यतिरेकपरामर्शात्, क्वचिदन्वयधर्मसमनुगमात्, क्वचिच्चोभाभ्यामपि, भवतोऽपायस्य निश्चयैकरूपेण भेदाभावात्, अन्यथा स्मृतेराधिक्येन मतेः पञ्चभेदत्वप्रसंगात्। अथ नास्त्येव भवदभिमता धारणेति भेदचतुष्टयाव्याघातः, तथाहि, उपयोगोपरमे का नाम धारणोपयोगसातत्यलक्षणा, अविच्युतिश्चापायान्नातिरिच्यते। या च घटाद्युपयोगोपरमे संख्येयमसंख्येयं वा कालं वासनाऽभ्युपगम्यते, या च तदेवेतिलक्षणा स्मृतिः। सा मत्यंशरूपा धारणा न भवति, मत्युपयोगस्य प्रागेवोपरतत्वात्। कालान्तरे जायमानोपयोगेऽप्यन्वयमुख्यां धारणायां स्मृत्यन्तर्भावादिति चेन्न, अपायप्रवृत्त्यनन्तरं क्वचिदन्तर्मुहूर्तं यावदपायधाराप्रवृत्तिदर्शनादविच्युतेः पूर्वापरदर्शनानुसन्धानस्य तदेवेदमिति स्मृत्याख्यस्य प्राच्यापायपरिणामस्य तदाधायकसंस्कारलक्षणाया वासनायाश्चापायाभ्यधिकत्वात्। नन्वविच्युतिसंस्मृतिलक्षणौ ज्ञानभेदौ गृहीतग्राहित्वान्न प्रमाणं। संस्कारश्च किं स्मृतिज्ञानावरणकर्मक्षयोपशमो वा तज्ज्ञानजननशक्तिर्वा तद्वस्तुविकल्पो वेति त्रयी गतिः। तत्राद्यपक्षद्वयमयुक्तं, ज्ञानरूपत्वाभावात्तद्भेदानां चेह विचार्यत्वात्। तृतीयपक्षोऽप्ययुक्त एव, संख्येयमसंख्येयं वा कालं वासनाया इष्टत्वादेतावन्तं च कालं वस्तुविकल्पायोगादिति न कापि धारणा घटत इति चेन्न, स्पष्टस्पष्टतरस्पष्टतमभिन्नधर्मकवासनाजनकत्वेनान्यान्यवस्तुग्राहित्वादविच्युतेः प्रागननुभूतवस्त्वेकत्वग्राहित्वाच्च स्मृतेरगृहीतग्राहित्वात् स्मृतिज्ञानावरणकर्मक्षयोपशमरूपायास्तद्विज्ञानजननशक्तिरूपायाश्च वासनायाः स्वयमज्ञानरूपत्वेऽपि कारणे कार्योपचारेण ज्ञानभेदाभिधानाविरोधादिति। एते चावग्रहादयो नोत्क्रमव्यतिक्रमाभ्यां न्यूनत्वेन वोत्पद्यन्ते, ज्ञेयस्येत्थ-

मेव ज्ञानजनस्वाभाव्यात् क्वचिदन्यस्तेऽपायमात्रस्य दृढवासने विषये स्मृतिमात्रस्य चोपलक्षणेऽप्युत्पलपत्रशतव्यतिभेद इव सौक्ष्म्यादवग्रहादिक्रमानुपलक्षणात् । तदेवमर्थावग्रहादयो मनइन्द्रियैः षोढा भिद्यमाना व्यञ्जनावग्रहचतुर्भेदैः सहाष्टाविंशतिर्मतिभेदा भवन्ति । अथवा बहुबहुविधक्षिप्रानिश्रितनिश्चितध्रुवैः सप्रतिपक्षैर्द्वादशभिर्भेदैर्भिन्नानामेतेषां षट्त्रिंशदधिकानि त्रीणि शतानि भवन्ति । बह्वादयश्च भेदा विषयापेक्षाः, तथाहि, कश्चिन्नानाशब्दसमूहमाकर्णितं बहुं जानाति, एतावन्तोऽत्र शंखशब्दा एतावन्तश्च पटहादिशब्दा इति पृथग्भिन्नजातीयं क्षयोपशमविशेषात्परिच्छिनत्तीत्यर्थः । अन्यस्त्वल्पक्षयोपशमत्वात्तत्समानदेशोऽप्यबहुं, अपरस्तु क्षयोपशमवैचित्र्याद्बहुविधं, एकैकस्यापि शंखादिशब्दस्य स्निग्धत्वादिबहुधर्मान्वितत्वेनाप्याकलनात्। परस्त्वबहुविधं स्निग्धत्वादिस्वल्पधर्मान्वितत्वेनाकलनात् । अन्यस्तु क्षिप्रं, शीघ्रमेव परिच्छेदात् । इतरस्त्वक्षिप्रं चिरविमर्शेनाकलनात् । परस्त्वनिश्रितं, लिङ्गं विना स्वरूपत एव परिच्छेदात् । अपरस्तु निश्रितं लिंगनिश्रयाकलनात् । ( कश्चित्तुनिश्चितं विरुद्धधर्मानालिंगितत्वेनावगते रितरस्त्वनिश्चितं विरुद्धधर्माङ्कितत्तयावगमात् ) अन्यो ध्रुवं, बह्वादिरूपेणावगतस्य सर्वदैव तथाबोधात् । अन्यस्त्वध्रुवं कदाचिद्बह्वादिरूपेण कदाचित्त्वबह्वादिरूपेणावगमात् । इत्युक्ता मतिभेदाः । श्रुतभेदा उच्यन्ते । श्रुतमक्षरसंज्ञिसम्यक्सादिसपर्यवसितगमिकाङ्गप्रविष्टभेदैः सप्रतिपक्षैश्चतुर्दशविधम् । तत्राक्षरं त्रिविधं । संज्ञाव्यञ्जनलब्धिभेदात् । संज्ञाक्षरं बहुविधलिपिभेदं,व्यञ्जनाक्षरं भाष्यमाणमकारादि, एते चोपचाराच्छ्रुते, लब्ध्यक्षरं त्विन्द्रियमनोनिमित्तः श्रुतोपयोगस्तदावरणक्षयोपशमो वा, एतच्च परोपदेशं विनापि नासंभाव्यं, अनाकलितोपदेशानामपि मुग्धानां गवादीनां च शब्दश्रवणे तदाभिमुख्यदर्शनात्, एकेन्द्रियाणामप्य-

व्यक्ताक्षरलाभाच्च । अनक्षरश्रुतमुच्छ्वसितादि, तस्यापि भावश्रुतहेतुत्वात्, ततोऽपि सशोकोऽयमित्यादिज्ञानाविर्भावात् । अथवा श्रुतोपयुक्तस्य सर्वात्मनैवोपयोगात्सर्वस्यैव व्यापारस्य श्रुतरूपत्वेऽप्यत्रैव शास्त्रज्ञलोकप्रसिद्धारूढिः । समनस्कस्य श्रुतं संज्ञिश्रुतं । तद्विपरीतमसंज्ञिश्रुतं । सम्यक्श्रुतमङ्गानङ्गप्रविष्टं, लौकिकं तु मिथ्याश्रुतं, स्वामित्वचिन्तायां तु भजना, सम्यग्दृष्टिपरिगृहीतं मिथ्याश्रुतमपि सम्यक्श्रुतमेवावितथभाषित्वादिना यथास्थानं तदर्थविनियोगात्, विपर्ययान्मिथ्यादृष्टिपरिगृहीतं च सम्यक्श्रुतमपि मिथ्याश्रुतमेवेति । सादि द्रव्यत एकं पुरुषमाश्रित्य, क्षेत्रतश्च भरतैरवते, कालत उत्सर्पिण्यवसर्पिण्यौ भावतश्च तत्तज्ज्ञापकप्रयत्नादिकम् । अनादि द्रव्यतो नानापुरुषानाश्रित्य । क्षेत्रतो महाविदेहान्, कालतो नोउत्सर्पिण्यवसर्पिणीलक्षणं । भावतश्च सामान्यतः क्षयोपशममिति । एवं सपर्यवसितापर्यवसितभेदावपि भाव्यौ । गमिकं सदृशपाठं प्रायो दृष्टिवादगतं । अगमिकमसदृशपाठं प्रायः कालिकश्रुतगतं । अङ्गप्रविष्टं गणधरकृतं अनङ्गप्रविष्टं तु स्थविरकृतमिति । तदेवं सप्रभेदं सांव्यवहारिकं मतिश्रुतलक्षणं प्रत्यक्षं निरूपितम् । स्वोत्पत्तावात्मव्यापारमात्रापेक्षं पारमार्थिकं, तत्त्रिविधं, अवधिमनःपर्ययकेवलभेदात् । सकलरूपिद्रव्यविषयकजातीयमात्ममात्रापेक्षं ज्ञानमवधिज्ञानं, तच्च षोढा, अनुगामिवर्धमानप्रतिपातीतरभेदात् । तत्रोत्पत्तिक्षेत्रादन्यत्राप्यनुवर्तमानमानुगामिकं, भास्करप्रकाशवत्, यथा भास्करप्रकाशः प्राच्यामाविर्भूतः प्रतीचीमनुसरत्यपि तत्रावकाशमुद्योतयति, तथैतदप्येकत्रोत्पन्नमन्यत्र गच्छतोऽपि पुंसो विषयमवभासयतीति । उत्पत्तिक्षेत्र एव विषयावभासकमनानुगामिकं, प्रश्नादेशपुरुषज्ञानवत्, यथा प्रश्नादेशः क्वचिदेव स्थाने संवादयितुं शक्नोति पृच्छ्यमानमर्थं, तथेदमपि अधिकृत एव स्थाने विषयमुद्योतयितुमलमिति । उत्पत्तिक्षेत्रात्क्रमेण विषय-

१ भास्वति ।

व्याप्तिमवगाहमानं वर्धमानं, अधरोत्तरारणिनिर्मथनोत्पन्नोपात्तशुष्कोपचीयमानाधीयमानेन्धनराश्यग्निवत्, यथाऽग्निः प्रयत्नादुपजातः सन् पुनरिन्धनलाभाद्विवृद्धिमुपागच्छत्येवं परमशुभाध्यवसायलाभादिदमपि पूर्वोत्पन्नं वर्धत इति । उत्पत्तिक्षेत्रापेक्षया क्रमेणाल्पीभवद्विषयं हीयमानं, परिच्छिन्नेन्धनोपादानसंतत्यग्निशिखावत्, यथाऽपनीतेन्धनाग्निज्वाला परिहीयते तथेदमपीति । उत्पत्त्यनन्तरं निर्मूलनश्वरं प्रतिपाति, जलतरङ्गवत्, यथा जलतरङ्ग उत्पन्नमात्र एव निर्मूलं विलीयते तथेदमपि । आकेवलप्राप्तेरामरणाद्वाऽवतिष्ठमानमप्रतिपाति वेदवत्, यथा पुरुषवेदादिरापुरुषादिपर्यायं तिष्ठति तथेदमपीति । मनोमात्रसाक्षात्कारिमनःपर्यवज्ञानं, मनःपर्यायानिदं साक्षात्परिच्छेत्तुमलं, बाह्यानर्थान् पुनस्तदन्यथाऽनुपपत्त्याऽनुमानेनैव परिच्छिनत्तीति द्रष्टव्यम् । तद्द्विविधं ऋजुमतिविपुलमतिभेदात् । ऋज्वी सामान्यग्राहिणी मतिर्ऋजुमतिः सामान्यशब्दोऽत्र विपुलमत्यपेक्षयाऽल्पविशेषपरः, अन्यथा सामान्यमात्रग्राहित्वे मनःपर्यायदर्शनप्रसंगात् । विपुला विशेषग्राहिणी मतिर्विपुलमतिः । तत्र ऋजुमत्या घटादिमात्रमनेन चिन्तितमिति ज्ञायते, विपुलमत्या तु पर्यायशतोपेतं तत्परिच्छिद्यत इति । एते च द्वे ज्ञाने विकलविषयत्वाद्विकलप्रत्यक्षे परिभाष्येते । निखिलद्रव्यपर्यायसाक्षात्कारि केवलज्ञानं । अत एवैतत्सकलप्रत्यक्षं, तच्चावरणक्षयस्य हेतोरैक्याद्भेदरहितं, आवरणं चात्र कर्मैव । स्वविषयेऽप्रवृत्तिमतोऽस्मदादिज्ञानस्य सावरणत्वादसर्वविषयत्वे व्याप्तिज्ञानाभावप्रसंगात्, सावरणत्वाभावेऽस्पष्टत्वानुपपत्तेश्च । आवरणस्य च कर्मणो विरोधिना सम्यग्दर्शनादिना विनाशात् सिद्ध्यति कैवल्यम् । योगजधर्मानुगृहीतमनोजन्यमेवेदमस्त्विति केचित्तन्न, धर्मानुगृहीतेनापि मनसा

१ मनःपर्यायं ।

पञ्चेन्द्रियार्थज्ञानवदस्य जनयितुमशक्यत्वात्। कवलभोजिनः कैवल्यं न घटत इति दिक्पटस्तन्न, आहारपर्याप्त्यसातवेदनीयोदयादिप्रसूतया कवलभुक्त्या कैवल्याविरोधात्, घातिकर्मणामेव तद्विरोधित्वात्। दग्धरज्जुस्थानीयात्ततो न तदुत्पत्तिरिति चेन्नन्वेवं तादृशादायुषो भवोपग्रहोऽपि न स्यात्। किं चौदारिकशरीरस्थितिः कथं कवलभुक्तिं विना भगवतः स्यात्। अनन्तवीर्यत्वेन तां विना तदुपपत्तौ छद्मस्थावस्थायामप्यपरिमितबलवत्त्वश्रवणाद्भुक्त्यभावः स्यादित्यन्यत्र विस्तरः। उक्तं प्रत्यक्षम्। अथ परोक्षमुच्यते—अस्पष्टं परोक्षम्। तच्च स्मरणप्रत्यभिज्ञानतर्कानुमानागमभेदतः पञ्चप्रकारम्। अनुभवमात्रजन्यं ज्ञानं स्मरणं, यथा तत्तीर्थकरबिंबम्। न चेदमप्रमाणं, प्रत्यक्षादिवदविसंवादकत्वात्। अतीततत्तांशे वर्तमानत्वविषयत्वादप्रमाणमिदमिति चेन्न, सर्वत्र विशेषणे विशेष्यकालभानानियमात्। अनुभवप्रमात्वपारतंत्र्यादत्राप्रमात्वमिति चेन्न, अनुमितेरपि व्याप्तिज्ञानादिप्रमात्वपारतंत्र्येणाप्रमात्वप्रसंगात्। अनुमितेरुत्पत्तौ परापेक्षा विषयपरिच्छेदे तु स्वातंत्र्यमिति चेन्न, स्मृतेरप्युत्पत्तावेवानुभवसव्यपेक्षत्वात्, स्वविषयपरिच्छेदे तु स्वातंत्र्यात्। अनुभवविषयीकृतभावावभासिन्याः स्मृतेर्विषयपरिच्छेदेऽपि न स्वातंत्र्यमिति चेत्तर्हि व्याप्तिज्ञानादिविषयीकृतानर्थान् परिच्छिन्दन्त्या अनुमितेरपि प्रामाण्यं दूरत एव। नैयत्येनाभातएवार्थोऽनुमित्या विषयीक्रियते इति चेत्तर्हि तत्तयाभात एवार्थः स्मृत्या विषयीक्रियत इति तुल्यमिति न किञ्चिदेतत्। अनुभवस्मृतिहेतुकं तिर्यगूर्ध्वतासामान्यादिगोचरं संकलनात्मकं ज्ञानं प्रत्यभिज्ञानम्। यथा तज्जातीय एवायं गोपिण्डः, गोसदृशो गवयः, स एवायं जिनदत्तः, स एवानेनार्थः कथ्यते, गोविलक्षणो महिषः, इदं तस्माद्दूरं, इदं तस्मात्समीपं, इदं तस्मात्प्रांशु ह्रस्वं वेत्यादि। तत्तेदंतारूपस्पष्टाकारभेदान्नैकं प्रत्यभिज्ञानस्वरूपमस्तीति शाक्यः, तन्न, आ-

कारभेदेऽपि चित्रज्ञानवदेकस्य तस्यानुभूयमानत्वात्, स्वसामग्रीप्रभवस्यास्य वस्तुतोऽस्पष्टैकरूपत्वाच्च । इदंतोल्लेखस्य प्रत्यभिज्ञानिबन्धनत्वात् । विषयाभावान्नेदमस्तीति चेन्न, पूर्वापरविवर्तवर्त्येकद्रव्यस्य विशिष्टस्यैतद्विषयत्वात् । अत एवागृहीतासंसर्गकमनुभवस्मृतिरूपं ज्ञानद्वयमेवैतदिति निरस्तं । इत्थं सति विशिष्टज्ञानमात्रोच्छेदापत्तेः । तथा प्रत्यक्षान्वयव्यतिरेकानुविधायित्वात् प्रत्यक्षरूपमेवेदं युक्तमिति केचित्, तन्न, साक्षादक्षान्वयव्यतिरेकानुविधायित्वस्यासिद्धेः । प्रत्यभिज्ञानस्य साक्षात्प्रत्यक्षस्मरणान्वयव्यतिरेकानुविधायित्वेनानुभूयमानत्वात् । अन्यथा प्रथमव्यक्तिदर्शनकालेऽप्युत्पत्तिप्रसंगात् । अथ पुनर्दर्शने पूर्वदर्शनाहितसंस्कारप्रबोधोत्पन्नस्मृतिसहायमिन्द्रियं प्रत्यभिज्ञानमुत्पादयतीत्युच्यते, तदनुचितं, प्रत्यक्षस्य स्मृतिनिरपेक्षत्वात् । अन्यथा पर्वते वह्निज्ञानस्यापि व्याप्तिस्मरणादिसापेक्षमनसैवोपपत्तौ अनुमानस्याप्युच्छेदप्रसंगात् । किं च प्रत्यभिजानामीति विलक्षणप्रतीतेरप्यतिरिक्तमेतत् । एतेन विशेष्येन्द्रियसन्निकर्षसत्त्वाद्विशेषणज्ञाने सति विशिष्टप्रत्यक्षरूपमेतदुपपद्यत इति निरस्तम् । एतत्सदृशः स इत्यादौ तदभावात्, स्मृत्यनुभवसंकलनक्रमस्यानुभविकत्वाच्चेति दिक् । अत्राह भाट्टः-नन्वेकत्वज्ञानं प्रत्यभिज्ञानमस्तु, सादृश्यज्ञानं तूपमानमेव । गवये दृष्टे गवि च स्मृते सति सादृश्यज्ञानस्योपमानत्वात् । तदुक्तम्-"तस्माद्यत्स्मर्यते तत्स्यात् सादृश्येन विशेषितम् । प्रमेयमुपमानस्य सादृश्यं वा तदन्वितम् ॥१॥ प्रत्यक्षेणावबुद्धेऽपि सादृश्ये गवि च स्मृते । विशिष्टस्यान्यतोऽसिद्धेरुपमानप्रमाणता ॥२॥" इति, तन्न, दृष्टस्य सादृश्यविशिष्टपिंडस्य, स्मृतस्य च गोः, संकलनात्मकस्य गोसदृशो गवय इति ज्ञानस्य, प्रत्यभिज्ञानताऽनतिक्रमात् । अन्यथा गोविसदृशो महिष इत्यादेरपि सादृश्याविषयत्वेनोपमानातिरेके प्रमाणसंख्याव्याघातप्रसंगात् । एतेन गोसदृशो गवय इत्यतिदेशवाक्या-

र्थज्ञानकरणकसादृश्यविशिष्टपिण्डदर्शनव्यापारकं अयं गवयशब्दवाच्य इति संज्ञासंज्ञिसंबन्धप्रतिपत्तिरूपमुपमानमिति नैया-
यिकमतमप्यपहस्तितं भवति । अनुभूतव्यक्तौ गवयपदवाच्यत्वसंकलनात्मकस्यास्य प्रत्यभिज्ञानत्वानतिक्रमात्प्रत्यभिज्ञानाव-
रणकर्मक्षयोपशमविशेषेण यद्धर्मावच्छेदेनातिदेशवाक्यानूद्यधर्मदर्शनं तद्धर्मावच्छेदेनैव पदवाच्यत्वपरिच्छेदोपपत्तेः । अत एव
पयोऽम्बुभेदी हंसः स्यादित्यादिवाक्यार्थज्ञानवतां पयोऽम्बुभेदित्वादिविशिष्टव्यक्तिदर्शने सत्ययं हंसपदवाच्य इत्यादिप्रती-
तिर्जायमानोपपद्यते । यदि चायं गवयपदवाच्य इति प्रतीत्यर्थं प्रत्यभिज्ञातिरिक्तं प्रमाणमाश्रीयते तदामलकादिदर्शनाहि-
तसंस्कारस्य बिल्वादिदर्शनात् अतस्तत्सूक्ष्ममित्यादिप्रतीत्यर्थं प्रमाणान्तरमन्वेषणीयं स्यात्, मानसत्वे चासामुपमानस्यापि
मानसत्वप्रसंगात्, प्रत्यभिजानामीतिप्रतीत्या प्रत्यभिज्ञानत्वमेवाभ्युपेयमितिदिक् । सकलदेशकालाद्यवच्छेदेन साध्यसाधनभा-
वादिविषय ऊहस्तर्कः । यथा यावान् कश्चिद्धूमः स सर्वो वह्नौ सत्येव भवति, वह्निं विना वा न भवति । घटशब्दमात्रं
घटस्य वाचकं, घटमात्रं घटशब्दवाच्यमित्यादि । तथाहि स्वरूपप्रयुक्तव्यभिचारलक्षणायां व्याप्तौ भूयोदर्शनसहितान्वय-
व्यतिरेकसहकारेणापि प्रत्यक्षस्य तावदविषयत्वादेवाप्रवृत्तिः, सुतरां च सकलसाध्यसाधनव्यक्त्युपसंहारेण तद्ग्रह इति सा-
ध्यसाधनदर्शनस्मरणप्रत्यभिज्ञानोपजनितस्तर्क एव तत्प्रतीतिमाधातुमलम् । अथ स्वव्यापकसाध्यसामानाधिकरण्यलक्षणाया
व्याप्तेर्योग्यत्वाद्भूयोदर्शनव्यभिचारादर्शनसहकृतेनेन्द्रियेण व्याप्तिग्रहोऽस्तु । सकलसाध्यसाधनव्यक्त्युपसंहारस्यापि सामा-
न्यलक्षणप्रत्यासत्त्यासंभवादिति चेन्न, तर्कयामीत्यनुभवसिद्धेन तर्केणैव सकलसाध्यसाधनव्यक्त्युपसंहारेण व्याप्तिग्रहोप-
पत्तौ सामान्यलक्षणप्रत्यासत्तिकल्पने प्रमाणाभावात्, ऊहं विना ज्ञातेन सामान्येनापि सकलव्यक्त्यनुपस्थितेश्च । वाच्य-

वाचकभावोऽपि तर्केणैवावगम्यते, तस्यैव सकलशब्दार्थगोचरत्वात्। प्रयोजकवृद्धोक्तं श्रुत्वा प्रवर्तमानस्य प्रयोज्यवृद्धस्य चेष्टामवलोक्य तत्कारणज्ञानजनकतां शब्देऽवधारयतोऽन्त्यावयवश्रवणपूर्वावयवस्मरणोपजनितवर्णपदवाक्यविषयसंकल-नात्मकप्रत्यभिज्ञानवत्, आवापोद्वापाभ्यां सकलव्यक्त्युपसंहारेण च वाच्यवाचकभावप्रतीतिदर्शनादिति। अयं च तर्कः संबन्धप्रतीत्यन्तरनिरपेक्ष एव, स योग्यतासामर्थ्यात्संबन्धप्रतीतिं जनयतीति नानवस्था। प्रत्यक्षपृष्ठभाविविकल्परूपत्वान्नायं प्रमाणमिति बौद्धाः, तन्न, प्रत्यक्षपृष्ठभाविनो विकल्पस्यापि प्रत्यक्षगृहीतमात्राध्यवसायित्वेन सर्वोपसंहारेण व्याप्तिग्राहक-त्वाभावात्तादृशस्य सामान्यविषयस्याप्यनुमानवत्प्रमाणत्वात्। अवस्तुनिर्भासेऽपि परंपरया पदार्थप्रतिबन्धेन भवतां व्यवहा-रतः प्रामाण्यप्रसिद्धेः। यस्त्वग्निधूमव्यतिरिक्तदेशे प्रथमं धूमस्यानुपलम्भ एकस्तदनन्तरमग्नेरुपलम्भस्ततो धूमस्येत्युपलम्भद्वयं, पश्चादग्नेरनुपलम्भोऽनन्तरं धूमस्याप्यनुपलम्भ इति द्वावनुपलम्भाविति प्रत्यक्षानुपलम्भपञ्चकाद्व्याप्तिग्रह इत्येतेषां सिद्धान्तः। तदुक्तम्–'धूमाधीर्वह्निविज्ञानं धूमज्ञानमधीस्तयोः। प्रत्यक्षानुपलम्भाभ्यामिति पञ्चभिरन्वयः॥ १ ॥' इति। स तु मिथ्या उपलम्भानुपलम्भस्वभावस्य द्विविधस्यापि प्रत्यक्षस्य सन्निहितमात्रविषयतयाऽविचारकतया च देशादिव्यवहितसमस्तपदार्थ गोचरत्वायोगात्। यत्तु व्याप्यस्याहार्यारोपेण व्यापकस्याहार्यप्रसञ्जनं तर्कः, स च विशेषदर्शनवद्विरोधिशंकाकालीनप्रमा-णमात्रसहकारी विरोधिशंकानिवर्तकत्वेन तदनुकूल एव वा। न चायं स्वतः प्रमाणमिति नैयायिकैरिष्यते, तन्न व्याप्तिग्र-हरूपस्य तर्कस्य स्वपरव्यवसायित्वेन स्वतः प्रमाणत्वात्पराभिमततर्कस्यापि क्वचिदेतद्विचारांगतया विपर्ययपर्यवसायिन आहार्यशंकाविघटकतया स्वातंत्र्येण शंकामात्रविघटकतया चोपयोगात्। इत्थं चाज्ञाननिवर्तकत्वेन तर्कस्य प्रामाण्यं धर्म-

भूषणोक्तं। तत्र सत्येव मिथ्याज्ञाने व्यवच्छेद्ये संगच्छते ज्ञानरूपे। ज्ञानाभावनिवृत्तिस्त्वर्थज्ञानताव्यवहारनिबन्धनस्वव्यवसितिपर्यवसितैव सामान्यतः फलमिति द्रष्टव्यम्। साधनात्साध्यविज्ञानमनुमानं। तद्विविधं स्वार्थं परार्थं च। तत्र हेतुग्रहणसंबन्धस्मरणकारणकं साध्यविज्ञानं स्वार्थं। यथा गृहीतधूमस्य स्मृतव्याप्तिकस्य पर्वतो वह्निमानिति ज्ञानम्। अत्र हेतुग्रहणसंबन्धस्मरणयोः समुदितयोरेव कारणत्वमवसेयम्। अन्यथा विस्मृताप्रतिपन्नसंबन्धस्यागृहीतलिङ्गकस्य च कस्यचिदनुमानोत्पादप्रसंगात्। निश्चितान्यथानुपपत्त्येकलक्षणो हेतुः न तु त्रिलक्षणकादिः। तथाहि--त्रिलक्षण एव हेतुरिति बौद्धाः। पक्षधर्मत्वाभावेऽसिद्धत्वव्यवच्छेदस्य। सपक्ष एव सत्त्वाभावे च विरुद्धत्वव्युदासस्य। विपक्षेऽसत्त्वनियमाभावे चानैकान्तिकत्वनिषेधस्यासंभवेनानुमित्यप्रतिरोधानुपपत्तेरिति, तन्न, पक्षधर्मत्वाभावेऽप्युदेष्यति शकटं कृत्तिकोदयादुपरि सविता भूमेरालोकवत्त्वादस्ति नभश्चन्द्रो जलचन्द्रादित्याद्यनुमानदर्शनात्। न चात्रापि कालाकाशादिकं भविष्यच्छकटोदयादिमत् कृत्तिकोदयादिमत्त्वादित्येवं पक्षधर्मत्वोपपत्तिरिति वाच्यम्। अननुभूयमानधर्मिविषयत्वेनेत्थं पक्षधर्मत्वोपपादने जगद्धर्म्यपेक्षया काककार्ष्ण्येन प्रासादधावल्यस्यापि साधनोपपत्तेः। ननु यद्येवं पक्षधर्मतानुमितौ नाङ्गं, तदा कथं तत्र पक्षभाननियम इति चेत्, क्वचिदन्यथाऽनुपपत्त्यवच्छेदकतया ग्रहणात् पक्षभानं, यथा नभश्चन्द्रास्तित्वं विना जलचन्द्रोऽनुपपन्न इत्यत्र। क्वचिच्च हेतुग्रहणाधिकरणतया यथा पर्वतो वह्निमान् धूमवत्त्वादित्यत्र धूमस्य पर्वते ग्रहणाद्वह्नेरपि तत्र भानमिति। व्याप्तिग्रहवेलायां तु पर्वतस्य सर्वत्रानुवृत्त्यभावेन न ग्रह इति। यत्त्वन्तर्व्याप्त्या पक्षीयसाधनसंबन्धग्रहात् पक्षसाध्यसंसर्गभानं। तदुक्तं

१ स्याद्वादरत्नाकरसूत्रे.

पक्षीकृत एव विषये साधनस्य साध्येन व्याप्तिरन्तर्व्याप्तिः । अन्यत्र तु बहिर्व्याप्तिरिति" । तत्रान्तर्व्याप्त्या हेतोः साध्यप्रत्यायनशक्तौ सत्यां बहिर्व्याप्तेरुद्भावनव्यर्थत्वप्रतिपादनेन तस्याः स्वरूपप्रयुक्तव्यभिचारलक्षणत्वस्य, बहिर्व्याप्तेश्च सहचारमात्रत्वस्य लाभात्। सार्वत्रिक्या व्याप्तेर्विषयभेदस्य दुर्वचत्वात्, न चेदेवं तदान्तर्व्याप्तिग्रहकाल एव च पक्षसाध्यसंसर्गभानादनुमानवैफल्यापत्तिर्विना पर्वतो वह्निमानित्युद्देश्यप्रतीतिमिति यथातंत्रं भावनीयं सुधीभिः । इत्थं च पक्वान्येतानि सहकारफलान्येकशाखाप्रभवत्वादुपयुक्तसहकारफलवदित्यादौ बाधितविषये, मूर्खोऽयं देवदत्तस्तत्पुत्रत्वादितरतत्पुत्रवदित्यादौ सत्प्रतिपक्षे चातिप्रसंगवारणायाबाधितविषयत्वासत्प्रतिपक्षत्वसहितं प्रागुक्तरूपत्रयमादाय पांचरूप्यं हेतुलक्षणमिति नैयायिकमतमप्यपास्तम् । उदेष्यति शकटमित्यादौ पक्षधर्मत्वस्यैवासिद्धेः, स श्यामस्तत्पुत्रत्वादित्यत्र हेत्वाभासेऽपि पांचरूप्यसत्त्वाच्च । निश्चितान्यथानुपपत्तेरेव सर्वत्र हेतुलक्षणत्वौचित्यात् । ननु हेतुना साध्यमनुमातव्यं, तत्र किं लक्षणं ? साध्यमिति चेदुच्यते, अप्रतीतमनिराकृतमभीप्सितं च साध्यम् । शंकितविपरीतानध्यवसितवस्तूनां साध्यताप्रतिपत्त्यर्थमप्रतीतमिति विशेषणम् । प्रत्यक्षादिविरुद्धस्य साध्यत्वं मा प्रसांक्षीदित्यनिराकृतग्रहणम् । अनभिमतस्यासाध्यत्वप्रतिपत्तयेऽभीप्सितग्रहणम् । कथायां शंकितस्यैव साध्यस्य साधनं युक्तमिति कश्चित्। तन्न । विपर्यस्ताव्युत्पन्नयोरपि परपक्षदिदृक्षादिना कथायामुपसर्पणसंभवेन संशयनिरासार्थमिव विपर्ययानध्यवसायनिरासार्थमपि प्रयोगसंभवात्। पित्रादेर्विपर्यस्ताव्युत्पन्नपुत्रादिशिक्षाप्रदानदर्शनाच्च । न चेदेवं जिगीषुकथायामनुमानप्रयोग एव न स्यात्तस्य साभिमानत्वेन विपर्यस्तत्वात्। अनिराकृतमिति विशेषणं वादिप्रतिवाद्युभयापेक्षया, द्वयोः प्रमाणेनाबाधितस्य कथायां साध्यत्वात् । अनीप्सितमिति तु वाद्यपेक्षयैव।

वक्तुरेव स्वाभिप्रेतार्थप्रतिपादनायेच्छासंभवात् । ततश्च परार्थाश्चक्षुरादय इत्यादौ पारार्थ्यमात्राभिधानेऽप्यात्मार्थत्वमेव साध्यं सिध्यति । अन्यथा संहतपरार्थत्वेन बौद्धैश्चक्षुरादीनामभ्युपगमादित्यनन्वयादिदोषदुष्टमेतत्सांख्यसाधनमिति वदन्ति । स्वार्थानुमानावसरेऽपि परार्थानुमानोपयोग्यभिधानं, परार्थस्य स्वार्थपुरःसरत्वेनानतिभेदज्ञापनार्थम् । व्याप्तिग्रहसमयापेक्षया साध्यं धर्म एवान्यथा तदनुपपत्तेरानुमानिकप्रतिपत्त्यवसरापेक्षया तु पक्षापरपर्यायस्तद्विशिष्टः प्रसिद्धो धर्मी । इत्थं च स्वार्थानुमानस्य त्रीण्यंगानि धर्मी साध्यं साधनं च । तत्र साधनं गमकत्वेनांगं, साध्यं तु गम्यत्वेन, धर्मी पुनः साध्यधर्माधारत्वेनाधारविशेषनिष्ठतया साध्यसिद्धेरनुमानप्रयोजनत्वात् । अथवा पक्षो हेतुरित्यङ्गद्वयं स्वार्थानुमाने, साध्यधर्मविशिष्टस्य धर्मिणः पक्षत्वादिति धर्मधर्मिभेदाभेदविवक्षया पक्षद्वयं द्रष्टव्यम् । धर्मिणः प्रसिद्धिश्च क्वचित्प्रमाणात् क्वचिद्विकल्पात् क्वचित्प्रमाणविकल्पाभ्याम् । तत्र निश्चितप्रामाण्यकप्रत्यक्षाद्यन्यतमावधृतत्वं प्रमाणप्रसिद्धत्वम् । अनिश्चितप्रामाण्याप्रामाण्यप्रत्ययगोचरत्वं विकल्पप्रसिद्धत्वम् । तद्द्वयविषयत्वं प्रमाणविकल्पप्रसिद्धत्वम् । तत्र प्रमाणसिद्धो धर्मी यथा धूमवत्त्वादग्निमत्त्वे साध्ये पर्वतः, स खलु प्रत्यक्षेणानुभूयते । विकल्पसिद्धो धर्मी यथा सर्वज्ञोऽस्ति सुनिश्चितासंभवद्बाधकप्रमाणत्वादित्यस्तित्वे साध्ये सर्वज्ञः, अथवा खरविषाणं नास्तीति नास्तित्वे साध्ये खरविषाणं, अत्र हि सर्वज्ञखरविषाणे अस्तित्वनास्तित्वसिद्धिभ्यां प्राग्विकल्पसिद्धे । उभयसिद्धो धर्मी यथा शब्दः परिणामी कृतकत्वादित्यत्र शब्दः, स हि वर्तमान प्रत्यक्षगम्यः, भूतो भविष्यंश्च विकल्पगम्यः, स सर्वोऽपि धर्मीति प्रमाणविकल्पसिद्धो धर्मी । प्रमाणोभयसिद्धयोर्धर्मिणोः साध्ये कामचारः । विकल्पसिद्धे तु धर्मिणि सत्तासत्तयोरेव साध्यमिति नियमः । तदुक्तम्—"विकल्पसिद्धे तस्मिन् सत्तेतरसाध्ये"

इति । अत्र बौद्धः सत्तामात्रस्यानभीप्सितत्वाद्विशिष्टसत्तासाधने चानन्वयाद्विकल्पासिद्धे धर्मिणि न सत्ता साध्येत्याह । तदसत्, इत्थं सति प्रकृतानुमानस्यापि भङ्गप्रसंगात्, वह्निमात्रस्यानभीप्सितत्वाद्विशिष्टवह्नेश्चानन्वयादिति । अथ तत्र सत्तायां साध्यायां तद्धेतुर्भावधर्मो भावाभावधर्मोऽभावधर्मो वा स्यात् । आद्येऽसिद्धिरसिद्धसत्ताके भावधर्मासिद्धेः । द्वितीये व्यभिचारः, अस्तित्वाभाववत्यपि वृत्तेः । तृतीये च विरोधो, भावधर्मस्य भावे क्वचिदप्यसंभवात् । तदुक्तं—"नासिद्धे भावधर्मोऽस्ति व्यभिचार्युभयाश्रयः । धर्मो विरुद्धो भावस्य सा सत्ता साध्यते कथम् ॥१॥" इति चेन्न, इत्थं वह्निमद्धर्मत्वादिविकल्पैर्धूमेन वह्न्यनुमानस्याप्युच्छेदापत्तेः । विकल्पस्याप्रमाणत्वाद्विकल्पसिद्धो धर्मी नास्त्येवेति नैयायिकः, तस्येत्थंवचनस्यैवानुपपत्तेस्तूष्णींभावापत्तिर्विकल्पसिद्धधर्मिणोऽप्रसिद्धौ तत्प्रतिषेधानुपपत्तेरिति । इदं त्ववधेयं, विकल्पसिद्धस्य धर्मिणो नाखंडस्यैव भानमसत्ख्यातिप्रसंगादिति, शब्दादेर्विशिष्टस्य तस्य भानाभ्युपगमे विशेषणस्य संशयेऽभावनिश्चये वा विशिष्टवैशिष्ट्यभानानुपपत्तेः, विशेषणाद्यंशे आहार्यारोपरूपा विकल्पादिकैवानुमितिः स्वीकर्तव्या । देशकालसत्तालक्षणस्यास्तित्वस्य, सकलदेशकालसत्ताभावलक्षणस्य च नास्तित्वस्य साधनेन, परपरिकल्पितविपरीतारोपव्यवच्छेदमात्रस्य फलत्वात् । वस्तुतस्तु खंडशः प्रसिद्धपदार्थोऽस्तित्वनास्तित्वसाधनमेवोचितम् । अत एव "असतो नत्थि णिसेहो" इत्यादिभाष्यग्रन्थे खरविषाणं नास्तीत्यत्र खरे विषाणं नास्तीत्येवार्थ उपपादितः । एकान्तनित्यमर्थक्रियासमर्थं न भवति क्रमयौगपद्याभावादित्यत्रापि विशेषावमर्शदशायां क्रमयौगपद्यनिरूपकत्वाभावेनार्थक्रियानियामकत्वाभावो नित्यत्वादौ सुसाध्य इति सम्यग्निभालनीयं स्वपरसमयदत्तदृष्टिभिः । परार्थं पक्षहेतुवचनात्मकमनुमानमुपचारात्तेन श्रोतुरनुमानेनार्थबोधनात् । पक्षस्य विवादादेव

गम्यमानत्वादप्रयोगइति सौगतः, तन्न, यत्किञ्चिद्वचनव्यवहितात् ततो व्युत्पन्नमतेः पक्षप्रतीतावप्यव्युत्पन्नान् प्रत्यवश्यनिर्देश्यत्वात् । प्रकृतानुमानवाक्यावयवान्तरैकवाक्यतापन्नात्ततोऽवगम्यमानस्य पक्षस्याप्रयोगस्य चेष्टत्वात् । अवश्यं चाभ्युपगन्तव्यं हेतोः प्रतिनियतधर्मिधर्मताप्रतिपत्त्यर्थमुपसंहारवचनवत्साध्यस्यापि तदर्थं पक्षवचनं ताथागतेनापि,अन्यथा समर्थनोपन्यासादेव गम्यमानस्य हेतोरप्यनुपन्यासप्रसंगात्, मन्दमतिप्रतिपत्त्यर्थस्य चोभयत्राविशेषादिति । किं च प्रतिज्ञायाः प्रयोगानर्हत्वे शास्त्रादावप्यसौ न प्रयुज्येत, दृश्यते च प्रयुज्यमानेयं शाक्यशास्त्रेऽपि, परानुग्रहार्थं शास्त्रे तत्प्रयोगश्च वादेऽपि तुल्यः । विजिगीषूणामपि मन्दमतीनामर्थप्रतिपत्तेस्तत एवोपपत्तेरिति । आगमात्परेणैव ज्ञातस्य वचनं परार्थानुमानं, यथा बुद्धिरचेतना उत्पत्तिमत्वात् घटवदिति सांख्यानुमानं । अत्र हि बुद्धावुत्पत्तिमत्त्वं सांख्येनैवाभ्युपगम्यते इति, तदेतदपेशलं, वादिप्रतिवादिनोरागमप्रामाण्यविप्रतिपत्तेः । अन्यथा तत एव साध्यसिद्धिप्रसंगात् । परीक्षापूर्वमागमाभ्युपगमेऽपि परीक्षाकाले तद्बाधात् । नन्वेवं भवद्भिरपि कथमापाद्यते परं प्रति, यत्सर्वथैकं तन्नानेकत्र संबध्यते, तथा च सामान्यमिति, सत्यम्, एकधर्मोपगते धर्मान्तरसंदर्शनमात्रतत्परत्वेनैतदापादनस्य वस्तुनिश्चायकत्वाभावात्, प्रसंगविपर्ययरूपस्य मौलहेतोरेव तन्निश्चायकत्वात्, अनेकवृत्तित्वव्यापकानेकत्वनिवृत्त्यैव तन्निवृत्तेर्मौलहेतुपरिकरत्वेन प्रसंगोपन्यासस्यापि न्याय्यत्वात् । बुद्धिरचेतनेत्यादौ च प्रसंगविपर्ययहेतोर्व्याप्तिसिद्धिनिबन्धनस्य विरुद्धधर्माध्यासस्य विपक्षबाधकप्रमाणस्यानुपस्थापनात् प्रसंगस्याप्यन्याय्यत्वमिति वदन्ति । हेतुः साध्योपपत्त्यन्यथानुपपत्तिभ्यां द्विधा प्रयोक्तव्यो, यथा पर्वतो वह्निमान्, सत्येव वह्नौ धूमोपपत्तेः असत्यनुपपत्तेर्वा । अनयोरन्यतरप्रयोगेणैव साध्यप्रतिपत्तौ द्वितीयप्रयोगस्यैकत्रानुपयोगः । पक्ष-

हेतुवचनलक्षणमवयवद्वयमेव च परप्रतिपत्त्यङ्गं, न दृष्टान्तादिवचनं, पक्षहेतुवचनादेव परप्रतिपत्तेः, प्रतिबन्धस्य तर्कत एव निर्णयात्तत्स्मरणस्यापि पक्षहेतुदर्शनेनैव सिद्धेरसमर्थितस्य दृष्टान्तादेः प्रतिपत्त्यनङ्गत्वात्तत्समर्थनेनैवान्यथासिद्धेश्च। समर्थनं हि हेतोरसिद्धत्वादिदोषान्निराकृत्य स्वसाध्येनाविनाभावसाधनं, तत एव च परप्रतीत्युपपत्तौ किमपरप्रयासेनेति। मन्दमतींस्तु व्युत्पादयितुं दृष्टान्तादिप्रयोगोऽप्युपयुज्यते, तथाहि–यः खलु क्षयोपशमविशेषादेव निर्णीतपक्षो दृष्टान्तस्मार्यप्रतिबन्धग्राहकप्रमाणस्मरणनिपुणोऽपरावयवाभ्यूहनसमर्थश्च भवति, तं प्रति हेतुरेव प्रयोज्यः। यस्य तु नाद्यापि पक्षनिर्णयस्तं प्रति पक्षोऽपि। यस्तु प्रतिबन्धग्राहिणः प्रमाणस्य न स्मरति, तं प्रति दृष्टान्तोऽपि। यस्तु दार्ष्टान्तिके हेतुं योजयितुं न जानीते, तं प्रत्युपनयोऽपि। एवमपि साकाङ्क्षं प्रति च निगमनं। पक्षादिस्वरूपविप्रतिपत्तिमन्तं प्रति च पक्षशुद्ध्यादिकमपीति सोऽयं दशावयवो हेतुः पर्यवस्यति। स चायं द्विविधो, विधिरूपः प्रतिषेधरूपश्च। तत्र विधिरूपो द्विविधः, विधिसाधकः प्रतिषेधसाधकश्च। तत्राद्यः षोढा, तद्यथा–कश्चिद्व्याप्य एव, यथा शब्दो नित्यः प्रयत्नानान्तरीयकत्वादिति, यद्यपि व्याप्यो हेतुः सर्व एव, तथापि कार्याद्यनात्मव्याप्यस्यात्र ग्रहणाद्भेदः, वृक्षः शिंशपाया इत्यादेरप्यत्रैवान्तर्भावः। कश्चित्कार्यरूपः, यथा पर्वतोऽयमग्निमान् धूमवत्त्वान्यथानुपपत्तेरित्यत्र धूमः, धूमो ह्यग्नेः कार्यभूतः, तदभावेऽनुपपद्यमानोऽग्निं गमयति। कश्चित्कारणरूपः, यथा वृष्टिर्भविष्यति, विशिष्टमेघान्यथानुपपत्तेरित्यत्र मेघविशेषः, स हि वर्षस्य कारणं स्वकार्यभूतं वर्षं गमयति। ननु कार्याभावेऽपि संभवत्कारणं न कार्यानुमापकं, अत एव न वह्निर्धूमं गमयतीति चेत्सत्यं, यस्मिन्सामर्थ्याप्रतिबन्धः कारणान्तरसाकल्यं च निश्चेतुं शक्यते, तस्यैव कारणस्य कार्यानुमापकत्वात्। कश्चित् पूर्वचरः, यथा

उदेष्यति शकटं कृत्तिकोदयान्यथानुपपत्तेरित्यत्र कृत्तिकोदयानन्तरं मुहूर्तान्ते नियमेन शकटोदयो जायत इति कृत्तिकोदयः पूर्वचरो हेतुः शकटोदयं गमयति । कश्चिदुत्तरचरो यथोदगाद्भरणिः प्राक् कृत्तिकोदयादित्यत्र कृत्तिकोदयः, कृत्तिकोदयो हि भरण्युदयोत्तरचरस्तं गमयतीति कालव्यवधानेनानयोः कार्यकारणाभ्यां भेदः । कश्चित् सहचरः, यथा मातुलिंगं रूपवद्भवितुमर्हति रसवत्तान्यथानुपपत्तेरित्यत्र रसः, रसो हि नियमेन रूपसहचरितः, तदभावेऽनुपपद्यमानस्तद्गमयति, परस्परस्वरूपपरित्यागोपलंभपौर्वापर्याभावाभ्यां स्वभावकारणेभ्योऽस्य भेदः । एतेषूदाहरणेषु भावरूपानेवाग्न्यादीन् साधयन्ति धूमादयो हेतवो भावरूपा एवेति विधिसाधकविधिरूपास्त एवाविरुद्धोपलब्धय इत्युच्यन्ते । द्वितीयस्तु निषेधसाधको विरुद्धोपलब्धिनामा, स च [1]स्वभावविरुद्धतद्व्याप्याद्युपलब्धिभेदात् सप्तधा । यथा नास्त्येव सर्वथा एकान्तः, अनेकान्तस्योपलंभात् १। नास्त्यस्य तत्त्वनिश्चयः, तत्र सन्देहात् २। नास्त्यस्य क्रोधोपशान्तिः, वदनविकारादेः ३। नास्त्यस्यासत्यं वचः, रागाद्यकलंकितज्ञानकलितत्वात् ४। नोद्गमिष्यति मुहूर्तान्ते पुष्यतारा, रोहिण्युद्गमात् ५। नोदगान्मुहूर्तात्पूर्वं मृगशिरः, पूर्वफाल्गुन्युदयात् ६। नास्त्यस्य मिथ्याज्ञानं, सम्यग्दर्शनादिति ७। अत्रानेकान्तः प्रतिषेध्यस्यैकान्तस्य स्वभावतो विरुद्धः १। तत्त्वसन्देहश्च प्रतिषेध्यतत्त्वनिश्चयविरुद्धतदनिश्चयव्याप्यः २। वदनविकारादिश्च क्रोधोपशमविरुद्धतदनुपशमकार्यम् ३। रागाद्यकलंकितज्ञानकलितत्वं चासत्यविरुद्धसत्यकारणम् ४। रोहिण्युद्गमश्च पुष्पतारोद्गमविरुद्धमृगशीर्षोदयपूर्वचरः ५। पूर्वफाल्गुन्युदयश्च मृगशीर्षोदयविरुद्धमघोदयोत्तरचरः ६। सम्यग्दर्शनं च मिथ्याज्ञानविरुद्धसम्यग्ज्ञानसह-

१ विरुद्धस्वभावव्यापककार्यकारणपूर्वचरोत्तरचरसहचरोपलंभभेदात्सप्तधा ।

चरमिति ७। प्रतिषेधरूपोऽपि हेतुर्द्विविधः, विधिसाधकः प्रतिषेधसाधकश्चेति। आद्यो विरुद्धानुपलब्धिनामा विधेयविरुद्ध-कार्यकारणस्वभावव्यापकसहचरानुपलम्भभेदात्पञ्चधा। यथा अस्त्यत्र रोगातिशयः, नीरोगव्यापारानुपलब्धेः १। विद्यतेऽत्र कष्टं, इष्टसंयोगाभावात् २। वस्तुजातमनेकान्तात्मकं, एकान्तस्वभावानुपलम्भात् ३। अस्त्यत्र छाया, औष्ण्यानुपलब्धेः ४। अस्त्यस्य मिथ्याज्ञानं, सम्यग्दर्शनानुपलब्धेरिति ५। द्वितीयोऽविरुद्धानुपलब्धिनामा प्रतिषेध्याविरुद्धस्वभावव्यापककार्य-कारणपूर्वचरोत्तरचरसहचरानुपलब्धिभेदात् सप्तधा। यथा नास्त्यत्र भूतले कुंभः, उपलब्धिलक्षणप्राप्तस्य तत्स्वभावस्या-नुपलम्भात् १। नास्त्यत्र पनसः, पादपानुपलब्धेः २। नास्त्यत्राप्रतिहतशक्तिकं बीजं, अंकुरानवलोकनात् ३। न सन्त्यस्य प्रशमप्रभृतयो भावाः, तत्त्वार्थश्रद्धानाभावात् ४। नोद्गमिष्यति मुहूर्तान्ते स्वातिः, चित्रोदयादर्शनात् ५। नोदगमत्पूर्वभा-द्रपदा मुहूर्तात्पूर्वमुत्तरभाद्रपदोद्गमानवगमात् ६। नास्त्यत्र सम्यग्ज्ञानं, सम्यग्दर्शनानुपलब्धेरिति ७। सोऽयमनेकविधोऽ-न्यथानुपपत्त्येकलक्षणो हेतुरुक्तोऽतोऽन्यो हेत्वाभासः, स त्रेधा, असिद्धविरुद्धानैकान्तिकभेदात्। तत्राप्रतीयमानस्वरूपो हेतुरसिद्धः, स्वरूपाप्रतीतिश्चाज्ञानात्सन्देहाद्विपर्ययाद्वा, स द्विविध, उभयासिद्धोऽन्यतरासिद्धश्च। आद्यो यथा शब्दः परि-णामी चाक्षुषत्वादिति। द्वितीयो यथा अचेतनास्तरवः, विज्ञानेन्द्रियायुर्निरोधलक्षणमरणरहितत्वात्, अचेतनाः सुखा-दयः उत्पत्तिमत्त्वादिति वा। नन्वन्यतरासिद्धो हेत्वाभास एव नास्ति, तथाहि—परेणासिद्ध इत्युद्भाविते यदि वादी न तत्साधकं प्रमाणमाचक्षीत, तदा प्रमाणाभावादुभयोरप्यसिद्धोऽथाचक्षीत तदा प्रमाणस्यापक्षपातित्वादुभयोरपि सिद्धः। अथ यावन्न परं प्रति प्रमाणेन प्रसाध्यते, तावत्तं प्रत्यसिद्ध इति चेत् गौणं तर्ह्यसिद्धत्वं, न हि रत्नादिपदार्थस्तत्त्वतोऽप्रती-

यमानस्तावन्तमपि कालं मुख्यतया तदाभासः । किं चान्यतरासिद्धो यदा हेत्वाभासस्तदा वादी निगृहीतः स्यात्, न च निगृहीतस्य पश्चादनिग्रह इति युक्तम् । नापि हेतुसमर्थनं पश्चाद्युक्तं, निग्रहान्तत्वाद्वादस्येति । अत्रोच्यते—यदा वादी सम्यग्घेतुं प्रतिपद्यमानोऽपि तत्समर्थनन्यायविस्मरणादिनिमित्तेन प्रतिवादिनं प्राश्निकान् वा प्रतिबोधयितुं न शक्नोति, असिद्धतामपि नानुमन्यते, तदान्यतरासिद्धत्वेनैव निगृह्यते, तथा स्वयमनभ्युपगतोऽपि परस्य सिद्ध इत्येतावतैवोपन्यस्तो हेतुरन्यतरासिद्धो निग्रहाधिकरणं, यथा सांख्यस्य जैनं प्रत्यचेतनाः सुखादय उत्पत्तिमत्त्वात् घटवदिति । साध्यविपरीतव्याप्तो विरुद्धः । यथाऽपरिणामी शब्दः कृतकत्वादिति । कृतकत्वं ह्यपरिणामित्वविरुद्धेन परिणामित्वेन व्याप्तमिति । यस्यान्यथानुपपत्तिः सन्दिह्यते सोऽनैकान्तिकः, स द्वेधा निर्णीतविपक्षवृत्तिकः सन्दिग्धविपक्षवृत्तिकश्च । आद्यो यथा नित्यः शब्दः प्रमेयत्वात् । अत्र हि प्रमेयत्वस्य वृत्तिर्नित्ये व्योमादौ सपक्ष इव विपक्षेऽनित्ये घटादावपि निश्चिता । द्वितीयो यथा अभिमतः सर्वज्ञो न भवति वक्तृत्वादिति । अत्र हि वक्तृत्वं विपक्षे सर्वज्ञे संदिग्धवृत्तिकं, सर्वज्ञः किं वक्ताहोस्विन्नेति सन्देहादेवं स श्यामो मित्रपुत्रत्वादित्याद्यप्युदाहार्यम् । अकिञ्चित्कराख्यश्चतुर्थोऽपि हेत्वाभासभेदो धर्मभूषणोदीरितो न श्रद्धेयः, सिद्धसाधनो बाधितविषयश्चेति द्विविधस्याप्यप्रयोजकाह्वयस्य तस्य प्रतीतनिराकृताख्यपक्षाभासभेदानतिरिक्तत्वात् । न च यत्र पक्षदोषस्तत्रावश्यं हेतुदोषोऽपि वाच्यः, दृष्टान्तादिदोषस्याप्यवश्यं वाच्यत्वापत्तेः । एतेन कालात्ययापदिष्टोऽपि प्रत्युक्तो वेदितव्यः । प्रकरणसमोऽपि नातिरिच्यते, तुल्यबलसाध्यतद्विपर्ययसाधकहेतुद्वयरूपे सत्यस्मिन् प्रकृतसाधनयोरन्यथानुपपत्त्यनिश्चयेऽसिद्ध एवान्तर्भावादिति संक्षेपः ॥ आप्तवचनादाविर्भूतमर्थसंवेदनमागमः । न च व्याप्तिग्रह-

एवं बलेनार्थप्रतिपादकत्वाद्धूमवदस्यानुमानेऽन्तर्भावः, कूटाकूटकार्षापणनिरूपणप्रवणप्रत्यक्षवदन्यासदशायां व्याप्तिग्रहणनैरपेक्ष्येणैवास्यार्थबोधकत्वात् । यथास्थितार्थपरिज्ञानपूर्वकहितोपदेशप्रवण आप्तः । वर्णपदवाक्यात्मकं तद्वचनं । वर्णोऽकारादिः पौद्गलिकः । पदं संकेतवत् । अन्योऽन्यापेक्षाणां पदानां समुदायो वाक्यं । तदिदमागमप्रमाणं । स च विधिप्रतिषेधाभ्यां स्वार्थमभिदधानः सप्तभंगीमनुगच्छति । तथैव परिपूर्णार्थप्रापकत्वलक्षणतात्त्विकप्रामाण्यनिर्वाहात्, क्वचिदेकभंगदर्शनेऽपि व्युत्पन्नमतीनामितरभंगाक्षेपध्रौव्यात् । यत्र तु घटोस्तीत्यादिलोकवाक्ये सप्तभंगीसंस्पर्शशून्यता । तत्रार्थप्रापकत्वमात्रेण लोकापेक्षया प्रामाण्येऽपि तत्त्वतो न प्रामाण्यमिति द्रष्टव्यम् । केयं सप्तभंगीति चेदुच्यते–एकत्र वस्तुन्येकैकधर्मपर्यनुयोगवशादविरोधेन व्यस्तयोः समस्तयोश्च विधिनिषेधयोः कल्पनया स्यात्कारांकितः सप्तधा वाक्प्रयोगः सप्तभंगी । इयं च सप्तभंगी वस्तुनि प्रतिपर्यायं सप्तविधधर्माणां संभवात् सप्तविधसंशयोत्थापितसप्तविधजिज्ञासामूलसप्तविधप्रश्नानुरोधादुपपद्यते । तत्र स्यादस्त्येव सर्वमिति प्राधान्येन विधिकल्पनया प्रथमो भंगः । स्यात्कथञ्चित् स्वद्रव्यक्षेत्रकालभावापेक्षयेत्यर्थः । अस्ति हि घटादिकं द्रव्यतः पार्थिवादित्वेन, न जलादित्वेन, क्षेत्रतः पाटलिपुत्रकादित्वेन, न कान्यकुब्जादित्वेन, कालतः शैशिरादित्वेन, न वासन्तिकादित्वेन, भावतः श्यामादित्वेन, न रक्तादित्वेनेति । एवं स्यान्नास्त्येव सर्वमिति प्राधान्येन निषेधकल्पनया द्वितीयः । न चासत्त्वं काल्पनिकं । सत्त्ववत्तस्य स्वातंत्र्येणानुभवात् । अन्यथा विपक्षासत्त्वस्य तात्त्विकस्याभावेन हेतोस्त्रैरूप्यव्याघातप्रसंगात् । स्यादस्त्येव स्यान्नास्त्येवेति प्राधान्येन क्रमिकविधिनिषेधकल्पनया तृतीयः । स्यादवक्तव्यमेवेति युगपत्प्राधान्येन विधिनिषेधकल्पनया चतुर्थः । एकेन पदेन युगपदुभयोर्वक्तुमशक्यत्वात् । शतृशानचौ सदित्यादौ सांके-

तिकपदेनापि क्रमेणार्थद्वयबोधनादन्यतरत्वादिना कथञ्चिद्‌द्वयबोधनेऽपि प्रातिस्विकरूपेणैकपदाद्‌द्वयबोधस्य ब्रह्मणापि दुरुपपादत्वात् । स्यादस्त्येव स्यादवक्तव्यमेवेति विधिकल्पनया युगपद्विधिनिषेधकल्पनया च पञ्चमः । स्यान्नास्त्येव स्यादवक्तव्यमेवेति निषेधकल्पनया युगपद्विधिनिषेधकल्पनया च षष्ठः । स्यादस्त्येव स्यान्नास्त्येव स्यादवक्तव्यमेवेति विधिनिषेधकल्पनया युगपद्विधिनिषेधकल्पनया च सप्तम इति । सेयं सप्तभंगी प्रतिभंगं सकलादेशस्वभावा विकलादेशस्वभावा च । तत्र प्रमाणप्रतिपन्नानन्तधर्मात्मकवस्तुनः कालादिभिरभेदवृत्तिप्राधान्यादभेदोपचाराद्वा यौगपद्येन प्रतिपादकं वचः सकलादेशः । नयविषयीकृतस्य वस्तुधर्मस्य भेदवृत्तिप्राधान्याद्भेदोपचाराद्वा क्रमेणाभिधायकं वाक्यं विकलादेशः । ननु कः क्रमः, किं वा यौगपद्यं ? उच्यते—यदास्तित्वादिधर्माणां कालादिभिर्भेदविवक्षा तदैकशब्दस्यानेकार्थप्रत्यायने शक्त्यभावात् क्रमः । यदा तु तेषामेव धर्माणां कालादिभिरभेदेन वृत्तमात्मरूपमुच्यते तदैकेनापि शब्देनैकधर्मप्रत्यायनमुखेन तदात्मकतामापन्नस्यानेकाशेषरूपस्य वस्तुनः प्रतिपादनसंभवाद्यौगपद्यं । के पुनः कालादयः ? उच्यते—काल आत्मरूपमर्थः संबन्ध उपकारः गुणिदेशः संसर्गः शब्द इत्यष्टौ । तत्र स्याज्जीवादि वस्त्वस्त्येव । तत्र यत्कालमस्तित्वं त एव कालाः शेषानन्तधर्मा वस्तुन्येकत्रेति तेषां कालेनाभेदवृत्तिः । यदेव चास्तित्वस्य तद्गुणत्वमात्मरूपं तदेवान्यानन्तगुणानामपीत्यात्मरूपेणाभेदवृत्तिः । य एव चाधारोऽर्थो द्रव्याख्योऽस्तित्वस्य स एवान्यपर्यायाणामित्यर्थेनाभेदवृत्तिः । य एव चाविष्वग्भावः संबन्धोऽस्तित्वस्य स एवान्येषामिति संबन्धेनाभेदवृत्तिः । य एव चोपकारोऽस्तित्वेन स्वानुरक्तत्वकारणं स एवान्यैरपीत्युपकारेणाभेदवृत्तिः । य एव गुणिनः संबन्धी देशः क्षेत्रलक्षणोऽस्तित्वस्य स एवान्येषामिति गुणिदेशेनाभेदवृत्तिः । य एव चैकव-

स्वात्मनाऽस्तित्वस्य संसर्गः स एवान्येषामिति संसर्गेणाभेदवृत्तिः, गुणिभूतभेदाभेदप्रधानात् संबन्धादिविपर्ययेण संसर्गस्य भेदः । य एव चास्तीति शब्दोऽस्तित्वधर्मात्मकस्य वस्तुनो वाचकः स एवाशेषानन्तधर्मात्मकस्यापीति शब्देनाभेदवृत्तिः, पर्यायार्थिकनयगुणभावेन द्रव्यार्थिकनयप्राधान्यादुपपद्यते । द्रव्यार्थिकगुणभावेन पर्यायार्थिकप्राधान्ये तु न गुणानामभेदवृत्तिः संभवति, समकालमेकत्र नानागुणानामसंभवात्, संभवे वा तदाश्रयस्य भेदप्रसंगात्। नानागुणानां संबन्धिन आत्मरूपस्य च भिन्नत्वात्, अन्यथा तेषां भेदविरोधात्, स्वाश्रयस्यार्थस्यापि नानात्वात्, अन्यथा नानागुणाश्रयत्वविरोधात्। संबन्धस्य च संबन्धिभेदेन भेददर्शनात्, नानासंबन्धिभिरेकत्रैकसंबन्धाघटनात् । तैः क्रियमाणस्योपकारस्य च प्रतिनियतरूपस्यानेकत्वात् , अनेकैरुपकारिभिः क्रियमाणस्योपकारस्यैकस्य विरोधात्। गुणिदेशस्य च प्रतिगुणं भेदात्, तदभेदे भिन्नार्थगुणानामपि गुणिदेशाभेदप्रसंगात्, संसर्गस्य च प्रतिसंसर्गिभेदात्, तदभेदे संसर्गिभेदविरोधात् । शब्दस्य प्रतिविषयं नानात्वात् , सर्वगुणानामेकशब्दवाच्यतायां सर्वार्थानामेकशब्दवाच्यतापत्तेरिति कालादिभिर्भिन्नात्मनामभेदोपचारः क्रियते । एवं भेदवृत्तितदुपचारावपि वाच्याविति पर्यवसितं परोक्षम्। ततश्च निरूपितः प्रमाणपदार्थः॥

॥ इति श्रीमहामहोपाध्यायश्रीकल्याणविजयगणिशिष्यमुख्यपण्डितश्रीलाभविजयगणिशिष्यावतंसपण्डितश्रीजीतविजयगणिसतीर्थ्यपण्डितश्रीनयविजयगणिशिष्येण पण्डितश्रीपद्मविजयगणिसहोदरेण पण्डितयशोविजयगणिना कृतायां जैनतर्कभाषायां प्रमाणपरिच्छेदः ॥

## ॥ अथ नयपरिच्छेदः ॥

प्रमाणान्युक्तानि, अथ नया उच्यन्ते । प्रमाणपरिच्छिन्नस्यानन्तधर्मात्मकस्य वस्तुन एकदेशग्राहिणस्तदितरांशाप्रतिक्षेपिणोऽध्यवसायविशेषा नयाः । प्रमाणैकदेशत्वाच्चैषां ततो भेदः । यथा हि समुद्रैकदेशो न समुद्रो नाप्यसमुद्रस्तथा नया अपि न प्रमाणं न वाऽप्रमाणमिति । ते च द्विधा । द्रव्यार्थिकपर्यायार्थिकभेदात् । तत्र प्राधान्येन द्रव्यमात्रग्राही द्रव्यार्थिकः, प्राधान्येन पर्यायमात्रग्राही पर्यायार्थिकः । तत्र द्रव्यार्थिकस्त्रिधा नैगमसंग्रहव्यवहारभेदात् । पर्यायार्थिकश्चतुर्धा ऋजुसूत्रशब्दसमभिरूढैवंभूतभेदात् । ऋजुसूत्रो द्रव्यार्थिकस्यैव भेद इति तु जिनभद्रगणिक्षमाश्रमणाः । तत्र सामान्यविशेषाद्यनेकधर्मोपनयनपरोऽध्यवसायो नैगमः, यथा पर्याययोर्द्रव्ययोः पर्यायद्रव्ययोश्च मुख्यामुख्यरूपतया विवक्षणपरः, तत्र सच्चैतन्यमात्मनीति पर्याययोर्मुख्यामुख्यतया विवक्षणं, अत्र चैतन्याख्यस्य व्यञ्जनपर्यायस्य विशेष्यत्वेन मुख्यत्वात्, सत्त्वाख्यस्य तु विशेषणत्वेनामुख्यत्वात्, प्रवृत्तिनिवृत्तिनिबन्धनार्थक्रियाकारित्वोपलक्षितो व्यञ्जनपर्यायः, भूतभविष्यत्त्वसंस्पर्शरहितं वर्तमानकालावच्छिन्नं वस्तुस्वरूपं चार्थपर्यायः, वस्तु पर्यायवद्द्रव्यमिति द्रव्ययोर्मुख्यामुख्यतया विवक्षणं, पर्यायवद्द्रव्याख्यस्य धर्मिणो विशेष्यत्वेन प्राधान्यात्, वस्त्वाख्यस्य विशेषणत्वेन गौणत्वात् । क्षणमेकं सुखी विषयासक्तजीव इति पर्यायद्रव्ययोर्मुख्यामुख्यतया विवक्षणं, अत्र विषयासक्तजीवाख्यस्य धर्मिणो विशेष्यत्वेन मुख्यत्वात्, सुखलक्षणस्य तु धर्मस्य तद्विशेषणत्वेनामुख्यत्वात् । न चैवं द्रव्यपर्यायोभयावगाहित्वेन नैगमस्य प्रामाण्यप्रसंगः, प्राधान्येन तदुभयावगाहिन एव ज्ञानस्य प्रमाणत्वात् । सामान्यमात्रग्राही परामर्शः संग्रहः, स द्वेधा, परोऽपरश्च । तत्राशेषविशेषेष्वौदासीन्यं

भजमानः शुद्धद्रव्यं सन्मात्रमभिमन्यमानः परः संग्रहः । यथा विश्वमेकं सदविशेषादिति । द्रव्यत्वादीन्यवान्तरसामान्यानि मन्वानस्तद्भेदेषु गजनिमीलिकामवलंबमानः पुनरपरसंग्रहः । संग्रहेण गोचरीकृतानामर्थानां विधिपूर्वकमवहरणं येनाभिसन्धिना क्रियते स व्यवहारः । यत्सत्तद्द्रव्यं पर्यायो वा, यद्द्रव्यं तज्जीवादिषड्विधं, यः पर्यायः स द्विविधः, क्रमभावी सहभावी चेत्यादि । ऋजु वर्तमानक्षणस्थायि पर्यायमात्रं प्राधान्यतः सूचयन्नभिप्राय ऋजुसूत्रः । यथा सुखविवर्तः संप्रत्यस्ति । अत्र हि क्षणस्थायि सुखाख्यं पर्यायमात्रं प्राधान्येन प्रदर्श्यते, तदधिकरणभूतं पुनरात्मद्रव्यं गौणतया नार्प्यत इति । कालादिभेदेन ध्वनेरर्थभेदं प्रतिपद्यमानः शब्दः । कालकारकलिंगसंख्यापुरुषोपसर्गाः कालादयः । तत्र बभूव भवति भविष्यति सुमेरुरित्यत्रातीतादिकालभेदेन सुमेरोर्भेदप्रतिपत्तिः, करोति क्रियते कुंभ इत्यादौ कारकभेदेन, तटस्तटी तटमित्यादौ लिंगभेदेन, दाराः कलत्रमित्यादौ संख्याभेदेन, यास्यसि त्वं यास्यति भवानित्यादौ पुरुषभेदेन, संतिष्ठते अवतिष्ठते इत्यादावुपसर्गभेदेन । पर्यायशब्देषु निरुक्तिभेदेन भिन्नमर्थं समभिरोहन् समभिरूढः । शब्दनयो हि पर्यायभेदेऽप्यर्थाभेदमभिप्रैति, समभिरूढस्तु पर्यायभेदे भिन्नानर्थानभिमन्यते । अभेदं त्वर्थगतं पर्यायशब्दानामुपेक्षत इति । यथा इन्दनादिन्द्रः, शकनाच्छक्रः, पूर्दारणात्पुरन्दर इत्यादि । शब्दानां स्वप्रवृत्तिनिमित्तभूतक्रियाविष्टमर्थं वाच्यत्वेनाभ्युपगच्छन्नेवंभूतः । यथेन्दनमनुभवन्निन्द्रः । समभिरूढनयो हीन्दनादिक्रियायां सत्यामसत्यां च वासवादेरर्थस्येन्द्रादिव्यपदेशमभिप्रैति, क्रियोपलक्षितसामान्यस्यैव प्रवृत्तिनिमित्तत्वात्, पशुविशेषस्य गमनक्रियायां सत्यामसत्यां च गोव्यपदेशवत, तथारूढेः सद्भावात् । एवंभूतः पुनरिन्दनादिक्रियापरिणतमर्थं तत्क्रियाकाले इन्द्रादिव्यपदेशभाजमभिमन्यते । न हि कश्चित् क्रियाशब्दोऽस्या-

स्ति । गौरश्व इत्यादिजातिशब्दाभिमतानामपि क्रियाशब्दत्वात् । गच्छतीति गौः, आशुगामित्वादश्व इति । शुक्लो, नील इति गुणशब्दाभिमता अपि क्रियाशब्दा एव, शुचीभवनाच्छुक्लो, नीलनान्नील इति । देवदत्तो यज्ञदत्त इति यदृच्छाशब्दाभिमता अपि क्रियाशब्दा एव, देव एनं देयात्, यज्ञ एनं देयादिति । संयोगिद्रव्यशब्दाः समवायद्रव्यशब्दाश्चाभिमताः क्रियाशब्दा एव, दण्डोऽस्यास्तीति दण्डी । विषाणमस्यास्तीति विषाणीत्यस्तिक्रियाप्रधानत्वात् । पंचतयी तु शब्दानां व्यवहारमात्रात्, न तु निश्चयादित्ययं नयः स्वीकुरुते । एतेष्वाद्याश्चत्वारः प्राधान्येनार्थगोचरत्वादर्थनयाः, अन्त्यास्तु त्रयः प्राधान्येन शब्दगोचरत्वाच्छब्दनयाः । तथा विशेषग्राहिणोऽर्पितनयाः, सामान्यग्राहिणश्चानर्पितनयाः । तत्रानर्पितनयमते तुल्यमेव रूपं सर्वेषां सिद्धानां भगवताम् । अर्पितनयमते त्वेकद्वित्र्यादिसमयसिद्धाः स्वसमानसमयसिद्धैरेव तुल्या इति । तथा लोकप्रसिद्धार्थानुवादपरो व्यवहारनयः, यथा पञ्चस्वपि वर्णेषु भ्रमरे सत्सु श्यामो भ्रमर इति व्यपदेशः । तात्त्विकार्थाभ्युपगमपरस्तु निश्चयः, स पुनर्मन्यते पञ्चवर्णो भ्रमरः, बादरस्कन्धत्वेन तच्छरीरस्य पञ्चवर्णपुद्गलैर्निष्पन्नत्वात्, शुक्लादीनां च न्यग्भूतत्वेनानुपलक्षणात् । अथवा एकनयमतार्थग्राही व्यवहारः, सर्वनयमतार्थग्राही च निश्चयः । न चैवं निश्चयस्य प्रमाणत्वेन नयत्वव्याघातः, सर्वनयमतस्यापि स्वार्थस्य तेन प्राधान्याभ्युपगमात् । तथा ज्ञानमात्रप्राधान्याभ्युपगमपरा ज्ञाननयाः । क्रियामात्रप्राधान्याभ्युपगमपराश्च क्रियानयाः । सूत्रादयश्चत्वारो नयाश्चारित्रलक्षणायाः क्रियाया एव प्राधान्यमभ्युपगच्छन्ति, तस्या एव मोक्षं प्रत्यव्यवहितकारणत्वात् । नैगमसंग्रहव्यवहारास्तु यद्यपि चारित्रश्रुतसम्यक्त्वानां त्रयाणामपि मोक्षकारणत्वमिच्छन्ति, तथापि व्यस्तानामेव, न तु समस्तानां, एतन्मते ज्ञानादित्रयादेव मोक्ष इत्यनियमात्,

अन्यथा नयत्वहानिप्रसंगात्, समुदयवादस्य स्थितपक्षत्वादिति द्रष्टव्यम् । कः पुनरत्र बहुविषयो नयः को वाऽल्पविषयः, इति चेदुच्यते–सन्मात्रगोचरात्संग्रहात्तावन्नैगमो बहुविषयो भावाभावभूमिकत्वात् । सद्विशेषप्रकाशकाद्व्यवहारतः संग्रहः समस्तसत्समूहोपदर्शकत्वाद्बहुविषयः । वर्तमानविषयावलंबिन ऋजुसूत्रात्कालत्रितयवर्त्यर्थजातावलंबी व्यवहारो बहुविषयः । कालादिभेदेन भिन्नार्थोपदेशकाच्छब्दात्तद्विपरीतवेदक ऋजुसूत्रो बहुविषयः । न केवलं कालादिभेदेनै वर्जुसूत्रादल्पार्थता शब्दस्य, किं तु भावघटस्यापि सद्भावादिनाऽर्पितस्य स्याद्घटः स्यादघट इत्यादिभंगपरिकरितस्य तेनाभ्युपगमात् तस्यर्जु सूत्राविशेषिततरत्वोपदेशात् । यद्यपीदृशसंपूर्णसप्तभंगपरिकरितं वस्तु स्याद्वादिन एव संगिरन्ते, तथापि ऋजुसूत्रकृततदभ्युपगमापेक्षयाऽन्यतरभंगेन विशेषितप्रतिपत्तिरत्राप्युष्टेत्यदोष इति वदन्ति । प्रतिपर्यायशब्दमर्थभेदमभीप्सतः समभिरूढाच्छब्दस्तद्विषयानुयायित्वाद्बहुविषयः । प्रतिक्रियं विभिन्नमर्थं प्रतिजानानादेवंभूतात्समभिरूढः तदन्यथार्थस्थापकत्वाद्बहुविषयः । नयवाक्यमपि स्वविषये प्रवर्तमानं विधिप्रतिषेधाभ्यां सप्तभंगीमनुगच्छति, विकलादेशत्वात्, परमेतद्वाक्यस्य प्रमाणवाक्याद्विशेष इति द्रष्टव्यम् ॥

अथ नयाभासाः । तत्र द्रव्यमात्रग्राही पर्यायप्रतिक्षेपी द्रव्यार्थिकाभासः । पर्यायमात्रग्राही द्रव्यप्रतिक्षेपी पर्यायार्थिकाभासः । धर्मिधर्मादीनामेकान्तिकपार्थक्याभिसन्धिर्नैगमाभासः, यथा नैयायिकवैशेषिकदर्शनं । सत्ताद्वैतं स्वीकुर्वाणः सकलविशेषान्निराचक्षाणः संग्रहाभासः, यथाऽखिलान्यद्वैतवादिदर्शनानि सांख्यदर्शनं च । अपारमार्थिकद्रव्यपर्यायविभागाभिप्रायो व्यवहाराभासः, यथा चार्वाकदर्शनं, चार्वाको हि प्रमाणप्रतिपन्नं जीवद्रव्यपर्यायादिप्रविभागं कल्पनारोपि-

तत्त्वेनापह्नुतेऽविचारितरमणीयं भूतचतुष्टयप्रविभागमात्रं तु स्थूललोकव्यवहारानुयायितया समर्थ्यत इति । वर्तमानपर्या-
याभ्युपगन्ता सर्वथा द्रव्यापलापी ऋजुसूत्राभासः, यथा तथागतमतं । कालादिभेदमेवाभ्युपगच्छन् शब्दाभासः, यथा
बभूव भवति भविष्यति सुमेरुरित्यादयः शब्दा भिन्नमेवार्थमभिदधति, भिन्नकालशब्दत्वात्तादृक्सिद्धान्यशब्दवदिति ।
पर्यायध्वनीनामभिधेयनानात्वमेव कक्षीकुर्वाणः समभिरूढाभासः, यथा इन्द्रः शक्रः पुरन्दर इत्यादयः शब्दा भिन्नाभिधे-
या एव, भिन्नशब्दत्वात्, करिकुरंगशब्दवदिति । क्रियानाविष्टं वस्तु शब्दवाच्यतया प्रतिक्षिपन्नेवंभूताभासः, यथा विशि-
ष्टचेष्टाशून्यं घटाख्यं वस्तु न घटशब्दवाच्यं, घटशब्दप्रवृत्तिनिमित्तभूतक्रियाशून्यत्वात्, पटवदिति । अर्थाभिधायी शब्द-
प्रतिक्षेपी अर्थनयाभासः । शब्दाभिधाय्यर्थप्रतिक्षेपी शब्दनयाभासः । अर्पितमभिदधानोऽनर्पितं प्रतिक्षिपन्नर्पितनयाभा-
सः । अनर्पितमभिदधदर्पितं प्रतिक्षिपन्ननर्पिताभासः । लोकव्यवहारमभ्युपगम्य तत्त्वप्रतिक्षेपी व्यवहाराभासः । तत्त्वम-
भ्युपगम्य व्यवहारप्रतिक्षेपी निश्चयाभासः । ज्ञानमभ्युपगम्य क्रियाप्रतिक्षेपी ज्ञाननयाभासः । क्रियामभ्युपगम्य ज्ञानप्रति-
क्षेपी क्रियानयाभास इति ॥

॥ इति महामहोपाध्यायश्रीकल्याणविजयगणिशिष्यमुख्यपंडितश्रीलाभविजयगणिशिष्यावतंसश्रीजीतविजय-
गणिसतीर्थ्यपंडितश्रीनयविजयगणिशिष्येण पंडितश्रीपद्मविजयगणिसहोदरेण पंडितयशोविजय-
गणिना विरचितायां जैनतर्कभाषायां नयपरिच्छेदः ॥ २ ॥

॥ अथ निक्षेपपरिच्छेदः ॥

नया निरूपिताः । अथ निक्षेपा निरूप्यन्ते । प्रकरणादिवशेनाप्रतिपत्त्यादिव्यवच्छेदकयथास्थानविनियोगाय शब्दार्थरचनाविशेषा निक्षेपाः । मंगलादिपदार्थनिक्षेपान्नाममंगलादिविनियोगोपपत्तेश्च निक्षेपाणां फलवत्त्वं । तदुक्तम्—"अप्रस्तुतार्थापाकरणात् प्रस्तुतार्थव्याकरणाच्च निक्षेपः फलवानिति" । ते च सामान्यतश्चतुर्धा, नामस्थापनाद्रव्यभावभेदात् । तत्र प्रकृतार्थनिरपेक्षा नामार्थान्यतरपरिणतिर्नामनिक्षेपः । यथा संकेतितमात्रेणान्यार्थस्थितेनेन्द्रादिशब्देन वाच्यस्य गोपालदारकस्य शक्रादिपर्यायशब्दानभिधेया परिणतिरियमेव वा यथान्यत्रावर्तमानेन यदृच्छाप्रवृत्तेन डित्थडवित्थादिशब्देन वाच्या । तत्त्वतोऽर्थनिष्ठोपचारतः शब्दनिष्ठा च मेर्वादिनामापेक्षया यावद्द्रव्यभाविनी, देवदत्तादिनामापेक्षया वा यावद्द्रव्यभाविनी, यथा वा पुस्तकपत्रचित्रादिलिखिता वस्त्वभिधानभूतेन्द्रादिवर्णावली । यत्तु वस्तु तदर्थवियुक्तं तदभिप्रायेण स्थाप्यते चित्रादौ तादृशाकारमक्षादौ च निराकारं, चित्राद्यपेक्षयेत्वरं नन्दीश्वरचैत्यप्रतिमाद्यपेक्षया च यावत्कथिकं स स्थापनानिक्षेपः, यथा जिनप्रतिमा स्थापनाजिनः । यथा चेन्द्रप्रतिमा स्थापनेन्द्रः। भूतस्य भाविनो वा भावस्य कारणं यन्निक्षिप्यते स द्रव्यनिक्षेपः, यथाऽनुभूतेन्द्रपर्यायोऽनुभविष्यमाणेन्द्रपर्यायो वा इन्द्रः, अनुभूतघृताधारत्वपर्यायेऽनुभविष्यमाणघृताधारत्वपर्याये च घृतघटव्यपदेशवत्तत्रेन्द्रशब्दव्यपदेशोपपत्तेः । क्वचिदप्राधान्येऽपि द्रव्यनिक्षेपः प्रवर्तते, यथाऽङ्गारमर्दको द्रव्याचार्यः, आचार्यगुणरहितत्वात् अप्रधानाचार्य इत्यर्थः । क्वचिदनुपयोगेऽपि, यथाऽनाभोगेनेहपरलोकाद्याशंसालक्षणेनाविधिना च भक्त्यापि क्रियमाणा जिनपूजादिक्रिया द्रव्यक्रियैव, अनुपयुक्तक्रियायाः साक्षान्मोक्षांगत्वाभा-

वात् । भक्त्याऽविधिनापि क्रियमाणा सा पारंपर्येण मोक्षांगत्वापेक्षया द्रव्यतामश्नुते, भक्तिगुणेनाविधिदोषस्य निरनुबन्धीकृतत्वादित्याचार्याः । विवक्षितक्रियानुभूतिविशिष्टं स्वतत्त्वं यन्निक्षिप्यते स भावनिक्षेपः, यथा इन्दनक्रियापरिणतो भावेन्द्र इति । ननु भाववर्जितानां नामादीनां कः प्रतिविशेषस्त्रिष्वपि वृत्त्यविशेषात्, तथाहि–नाम तावन्नामवति पदार्थे स्थापनायां द्रव्ये चाविशेषेण वर्तते । भावार्थशून्यत्वं अपि । स्थापनारूपमपि त्रिष्वपि समानं, भावस्याभावात् । द्रव्यमपि नामस्थापनाद्रव्येषु वर्तत एव, द्रव्यस्यैव नामस्थापनाकरणाद्द्रव्यस्य द्रव्ये सुतरां वृत्तेश्चेति विरुद्धधर्माध्यासाभावान्नैषां भेदो युक्त इति चेन्न, अनेन रूपेण विरुद्धधर्माध्यासाभावेऽपि रूपान्तरेण विरुद्धधर्माध्यासात्तद्भेदोपपत्तेः । तथाहि–नामद्रव्याभ्यां स्थापना तावदाकाराभिप्रायबुद्धिक्रियाफलदर्शनाद्भिद्यते, यथा हि स्थापनेन्द्रे लोचनसहस्राद्याकारः, स्थापनाकर्तुश्च सद्भूतेन्द्राभिप्रायो, द्रष्टुश्च तदाकारदर्शनादिन्द्रबुद्धिः, भक्तिपरिणतबुद्धीनां नमस्करणादिक्रिया, तत्फलं च पुत्रोत्पत्त्यादिकं संवीक्ष्यते, न तथा नामेन्द्रे द्रव्येन्द्रे चेति ताभ्यां तस्य भेदः । द्रव्यमपि भावपरिणामिकारणत्वान्नामस्थापनाभ्यां भिद्यते, यथा ह्यनुपयुक्तो वक्ता द्रव्यं, उपयुक्तत्वकाले उपयोगलक्षणस्य भावस्य कारणं भवति, यथा वा साधुजीवो द्रव्येन्द्रः सद्भावेन्द्ररूपायाः परिणतेः, न तथा नामस्थापनेन्द्राविति । नामापि स्थापनाद्रव्याभ्यामुक्तवैधर्म्यादेव भिद्यत इति दुग्धतक्रादीनां श्वेतत्वादिनाऽभेदेऽपि माधुर्यादिना भेदवन्नामादीनां केनचिद्रूपेणाभेदेऽपि रूपान्तरेण भेद इति स्थितम् । ननु भाव एव वस्तु, किं तदर्थशून्यैर्नामादिभिरिति चेन्न, नामादीनामपि वस्तुपर्यायत्वेन सामान्यतो भावत्वानतिक्रमात्, अविशिष्टे इन्द्रवस्तुन्युच्चरिते नामादिभेदचतुष्टयपरामर्शदर्शनात् । प्रकरणादिनैव विशेषपर्यवसानात् । भावांगत्वेनैव वा

नामादीनामुपयोगः जिननामजिनस्थापनापरिनिर्वृतमुनिदेहदर्शनाद्भावोल्लासानुभवात्। केवलं नामादित्रयं भावोल्लासेनैकान्तिकमनात्यन्तिकं च कारणमिति एकान्तिकात्यन्तिकस्य भावस्याभ्यर्हितत्वमनुमन्यन्ते प्रवचनवृद्धाः। एतच्च भिन्नवस्तुगतनामाद्यपेक्षयोक्तम्। अभिन्नवस्तुगतानां तु नामादीनां भावाविनाभूतत्वादेव वस्तुत्वं, सर्वस्य वस्तुनः स्वाभिधानस्य नामरूपत्वात्, स्वाकारस्य स्थापनारूपत्वात्, कारणतायाश्च द्रव्यरूपत्वात्, कार्यापन्नस्य च स्वस्य भावरूपत्वात्। यदि च घटनाम घटधर्मो न भवेत्तदा ततस्तत्संप्रत्ययो न स्यात्, तस्य स्वापृथग्भूतसंबन्धनिमित्तकत्वादिति सर्वं नामात्मकमेष्टव्यम्। साकारं च सर्वं मतिशब्दघटादीनामाकारवत्त्वान्नीलाकारसंस्थानविशेषादीनामाकाराणामनुभवसिद्धत्वात्। द्रव्यात्मकं च सर्वं उत्फणविफणकुंडलिताकारसमन्वितसर्पवद्विकाररहितस्याविर्भावतिरोभावमात्रपरिणामस्य द्रव्यस्यैव सर्वत्र सर्वदानुभवात्। भावात्मकं च सर्वं परापरकार्यक्षणसन्तानात्मकस्यैव तस्यानुभवादिति। चतुष्टयात्मकं जगदिति नामादिनयसमुदायवादः। अथ नामादिनिक्षेपा नयैः सह योज्यन्ते। तत्र नामादित्रयं द्रव्यास्तिकनयस्यैवाभिमतं, पर्यायास्तिकनयस्य च भाव एव। आद्यस्य भेदौ संग्रहव्यवहारौ। नैगमस्य यथाक्रमं सामान्यग्राहिणो विशेषग्राहिणश्च अनयोरेवान्तर्भावात्। ऋजुसूत्रादयश्च चत्वारो द्वितीयस्य भेदा इत्याचार्यसिद्धसेनमतानुसारेणाभिहितं। जिनभद्रगणिक्षमाश्रमणपूज्यपादैः "नामाइतियं दव्वट्ठियस्स भावो अ पज्जवणयस्स। संगहववहारा पढमगस्स सेसा उ इयरस्स" इत्यादिना विशेषावश्यके। स्वमते तु नमस्कारनिक्षेपविचारस्थले "भावं चिय सद्दणया सेसा इच्छंति सव्वणिक्खेवे" इति वचसा त्रयोऽपि शब्दनयाः शुद्धत्वाद्भावमेवेच्छन्ति। ऋजुसूत्रादयस्तु चत्वारश्चतुरोऽपि निक्षेपानिच्छन्ति अविशुद्धत्वादित्युक्तम्। ऋजुसूत्रो नामभावनिक्षे-

पावेवेच्छतीत्यन्ये, तन्न, ऋजुसूत्रेण द्रव्याभ्युपगमस्य सूत्राभिहितत्वात्, पृथक्त्वाभ्युपगमस्य परं निषेधात्। तथा च सूत्रम् " उज्जुसुअस्स एगे अणुवउत्ते आगमओ एगं दव्वावस्सयं, पुहत्तं नेच्छइ त्ति "। कथं चायं पिण्डावस्थायां सुवर्णादिद्रव्यमनाकारं भविष्यत्कुंडलादिपर्यायलक्षणभावहेतुत्वेनाभ्युपगच्छन् विशिष्टेन्द्राद्यभिलापहेतुभूतां साकारामिन्द्रादिस्थापनां नेच्छेत्, न हि दृष्टेऽनुपपन्नं नामेति। किं चेन्द्रादिसंज्ञामात्रं तदर्थरहितमिन्द्रादिशब्दवाच्यं वा नामेच्छन्नयं भावकारणत्वाविशेषात् कुतो नामस्थापने नेच्छेत्? प्रत्युत सुतरां तदभ्युपगमो न्याय्यः। इन्द्रमूर्तिलक्षणद्रव्यविशिष्टतदाकाररूपस्थापनयोरिन्द्रपर्यायरूपे भावे तादात्म्यसंबन्धेनावस्थितत्वात्तत्र वाच्यवाचकभावसंबन्धेन संबद्धान्नाम्नोऽपेक्षया सन्निहिततरकारणत्वात्। संग्रहव्यवहारौ स्थापनावर्जांस्त्रीन्निक्षेपानिच्छत इति केचित्तन्नानवद्यं यतः संग्रहिकोऽसंग्राहिकोऽनर्पितभेदः परिपूर्णो वा नैगमस्तावत् स्थापनामिच्छतीत्यवश्यमभ्युपेयम्। संग्रहव्यवहारयोरन्यत्र द्रव्यार्थिके स्थापनाभ्युपगमावर्जनात्। तत्राद्यपक्षे संग्रहे स्थापनाभ्युपगमप्रसंगः, संग्रहनयमतस्य संग्रहिकनैगममताविशेषाद्द्वितीये व्यवहारे तदभ्युपगमप्रसंगः, तन्मतस्य व्यवहारमतादविशेषात्, तृतीये च निरपेक्षयोः संग्रहव्यवहारयोः स्थापनानभ्युपगमोपपत्तावपि समुदितयोः संपूर्णनैगमरूपत्वात्तदभ्युपगमस्य दुर्निवारत्वं। अविभागस्थान्नैगमात्प्रत्येकं तदेकैकभागग्रहणात्। किं च संग्रहव्यवहारयोर्नैगमान्तर्भावात्स्थापनाभ्युपगमलक्षणं तन्मतमपि तत्रान्तर्भूतमेव। उभयधर्मलक्षणस्य विषयस्य प्रत्येकमप्रवेशेऽपि स्थापनालक्षणस्यैकधर्मस्य प्रवेशस्य सूपपादत्वात्। स्थापनासामान्यतद्विशेषाभ्युपगममात्रेणैवसंग्रहव्यवहारयोर्भेदोपपत्तेरिति यथागमं भावनीयम्। एतैश्च नामादिनिक्षेपैर्जीवादयः पदार्था निक्षेप्याः। तत्र यद्यपि यस्य जीवस्याजीवस्य वा जीव

इति नाम क्रियते स नामजीवः, देवदत्तादिप्रतिमा च स्थापनाजीवः, औपशमिकादिभाववशाली च भावजीव इति जीवविषयं निक्षेपत्रयं भवति, न तु द्रव्यनिक्षेपः। अयं हि तदा संभवेत्, यद्यजीवः सन्नायत्यां जीवोऽभविष्यत्, यथाऽदेवः सन्नायत्यां देवो भविष्यन् द्रव्यदेव इति। न चैतदिष्टं सिद्धान्ते। यतो जीवत्वमनादिनिधनः पारिणामिको भाव इष्यत इति, तथापि गुणपर्यायवियुक्तत्वेन बुद्ध्या कल्पितोऽनादिपारिणामिकभावयुक्तो द्रव्यजीवः, शून्योऽयं भंग इति यावत्। सतां गुणपर्यायाणां बुद्ध्यापनयनस्य कर्तुमशक्यत्वात्। न खलु ज्ञानायत्तार्थपरिणतिः। किं त्वर्थो यथा यथा विपरिणमते तथा तथा ज्ञानं प्रादुरस्तीति। न चैवं नामादिचतुष्टयस्य व्यापिताभंगः, यतः प्रायः सर्वपदार्थेष्वन्येषु तत्संभवति। यद्यत्रैकस्मिन्न संभवति नैतावता भवत्यव्यापितेति वृद्धाः। जीवशब्दार्थज्ञस्तत्रानुपयुक्तो द्रव्यजीव इत्यप्याहुः। अपरे तु वदन्ति-अहमेव मनुष्यजीवो द्रव्यजीवोऽभिधातव्यः, उत्तरं देवजीवमप्रादुर्भूतमाश्रित्य अहं हि तस्योत्पित्सोर्देवजीवस्य कारणं भवामि, यतश्चाहमेव तेन देवजीवभावेन भविष्यामि, अतोऽहमधुना द्रव्यजीव इति। एतत्कथितं तैर्भवति। पूर्वः पूर्वो जीवः परस्य परस्योत्पित्सोः कारणमिति। अस्मिंश्च पक्षे सिद्ध एव भावजीवो भवति, नान्य इत्येतदपि नानवद्यमिति तत्त्वार्थटीकाकृतः। इदं पुनरिहावधेयं-इत्थं संसारिजीवे द्रव्यत्वेऽपि भावत्वाविरोधः, एकवस्तुगतानां नामादीनां भावाविनाभूतत्वप्रतिपादनात्। तदाह भाष्यकारः-"अहवा वत्थभिहाणं नामं ठवणाय जो तयागारो। कारणया से दव्वं कज्जावन्नं तयं भावो ॥ १ ॥" इति। केवलमविशिष्टजीवापेक्षया द्रव्यजीवत्वव्यवहार एव न स्यात्, मनुष्यादेर्देवत्वादिविशिष्टजीवं प्रत्येव हेतुत्वादिति अधिकं नयरहस्यादौ विवेचितमस्माभिः॥

॥ इति महामहोपाध्यायश्रीकल्याणविजयगणिशिष्यमुख्यपंडितश्रीलाभविजयगणिशिष्यावतंसपंडितश्रीजीतविजयगणिसतीर्थ्यपंडितश्रीनयविजयगणिशिष्येण पंडितश्रीपद्मविजयगणिसोदरेण पंडितयशोविजयगणिना विरचितायां जैनतर्कभाषायां निक्षेपपरिच्छेदः संपूर्णः,तत्संपूर्तौ च संपूर्णोयं जैनतर्कभाषाग्रन्थः ॥

सूरिश्रीविजयादिदेवसुगुरोः पट्टांबराहर्मणौ, सूरिश्रीविजयादिसिंहसुगुरौ शक्रासनं भेजुषि ।
तत्सेवाप्रतिमप्रसादजनितश्रद्धानशुद्ध्या कृतो, ग्रन्थोऽयं वितनोतु कोविदकुले मोदं विनोदं तथा ॥ १ ॥
यस्यासन् गुरवोऽत्र जीतविजयप्राज्ञाः प्रकृष्टाशया, भ्राजन्ते सनया नयादिविजयाः प्राज्ञाश्च विद्याप्रदाः ।
प्रेम्णां यस्य च सद्म पद्मविजयो जातः सुधीः सोदरस्तेन न्यायविशारदेन रचिता स्तात्तर्कभाषा मुदे ॥ २ ॥

तर्कभाषामिमां कृत्वा मया यत्पुण्यमर्जितम् ।
प्राप्नुयां तेन विपुलां परमानन्दसंपदम् ॥ ३ ॥

पूर्वं न्यायविशारदत्वबिरुदं काश्यां प्रदत्तं बुधैर्न्यायाचार्यपदं ततः कृतशतग्रन्थस्य यस्यार्पितम् ।
शिष्यप्रार्थनया नयादिविजयप्राज्ञोत्तमानां शिशुस्तत्त्वं किंचिदिदं यशोविजय इत्याख्याभृदाख्यातवान् ॥ ४ ॥

---

१ दृश्यमानादर्शेषु दृश्यते वृत्तमिदं पृथगंकान्वितं, तेनानुमीयतेऽदो यदन्यप्रकरणादेतत्कर्तृकादुपनीतं भवेत्केनापि, यद्वा प्रकरणग्रंथत्वेनास्य शिष्यशिक्षानिमित्तकस्वक्रियाज्ञापनाय पूज्यपादैरेवायं पृथगन्यस्तः पश्चाद्भवेत्.

॥ इति श्रीजैनतर्कभाषा समाप्ता ॥

# ॥ अथ ज्ञानबिन्दुः ॥

**ऐन्द्रस्तोमनतं नत्वा वीरं तत्त्वार्थदेशिनम् । ज्ञानबिन्दुः श्रुतांभोधेः सम्यगुद्ध्रियते मया ॥१॥**

तत्र ज्ञानं तावदात्मनः स्वपरावभासकोऽसाधारणो गुणः, स चाभ्रपटलविनिर्मुक्तस्य भास्वत इव निरस्तसमस्तावरणस्य जीवस्य स्वभावभूतः केवलज्ञानव्यपदेशं लभते । तदाहुराचार्याः—“केवलनाणमणंतं जीवसरूवं तयं निरावरणं” इति । तं च स्वभावं यद्यपि सर्वघातिकेवलज्ञानावरणं कार्त्स्न्येनैवावरीतुं व्याप्रियते, तथापि तस्यानन्ततमो भागो नित्यानावृत एवावतिष्ठते, तथास्वाभाव्यात्—“सव्वजीवाणं पि य णं अक्खरस्स अणंततमो भागो णिच्चुग्घाडिओ चिट्ठइ, सो वि अ जइ आवरिज्जा, तेणं जीवो अजीवत्तणं पाविज्जा” इति पारमर्षप्रामाण्यात् । अयं च स्वभावः केवलज्ञानावरणावृतस्य जीवस्य घनपटलच्छन्नस्य रवेरिव मन्दप्रकाश इत्युच्यते । तत्र हेतुः केवलज्ञानावरणमेव । केवलज्ञानव्यावृत्तज्ञानत्वव्याप्यजातिविशेषावच्छिन्ने तद्धेतुत्वस्य शास्त्रार्थत्वात् । अत एव न मतिज्ञानावरणक्षयादिनापि मतिज्ञानाद्युत्पादनप्रसंगः । अत एव चास्य विभावगुणत्वमिति प्रसिद्धिः । स्पष्टप्रकाशप्रतिबन्धके मन्दप्रकाशजनकत्वमनुत्कटे चक्षुराद्यावरणे वस्त्रादावेव दृष्टं, न तूत्कटे कुड्यादाविति कथमत्रैवमिति चेन्न, अभ्राद्यावरणे उत्कटे उभयस्य दर्शनात्, अत एवात्र सुट्ठु वि मेघसमुदए होंति पभा चंदसूराणं इत्येव दृष्टान्तितं पारमर्षे, अत्यावृतेऽपि चन्द्रसूर्यादौ दिनरजनीविभागहेत्वल्पप्रकाशवज्जीवेऽप्यन्यव्यावर्तकचैतन्यमात्राविर्भाव आवश्यक इति परमार्थः । एकत्र कथमावृतानावृतत्वमिति त्वर्पितद्रव्यपर्यायात्मना भेदाभेदवादेन निर्लो-

ढनीयं । ये तु चिन्मात्राश्रयविषयमज्ञानमिति विवरणाचार्यमताश्रयिणो वेदान्तिनस्तेषामेकान्तवादिनां महत्यनुपपत्तिरेवाज्ञानाश्रयत्वेनानावृतं चैतन्यं यत्तदेव तद्विषयतयावृतमिति विरोधात् । न चाखंडत्वाद्यज्ञानविषयश्चैतन्यं त्वाश्रय इत्यविरोधः, अखंडत्वादेश्चिद्रूपत्वे भासमानस्यावृतत्वायोगात्, अचिद्रूपत्वे च जडे आवरणायोगात् । कल्पितभेदेनाखंडत्वादिविषय इति चेन्न, भिन्नावरणे चैतन्यानावरणात्, परमार्थतो नास्त्येवावरणं चैतन्ये, कल्पितं तु शुक्तौ रजतमिव तत्त्राविरुद्धं, तेनैव च चित्त्वाखंडत्वादिभेदकल्पनाचैतन्यं स्फुरति नाखंडत्वादित्येवंरूपाधीयमाना न विरुद्धेति चेन्न, कल्पितेन रजतेन रजतकार्यवत्कल्पितेनानावरणेनावरणकार्यायोगात् । अहं मां न जानामीत्यनुभव एव कर्मत्वांशे आवरणविषयकः कल्पितस्यापि तस्य कार्यकारित्वमाचष्टेऽज्ञानरूपक्रियाजन्यस्यातिशयस्यावरणरूपस्यैव प्रकृते कर्मत्वात्मकत्वात्, अत एवास्य साक्षिप्रत्यक्षत्वेन स्वगोचरप्रमाणापेक्षया न निवृत्तिप्रसंग इति चेन्न मां न जानामीत्यस्य विशेषज्ञानाभावविषयत्वात्, अन्यथा मां जानामीत्यनेन विरोधात्, दृष्टश्चेत्थं न किमपि जानामीत्यादिर्मध्यस्थानां प्रयोगः । किं च विशिष्टाविशिष्टयोर्भेदाभेदाभ्युपगमं विनाऽखंडत्वादिविशिष्टचैतन्यज्ञानेन विशिष्टावरणनिवृत्तावपि शुद्धचैतन्याप्रकाशप्रसंगः, विशिष्टस्य कल्पितत्वादविशिष्टस्य चाननुभवात्, महावाक्यस्य निर्धर्मक[1]विषयत्वं चाग्रे निर्लोठयिष्यामः । एतेन जीवाश्रयं ब्रह्मविषयं चाज्ञानमिति वाचस्पतिमिश्राभ्युपगमोऽपि निरस्तः।जीवब्रह्मणोरपि कल्पितभेदत्वात्, व्यावहारिकभेदेऽपि जीवनिष्ठाविद्यया तत्रैव प्रपंचोत्पत्तिप्रसंगात् । न चाहंकारादिप्रपंचोत्पत्तिस्तत्रेष्टैवाकाशादिप्रपंचोत्पत्तिस्तु विषयपक्षपातिन्या अविद्याया ईश्वरेऽस-

१ निर्धर्मकब्रह्मविषयत्वम् ।

त्वेन तत्रैव युक्तेत्यपि सांप्रतं, अज्ञातब्रह्मण एवैतन्मते ईश्वरत्वेऽप्यज्ञातशुक्ते रजतोपादानत्ववत्तस्याकाशादिप्रपंचोपादानत्वाभिधानासंभवात्, रजतस्थले हीदमंशावच्छेदेन रजतज्ञानमिदमंशावच्छेदेन रजतोत्पादकमिति त्वया क्लृप्तं। शुक्त्यज्ञानं त्वदूरविप्रकर्षेण, तथा प्रकृते तु ब्रह्मण्यवच्छेदासंभवान्न किंचिदेतत्, अवच्छेदानियमेन हेतुत्वे चाहंकारादेरपीश्वरे उत्पत्तिप्रसंगादिति किमतिप्रसंगेन, तस्मादनेकान्तवादाश्रयादेव केवलज्ञानावरणेनावृतोऽप्यनन्ततमभागावशिष्टोऽनावृत एव ज्ञानस्वभावः सामान्यत एकोऽप्यनन्तपर्यायकर्मीरितमूर्तिर्मन्दप्रकाशनामधेयो नानुपपन्नः, स चापान्तरालावस्थितमतिज्ञानाद्यावरणक्षयोपशमभेदसंपादितं नानात्वं भजते, घनपटलाच्छन्नरवेर्मन्दप्रकाश इवान्तरालस्थकटकुड्याद्यावरणक्षयोपशमभेदसंपादितविवरप्रवेशात्। इत्थं च जन्मादिपर्यायवदात्मस्वभावत्वेऽपि मतिज्ञानादिरूपमन्दप्रकाशस्योपाधिभेदसंपादितसत्ताकत्वेनोपाधिविगमे तद्विगमसंभवान्न कैवल्यस्वभावानुपपत्तिरिति महाभाष्यकारः, अत एव द्वितीयापूर्वकरणे तात्त्विकधर्मसन्न्यासलाभे क्षायोपशमिकाः क्षमादिधर्मा अप्यपगच्छन्तीति तत्र तत्र हरिभद्राचार्यैर्निरूपितम्। निरूपितं च योगयत्नकर्मनिर्जरणहेतुफलसंबन्धनियतसत्ताकस्य क्षायिकस्यापि चारित्रधर्मस्य मुक्तावनवस्थानम्। न च वक्तव्यं केवलज्ञानावरणेन बलीयसावरीतुमशक्यस्यानन्ततमभागस्य दुर्बलेन मतिज्ञानावरणादिना नावरणसंभव इति, कर्मणः स्वावार्यावारकतायां सर्वघातिरसस्पर्धकोदयस्यैव बलत्वात्, तस्य च मतिज्ञानावरणादिप्रकृतिष्वप्यविशिष्टत्वात्। कथं तर्हि क्षयोपशम इति चेदत्रेयमर्हन्मतोपनिषद्वेदिनां प्रक्रिया—इह हि कर्मणां प्रत्येकमनन्तानन्तानि रससपर्धकानि भवन्ति, तत्र केवलज्ञानावरणकेवलदर्शनावरणाद्यद्वादशकषायमिथ्यात्वनिद्रालक्षणानां विंशतेः प्रकृतीनां सर्वघातिनीनां सर्वाण्यपि रसस्पर्धकानि

सर्वघातीन्येव भवन्ति, उक्तशेषाणां पंचविंशतिघातिप्रकृतीनां देशघातिनीनां रसस्पर्धकानि यानि चतुःस्थानकानि यानि च त्रिस्थानकानि तानि सर्वघातीन्येव, द्विस्थानकानि तु कानिचित् सर्वघातीनि कानिचिच्च देशघातीनि, एकस्थानकानि तु सर्वाण्यपि देशघातीन्येव। तत्र ज्ञानावरणचतुष्कदर्शनावरणत्रयसंज्वलनचतुष्कान्तरायपंचकपुंवेदलक्षणानां सप्तदशप्रकृतीनामेकद्वित्रिचतुःस्थानकरसा बन्धमाश्रित्य प्राप्यन्ते, श्रेणिप्रतिपत्तेरर्वागासां द्विस्थानकस्य त्रिस्थानकस्य चतुःस्थानकस्य वा रसस्य बन्धात्। श्रेणिप्रतिपत्तौ त्वनिवृत्तिबादराद्धायाः संख्येयेषु भागेषु गतेष्वत्यन्तविशुद्धाध्यवसायेनाशुभत्वादासामेकस्थानकरसस्यैव बन्धात्, शेषास्तु शुभा अशुभा वा बन्धमधिकृत्य द्विस्थानकरसास्त्रिस्थानकरसाश्चतुःस्थानकरसाश्च प्राप्यन्ते, न कदाचनाप्येकस्थानकरसाः। यत उक्तं–"सप्तदशव्यतिरिक्तानां हास्याद्यानामशुभप्रकृतीनामेकस्थानकरसबन्धयोग्या शुद्धिरपूर्वकरणप्रमत्ताप्रमत्तानां भवत्येव न, यदा त्वेकस्थानकरसबन्धयोग्या परमप्रकर्षप्राप्ता शुद्धिरनिवृत्तिबादराद्धायाः संख्येयेभ्यो भागेभ्यः परतो जायते, तदा बन्धमेव न ता आयान्तीति"। न च यथा श्रेण्यारोहेऽनिवृत्तिबादराद्धायाः संख्येयेषु भागेषु गतेषु परतोऽतिविशुद्धत्वान्मतिज्ञानावरणादीनामेकस्थानकरसबन्धः, तथा क्षपकश्रेण्यारोहे सूक्ष्मसंपरायस्य चरमद्विचरमादिसमयेषु वर्तमानस्यातीव विशुद्धत्वात् केवलद्विकस्य संभवद्बन्धस्यैकस्थानकरसबन्धः कथं न भवतीति शंकनीयम्। स्वल्पस्यापि केवलद्विकरसस्य सर्वघातित्वात्, सर्वघातिनां च जघन्यपदेऽपि द्विस्थानकरसस्यैवसंभवात्, शुभानामपि प्रकृतीनामत्यन्तशुद्धौ वर्तमानश्चतुःस्थानकमेव रसं बध्नाति, ततो मन्दमन्दतरविशुद्धौ तु त्रिस्थानकं द्विस्थानकं वा, संक्लेशाद्धायां वर्तमानस्तु शुभप्रकृतीरेव न बध्नातीति कुतस्तद्गतरसस्थानकचिन्ता। यास्त्वतिसंक्लिष्टे

मिथ्यादृष्टौ नरकगतिप्रायोग्या वैक्रियतैजसाद्याः शुभप्रकृतयो बन्धमायान्ति, तासामपि तथास्वाभाव्याज्जघन्यतोऽपि द्विस्थानक एव रसो बन्धमायाति नैकस्थानक इति ध्येयम् । ननूत्कृष्टस्थितिमात्रं संक्लेशोत्कर्षेण भवति, ततो यैरध्यवसायैः शुभप्रकृतीनामुत्कृष्टा स्थितिर्भवति तैरेवैकस्थानकोऽपि रसः किं न स्यादिति चेदुच्यते–इह हि प्रथमस्थितेरारभ्य समयवृद्ध्याऽसंख्येयाः स्थितिविशेषा भवन्ति, एकैकस्यां च स्थितावसंख्येया रसस्पर्धकसंघातविशेषाः, तत उत्कृष्टस्थितौ बध्यमानायां प्रतिस्थितिविशेषमसंख्येया ये रसस्पर्धकसंघातविशेषास्ते तावन्तो द्विस्थानकरसस्यैव घटन्ते नैकस्थानकस्येति न शुभप्रकृतीनामुत्कृष्टस्थितिबन्धेऽप्येकस्थानकरसबन्धः । उक्तं च–"उक्कोसठिई अज्झवसाणेहिं एगठाणिउ होइ । सुभिआण तं न जं ठिइ असंखगुणिआ उ अणुभागा ॥ १ ॥ इति" । एवं स्थिते देशघातिनामवधिज्ञानावरणादीनां सर्वघातिरसस्पर्धकेषु विशुद्धाध्यवसायतो देशघातितया परिणमनेन निहतेषु, देशघातिरसस्पर्धकेषु चातिस्निग्धेष्वल्परसीकृतेषु, तदन्तर्गतकतिपयरसस्पर्धकभागस्योदयावलिकाप्रविष्टस्य क्षये, शेषस्य च विपाकोदयविष्कंभलक्षणे उपशमे, जीवस्यावधिमनःपर्यायज्ञानचक्षुर्दर्शनादयो गुणाः क्षायोपशमिकाः प्रादुर्भवन्ति । तदुक्तम्–"णिहएसु सव्वघाइरसेसु फड्डेसु देसघाईणं । जीवस्स गुणा जायंति ओहिमणचक्खुमाईआ ॥१॥" निहतेषु देशघातितया परिणमितेषु तदावधिज्ञानावरणादीनां कतिपयदेशघातिरसस्पर्धकक्षयोपशमात् कतिपयदेशघातिरसस्पर्धकानां चोदयात् क्षयोपशमानुविद्ध औदयिको भावः प्रवर्तते, अत एवोदीयमानांशक्षयोपशमवृद्ध्या वर्धमानावधिज्ञानोपपत्तिः । यदा चावधिज्ञानावरणादीनां सर्वघातीनि रसस्पर्धकानि विपाकोदयमागतानि भवन्ति,तदा तद्विषय औदयिको भावः केवलः प्रवर्तते।केवलमवधिज्ञानावरणीयसर्वघातिरसस्पर्धकानां देशघातितया

परिणामः कदाचिद्विशिष्टगुणप्रतिपत्त्या कदाचिच्च तामन्तरेणैव स्यात्, भवप्रत्ययगुणप्रत्ययभेदेन तस्य द्वैविध्योपदर्शनात्।
मनःपर्यायज्ञानावरणीयस्य तु विशिष्टसंयमाप्रमादादिप्रतिपत्तावेव तथास्वभावानामेव बन्धकाले तेषां बन्धनात्, चक्षुर्दर्श-
नावरणादेरपि तत्तदिन्द्रियपर्याप्त्यादिघटितसामग्र्या तथापरिणामः। मतिश्रुतावरणाचक्षुर्दर्शनावरणान्तरायप्रकृतीनां तु
सदैव देशघातिनामेव रसस्पर्धकानामुदयो न सर्वघातिनां, ततः सदैव तासामौदयिकक्षायोपशमिकौ भावौ संमिश्रौ प्राप्येते,
न केवल औदयिक इति उक्तं पंचसंग्रहमूलटीकायाम्। एतच्च तासां सर्वघातिरसस्पर्धकानि येन तेनाध्यवसायेन देशघा-
तीनि कर्तुं शक्यन्ते इत्यभ्युपगमे सति उपपद्यतेऽन्यथा बन्धोपनीतानां मतिज्ञानावरणादिदेशघातिरसस्पर्धकानामनिवृत्ति-
बादराद्धायाः संख्येयेषु भागेषु गतेष्वेव संभवात्तदर्वाग् मतिज्ञानाद्यभावप्रसंगः, तदभावे च तद्बललभ्यतदवस्थालाभानु-
पपत्तिरित्यन्योऽन्याश्रयापातेन मतिज्ञानादीनां मूलत एवाभावप्रसंगात्। एवं मतिश्रुताज्ञानाचक्षुर्दर्शनादीनामपि क्षायो-
पशमिकत्वेन भणनात्सर्वघातिरसस्पर्धकोदये तदलाभाद्देशघातिरसस्पर्धकानां चार्वागबन्धादध्यवसायमात्रेण सर्वघातिनो
देशघातित्वपरिणामानभ्युपगमे सर्वजीवानां तल्लाभानुपपत्तिरिति भावनीयम्। ननु यदि येन तेनाध्यवसायेनोक्तरसस्पर्ध-
कानां सर्वघातिनां देशघातितया परिणामस्तदार्वाग्दशायां तद्बन्ध एव किं प्रयोजनमिति चेत्तत्किं प्रयोजनक्षतिभिया सा-
मग्री कार्यं नार्जयतीति वक्तुमध्यवसितोऽसि ?। एवं हि पूर्णे प्रयोजने दृढदंडनुन्नं चक्रं न भ्राम्येत्, तस्मात्प्रकृते हेतुस-
माजादेव सर्वघातिरसस्पर्धकबन्धौपयिकाध्यवसायेन तद्बन्धे तत्तदध्यवसायेन सर्वदा तद्देशघातित्वपरिणामे च बाधकाभा-
वः। तदेवं ज्ञानावरणदर्शनावरणान्तरायाणां विपाकोदयेऽपि क्षयोपशमोऽविरुद्ध इति स्थितम्। मोहनीयस्य तु मिथ्या-

त्वानन्तानुबन्ध्यादिप्रकृतीनां प्रदेशोदये क्षायोपशमिको भावोऽविरुद्धो, न विपाकोदये, तासां सर्वघातिनीत्वेन तद्रसस्पर्धकस्य तथाविधाध्यवसायेनापि देशघातितया परिणमयितुमशक्यत्वाद्रसस्य देशघातितया परिणामे तादात्म्येन देशघातिन्या हेतुत्वकल्पनात् । विपाकोदयविष्कंभणं तु तासु सर्वघातिरसस्पर्धकानां क्षायोपशमिकसम्यक्त्वादिलब्ध्यभिधायकसिद्धान्तबलेन क्षयोपशमान्यथानुपपत्त्यैव तथाविधाध्यवसायेन कल्पनीयम् । केवलज्ञानकेवलदर्शनावरणयोस्तु विपाकोदयविष्कंभायोग्यत्वे स्वभाव एव शरणमिति प्राञ्चः । हेत्वभावादेव तदभावस्तद्धेतुत्वेन कल्प्यमानेऽध्यवसाये तत्क्षयहेतुत्वकल्पनाया एवौचित्यादिति तु युक्तं, तस्मान्मिथ्यात्वादिप्रकृतीनां विपाकोदये न क्षयोपशमसंभवः, किं तु प्रदेशोदये । न च सर्वघातिरसस्पर्धकप्रदेशा अपि सर्वस्वघात्यगुणघातनस्वभावा इति तत्प्रदेशोदयेऽपि कथं क्षायोपशमिकभावसंभव इति वाच्यम्, तेषां सर्वघातिरसस्पर्धकप्रदेशानामध्यवसायविशेषेण मनाग्मन्दानुभावीकृतविरलवेद्यमानदेशघातिरसस्पर्धकेष्वन्तःप्रवेशितानां यथास्थितस्वबलप्रकटनासमर्थत्वात् । मिथ्यात्वाद्यद्वादशकषायरहितानां शेषमोहनीयप्रकृतीनां तु प्रदेशोदये विपाकोदये वा क्षयोपशमोऽविरुद्धः, तासां देशघातिनीत्वात्, तदीयसर्वघातिरसस्य देशघातित्वपरिणामे हेतुश्चारित्रानुगतोऽध्यवसायविशेष एव द्रष्टव्यः, परं ताः प्रकृतयोऽध्रुवोदया इति तद्विपाकोदयाभावे क्षायोपशमिकभावे विजृंभमाणे, प्रदेशोदयवत्योऽपि न ता मनागपि देशघातिन्यः । विपाकोदये तु वर्तमाने क्षायोपशमिकभावसंभवे मनाग्मालिन्यकारित्वाद्देशघातिन्यस्ता भवन्तीति संक्षेपः । विस्तरार्थिना तु मत्कृतकर्मप्रकृतिविवरणादिविशेषग्रन्था अवलोकनीयाः । उक्ता क्षयोपशमप्रक्रिया । इत्थं च सर्वघातिरसस्पर्धकवन्मतिज्ञानावरणादिक्षयोपशमजनितं मतिश्रुतावधि-

मनःपर्यायभेदाच्चतुर्विधं क्षायोपशमिकं ज्ञानं, पंचमं च क्षायिकं केवलज्ञानमिति पंचप्रकारा ज्ञानस्य । तत्र मतिज्ञानत्वं श्रुताननुसार्यनतिशयितज्ञानत्वं, अवग्रहादिक्रमवदुपयोगजन्यज्ञानत्वं वा, अवध्यादिकमतिशयितमेव, श्रुतं तु श्रुतानुसार्येवेति न तयोरतिव्याप्तिः । श्रुतानुसारित्वं च धारणात्मकपदपदार्थसंबन्धप्रतिसंधानजन्यज्ञानत्वं, तेन न सविकल्पकज्ञानसामग्रीमात्रप्रयोज्यपदविषयताशालिनीहापायधारणात्मके मतिज्ञानेऽव्याप्तिः । ईहादिमतिज्ञानभेदस्य श्रुतज्ञानस्य च साङ्कर्यत्वाविशेषेप्ययं घट इत्यपायोत्तरमयं घटनामको न वेति संशयादर्शनात्, तत्तन्नाम्नोऽप्यपायेन ग्रहणात्, तद्धारणोपयोगे इदं पदमस्य वाचकं, अयमर्थ एतत्पदस्य वाच्य इति पदपदार्थसंबन्धग्रहस्यापि ध्रौव्येण, तज्जनितश्रुतज्ञानस्यैव श्रुतानुसारित्वव्यवस्थितेः । अत एव धारणात्वेन श्रुतहेतुत्वात् "मइपुव्वं सुअं" इत्यनेन श्रुतत्वावच्छेदेन मतिपूर्वत्वविधिः, " न मई सुअपुव्विया" इत्यनेन च मतित्वसामानाधिकरण्येन श्रुतपूर्वत्वनिषेधोऽभिहितः संगच्छते । कथं तर्हि श्रुतनिश्रिताश्रुतनिश्रितभेदेन मतिज्ञानद्वैविध्याभिधानमिति चेदुच्यते—स्वसमानाकारश्रुतज्ञानाहितवासनाप्रबोधसमानकालीनत्वे सति श्रुतोपयोगाभावकालीनं श्रुतनिश्रितमवग्रहादिचतुर्भेदं, उक्तवासनाप्रबोधो धारणादार्ढ्यायोपयुज्यते, श्रुतोपयोगाभावश्च मतिज्ञानसामग्रीसंपादनाय, उक्तवासनाप्रबोधकाले श्रुतज्ञानोपयोगबलाच्छ्रुतज्ञानस्यैवापत्तेः, मतिज्ञानसामग्र्याः श्रुतज्ञानोत्पत्तिप्रतिबन्धकत्वेऽपि शाब्देच्छास्थानीयस्य तस्योत्तेजकत्वात् । मतिज्ञानजन्यस्मरणस्य मतिज्ञानत्ववत्, श्रुतज्ञानजन्यस्मरणमपि च श्रुतज्ञानमध्य एव परिगणनीयम् । उक्तवासनाप्रबोधासमानकालीनं च मतिज्ञानमौत्पत्तिक्यादिचतुर्भेदमश्रुतनिश्रितमित्यभिप्रायेण द्विविधभागे दोषाभावः । तदिदमाह महाभाष्यकारः—"पुव्विं सुअपरिकम्मियमइस्स जं संपयं सुआईअं । तं

णिस्सियमियरं पुण अणिस्सिअं मइचउक्कं तं ॥ १ ॥ इति"। अपूर्वचैत्रादिव्यक्तिबुद्धौ त्वौत्पत्तिकीत्वमेवाश्रयणीयम्। ऐन्द्रियकश्रुतज्ञानसामान्ये धारणात्वेन, तदिन्द्रियजन्यश्रुते तदिन्द्रियजन्यधारणात्वेनैव वा, हेतुत्वात्। प्रागनुपलब्धेऽर्थे श्रुतज्ञानाहितवासनाप्रबोधाभावेन श्रुतनिश्रितज्ञानासंभवात्, धारणायाः श्रुतहेतुत्व एव च मतिश्रुतयोर्लब्धियौगपद्येऽप्युपयोगक्रमः संगच्छते, प्रागुपलब्धार्थस्य चोपलंभे धारणाहितश्रुतज्ञानाहितवासनाप्रबोधान्वयाच्छ्रुतनिश्रितत्वमावश्यकं, धारणादिरहितानामेकेन्द्रियादीनां त्वाहारादिसंज्ञान्यथानुपपत्त्यान्तर्जल्पाकारविवक्षितार्थवाचकं शब्दसंस्पृष्टार्थज्ञानरूपं श्रुतज्ञानं क्षयोपशममात्रजनितं जात्यन्तरमेव, आप्तोक्तस्य शब्दस्योहाख्यप्रमाणेन पदपदार्थशक्तिग्रहानन्तरमाकांक्षाज्ञानादिसाचिव्येन जायमानं तु ज्ञानं स्पष्टधारणाप्रायमेव, शाब्दबोधपरिकरीभूतश्च यावान् प्रमाणान्तरोत्थापितोऽपि बोधः सोऽपि सर्वः श्रुतमेव। अत एव पदार्थवाक्यार्थमहावाक्यार्थैदंपर्यार्थभेदेन चतुर्विधवाक्यार्थज्ञाने ऐदंपर्यार्थनिश्चयपर्यन्तं श्रुतोपयोगव्यापारात् सर्वत्र श्रुतत्वमेवेत्यभियुक्तैरुक्तमुपदेशपदादौ। तत्र "सव्वे पाणा सव्वे भूआ ण हंतव्वा" इत्यादौ यथाश्रुतमात्रप्रतीतिः पदार्थबोधः। एवं सति हिंसात्वावच्छेदेनानिष्टसाधनत्वप्रतीतेराहारविहारदेवार्चनादिकमपि प्राणोपघातहेतुत्वेन हिंसारूपत्वादकर्तव्यं स्यादिति वाक्यार्थबोधः। यतनया क्रियमाणा आहारविहारादिक्रिया न पापसाधनानि, चित्तशुद्धिफलत्वात्, अयतनया क्रियमाणं तु सर्वं हिंसान्तर्भावात् पापसाधनमेवेति महावाक्यार्थबोधः। आज्ञैव धर्मे सार इत्यपवादस्थलेऽपि गीतार्थयतनाकृतयोगिकारणपदैर्निषिद्धस्याप्यदुष्टत्वं, विहितक्रियामात्रे च स्वरूपहिंसासंभवेऽप्यनुबन्धहिंसाया अभावान्न दोषलेशस्याप्यवकाश इत्यैदंपर्यार्थबोधः। एतेषु सर्वेष्वेकदीर्घोपयोगव्यापारान्न श्रुतान्यज्ञानशंका, ऐदंपर्यबोधस्

क्षणफलव्याप्यतयैव श्रुतस्य लोकोत्तरप्रामाण्यव्यवस्थितेर्वाक्येऽपि क्रमिकतावद्बोधजनके तथात्वव्युत्पत्तिप्रतिसंधानवति व्युत्पत्तिमति पुरुषे न विरम्यव्यापारादिदूषणावकाशः।सोऽयमिषोरिव दीर्घदीर्घतरो व्यापारो, यत्परः शब्दः स शब्दार्थ इति नयाश्रयणात् । एतेन न हिंस्यादित्यादिनिषेधविधौ विशेषविधिबाधपर्यालोचनयाऽनुमितौ व्यापकतानवच्छेदकेनापि विशेषरूपेण व्यापकस्येव, शाब्दबोधे तत्तद्विहितेतरहिंसात्वेन वृत्त्यनवच्छेदकरूपेणापि निषेध्यस्य प्रवेश इति निरस्तम् । उक्तबाधपर्यालोचनस्य प्रकृतोपयोगान्तर्भावेऽस्मदुक्तप्रकारस्यैव साम्राज्यात्, तदनन्तर्भावे च तस्य सामान्यवाक्यार्थबोधेन सह मिलनाभावेन विशेषपर्यवसायकत्वासंभवात् । अव्यवहितद्वित्रक्षणमध्ये एकविशेषबाधप्रतिसन्धानमेव सामान्यवाक्यार्थस्य तदितरविशेषपर्यवसायकमिति कल्पनायां न दोष इति चेन्न, द्वित्रक्षणाननुगमात्, पटुसंस्कारस्य पंचषक्षणव्यवधानेऽपि फलोत्पत्तेश्च, संस्कारपाटवस्यैवानुगतस्यानुसरणौचित्यात्, तच्च गृहीतेऽर्थे मतिश्रुतसाधारणविचारणोपयोग एवोपयुज्यते, अत एव सामान्यनिषेधज्ञाने विरोधसंबन्धेन विशेषविधिस्मृतावपि विचारणया तदितरविशेषपर्यवसानम् । अपि च 'स्वर्गकामो यजेत' इत्यत्र यथा परेषां प्रथमं स्वर्गत्वसामानाधिकरण्येनैव यागकार्यताग्रहोऽनन्तरं चानुगताननतिप्रसक्तकार्यगतजातिविशेषकल्पनं, तथा प्रकृतेऽपि हिंसात्वसामानाधिकरण्येन पापजनकत्वबोधेऽनन्तरं तद्गतहेतुतावच्छेदकानुगताननतिप्रसक्तरूपं कल्पने किं बाधकं, सर्वशब्दबलेन हिंसासामान्योपस्थितावपि तद्गतहेतुस्वरूपानुबन्धकृतविशेषस्य कल्पनीयत्वात् । सैव च कल्पना वाक्यार्थबोधात्मिकेति न तदुच्छेदः । किं च पदार्थबोधाद्धिंसासामान्येऽनिष्टसाधनत्वग्रहे आहारविहारादिक्रियास्वनिष्टसाधनत्वव्याप्यहिंसात्वारोपेणानिष्टसाधनत्वारोपलक्षणतर्कात्मक एव वाक्यार्थबोधः, तस्य युक्त्या

॥ १३७ ॥

विपर्ययपर्यवसानात्मको महावाक्यार्थबोधः, ततो हेतुस्वरूपानुबन्धत्रयविषय एव हिंसापदार्थ इत्यैदंपर्यार्थबोधः, इत्येते बोधा अनुभवसिद्धत्वादेव दुर्वाराः। श्रुतज्ञानमूलोहादेश्च श्रुतत्वं मतिज्ञानमूलोहादेर्मतिज्ञानत्ववदेवाभ्युपेयम्। अत एव श्रुतज्ञानाभ्यन्तरीभूतमतिविशेषैरेव षट्स्थानपतितत्वं चतुर्दशपूर्वविदामप्याचक्षते संप्रदायवृद्धाः। तथा चोक्तं कल्पभाष्ये—"अक्खरलंभेण समा ऊणहिया हुंति मइविसेसेहिं। ते वि य मईविसेसा सुअनाणब्भंतरे जाण॥१॥" यदि च सामान्यश्रुतज्ञानस्य विशेषपर्यवसायकत्वमेव मतिज्ञानस्य श्रुतज्ञानाभ्यन्तरीभूतत्वमुपयोगविच्छेदेऽप्येकोपयोगव्यवहारश्च फलप्राधान्यादेवेति विभाव्यते, तदा पदार्थं बोधयित्वा विरतं वाक्यं वाक्यार्थबोधादिरूपविचारसहकृतमावृत्त्या विशेषं बोधयदैदंपर्यार्थकत्वव्यपदेशं लभत इति मन्तव्यम्। परं शब्दसंसृष्टार्थग्रहणव्यापृतत्वे पदपदार्थसंबन्धग्राहकोहादिवत्तस्य कथं न श्रुतत्वम्? शब्दसंसृष्टार्थग्रहणहेतुरुपलब्धिविशेषो धारणसमानपरिणामः श्रुतमिति नन्दिवृत्त्यादौ दर्शनात् "सोइंदिउवलद्धी होइ सुअं सेसयं तु मइनाणं। मोत्तूणं दव्वसुअं अक्खरलंभो अ सेसेसु॥१॥ इति पूर्वगतगाथायामप्ययमेव स्वरसो लभ्यते। तथा चास्यार्थः—श्रोत्रेन्द्रियेणोपलब्धिरेव श्रुतमित्यवधारणं, न तु श्रोत्रेन्द्रियेणोपलब्धिः श्रुतमेवेति। अवग्रहेहादिरूपायाः श्रोत्रेन्द्रियोपलब्धेरपि मतिज्ञानरूपत्वात्। यद्भाष्यकारः—"सोइंदिउवलद्धी चेव सुअं न उ मइ सुअं चेव। सोइंदिउवलद्धिवि काई जम्हा मइन्नाणं" शेषं तु यच्चक्षुरादीन्द्रियोपलब्धिरूपं तन्मतिज्ञानं, तुशब्दोऽनुक्तसमुच्चयार्थः, स चावग्रहेहादिरूपां श्रोत्रेन्द्रियोपलब्धिमपि समुच्चिनोति, यद्भाष्यकारः—"तु समुच्चयवयणाउ काई सोइंदिउवलद्धीवि। मइ एवं सइ सोउग्गहादउ होंति मइभेया" ॥१॥ अपवादमाह—मुक्त्वा द्रव्यश्रुतं पुस्तकपत्रादिन्यस्ताक्षररूपं, तदाहितायाः शब्दार्थपर्यालोचनात्मिकायाः शेषेन्द्रियोपलब्धे-

रपि श्रुतत्वात् । अक्षरलाभश्च यः शेषेष्वपीन्द्रियेषु शब्दार्थपर्यालोचनात्मकः, न तु केवलः, तस्येहादिरूपत्वात्, तमपि मुक्त्वेति सोपस्कारं व्याख्येयम् । नन्वेवं शेषेन्द्रियेष्वप्यक्षरलाभस्य श्रुतत्वोक्तेः श्रोत्रेन्द्रियोपलब्धिरेव श्रुतमिति प्रतिज्ञा विशीर्येत, मैवम् ,तस्यापि श्रोत्रेन्द्रियोपलब्धिकल्पत्वादिति बहवः। श्रोत्रेन्द्रियोपलब्धिपदेन श्रोत्रेन्द्रियजन्यव्यंजनाक्षरज्ञानाहिता शाब्दी बुद्धिः, द्रव्यश्रुतपदेन च चक्षुरादीन्द्रियजन्यसंज्ञाक्षरज्ञानाहिता सा,अक्षरलाभपदेन च तदतिरिक्तश्रुतज्ञानावरणकर्मक्षयोपशमजनिता बुद्धिर्गृह्यत इति । सर्वसाधारणो धारणाप्रायज्ञानवृत्तिः शब्दसंसृष्टार्थाकारविशेष एवानुगतलक्षणम् । त्रिविधाक्षरश्रुताभिधानप्रस्तावेऽपि संज्ञाव्यंजनयोर्द्रव्यश्रुतत्वेन,लब्धिपदस्य चोपयोगार्थत्वेन व्याख्यानात् । तत्र चानुगतमुक्तमेव लक्षणमिति । इह गोवृषन्यायेन त्रिविधोपलब्धिरूपभावश्रुतग्रहणमिति त्वस्माकमाभाति । अवग्रहादिक्रमवदुपयोगत्वेनापि च मतिज्ञान एव जनकता, न श्रुतज्ञाने, तत्र शाब्दोपयोगत्वेनैव हेतुत्वात्, मतिज्ञाने च—नानवगृहीतमीह्यते, नानीहितमपेयते, नानपेतं च धार्यते, इति क्रमनिबन्धनमन्वयव्यतिरेकनियममामनन्ति मनीषिणः । तत्रावग्रहस्येहायां धर्मिज्ञानत्वेन,तदवान्तरधर्माकारेहायां तत् सामान्यज्ञानत्वेन वा । ईहायाश्च तद्धर्मप्रकारतानिरूपिततद्धर्मिनिष्ठसिद्धत्वाख्यविषयतावदपायत्वावच्छिन्ने तद्धर्मप्रकारतानिरूपिततद्धर्मिनिष्ठसाध्यत्वाख्यविषयतावदीहात्वेन, घटाकारावच्छिन्नसिद्धत्वाख्यविषयतावदपायत्वावच्छिन्ने तादृशसाध्यत्वाख्यविषयतावदीहात्वेन वा, धारणायां चापायस्य समानप्रकारकानुभवत्वेन, विशिष्टभेदे समानविषयकानुभवत्वेन वा कार्यकारणभावः । तत्रावग्रहो द्विविधो व्यंजनावग्रहार्थावग्रहभेदात् । तत्र व्यंजनेन शब्दादिपरिणतद्रव्यनिकुरंबेण व्यंजनस्य श्रोत्रेन्द्रियादेरवग्रहः संबन्धो व्यंजनावग्रहः, स च मल्लकप्रतिबोधकदृष्टा-

न्ताभ्यां सूत्रोक्ताभ्यामसंख्येयसमयभावी । तस्यामप्यवस्थायामव्यक्ता ज्ञानमात्रा, प्रथमसमयेंऽशेनाभवतश्चरमसमये भवनान्यथानुपपत्त्या भाष्यकृता प्रतिपादिता। युक्तं चैतत्, निश्चयतोऽविकलकारणस्यैव कार्योत्पत्तिव्याप्यत्वाद्, अविकलं च कारणं ज्ञाने उपयोगेन्द्रियमेव, तच्च व्यंजनावग्रहकाले लब्धसत्ताकं कथं न स्वकार्यं ज्ञानं जनयेदिति अयमुपयोगस्य कारणांशः। ननु व्यंजनावग्रहः प्राप्यकारिणामेवेन्द्रियाणामुक्तो नाप्राप्यकारिणोश्चक्षुर्मनसोरिति तत्र कः कारणांशो वाच्यः ? यद्यर्थावग्रहस्तर्हि सर्वत्र स एवास्त्विति चेन्न, तत्राप्यर्थावग्रहात्प्राग् लब्धीन्द्रियस्य ग्रहणोन्मुखपरिणाम एवोपयोगस्य कारणांश इत्यभ्युपगमात् । न च सर्वत्रैकस्यैवाश्रयणमिति युक्तम्, इन्द्रियाणां प्राप्यकारित्वाप्राप्यकारित्वव्यवस्थाप्रयुक्तस्य ह्रस्वदीर्घकारणांशभेदस्यागमयुक्त्युपपन्नत्वेन प्रतिबन्दिपर्यनुयोगानवकाशात् । अर्थावग्रहः सामान्यमात्रग्रहः, यतः किंचिद्दृष्टं, मया न तु परिभावितमिति व्यवहारः, स चैकसामयिकः, तत ईहोपयोग आन्तमौंहूर्तिकः प्रवर्तते, स च सद्भूतासद्भूतविशेषोपादानत्यागाभिमुखबहुविचारणात्मकः पर्यन्ते तत्तत्प्रकारेण धर्मिणि साध्यत्वाख्यविषयताफलवान् भवति । अत एव फलप्रवृत्तौ ज्ञानप्रामाण्यसंशयवत्करणप्रवृत्तावपीन्द्रियादिगतगुणदोषसंशयेन विषयसंशयादिन्द्रियसाद्गुण्यविचारणमपीहयैव जन्यते, केवलमभ्यासदशायां तज्झटिति जायमानत्वात् कालसौक्ष्म्येण नोपलक्ष्यते, अनभ्यासदशायां तु वैपरीत्येन स्फुटमुपलक्ष्यत इति मलयगिरिप्रभृतयो वदन्ति । एवं सति स्वजन्यापाये सर्वत्रार्थयाथात्म्यनिश्चयस्येहयैव जन्यमानत्वात्तदुभयमुत्पत्तौ परत एव, ज्ञप्तौ तु स्वतः परतश्चेत्याकरसूत्रं विरुध्येत, तदुभयं प्रामाण्यमप्रामाण्यं च, परत एवेति कारणगतगुणदोषापेक्षयेत्यर्थः, स्वतः परतश्चेति, संवादकबाधकज्ञानानपेक्षया जायमानत्वं स्वतस्त्वं, तच्चाभ्यासदशायां, केवलक्ष्यो-

पशमस्यैव तत्र व्यापारात्, तदपेक्षया जायमानत्वं च परतस्त्वं, तच्चानभ्यासदशायां, अयं च विभागो विषयापेक्षया, स्वरूपे तु सर्वत्र स्वत एव प्रामाण्यनिश्चय इत्यक्षरार्थ इति । ईहयैव हि सर्वत्र प्रामाण्यनिश्चयाभ्युपगमे किं संवादकप्रत्ययापेक्षया, न खल्वेकं गमकमपेक्षितमिति गमकान्तरमप्यपेक्षणीयम् । न चेहाया बहुविधत्वाद्यत्र न करणसाद्गुण्यविचारस्तत्रैवोक्तस्वतस्त्वपरतस्त्वव्यवस्थेति वाच्यम्, ईहायां क्वचिदुक्तविचारव्यभिचारोपगमे आभ्यासिकापायपूर्वेहायामनुपलक्ष्यमाणस्यापि तद्विचारस्य निरनुपपत्तेः[1] । न चोक्तविचार ईहायां प्रमाजनकतावच्छेदको, न तु तज्ज्ञप्तिजनकतावच्छेदक इत्यपि युक्तम्, करणगुणादेव प्रमोत्पत्तौ तस्यातथात्वात् । न च भाविज्ञानस्यासिद्धत्वादुक्तविचारवत्यापीहया तद्गतप्रामाण्याग्रह इत्यपि सांप्रतम्, विचारेण करणसाद्गुण्यग्रहे भाविज्ञानप्रामाण्यग्रहस्यापि संभृतसामग्रीकत्वादित्यादिविचारणीयम् । ननु भवतां सैद्धान्तिकमते उपयोगेऽवग्रहादिवृत्तिचतुष्टयव्याप्यत्वं, एकत्र वस्तुनि प्राधान्येन सामान्यविशेषोभयावगाहित्वपर्याप्त्याधारत्वं वा, तार्किकमते च प्रमेयाव्यभिचारित्वं प्रामाण्यमयोग्यत्वादभ्यासेनापि दुर्ग्रहं, समर्थप्रवृत्त्यनौपयिकत्वेनानुपादेयं । पौद्गलिकसम्यक्त्ववतां सम्यक्त्वदलिकान्वितोऽपायांशः प्रमाणं, क्षायिकसम्यक्त्ववतां च केवलोऽपायांश इति तत्त्वार्थवृत्त्यादिवचनतात्पर्यपर्यालोचनायां तु सम्यक्त्वसमानाधिकरणापायत्वं ज्ञानस्य प्रामाण्यं पर्यवस्यति, अन्यथाऽननुगमात्, तत्र च विशेषणविशेष्यभावे विनिगमनाविरहः । ज्ञानं प्रमाण (मिति) वचनं विनिगमकमिति चेत्तदपि समर्थप्रवृत्त्यौपयिकेन रूपेण विनिगमयेत्, न तु विशिष्टापायत्वेनानीदृशेन, सम्यक्त्वानुगतत्वेन ज्ञानस्य ज्ञानत्वं, अन्यथा त्वज्ञानत्वमिति व्यवस्था तु नापायमात्रप्रामाण्यसाक्षिणी, सम्यग्दृष्टिसंबन्धिनां ॥ १३९॥

१ नियमकल्पनानुपपत्तेः ।

संशयादीनामपि ज्ञानत्वस्य महाभाष्यकृता परिभाषितत्वात् । न च सम्यक्त्वसाहित्येन ज्ञानस्य रुचिरूपत्वं संपद्यते, रुचिरूपं च ज्ञानं प्रमाणमिति सम्यक्त्वविशेषणोपादानं फलवदित्यपि सांप्रतम्, एतस्य व्यवहारोपयोगित्वेऽपि प्रवृत्त्यनुपयोगित्वात् । न च घटाद्यपायरूपा रुचिरपि सम्यक्त्वमिति व्यवहरन्ति सैद्धान्तिकाः, जीवाजीवादिपदार्थनवकविषयकसमूहालंबनज्ञानविशेषस्यैव रुचिरूपतयाम्नातत्वात्, केवलं सत्संख्यादिमार्गणास्थानैस्तन्निर्णयो भावसम्यक्त्वं, सामान्यतस्तु द्रव्यसम्यक्त्वमिति विशेष इति । न च घटाद्यपायेऽपि रुचिरूपत्वमिष्टमेव, सदसद्विशेषणाविशेषणादिना सर्वत्र ज्ञानाज्ञानव्यवस्थाकथनात्, तदेव च प्रामाण्यमप्रत्यूहमिति वाच्यं, अनेकान्तव्यापकत्वादिप्रतिसंधानाहितवासनावतामेताद्दशबोधसंभवात्, तदन्येषां तु द्रव्यसम्यक्त्वेनैव ज्ञानसद्भावव्यवस्थितेः । अत एव चरणकरणप्रधानानामपि स्वसमयपरसमयमुक्तव्यापाराणां द्रव्यसम्यक्त्वेन चारित्रव्यवस्थितावपि भावसम्यक्त्वाभावः प्रतिपादितः संमतौ महावादिना । द्रव्यसम्यक्त्वं च, "तदेव सत्यं निःशंकं यज्जिनेन्द्रैः प्रवेदितमिति" ज्ञानाहितवासनारूपं, माषतुषाद्यनुरोधाद्गुरुपारतंत्र्यरूपं वेत्यन्यदेतत् । तस्मान्नैते प्रामाण्यप्रकाराः प्रवृत्त्यौपयोगिकाः । तद्वति तत्प्रकारकत्वरूपं ज्ञानप्रामाण्यं तु प्रवृत्त्यौपयिकमवशिष्यते, तस्य च स्वतो ग्राह्यत्वमेवोचितम् । न्यायनयेऽपि ज्ञाने पुरोवर्तिविशेष्यताकत्वस्य रजतत्वादिप्रकारकत्वस्य चानुव्यवसायग्राह्यतायामविवादात्, इमं रजतत्वेन जानामीति प्रत्ययात्,तत्र विशेष्यत्वप्रकारत्वयोरेव द्वितीयातृतीयार्थत्वात्, तत्र पुरोवर्ति इदंत्वेन रजतत्वादिनापि चोपनयवशाद्भासतां । न चेदंत्ववैशिष्ट्यं पुरोवर्तिनि न भासत इति वाच्यं, विशेष्यतायां पुरोवर्तिनः स्वरूपतो भानानुपपत्तेः ताद्दशविशेषणज्ञानाभावात्, अन्यथा प्रमेयत्वादिना रजतादिज्ञानेऽपि तथाज्ञानापत्तेः,

जात्यतिरिक्तस्य किंचिद्धर्मप्रकारेणैव ज्ञाननियमाच्च । किं च प्रामाण्यसंशयोत्तरमिदं रजतं न वेत्येव संशयो, न तु रजतमिदं न वा, द्रव्यं रजतं न वेत्यादिरूप इति, यद्विशेष्यकयत्प्रकारकज्ञानत्वावच्छेदेन प्रामाण्यसंशयस्तद्धर्मविशिष्टे तत्प्रकारकसंशय इति नियमादिदंत्वेन धर्मिज्ञानमावश्यकं, इदंत्वरजतत्वादिना पुरोवर्तिन उपनयसत्त्वाच्च तथाज्ञानमनुव्यवसाये दुर्वारमिति किमपरमवशिष्यते प्रामाण्ये ज्ञातुम् । न चैकसंबन्धेन तद्वति संबन्धान्तरेण तत्प्रकारकज्ञानं व्यावृत्तं, तेन संबन्धेन तत्प्रकारकत्वमेव प्रामाण्यं, तच्च दुर्ग्रहमिति वाच्यं, व्यवसाये येन संबन्धेन रजतत्वादिकं प्रकारस्तेन तद्वतोऽनुव्यवसाये ज्ञानात्, संसर्गस्य (तु) तत्त्वेनैव ज्ञानात् । तत्प्रकारकत्वं च वस्तुगत्या तत्संबन्धावच्छिन्नप्रकारताकत्वमिति प्रकारताकुक्षिप्रवेशेनैव वा तज्ज्ञानम् । अत एवेदं रजतमिति तादात्म्यारोपव्यावृत्तये मुख्यविशेष्यता प्रामाण्ये निवेशनीयेति मुख्यत्वस्य दुर्ग्रहत्वमित्युक्तेरप्यनवकाशो, वस्तुगत्या मुख्यविशेष्यताया एव निवेशात्, तादात्म्यारोपे आरोप्यांशे समवायेन प्रामाण्यसत्त्वेऽप्यक्षतेश्च । एतेन तद्विशेष्यकत्वे सति तत्प्रकारकत्वमात्रं न प्रामाण्यं, 'इमे रंगरजते' 'नेमे रंगरजते' इति विपरीतचतुष्कभ्रमसाधारण्यात्, किं तु तद्वद्विशेष्यकत्वावच्छिन्नतत्प्रकारकत्वं, तच्च प्रथमानुव्यवसाये दुर्ग्रहमित्यपि निरस्तम् । वस्तुगत्या तादृशप्रकारताकत्वस्य सुग्रहत्वादेव, तद्ग्रहेऽनुव्यवसायसामग्र्याऽसामर्थ्यस्य, व्यवसायप्रतिबन्धकत्वस्य वा कल्पनमज्ञिनिवेशेन स्वबुद्धिविडम्बनामात्रं, तथाकल्पनायामप्रामाणिकगौरवात् । एतेन विधेयतयाऽनुव्यवसाये स्वातंत्र्येण प्रामाण्यज्ञाने व्यवसायप्रतिबन्धकत्वकल्पनापि परास्ता । तत्र तद्वद्विशेष्यकतोपस्थितितदभाववद्विशेष्यकत्वाभावोपस्थित्यादीनामुत्तेजकत्वादिकल्पने महागौरवात् । यदि च विशेष्यत्वादिकमनुपस्थितं न प्रकारः, तदा विशेष्यतासंबन्धेन रजतादिमत्त्वे सति प्रकारि

तया रजतत्वादिमत्त्वमेव प्रामाण्यमस्तु । एतज्ज्ञानमेव लाघवात्प्रवृत्त्यौपयिकं । तस्माज्ज्ञप्तौ प्रामाण्यस्य स्वतस्त्वमेव युक्तम् । अप्रामाण्यं तु नानुव्यवसायग्राह्यं, रजतत्वाभाववत्त्वेन पुरोवर्तिनोऽग्रहणे तथोपनीतभानायोगात्, रजतत्वादिमत्तया शुक्त्यादिधीविशेष्यकत्वं रजतत्वप्रकारकत्वं च तत्र गृह्यते, अत एवाप्रमापि प्रमेत्येव गृह्यते इति चिन्तामणिग्रन्थः प्रमेतीत्येव व्याख्यातस्तांत्रिकैरित्यप्रामाण्यस्य परतस्त्वमेव । न च प्रामाण्यस्य स्वतस्त्वे ज्ञानप्रामाण्यसंशयानुपपत्तिः, ज्ञानग्रहे प्रामाण्यग्रहात्तदग्रहे धर्मिग्रहाभावादिति वाच्यं, दोषात् तत्संशयाद्धर्मीन्द्रियसन्निकर्षस्यैव संशयहेतुत्वात् । प्राक् प्रामाण्याभावोपस्थितौ धर्मिज्ञानात्मक एव वास्तु प्रामाण्यसंशय इति स्वतस्त्वपरतस्त्वानेकान्तः प्रामाण्याप्रामाण्ययोर्जैनानां न युक्त इति चेद् अत्र ब्रूमः।रजतत्ववद्विशेष्यकत्वावच्छिन्नरजतत्वप्रकारताकत्वरूपस्य रजतज्ञानप्रामाण्यस्य वस्तुतोऽनुव्यवसायेन ग्रहणात्, स्वतस्त्वाभ्युपगमेऽप्रामाण्यस्यापि स्वतस्त्वापातः, रजतभ्रमानुव्यवसायेनापि वस्तुतो रजतत्वाभाववद्विशेष्यकत्वावच्छिन्नरजतत्वप्रकारताकत्वस्यैव ग्रहात्, तत्र चास्माभिरनेकान्तवादिभिरिष्टापत्तिः कर्तुं शक्यते, द्रव्यार्थतः प्रत्यक्षस्य योग्यद्रव्यप्रत्यक्षीकरणवेलायां तद्गतानां योग्यायोग्यानां धर्माणां सर्वेषामभ्युपगमात्, स्वपरपर्यायापेक्षयाऽनन्तधर्मात्मकं तत्त्वमिति वासनावत एकज्ञत्वे सर्वज्ञत्वध्रौव्याभ्युपगमाच्च, "जे एगं जाणइ से सव्वं जाणइ, जे सव्वं जाणइ से एगं जाणइ त्ति" पारमर्षस्येत्थमेव स्वारस्यव्याख्यानात् । अवोचाम चाध्यात्मसारप्रकरणे—"आसत्तिपाटवाभ्यासस्वकार्यादिभिराश्रयन्। पर्यायमेकमप्यर्थं वेत्ति भावाद्बुधोऽखिलम् ॥ १ ॥" इति । न चेयं रीतिरेकान्तवादिनो भवत इति प्रतीक्ष प्रतिबन्दिदंरूप्रहारम् । ननु रजतत्ववद्विशेष्यकत्वरजतत्वप्रकारत्वयोरेव ज्ञानोपरि भानं, अवच्छिन्नत्वं तु तयोरेव मिथः संसर्ग, एकत्र

भासमानयोर्द्वयोर्धर्मयोः परस्परमपि सामानाधिकरण्येनैवावच्छिन्नत्वेनाप्यन्वयसंभवादित्येवं प्रामाण्यस्य स्वतस्त्वं, अप्रामाण्यस्य तु न तथात्वं, रजतत्वाभावस्य व्यवसायेऽस्फुरणेन तद्विशेष्यकत्वस्य ग्रहीतुमशक्यत्वात्, ज्ञानग्राहकसामग्र्यास्तूपस्थितविशेष्यत्वादिग्राहकत्व एव व्यापारादित्येवमदोष इति चेन्न प्रामाण्यशरीरघटकस्यावच्छिन्नत्वस्यसंसर्गतया भानोपगमे कात्स्न्येन प्रामाण्यस्य प्रकारत्वासिद्धेः, अंशतः प्रकारतया भानं च स्वाश्रयविशेष्यकत्वावच्छिन्नप्रकारतासंबन्धेन रजतत्वस्य ज्ञानोपरि भानेऽपि संभवतीति तावदेव प्रामाण्यम्। स्यादस्त्वेवं, ज्ञानग्राहकसामग्र्यास्तथाप्रामाण्यग्रह एव सामर्थ्यात्, अत एव नाप्रामाण्यस्य स्वतस्त्वमिति चेन्न, एवमभ्युपगमे अप्रमापि प्रमेतीत्येव गृह्यते इत्यस्य व्याघातात्तत्र रजतत्वस्य ज्ञानोपर्युक्तसंबन्धासंभवात्, कंबुग्रीवादिमान्नास्ति वाच्यं नास्तीत्यादावन्वयितावच्छेदकावच्छिन्नप्रतियोगिताया इव प्रकृते उक्तसंबन्धस्य तत्तदवगाहितानिरूपितावगाहितारूपा विलक्षणैव खण्डशः सांसर्गिकविषयतेति न दोष इति चेन्न, तत्रापि लक्षणादिनैव बोधः, उक्तप्रतियोगितायास्तु घटो नास्तीत्यादावेव स्वरूपतः संसर्गत्वं, उक्तं च मिश्रैः—"अर्थापत्तौ नेह देवदत्त इत्यत्र प्रतियोगित्वं स्वरूपत एव भासत इत्येवं समर्थनात्" वस्तुतोऽस्माकं सर्वापि विषयता द्रव्यार्थतोऽखण्डा, पर्यायार्थतश्च सखण्डेति। संपूर्णप्रामाण्यविषयताशालिबोधो न संवादकप्रत्ययं विना, न वा तादृशाप्रामाण्यविषयताकबोधो बाधकप्रत्ययं विनेत्युभयोरनभ्यासदशायां परतस्त्वमेव, अभ्यासदशायां तु क्षयोपशमविशेषसध्रीचीनया तादृशतादृशेहया तथा तथोभयग्रहणे स्वतस्त्वमेव, अत एव प्रामाण्यान्तरस्यापि न दुर्ग्रहत्वं, स्वोपयोगापृथग्भूतेहोपनीतप्रकारस्यैवापायेन ग्रहणात्, तादृशी च प्रामाण्यविषयता नावग्रहमात्रप्रयोज्यत्वेन लौकिकी, नापि पृथगुपयोगप्रयोज्यत्वेनालौकिकी, किं तु विलक्षणै-

वेति न किंचिदनुपपन्नमनन्तधर्मात्मकवस्त्वभ्युपगमे । अत एव वस्तुसदृशो ज्ञाने ज्ञेयाकारपरिणाम इति विदलक्षणप्रामाण्याकारवादेऽपि न क्षतिः । एवं च भ्रमेऽरजतनिमित्तो रजताकारः, संवृतशुक्त्याकारायाः शुक्तेरेव तत्रालंबनत्वात्, प्रमायां तु रजतनिमित्त इत्याकारतथात्वस्य परतःस्वतोग्रहाभ्यां प्रामाण्याप्रामाण्ययोस्तदनेकान्त इति प्राचां वाचामपि विमर्शः कान्त एवेति द्रष्टव्यम्। न्यायाभियुक्ता अपि यथाऽभावलौकिकप्रत्ययस्तद्धर्मस्य प्रतियोगितावच्छेदकत्वमवगाहमान एव तद्धर्मविशिष्टस्य प्रतियोगित्वमवगाहते, तथा ज्ञानलौकिकसाक्षात्कारोऽपि तद्धर्मस्य विशेष्यताद्यवच्छेदकत्वमवगाहमान एव तद्धर्मविशिष्टस्य विशेष्यतादिकमवगाहत इति इदंत्वविशिष्टस्यैव विशेष्यत्वमवगाहेत, इदंत्वस्य विशेष्यतावच्छेदकत्वात्, न तु रजतत्वादिविशिष्टस्य रजतत्वादेरतथात्वादित्थं नियमस्तु लौकिके । तेनोपनयवशादलौकिकताहशसाक्षात्कारेऽपि न क्षतिरिति वदन्तो विनोपनयं प्राथमिकानुव्यवसायस्य प्रामाण्याग्राहकत्वमेवाहुः। यदेव च तेषामुपनयस्य कृत्यं तदेवास्माकमीहायाः साध्यमिति कृतं प्रसंगेन। प्रकृतमनुसरामः। एताववग्रहेहाख्यौ व्यापारांशौ, ईहानन्तरमपायः प्रवर्तते 'अयं घट एवेति' अत्र चासत्त्यादिजनितक्षयोपशमवशेन यावानीहितो धर्मस्तावान् प्रकारीभवति, तेनैकत्रैव 'देवदत्तोऽयं' 'पाचकोऽयं' इत्यादिप्रत्ययभेदोपपत्तिः। इत्थं च रूपविशेषान्मणिः पद्मराग इत्युपदेशोत्तरमपि तदाहितवासनावतो रूपविशेषादनेन पद्मरागेण भवितव्यमितीहोत्तरमेवायं पद्मराग इत्यपायो युज्यते, उक्तोपदेशः पद्मरागपदवाच्यत्वोपमितावेवोपयुज्यते। अयं पद्मराग इति तु सामान्यावग्रहेहाक्रमेणैवेति नैयायिकानुयायिनः । घट इत्यपायोत्तरमपि यदा किमयं घटः सौवर्णो मार्त्तो वेत्यादिविशेषजिज्ञासा प्रवर्तते, तदा पाश्चात्यापायस्योत्तरविशेषावगमापेक्षया सामान्यालंबनत्वाद्व्यावहारिकावग्रहत्वं, ततः सौवर्ण एवायमित्यादिरपायः, तत्राप्युत्त-

रोत्तरविशेषजिज्ञासायां पाश्चात्यस्य पाश्चात्यस्य व्यावहारिकावग्रहत्वं द्रष्टव्यं । जिज्ञासानिवृत्तौ त्वंत्यविशेषज्ञानमवाय एवोच्यते, नावग्रहः, उपचारकारणाभावात् । अयं फलांशः । कालमानं त्वस्यांतर्मुहूर्तमेव, सौदामिनीसंपातजनितप्रत्यक्षस्य चिरमननुवृत्तेर्व्यभिचार इति चेन्न, अन्तर्मुहूर्तस्यासंख्यभेदत्वात्, अन्त्यविशेषावगमरूपापायोत्तरमविच्युतिरूपा धारणा प्रवर्तते साप्यान्तर्मौहूर्तिकी । अयं परिपाकांशः । वासनास्मृती तु सर्वत्र विशेषावगमे द्रष्टव्ये । तदाह जिनभद्रगणिक्षमाश्रमणः–“सामन्नमित्तगहणं णिच्छयओ समयमोग्गहो पढमो । तत्तोणंतरमीहियवत्थुविसेसस्स जोवाओ ॥ १ ॥ सो पुण ईहावायावेक्खाए उग्गहोत्ति उवयरिओ । एस विसेसावेक्खं सामन्नं गिण्हए जेणं ॥ २ ॥ तत्तो णंतरमीहा तओ अवाओ अ तव्विसेसस्स । इह सामन्नविसेसावेक्खा जावंतिमो भेओ ॥ ३ ॥ सव्वत्थेहावाया, णिच्छयओ मोत्तुमाइसामन्नं । संववहारत्थं पुण, सव्वत्थावग्गहोवाओ ॥४॥ तरतमजोगाभावेवाओच्चिय धारणा तदंतंमि । सव्वत्थवासणा पुण भणिया कालंतरसईयत्ति ॥५॥” न चाविच्युतेरपायावस्थानात्पार्थक्ये मानाभावो, विशेषजिज्ञासानिवृत्त्यवच्छिन्नस्वरूपस्य कथंचिद्भिन्नत्वाद्, अवगृह्णामि, ईहे, अवैमि, स्थिरीकरोमीतिप्रत्यया एव च प्रतिप्राण्यनुभवसिद्धाः अवग्रहादिभेदे प्रमाणं, स्मृतिजनकतावच्छेदकत्वेनैव वाऽविच्युतित्वं धर्मविशेषः कल्प्यते, तत्तदुपेक्षान्यत्वस्य स्मृतिजनकतावच्छेदककोटिप्रवेशे गौरवादिति धर्मविशेषसिद्धौ धर्मिविशेषसिद्धिरित्यधिकं मत्कृतज्ञानार्णवादवसेयम् । तदेवं निरूपितं मतिज्ञानं। तन्निरूपणेन च श्रुतज्ञानमपि निरूपितमेव। द्वयोरन्योऽन्यानुगतत्वात्तथैव व्यवस्थापितत्वाच्च । अन्ये त्वंगोपांगादिपरिज्ञानमेव श्रुतज्ञानं, अन्यच्च मतिज्ञानमित्यनयोरपि भजनैव, यदुवाच वाचकचक्रवर्ती–“एकादीन्येकस्मिन् भाज्यानि त्वाचतुर्भ्य इति ”। शब्दसंसृष्टार्थमात्रग्राहित्वेन श्रुतत्वे

॥ १४२ ॥

त्ववग्रहमात्रमेव मतिज्ञानं प्रसज्येत, धारणोत्तरं स्वसमानाकारश्रुतावश्यंभावकल्पनं तु स्ववासनामात्रविजृंभितं, शब्दसंसृष्टाया मतेरेव श्रुतत्वपरिभाषणं तु न पृथगुपयोगव्यापकमिति शाब्दज्ञानमेव श्रुतज्ञानं, न त्वपरोक्षमिन्द्रियजन्यमपीत्याहुः। नव्यास्तु श्रुतोपयोगो मत्युपयोगान्न पृथक्, मत्युपयोगेनैव तत्कार्योपपत्तौ तत्पार्थक्यकल्पनाया व्यर्थत्वात्। अत एव शब्दजन्यसामान्यज्ञानोत्तरं विशेषजिज्ञासायां तन्मूलकमत्यपायांशप्रवृत्तौ न पृथगवग्रहकल्पनागौरवं, शाब्दसामान्यज्ञानस्यैव तत्रावग्रहत्वात्। न च शाब्देऽशाब्दस्य तत्सामग्र्या वा प्रतिबन्धकत्वध्रौव्यान्नेयं कल्पना युक्तेति वाच्यं, अशाब्दत्वस्य प्रतिबध्यतावच्छेदकत्वे प्रतियोगिकोटौ शब्दमूलमतिज्ञानस्यापि प्रवेशात्, अन्यथा श्रुताभ्यन्तरीभूतमतिज्ञानोच्छेदप्रसंगात्। किं च शाब्दज्ञानरूपश्रुतस्यावग्रहादिक्रमवतो मतिज्ञानाद्भिन्नत्वोपगमेऽनुमानस्मृतितर्कप्रत्यभिज्ञानादीनामपि तथात्वं स्यादित्यतिप्रसंगः, सांव्यवहारिकप्रत्यक्षत्वाभावस्यापि तेषु तुल्यत्वात्। यदि चावग्रहादिभेदाः सांव्यवहारिकप्रत्यक्षरूपस्यैव मतिज्ञानस्य सूत्रे प्रोक्ता, अनुमानादिकं तु परोक्षमतिज्ञानमर्थतः सिद्धमितीष्यते, तर्हि श्रुतशब्दव्यपदेश्यं शाब्दज्ञानमपि परोक्षमतिज्ञानमेवांगीक्रियतां, किमर्धजरतीयन्यायाश्रयणेन। मत्या जानामि श्रुत्वा जानामीत्यनुभव एवानयोर्भेदोपपादक इति चेन्न, अनुमाय जानामि स्मृत्वा जानामीत्यनुभवेनानुमानस्मृत्यादीनामपि भेदापत्तेः। अनुमितित्वादिकं मतित्वव्याप्यमेवेति यदीष्यते, शाब्दत्वमपि किं न तथा?। मत्या न जानामीति प्रतीतिस्तत्र बाधिकेति चेन्न वैशेषिकाणां नानुमिनोमीति प्रतीतेरिव शाब्दे तस्याविशेषविषयत्वात्। न च निसर्गाधिगमसम्यक्त्वरूपकार्यभेदान्मतिश्रुतज्ञानरूपकारणभेद इत्यपि सांप्रतं, तत्र निसर्गपदेन स्वभावस्यैव ग्रहणात्। यद्वाचकः–"शिक्षागमोपदेशश्रवणान्येकार्थिकान्यधिगमस्य। एकार्थः

परिणामो भवति निसर्गः स्वभावश्चेति ”। यत्रापि मतेः श्रुतभिन्नत्वेन ग्रहणं तत्र गोबलीवर्दन्याय एवाश्रयणीयः। तदिदमभिप्रेत्याह महावादी सिद्धसेनः–“वैयर्थ्यातिप्रसंगाभ्यां न मत्यभ्यधिकं श्रुतमिति ” इत्याहुः।

अवधिज्ञानत्वं रूपिसमव्याप्यविषयताशालिज्ञानवृत्तिज्ञानत्वव्याप्यजातिमत्त्वं, रूपिसमव्याप्यविषयताशालिज्ञानं परमावधिज्ञानं “रूवगयं लहइ सव्वं ” इति वचनात्, तद्वृत्तिर्ज्ञानत्वव्याप्या जातिरवधित्वमवधिज्ञानमात्र इति लक्षणसमन्वयः। समव्याप्यत्वमपहाय व्यापकत्वमात्रदाने जगद्व्यापकविषयताकस्य केवलस्यरूपिव्यापकविषयताकत्वनियमात् तद्वृत्तिकेवलत्वमादाय केवलज्ञानेऽतिव्याप्तिः, समव्याप्यत्वदाने त्वरूपिणि व्यभिचारात्केवलज्ञानविषयताया रूप्यव्याप्यत्वात्तन्निवृत्तिः। न च परमावधिज्ञानेऽप्यलोके लोकप्रमाणासंख्यारूप्याकाशखंडविषयतोपदर्शनादसंभवः। यदि तावत्सु खंडेषु रूपिद्रव्यं स्यात्तदा पश्येदिति प्रसंगापादन एव तदुपदर्शनतात्पर्यात्। न च तदंशे विषयबाधेन सूत्राप्रामाण्यं, स्वरूपबाधेऽपि शक्तिविशेषज्ञापनेन फलाबाधात्। एतेनासद्भावस्थापना व्याख्याता। बहिर्विषयताप्रसंजिका तारतम्येन शक्तिवृद्धिश्च लोकमध्य एव सूक्ष्मसूक्ष्मतरस्कन्धावगाहनफलवतीति न प्रसंगापादनवैयर्थ्यम्। यद्भाष्यं–“वड्ढंतो पुण बाहिं लोगत्थं चेव पासई दव्वं। सुहुमयरं सुहुमयरं परमोही जाव परमाणुं ॥ १ ॥ ” इति। अलोके लोकप्रमाणासंख्येयखंडविषयतावधेरिति वचने विषयतापदं तर्कितरूप्यधिकरणताप्रसंजिततावदधिकरणकरूपिविषयतापरमिति न स्वरूपबाधोऽपीति तत्त्वम्। जातौ ज्ञानत्वव्याप्यत्वविशेषणं ज्ञानत्वमादाय मत्यादावतिव्याप्तिवारणार्थम्। न च संयमप्रत्ययावधिज्ञानमनःपर्यायज्ञानसाधारणजातिविशेषमा- 

दाय मनःपर्यायज्ञानेऽतिव्याप्तिः, अवधित्वेन सांकर्येण तादृशजात्यसिद्धेः । न च पुद्गला रूपिण इति शाब्दबोधे रूपिसमव्याप्यविषयताकेऽतिव्याप्तिः, विषयतापदेन स्पष्टविशेषाकारग्रहणादिति संक्षेपः ।

मनोमात्रसाक्षात्कारि मनःपर्यायज्ञानम् । न च तादृशावधिज्ञानेऽतिव्याप्तिः, मनःसाक्षात्कारिणोऽवधेः स्कन्धान्तरस्यापि साक्षात्कारित्वेन तादृशावधिज्ञानासिद्धेः । न च मनस्त्वपरिणतस्कन्धालोचितं बाह्यमप्यर्थं मनःपर्यायज्ञानं साक्षात्करोतीति तस्य मनोमात्रसाक्षात्कारित्वमसिद्धमिति वाच्यम्, मनोद्रव्यमात्रालंबनतयैव तस्य धर्मिग्राहकमानसिद्धत्वात्, बाह्यार्थानां तु मनोद्रव्याणामेव तथारूपपरिणामान्यथानुपपत्तिप्रसूतानुमानत एव ग्रहणाभ्युपगमात् । आह च भाष्यकारः-"जाणइ बज्झेणुमाणेणंति" बाह्यार्थानुमाननिमित्तकमेव हि तत्र मानसमचक्षुर्दर्शनमंगीक्रियते, यत्पुरस्कारेण सूत्रे मनोद्रव्याणि जानाति पश्यति चैतदिति व्यवह्रियते । एकरूपेऽपि ज्ञाने द्रव्याद्यपेक्षयोपशमवैचित्र्येण सामान्यरूपमनोद्रव्याकारपरिच्छेदापेक्षया पश्यतीति, विशिष्टतरमनोद्रव्याकारपरिच्छेदापेक्षया च जानातीत्येवं वा व्याचक्षते । आपेक्षिकसामान्यज्ञानस्यापि व्यावहारिकावग्रहन्यायेन व्यावहारिकदर्शनरूपत्वात् । निश्चयतस्तु सर्वमपि तज्ज्ञानमेव, मनःपर्यायदर्शनानुपदेशादिति द्रष्टव्यम् । नव्यास्तु बाह्यार्थाकारानुमापकमनोद्रव्याकारग्राहकं ज्ञानमवधिविशेष एव, अप्रमत्तसंयमविशेषजन्यतावच्छेदकजातेरवधित्वव्याप्याया एव (कल्पनात्) कल्पनाधर्मीति न्यायात् । इत्थं हि जानाति पश्यतीत्यत्र दृशेरवधिदर्शनविषयत्वेनैवोपपत्तौ लक्षणकल्पनगौरवमपि परिहृतं भवति । सूत्रे भेदाभिधानं च धर्मभेदाभिप्रायम् । यदि च संकल्पविकल्पपरिणतद्रव्यमात्रग्राह्यभेदात्तद्ग्राहकं ज्ञानमतिरिक्तमित्यत्र निर्बन्धस्तदा द्वीन्द्रियादीनामपीष्टानिष्टप्रवृत्तिनिवृत्तिदर्शनात्तज्जनकसूक्ष्मसंकल्पजनन-

परिणतद्रव्यविषयमपि मनःपर्यायज्ञानमभ्युपगन्तव्यं स्यात्, चेष्टाहेतोरेव मनसस्तद्ग्राह्यत्वात्। न च तेन द्वीन्द्रियादीनां समनस्कतापत्तिः, कपर्दिकासत्तया धनित्वस्येव, एकया गवा गोमत्त्वस्येव, सूक्ष्मेण मनसा समनस्कत्वस्यापादयितुमशक्यत्वात्, तदिदमभिप्रेत्योक्तं निश्चयद्वात्रिंशिकायां महावादिना–"प्रार्थनाप्रतिघाताभ्यां चेष्टन्ते द्वीन्द्रियादयः। मनःपर्यायविज्ञानं युक्तं तेषु न चान्यथा ॥ १ ॥" इति। न चैवं ज्ञानस्य पंचविधत्वविभागोच्छेदाद्उत्सूत्रापत्तिः, व्यवहारतश्चतुर्विधत्वेनोक्ताया अपि भाषाया निश्चयतो द्वैविध्याभिधानवन्नयविवेकेनोत्सूत्राभावादिति दिक्।

सर्वविषयं केवलज्ञानम्। सर्वविषयत्वं च सामान्यधर्मानवच्छिन्ननिखिलधर्मप्रकारकत्वे सति निखिलधर्मिविषयत्वम्। प्रमेयवदिति ज्ञाने प्रमेयत्वेन निखिलधर्मप्रकारकेऽतिव्याप्तिवारणायानवच्छिन्नान्तं, केवलदर्शनेऽतिव्याप्तिवारणाय सत्यन्तं, विशेष्यभागस्तु पर्यायवाद्यभिमतप्रतीत्यसमुत्पादरूपसन्तानविषयकनिखिलधर्मप्रकारकज्ञाननिरासार्थः। वस्तुतो निखिलज्ञेयाकारवत्त्वं केवलज्ञानत्वं। केवलदर्शनाभ्युपगमे तु तत्र निखिलदृश्याकारवत्त्वमेव, न तु निखिलज्ञेयाकारवत्त्वमिति नातिव्याप्तिः। न च प्रतिस्वं केवलज्ञाने केवलज्ञानान्तरवृत्तिस्वप्राक्कालविनष्टवस्तुसंबन्धिवर्तमानत्वाद्याकाराभावादसंभवः, स्वसमानकालीननिखिलज्ञेयाकारवत्त्वस्य विवक्षणात्। न च तथापि केवलज्ञानग्राह्ये आद्यक्षणवृत्तित्वप्रकारकत्वावच्छिन्नविशेष्यताया द्वितीयक्षणे नाशो, द्वितीयक्षणवृत्तित्वप्रकारकत्वावच्छिन्नविशेष्यतायाश्चोत्पादः, इत्थमेव ग्राह्यसामान्यविशेष्यताध्रौव्यसंभेदेन केवलज्ञाने त्रैलक्षण्यमुपपादितमित्येकदा निखिलज्ञेयाकारवत्त्वासंभव एवेति शंकनीयम्, समानकालीनत्वस्य क्षणगर्भत्वे दोषाभावात्, अस्तु वा निखिलज्ञेयाकारसंक्रमयोग्यतावत्त्वमेव लक्षणं, प्रमाणं च तत्र ज्ञातत्वमत्यन्तोत्कर्षव-

वृत्ति अत्यन्तापकर्षवद्वृत्तित्वात् परिमाणत्ववदित्याद्यनुमानमेव । न चाप्रयोजकत्वं ज्ञानतारतम्यस्य सर्वानुभवसिद्धत्वेन तद्विश्रान्तेरत्यन्तापकर्षोत्कर्षाभ्यां विनाऽसंभवात् । न चेन्द्रियाश्रितज्ञानस्यैव तरतमभावदर्शनात्तत्रैवान्त्यप्रकर्षो युक्त इत्यपि शंकनीयं, अतीन्द्रियेऽपि मनोज्ञाने शास्त्रार्थावधारणरूपे शास्त्रभावनाप्रकर्षजन्ये शास्त्रातिक्रान्तविषयेऽतीन्द्रियविषयसामर्थ्ययोगप्रवृत्तिसाधनेऽध्यात्मशास्त्रप्रसिद्धप्रातिभनामधेये च तरतमभावदर्शनात् । नन्वेवं भावनाजन्यमेव प्रातिभवत्केवलं प्राप्तं, तथा चाप्रमाणं स्यात्, कामातुरस्य सर्वदा कामिनीं भावयतो व्यवहितकामिनीसाक्षात्कारवद्भावनाजन्यज्ञानस्याप्रमाणत्वव्यवस्थितेः, अथ न भावनाजन्यत्वं तत्राप्रामाण्यप्रयोजकं, किं तु बाधितविषयत्वं, भावनानपेक्षेऽपि शुक्तिरजतादिभ्रमे बाधादेवाप्रामाण्यस्वीकारात्, प्रकृते च न विषयबाध इति नाप्रामाण्यं, न च व्यवहितकामिनीविभ्रमादौ दोषत्वेन भावनायाः क्लृप्तत्वात्तज्जन्यत्वेनास्याप्रामाण्यं, बाधितविषयत्ववद्दोषजन्यत्वस्यापि भ्रमत्वप्रयोजकत्वात्, तथा चोक्तं मीमांसाभाष्यकारेण—"यस्य च दुष्टं कारणं यत्र च मिथ्येत्यादिप्रत्ययः स एव समीचीनो नान्य इति", वार्तिककारेणाप्युक्तम्—"तस्माद्बोधात्मकत्वेन, प्राप्ता बुद्धेः प्रमाणता । अर्थान्यथात्वहेतूत्थदोषज्ञानादपोद्यते ॥ १ ॥ इति" अत्र हि तुल्यवदेवाप्रामाण्यप्रयोजकद्वयमुक्तं, तस्माद्बाधाभावेऽपि दोषजन्यत्वादप्रामाण्यमिति वाच्यं, भावनायाः क्वचिद्दोषत्वेऽपि सर्वत्र दोषत्वानिश्चयात्, अन्यथा शंखपीतत्वभ्रमकारणीभूतस्य पीतद्रव्यस्य स्वविषयकज्ञानेऽप्यप्रामाण्यप्रयोजकत्वं स्यादिति न किंचिदेतत्, क्वचिदेव कश्चिद्दोष इत्येवांगीकारात्, विषयबाधेनैव दोषजन्यत्वकल्पनाच्च, दुष्टकारणजन्यस्याप्यनुमानादेर्विषयाबाधेन प्रामाण्याभ्युपगमात्, अन्यथा परिभाषामात्रापत्तेः । मीमांसाभाष्यवार्तिककाराभ्यामपि बाधितविषयत्वव्या-

प्यत्वेनैव दुष्टकारणजन्यत्वस्याप्रामाण्यप्रयोजकत्वमुक्तं न स्वातंत्र्येणेति चेन्मैवम् तथापि परोक्षज्ञानजन्यभावनाया अप-रोक्षज्ञानजनकत्वासंभवात्। न हि वह्न्यनुमितिज्ञानं सहस्रकृत्व आवृत्तमपि वह्निसाक्षात्काराय कल्पते। न चाभ्यस्यमानं ज्ञानं परमप्रकर्षप्राप्तं तथा भविष्यतीत्यपि शंकनीयं, लंघनोदकतापादिवदभ्यस्यमानस्यापि परमप्रकर्षायोगात्। न च लंघ-नस्यैकस्यावस्थितस्याभावादपरापरप्रयत्नस्य पूर्वपूर्वातिशयितलंघनोत्पादन एव व्यापाराद्यावल्लंघयितव्यं तावन्नादावेव श्लेष्मा-दिना जाड्यात्कायो लंघयितुं शक्नोत्यभ्यासासादितश्लेष्मक्षयपटुभावश्चोत्तरकालं शक्नोतीति तत्र व्यवस्थितोत्कर्षतोदकतापे त्वतिशयेन क्रियमाणे तदाश्रयस्यैव क्षयान्न तत्राप्यग्निरूपतापत्तिरूपोऽन्त्योत्कर्षः, विज्ञानं तु संस्काररूपं शास्त्रपरावर्तनाद्य-न्यथानुपपत्त्योत्तरत्राप्यनुवर्तत इति तत्रापरापरयत्नानां सर्वेषामुपयोगादत्यन्तोत्कर्षो युक्त इति तद्वता भावनाज्ञानेनाप-रोक्षं केवलज्ञानं जन्यत इति टीकाकृदुक्तमपि विचारसहं, तस्य प्रमाणान्तरत्वापत्तेः, मनो यदसाधारणमिति न्यायात्, अन्यथा चक्षुरादिव्याप्तिज्ञानादिसहकृतस्य मनस एव सर्वत्र प्रामाण्यसंभवे प्रमाणान्तरोच्छेदापत्तेः। चक्षुरादीनामेव साधा-रण्यात्प्रामाण्यमित्यभ्युपगमे भावनायामपि तथा वक्तुं शक्यत्वात्। एवं च परोक्षभावनाया अपरोक्षज्ञानजनकत्वं तस्याः प्रमाणान्तरत्वं चान्यत्रादृष्टचरं कल्पनीयमिति महागौरवमिति चेदनुक्तोपालंभ एषः, प्रकृष्टभावनाजन्यत्वस्य केवलज्ञानेऽ-भ्युपगमवादेनैव टीकाकृतोक्तत्वात्। वस्तुतस्तु तज्जन्यात्प्रकृष्टादावरणक्षयादेव केवलज्ञानोत्पत्तिरित्येव सिद्धान्तात्। यैरपि योगजधर्मस्यातीन्द्रियज्ञानजनकत्वमभ्युपगम्यते, तैरपि प्रतिबन्धकपापक्षयस्य द्वारत्वमवश्यमाश्रयणीयम्, सति प्रतिबन्धके कारणस्याकिंचित्करत्वात्, केवलं तैर्योगजधर्मस्य मनःप्रत्यासत्तित्वं, तेन सन्निकर्षेण निखिलजात्यंशे निरवच्छिन्न-

प्रकारताकज्ञाने षोडशपदार्थविषयकविलक्षणमानसज्ञाने वा तत्त्वज्ञाननामधेये मनसः करणत्वं, चाक्षुषादिसामग्रीकाल इव लौकिकमानससामग्रीकालेऽपि तादृशतत्त्वज्ञानानुपपत्तेस्तत्त्वज्ञानाख्यमानसे तदितरमानससामग्र्याः प्रतिबन्धकत्वं, तत्त्वज्ञानरूपमानससामग्र्याश्च प्रणिधानरूपविजातीयमनःसंयोगघटितत्वं कल्पनीयमित्यनन्तमप्रामाणिककल्पनागौरवम्। अस्माकं तु दुरितक्षयमात्रं तत्र कारणमिति लाघवम्। अत एवेन्द्रियज्ञानासाचिव्येन केवलमसहायमिति प्राञ्चो व्याचक्षते। स चावरणाख्यदुरितक्षयोपि भावनातारतम्यात्तारतम्येनोपजायमानस्तदत्यन्तप्रकर्षादत्यन्तप्रकर्षमनुभवतीतिकिमनुपपन्नम्। तदाहाकलंकोऽपि--"दोषावरणयोर्हानिर्निःशेषास्त्यतिशायनात्। क्वचिद्यथा स्वहेतुभ्यो बहिरन्तर्मलक्षय इति ॥ १ ॥" न च निंबाद्यौषधोपयोगात्तरतमभावापचीयमानस्यापि श्लेष्मणो नात्यन्तिकक्षय इति व्यभिचारः, तत्र निंबाद्यौषधोपयोगोत्कर्षनिष्ठाया एवापादयितुमशक्यत्वात्, तदुपयोगेऽपि श्लेष्मपुष्टिकारणानामपि तदैवासेवनात्, अन्यथौषधोपयोगाधारस्यैव विनाशप्रसंगात्, चिकित्साशास्त्रं ह्युद्रिक्तधातुदोषसाम्यमुद्दिश्य प्रवर्तते, न तु तस्य निर्मूलनाशं, अन्यतरदोषात्यन्तक्षयस्य मरणाविनाभावित्वादिति द्रष्टव्यम्। रागाद्यावरणापाये सर्वज्ञज्ञानं वैशद्यभाग्भवतीत्यत्र च न विवादो रजोनीहाराद्यावरणापाये वृक्षादिज्ञाने तथा दर्शनात्। न च रागादीनां कथमावरणत्वं, कुड्यादीनामेव पौद्गलिकानां तथात्वदर्शनादिति वाच्यम्, कुड्यादीनामपि प्रातिभादावनावारकत्वात्, ज्ञानविशेषे तेषामावरणत्ववच्चातीन्द्रियज्ञाने रागादीनामपि तथात्वमन्वयव्यतिरेकाभ्यामेव सिद्धम्। रागाद्यपचये योगिनामतीन्द्रियानुभवसंभवात्पौद्गलिकत्वमपि द्रव्यकर्मानुगमेन तेषां नासिद्धम्। स्वविषयग्रहणक्षमस्य ज्ञानस्य तदग्राहकताया विशिष्टप्रत्ययसंबन्धपूर्वकत्वनियमात्पीतहृत्पूरपुरुषज्ञाने

१ विशिष्टद्रव्यसंबन्ध.

तथादर्शनादिति ध्येयम् । बार्हस्पत्यास्तु–रागादयो न लोभादिकर्मोदयनिबन्धनाः, किं तु कफादिप्रकृतिहेतुकाः । तथाहि, कफहेतुको रागः, पित्तहेतुको द्वेषः, वातहेतुकश्च मोहः । कफादयश्च सदैव सन्निहिताः, शरीरस्य तदात्मकत्वात्, ततो न सार्वज्ञमूलवीतरागत्वसंभव इत्याहुः । तदयुक्तम्, रागादीनां व्यभिचारेण कफादिहेतुकत्वायोगात्, दृश्यते हि वातप्रकृतेरपि रागद्वेषौ, कफप्रकृतेरपि द्वेषमोहौ, पित्तप्रकृतेरपि मोहरागाविति । एकैकस्याः प्रकृतेः पृथक् सर्वदोषजननशक्त्युपगमे च सर्वेषां समरागादिमत्त्वप्रसंगात् । न च स्वस्वयोग्यक्रमिकरागादिदोषजनककफाद्यवान्तरपरिणतिविशेषस्य प्रतिप्राणि कल्पनान्नायं दोष इति वाच्यं, तदवान्तरवैजात्यावच्छिन्नहेतुगवेषणायामपि कर्मण्येव विश्रामात् । किं चाभ्यासजनितप्रसरत्वात्प्रतिसंख्याननिवर्तनीयत्वाच्च न कफादिहेतुकत्वं रागादीनाम् । एतेन शुक्रोपचयहेतुक एव रागो नान्यहेतुक इत्याद्यपि निरस्तम्, अत्यन्तस्त्रीसेवापरस्य क्षीणशुक्रस्यापि रागोद्रेकदर्शनात्, शुक्रोपचयस्य सर्वस्त्रीसाधारणाभिलाषजनकत्वेन कस्यचित् कस्यांचिदेव रागोद्रेक इत्यस्यानुपपत्तेश्च । न चासाधारण्ये रूपमेव हेतुः, तद्रहितायामपि कस्यचिद्रागदर्शनात् । न च तत्रोपचार एव हेतुः, तयेनापि विमुक्तायां रागदर्शनात् । तस्मादभ्यासदर्शनजनितोपचयपरिपाकं कर्मैव विचित्रस्वभावतया तदा तदा तत्तत्कारणापेक्षं तत्र तत्र रागादिहेतुरिति प्रतिपत्तव्यम् । एतेन पृथिव्यंबुभूयस्त्वे रागः, तेजोवायुभूयस्त्वे द्वेषः, जलवायुभूयस्त्वे मोह इत्यादयोऽपि प्रलापा निरस्ताः, तस्य विषयविशेषापक्षपातित्वादिति दिक् । कर्मभूतानां रागादीनां सम्यग्ज्ञानक्रियाभ्यां क्षयेण वीतरागत्वं सर्वज्ञत्वं चानाविलमेव । शौद्धोदनीयास्तु–नैरात्म्यादिभावनैव

रागादिक्लेशहानिहेतुः, नैरात्म्यावगतावेवात्मात्मीयाभिनिवेशाभावेन रागद्वेषोच्छेदात् संसारमूलनिवृत्तिसंभवात्, आत्माव गतौ च तस्य नित्यत्वेन तत्र स्नेहात्तन्मूलतृष्णादिना क्लेशानिवृत्तेः। तदुक्तम्—" यः पश्यत्यात्मानं तत्रास्याहमिति शाश्वतः स्नेहः। स्नेहात्सुखेषु तृष्यंति तृष्णा दोषांस्तिरस्कुरुते ॥ १ ॥ गुणदर्शी परितृप्यत्यात्मनि तत्साधनान्युपादत्ते। तेनात्माभिनिवेशो यावत्तावच्च संसारः ॥ २ ॥ इति "। ननु यद्येवमात्मा न विद्यते, किं तु पूर्वापरक्षणत्रुटितानुसन्धानाः पूर्वहेतुप्रतिबद्धा ज्ञानक्षणा एव तथा तथोत्पद्यन्त इत्यभ्युपगमस्तदा परमार्थतो न कश्चिदुपकार्योपकारकस्वभाव इति कथमुच्यते भगवान् सुगतः करुणया सकलसत्त्वोपकाराय देशनां कृतवानिति, क्षणिकत्वमपि यद्येकान्तेन, तर्हि तत्त्ववेदी क्षणोऽनन्तरं विनष्टः सन्न कदाचनाप्यहं भूयो भविष्यामीति जानानः किमर्थं मोक्षाय यतत इति? अत्रोच्यते—भगवान् हि प्राचीनावस्थायां सकलमपि जगद्दुःखितं पश्यंस्तदुद्दिधीर्षया नैरात्म्यक्षणिकत्वादिकमवगच्छन्नपि तेषामुपकार्यसत्त्वानां निःक्लेशक्षणोत्पादनाय प्रयतते, ततो जातसकलजगत्साक्षात्कारः समुत्पन्नकेवलज्ञानः पूर्वाहितकृपाविशेषसंस्कारात् कृतार्थोऽपि देशनायां प्रवर्तते, अधिगततत्तात्पर्यार्थाश्च स्वसंततिगतविशिष्टक्षणोत्पत्तये मुमुक्षवः प्रवर्तन्ते, इति न किमप्यनुपपन्नमित्याहुः। तदखिलमज्ञानविलसितम्। आत्माभावे बन्धमोक्षाद्येकाधिकरणत्वायोगात्। न च सन्तानापेक्षया समाधिः, तस्यापि क्षणानतिरेके एकत्वासिद्धेः, एकत्वे च द्रव्यस्यैव नामान्तरत्वात्[2], सजातीयक्षणप्रबन्धरूपे सन्ताने च न कारकव्यापार इति समीचीनं मुमुक्षुप्रवृत्त्युपपादनम्। अथाक्लिष्टक्षणेऽक्लिष्टक्षणत्वेनोपादानत्वमिति सजातीयक्षणप्रबन्धोपपत्तिः,

---

१ तृष्यति तृष्या. २ नमान्तरंतत्.

बुद्धदेशितमार्गे तु तत्प्रयोजकत्वज्ञानादेव प्रवृत्तिरिति चेन्न, एकान्तवादेऽनेन रूपेण निमित्तत्वमनेन रूपेण चोपादानत्वमिति विभागस्यैव दुर्वचत्वात् । अक्लिष्टक्षणेऽक्लिष्टक्षणत्वेनैवोपादानत्वे आद्याक्लिष्टक्षणस्यानुत्पत्तिप्रसंगादन्त्यक्लिष्टक्षणसाधारणस्य हेतुतावच्छेदकस्य कल्पने च क्लिष्टक्षणजन्यतावच्छेदकेन सांकर्याज्जन्यजनकक्षणप्रबन्धकोटावेकैकक्षणप्रवेशपरित्यागयोर्विनिगमकाभावाच्च । एतेनेतरव्यावृत्त्या शक्तिविशेषेण वा जनकत्वमित्यप्यपास्तम् । न चैतदनन्तरमहमुत्पन्नमेतस्य चाहं जनकमित्यवगच्छति क्षणरूपं ज्ञानमिति न भवन्मते कार्यकारणभावः, नापि तदवगमः, ततो याचितकमंडनमेतदेकसन्ततिपतितत्वादेकाधिकरणं बन्धमोक्षादिकमिति । एतेनोपादेयोपादानक्षणानां परस्परं वास्यवासकभावादुत्तरोत्तरविशिष्टविशिष्टतरक्षणोत्पत्तेः मुक्तिसंभव इत्यप्यपास्तम्, युगपद्भाविनामेव तिलकुसुमादीनां वास्यवासकभावदर्शनात् । उक्तं च–" वास्यवासकयोश्चैवमसाहित्यान्न वासना । पूर्वक्षणैरनुत्पन्नो वास्यते नोत्तरक्षणे ॥१॥ इति" । कल्पितशुद्धक्षणैकसन्तानार्थितयैवमोक्षोपाये सौगतानां प्रवृत्तिः, तदर्थैव च सुगतदेशनेत्यभ्युपगमे च तेषां मिथ्यादृष्टित्वं, तत्कल्पितमोक्षस्य च मिथ्यात्वं स्फुटमेव, अधिकं लतायाम् । एतेनाखंडाद्वयानन्दैकरसब्रह्मज्ञानमेव केवलज्ञानं, तत एव चाविद्यानिवृत्तिरूपमोक्षाधिगम इति वेदान्तिमतमपि निरस्तम्, तादृशविषयाभावेन तज्ज्ञानस्य मिथ्यात्वात्, कीदृशं च ब्रह्मज्ञानमज्ञाननिवर्तकमभ्युपेयं देवानांप्रियेण, न केवलचैतन्यं, तस्य सर्वदा सत्त्वेनाविद्याया नित्यनिवृत्तिप्रसंगात्, ततश्च तन्मूलसंसारोपलब्ध्यसंभवात्सर्वशास्त्रानारंभप्रसंगादनुभवविरोधाच्च, नापि वृत्तिरूपं, वृत्तेः सत्यत्वे तत्कारणान्तःकरणाविद्यादेरपि सत्त्वस्यावश्यकत्वेन तया तन्निवृत्तेरशक्यतया सर्ववेदान्तार्थविप्लवापत्तेः, मिथ्यात्वे च कथमज्ञाननिवर्तकता । न हि मिथ्याज्ञानमज्ञाननिवर्तकं दृष्टम्, स्वप्नज्ञानस्यापि तत्त्वप्र-

संगात् । न च सत्यस्यैव चैतन्यस्य प्रमाणजन्यापरोक्षान्तःकरणवृत्त्यभिव्यक्तस्याज्ञाननिवर्तकत्वाद्वृत्तेश्च कारणताव-च्छेदकत्वेन दण्डत्वादिवदन्यथासिद्धत्वेन कारणत्वानंगीकारात्, अवच्छेदकस्य कल्पितत्वेऽप्यवच्छेद्यस्य वास्तवत्त्वं न हि हन्यते, यज्ञजतत्वेन ज्ञातं तद्धुक्तिद्रव्यमितिवत्, तार्किकैरप्याकाशस्य शब्दग्राहकत्वे कर्णशष्कुलीसंबन्धस्य कल्पितस्यैवावच्छेदकत्वां-गीकारात्, संयोगमात्रस्य निरवयवे नभसि सर्वात्मना सत्त्वेनातिप्रसंजकत्वात् । मीमांसकैश्च कल्पितह्रस्वत्वदीर्घत्वादिसं-सर्गावच्छिन्नानामेव वर्णानां यथार्थज्ञानजनकत्वोपगमाध्ध्वनिधर्माणां ध्वनिगतत्वेनैव ज्ञानात्, वर्णानां च विभूनामानुपूर्वी-विशेषाज्ञानादतिप्रसंगात्, वर्णनिष्ठत्वेन ह्रस्वत्वादिकल्पनस्य तेषामावश्यकत्वात्, तद्वदस्माकमपि कल्पितावच्छेदकोपगमे को दोष इति मधुसूदनतपस्विनोऽपि वचनं विचारसहं, मिथ्यादृग्दृष्टान्तस्य सम्यग्दृशा ग्रहणानौचित्यात्, नैयायिकमी-मांसोक्तस्थलेऽपि अनन्तधर्मात्मकैकवस्तुस्वीकारे कल्पितावच्छेदककृतविडंबनाया अप्रसरात्, विस्तरेणोपपादितं चैतत्संम-तिवृत्तौ । न चोक्तरीत्या वृत्तेरवच्छेदकत्वमपि युक्तं, प्रतियोगितयाऽज्ञाननिवृत्तौ सामानाधिकरण्येन समानविशेष्यकसमान-प्रकारकवृत्तेरेव त्वन्मते हेतुत्वस्य युक्तत्वात् । अत एव स्वयमुक्तं तपस्विना सिद्धान्तबिन्दौ–द्विविधमावरणं, एकमसत्त्वा-पादकमन्तःकरणावच्छिन्नसाक्षिनिष्ठं, अन्यदभानापादकं विषयावच्छिन्नब्रह्मचैतन्यनिष्ठं, घटमहं जानामीत्युभयावच्छेदानुभ-वादाद्यं परोक्षापरोक्षसाधारणप्रमामात्रेण निवर्ततेऽनुमितेऽपि वह्न्यादौ नास्तीति प्रतीत्यनुदयात्, द्वितीयं तु साक्षात्कारे-णैव निवर्तते यदाश्रयं यदाकारं ज्ञानं तदाश्रयं-तदाकारमज्ञानं नाशयतीति नियमादित्यादि, तत्किमिदानीं क्षुत्क्षामकुक्षेः सद्य एव विस्मृतं? येनोक्तवृत्तेरवच्छेदकत्वेनान्यथासिद्धिमाह, एवं हि घटादावपि दण्डविशिष्टाकाशत्वेनैव हेतुतां वदतो

वदनं कः पिदध्यात् ? अनयैव भिया चैतन्यनिष्ठायाः प्रमाणजन्यापरोक्षान्तःकरणवृत्तेरेवाज्ञाननाशकत्वांगीकारेऽपि न-
दोषः, पारमार्थिकसत्ताभावेऽपि व्यावहारिकसत्तांगीकारात् । न च स्वप्नादिवन्मिथ्यात्वापत्तिः, स्वरूपतो मिथ्यात्वस्याप्र-
योजकत्वात्, विषयतो मिथ्यात्वस्य च बाधाभावादसिद्धेः, धूमभ्रमजन्यवह्न्यनुमितेरप्यबाधितविषयतया प्रामाण्यानंगी-
काराच्च, कल्पितेनापि प्रतिबिंबेन वास्तवबिंबानुमानप्रामाण्याच्च, स्वप्नार्थस्याप्यरिष्टादिसूचकत्वाच्च, क्वचित्तदुपलब्धमंत्रादे-
र्जागरेऽप्यनुवृत्तेरबाधाच्चेति तपस्विनोक्तमिति चेदेतदप्यविचाररमणीयम्, त्वन्मते स्वप्नजागरयोर्व्यवहारविशेषस्यापि कर्तु-
मशक्यत्वात्, बाधाभावेन ब्रह्मण इव घटादेरपि परमार्थसत्त्वस्याप्रत्यूहत्वाच्च, प्रपंचासत्यत्वे बन्धमोक्षादेरपि तथात्वेन
व्यवहारमूल एव कुठारदानात् । एतेनाज्ञाननिष्ठाः परमार्थव्यवहारप्रतिभाससत्त्वप्रतीत्यनुकूलास्तिस्रः शक्तयः कल्प्यन्ते,
आद्यया प्रपंचे पारमार्थिकसत्त्वप्रतीतिः, अत एव नैयायिकादीनां तथाभ्युपगमः, सा च श्रवणाद्यभ्यासपरिपाकेन निव-
र्तते, ततो द्वितीयया शक्त्या व्यावहारिकसत्त्वं प्रपंचस्य प्रतीयते, वेदान्तश्रवणादभ्यासवन्तो हि नेमं प्रपंचं पारमार्थिकं
पश्यन्ति, किं तु व्यावहारिकमिति, सा च तत्त्वसाक्षात्कारेण निवर्तते, ततस्तृतीयया शक्त्या प्रातिभासिकसत्त्वप्रतीतिः
क्रियते, सा चान्तिमतत्त्वबोधेन सह निवर्तते, पूर्वपूर्वशक्तेरुत्तरोत्तरशक्तिकार्यप्रतिबन्धकत्वाच्च न युगपत्कार्यत्रयप्रसंगः,
तथा चैतदभिप्रायां श्रुतिः–" तस्याभिध्यानाद्योजनात्तत्त्वभावाद्भूयश्चान्ते विश्वमायानिवृत्तिरिति " । अस्या अयमर्थः–
तस्य परमात्मनोऽभिध्यानादभिमुखाद्ध्यानाच्छ्रवणाभ्यासपरिपाकादिति यावत्, विश्वमायाया विश्वारंभकाविद्याया निवृ-
त्तिः, आद्यशक्तिनाशेन विशिष्टनाशात्, युज्यतेऽनेनेति योजनं तत्त्वज्ञानं तस्मादपि विश्वमायानिवृत्तिः, द्वितीयशक्ति-

नाशेन विशिष्टनाशात्, तत्त्वभावो विदेहकैवल्यमन्तिमः साक्षात्कार इति यावत्, तस्मादन्ते प्रारब्धक्षये सह तृतीयशक्त्या विश्वमायानिवृत्तिः, अभिध्यानयोजनाभ्यां शक्तिद्वयनाशेन विशिष्टनाशापेक्षया भूयःशब्दोऽभ्यासार्थक इतीत्यादि निरस्तम्, अभिध्यानादेः प्रागपरमार्थसदादौ परमार्थसत्त्वादिप्रतीत्यभ्युपगमेऽन्यथाख्यात्यापातात्। न च तत्तच्छक्तिविशिष्टज्ञानेन परमार्थसत्त्वादि जनयित्वैव प्रत्याय्यत इति नायं दोष इति वाच्यम्, साक्षात्कृततत्त्वस्य न किमपि वस्त्वज्ञातमिति प्रातिभासिकसत्त्वोत्पादनस्थानाभावाद्ब्रह्माकारवृत्त्या ब्रह्मविषयतैवाज्ञानस्य नाशिता, तृतीयशक्तिविशिष्टत्वं त्वज्ञानं यावत्प्रारब्धमनुवर्तत एवेति ब्रह्मातिरिक्तविषये प्रातिभासिकसत्त्वोत्पादनादविरोध इति चेन्न, धर्मिसिद्ध्यसिद्धिभ्यां व्याघातात्, विशेषोपरागेणाज्ञाते तदुपगमे च ब्रह्मण्यपि प्रातिभासिकमेव सत्त्वं स्यात्, तत्त्वज्ञे कस्यचिदज्ञानस्य स्थितौ विदेहकैवल्येऽपि तदवस्थितिशंकया सर्वाज्ञाननिवृत्तौ मुक्तावनाश्वासप्रसंगाच्च। अथ दृष्टिसृष्टिवादे नेयमनुपपत्तिः, तन्मते हि वस्तु सद्ब्रह्मैव, प्रपंचश्च प्रातिभासिक एव, तस्य चाभिध्यानादेः प्राक् पारमार्थिकसत्त्वादिना प्रतिभासः पारमार्थिकसदाद्याकारज्ञानाभ्युपगमादेव सूपपाद इति चेन्न, तस्य प्राचीनोपगतस्य सौगतमतप्रायत्वेन नव्यैरुपेक्षितत्वात्, व्यवहारवादस्यैव तैरादृतत्वात्, व्यवहारवादे च व्यावहारिकं प्रपंचं प्रातिभासिकत्वेन प्रतीयतां तत्त्वज्ञानिनामत्यन्तभ्रान्तत्वं दुर्निवारमेव। अथ व्यावहारिकस्यापि प्रपंचस्य तत्त्वज्ञानेन बाधितस्यापि प्रारब्धवशेन बाधितानुवृत्त्या प्रतिभासः तृतीयस्याः शक्तेः कार्यं, तेन बाधितानुवृत्त्या प्रतिभासानुकूला तृतीया शक्तिः, प्रातिभासिकसत्त्वसंपादनपटीयसी शक्तिरुच्यते, सा चान्तिमतत्त्वबोधेन निवर्तत इत्येवमदोष इति चेन्न, बाधितं हि त्वन्मते नाशितं, तस्यानुवृत्तिरिति वदतो व्याघातात्। बाधितत्वेन बाधित-

त्वावच्छिन्नसत्तया वा प्रतिभासस्तत्त्वज्ञप्रारब्धकार्यमिति चेत्तृतीया शक्तिर्व्यर्था, यावद्विशेषाणां बाधितत्वे तेषां तथाप्रतिभासस्य सार्वज्ञाभ्युपगमं विनानुपपत्तेश्च, द्वितीयशक्तिविशिष्टाज्ञाननाशात् संचितकर्म तत्कार्यं च नश्यति, ततस्तृतीयशक्त्या प्रारब्धकार्ये दग्धरज्जुस्थानीया बाधितावस्था जन्यते, इयमेव बाधितानुवृत्तिरिति चेन्न, एवं सति घटपटादौ तत्त्वज्ञस्य न बाधितसत्त्वधीः, न वा व्यावहारिकपारमार्थिकसत्त्वधीरिति तत्र किंचिदन्यदेव कल्पनीयं स्यात्, तथा च लोकशास्त्रविरोध इति सुष्ठूक्तं हरिभद्राचार्यैः–" अग्निजलभूमयो यत्परितापकरा भवेऽनुभवसिद्धाः । रागादयश्च रौद्रा असत्प्रवृत्त्यास्पदं लोके ॥ १ ॥ परिकल्पिता यदि ततो न सन्ति तत्त्वेन कथममी स्युरिति । परिकल्पिते च तत्त्वे भवभवविगमौ कथं युक्तौ ॥ २ ॥ इत्यादि " । तस्माद्वृत्तेर्व्यावहारिकसत्तयापि न निस्तारः । प्रपंचे परमार्थदृष्ट्येव व्यवहारदृष्ट्यापि सत्तान्तरानवगाहनादिति स्मर्तव्यम् । किं च निष्प्रकारकज्ञानस्य कुत्राप्यज्ञाननिवर्तकत्वं न दृष्टमिति शुद्धब्रह्मज्ञानमात्रात्कथमज्ञाननिवृत्तिः? ( किं च सप्रकारं निष्प्रकारं वा ब्रह्म अज्ञाननिवर्तकमिति वक्तव्यं, आद्ये निष्प्रकारे ब्रह्मणि सप्रकारकज्ञानस्यायथार्थत्वान्नाज्ञाननिवर्तकता, तस्य यथार्थत्वे नाद्वैतसिद्धिः, द्वितीयपक्षस्तु निष्प्रकारकज्ञानस्य कुत्राप्यज्ञाननिवर्तकत्वादर्शनादेवानुद्भावनार्थः " इति प्रत्यंतरपाठः ) न च सामान्यधर्ममात्राप्रकारकसमानविषयप्रमात्वमज्ञाननिवृत्तौ प्रयोजकं, प्रमेयमिति ज्ञानेऽतिव्याप्तिवारणाय सामान्येति, प्रमेयो घट इत्यादावतिव्याप्तिवारणाय मात्रेति, तेनेदं विशेषप्रकारे निष्प्रकारे चानुगतमिति निष्प्रकारकब्रह्मज्ञानस्यापि ब्रह्माज्ञाननिवर्तकत्वं लक्षणान्वयात् । न च सामान्यधर्ममात्रप्रकारकज्ञानेऽव्याप्तिः, 

इदमनिदं वा, प्रमेयमप्रमेयं वेत्यादि[1]संशयादर्शनेन तदनिवर्तकस्य तस्यासंग्रहादिति वाच्यम्, निष्प्रकारकसंशयाभावेन निःष्प्रकारकाज्ञानासिद्ध्या निष्प्रकारकब्रह्मज्ञानस्यापि तन्निवर्तकत्वायोगादेकत्र धर्मिणि प्रकाराणामनन्तत्वे प्रकारनिष्ठतया निरवच्छिन्नप्रकारतासंबन्धेनाधिष्ठानप्रमात्वेन तया तदज्ञाननिवर्तकत्वौचित्यात्। अधिष्ठानत्वं च भ्रमजनकाज्ञानविषयत्वं वाऽज्ञानविषयत्वमेव वाऽखंडोपाधिर्वा? न च विषयतयैव तत्त्वं युक्तं, प्रमेयत्वस्य च केवलान्वयिनोनंगीकारान्न प्रमेयमिति ज्ञानाद् घटाद्याकाराज्ञाननिवृत्तिप्रसंग इति वाच्यं, द्रव्यमिति ज्ञानात्तदापत्तेरवारणात्। न च तस्य द्रव्यत्वविशिष्टविषयत्वेऽपि घटत्वविशिष्टाविषयत्वात्तद्वारणं, द्रव्यत्वविशिष्टस्यैव घटावच्छेदेन घटत्वविशिष्टत्वात्सत्त्वविशिष्टब्रह्मवत्, विशिष्टविषयज्ञानेन विशिष्टविषयाज्ञाननिवृत्त्यभ्युपगमेऽपि च ब्रह्मणः सच्चिदानन्दत्वादिधर्मवैशिष्ट्यप्रसंगः। एतेनान्यत्र घटाज्ञानत्वघटत्वप्रकारकप्रमात्वादिना नाश्यनाशकभावेऽपि प्रकृते ब्रह्माज्ञाननिवृत्तित्वेन ब्रह्मप्रमात्वेनैव कार्यकारणभावः, न तु ब्रह्मत्वप्रकारकेति विशेषणमुपादेयं, गौरवादनुपयोगाद्विरोधाच्चेत्यपि निरस्तम्, विशिष्टब्रह्मण एव संशयेन विशिष्टाज्ञाननिवृत्त्यर्थं विशेषोपरागेणैव ब्रह्मज्ञानस्यान्वेषणीयत्वात्, शुक्तिरजतादिस्थलेऽपि विशिष्टाज्ञानविषयस्यैवाधिष्ठानत्वं क्लृप्तमित्यत्राप्ययं न्यायोऽनुसर्तव्यः। किं च ब्रह्मणो निर्धर्मकत्वे तत्र विषयताया अप्यनुपपन्नत्वात्तद्विषयज्ञानत्वमपि तत्र दुर्लभं, विषयता हि कर्मतेति तदंगीकारे तस्य क्रियाफलशालित्वेन घटादिवज्जडत्वापत्तेः, तद्विषयज्ञानाजनकत्वे च तत्र वेदान्तानां प्रामाण्यानुपपत्तिः। न च तदज्ञाननिवर्तकतामात्रेण तद्विषयत्वोपचारः, अन्योऽन्याश्रयात्। न च कल्पिता विषयता कर्म-

१ संशयाद्यदर्शनात्सामान्यमात्राप्रकारकाज्ञानानंगीकारेण तदनिवर्तकस्य तस्यासंग्रहादिति वाच्यं ( प्रत्यंतरे )

त्वाप्रयोजिका, वास्तवविषयतायाः कुत्राप्यनंगीकाराद्व्यावहारिक्याश्च तुल्यत्वात् । न च ब्रह्मणि ज्ञानविषयताऽसंभवेऽपि ज्ञाने ब्रह्मविषयता तद्बिंबग्राहकत्वरूपाऽन्या वा काचिदनिर्वचनीया संभवतीति नानुपपत्तिः, विषयतैवाकारः प्रतिविषयं विलक्षणः, अत एव ब्रह्माकारापरोक्षप्रमाया एवाज्ञाननिवर्तकत्वं, अज्ञानविषयस्वरूपाकारापरोक्षप्रमात्वस्य सर्वत्रानुगतत्वात् । न चेदमित्याकारं घटाकारमिति शंकितुमपि शक्यं, आकारभेदस्य स्फुटतरसाक्षिप्रत्यक्षसिद्धत्वादिति वाच्यम्, ज्ञाननिष्ठाया अपि ब्रह्मविषयताया ब्रह्मनिरूपितत्वस्यावश्यकत्वेन ब्रह्मणि [1]तन्निरूपकत्वधर्मसत्त्वे निर्धर्मकत्वव्याघातात्, उभयनिरूप्यस्य विषयविषयिभाव[2]स्यैकधर्मत्वेन निर्वाहायोगात् । न च ब्रह्मण्यपि कल्पितविषयतोपगमे कर्मत्वेन न जडत्वापातः, स्वसमानसत्ताकविषयताया एव कर्मत्वापादकत्वात्, घटादौ हि विषयता स्वसमानसत्ताका, द्वयोरपि व्यावहारिकत्वात्, ब्रह्मणि तु परमार्थसति व्यावहारिकी विषयता न तथेति स्फुटमेव वैषम्यादिति वाच्यम्, सत्ताया इव विषयताया अपि ब्रह्मणि पारमार्थिकत्वोक्तावपि बाधकाभावात्, परमार्थनिरूपितधर्मस्य व्यावहारिके व्यावहारिकत्ववद्व्यावहारिकनिरूपितस्य धर्मस्य पारमार्थिके पारमार्थिकताया अपि न्यायप्राप्तत्वात् । सत्ताद्युपलक्षणभेदेऽप्युपलक्ष्यमेकमेवेति न दोष इति चेद्विषयतायामप्येष एव न्यायः । एवं चानन्तधर्मात्मकधर्म्यभेदेऽपि ब्रह्मणि कौटस्थ्यं द्रव्यार्थादेशादव्याहतमेव । तथा चान्यूनानतिरिक्तधर्मात्मद्रव्यस्वभावलाभलक्षणमोक्षगुणेन भगवन्तं तुष्टाव स्तुतिकारः—" भवबीजमनन्तमुज्झितं विमलज्ञानमनन्तमर्जितम् । न च हीनकलोऽसि नाधिकः समतां चाप्यतिवृत्य वर्तसे ॥ १ ॥ इति " । एतेन चैतन्यवि-

१ तन्निवृत्तिकत्वधर्मसत्त्वे. २ स्यैकनिष्ठत्वेन.

षयतैव जडत्वापादिका, न तु वृत्तिविषयतापि, “यतो वाचो निवर्तन्ते, न चक्षुषा गृह्यते, नापि वाचा, तं त्वौपनिषदं पुरुषं पृच्छामि” नावेदविन्मनुते तं बृहन्तं वेदेनैव यदेवेदितव्यम् इत्याद्युभयविधश्रुत्यनुसारेणेत्थं कल्पनात् “फलव्याप्यत्वमेवास्य शास्त्रकृद्भिर्निवारितम्। ब्रह्मण्यज्ञाननाशाय वृत्तिव्याप्तिरपेक्षिता ॥ १ ॥” इति कारिकायामपि फलपदं चैतन्यमात्रपरमेव द्रष्टव्यं, प्रमाणजन्यान्तःकरणवृत्त्यभिव्यक्तचैतन्यस्य शास्त्रे फलत्वेन व्यवह्रियमाणस्य ग्रहणे तद्व्याप्यताया अन्वयव्यतिरेकाभ्यां जडत्वापादकत्वे ब्रह्मण इव साक्षिभास्यानामपि जडत्वानापत्तेः, चैतन्यकर्मता तु चिद्भिन्नत्वावच्छेदेन सर्वत्रैवेति सैव जडत्वप्रयोजिका, न च वृत्तिविषयत्वेऽपि चैतन्यविषयत्वं नियतं वृत्तेश्चिदाकारगर्भिण्या एवोत्पत्तेः, तदुक्तम्—“वियदवस्तुस्वभावानुरोधादेव न कारणात्। वियत्संपूर्णतोत्पत्तौ कुम्भस्यैवं दशा धियाम् ॥ १ ॥ घटदुःखादिहेतुत्वं धियो धर्मादिहेतुतः। स्वतः सिद्धार्थसंबोधव्याप्तिर्वस्त्वनुरोधतः ॥ २ ॥ इति”, तथा च जडत्वं दुर्निवारमिति वाच्यम्, वृत्त्युपरक्तचैतन्यस्य स्वत एव चैतन्यरूपत्वेन तद्व्याप्यत्वाभावात्, फले फलान्तरानुत्पत्तेस्तद्भिन्नानां तु स्वतो भानरहितानां तद्व्याप्तेरवश्याश्रयणीयत्वादित्यादि मधुसूदनोक्तमप्यपास्तम्, वृत्तिविषयताया अपि निर्धर्मके ब्रह्मण्यसंभवात्, कल्पितविषयतायाः स्वीकारे च कल्पितप्रकारताया अपि स्वीकारापत्तेः, उभयोरपि ज्ञानभासकसाक्षिभास्यत्वेन चैतन्यानुपरंजकत्वाविशेषात्, ज्ञानस्य स्वविषयानिवर्तकत्वेन प्रकारानिवृत्तिप्रसंगभयस्य च विषयताद्यनिवृत्तिपक्ष इव धर्मधर्मिणोर्जात्यन्तरात्मकभेदाभेदसंबन्धाश्रयणेनैव सुपरिहरत्वात्, कृतान्तकोपस्त्वेकान्तवादिनामुपरि कदापि न निवर्तत इति तत्र कः प्रतिकारः। यदि च दृग्विषयत्वं ब्रह्मणि न वास्तवं, तदा सकृद्दर्शनमात्रेणात्मनि घटादाविव दृगपगमेऽपि दृष्टत्वं कदापि नापैतीत्युक्तं न युज्यते। तथा

च–"सकृत्प्रत्ययमात्रेण घटश्चेद्भासते तदा । स्वप्रकाशोऽयमात्मा किं घटवच्च न भासते ॥ १ ॥ स्वप्रकाशतया किं ते तद्बुद्धिस्तत्त्ववेदनम् । बुद्धिश्च क्षणनाश्येति चोद्यं तुल्यं घटादिषु ॥ २ ॥ घटादौ निश्चिते बुद्धिर्नश्यत्येव यदा घटः । दृष्टो नेतुं तदाऽशक्य इति चेत्सममात्मनि ॥ ३ ॥ निश्चित्य सकृदात्मानं यदापेक्षा तदैव तम् । वक्तुं मन्तुं तथा ध्यातुं शक्नोत्येव हि तत्त्ववित् ॥ ४ ॥ उपासक इव ध्यायँल्लौकिकं विस्मरेद्यदि । विस्मरत्येव सा ध्यानाद्विस्मृतिर्न तु वेदनात् ॥ ५ ॥" इत्यादि ध्यानदीपवचनं विप्लवेतेति किमतिविस्तरेण । तस्माद्ब्रह्मविषया ब्रह्माकारा वा वृत्तिरविवेचितसारैव । कथंचास्या निवृत्तिरिति वक्तव्यं, स्वकारणाज्ञाननाशादिति चेत्, अज्ञाननाशक्षण इवावस्थितस्य विनश्यदवस्थाज्ञानजनितस्य वा दृश्यस्य चिरमप्यनुवृत्तौ मुक्तावनाश्वासः । उक्तप्रमाविशेषत्वेन निवर्तकता दृश्यत्वेन च निवर्त्यतेति दृश्यत्वेन रूपेणाविद्यया सह स्वनिवर्त्यत्वेऽपि न दोषः, निवर्त्यतानिवर्तकतयोरवच्छेदकैक्य एव क्षणभंगापत्तेरिति चेन्न, प्रमाया अप्रमां प्रत्येव निवर्तकत्वदर्शनेन दृश्यत्वस्य निवर्त्यतानवच्छेदकत्वात् । न च ज्ञानस्याज्ञाननाशकतापि प्रमाणसिद्धा, अन्यथा स्वप्नाद्यध्यासकारणीभूतस्याज्ञानस्य जागरादिप्रमाणज्ञानेन निवृत्तौ पुनः स्वप्नाध्यासानुपपत्तिः, तत्रानेकाज्ञानस्वीकारे त्वात्मन्यपि तथासंभवेन मुक्तावनाश्वासः, मूलाज्ञानस्यैव विचित्रानेकशक्तिस्वीकारादेकशक्तिनाशेऽपि शक्त्यन्तरेण स्वप्नान्तरादीनां पुनरावृत्तिः संभवति, सर्वशक्तिमतो मूलाज्ञानस्यैव निवृत्तौ तु कारणान्तरासंभवात्, द्वितीयस्य च तादृशस्यानंगीकारान्न प्रपंचस्य पुनरुत्पत्तिरिति तु स्ववासनामात्रं, चरमज्ञानं वा मूलाज्ञाननाशकं क्षणविशेषो वेत्यत्र विनिगमकाभावादनन्तोत्तरोत्तरशक्तिकार्येष्वनन्तपूर्वपूर्वशक्तीनां प्रतिबन्धकत्वस्य, चरमशक्तिकार्ये चरमशक्तेः, तन्नाशे च चरमज्ञानस्य हेतुत्वकल्पने महागौरवात्,

पूर्वशक्तिनाश इव चरमशक्तिनाशोऽपि मूला[1]ज्ञानानुवृत्त्यापत्त्यनुद्धाराच्चेति, न किंचिदेतत् । एतेन जागरादिभ्रमेण स्वप्नादिभ्रमतिरोधानमात्रं क्रियते, सर्पभ्रमेण रज्ज्वां धाराभ्रमतिरोधानवत्, अज्ञाननिवृत्तिस्तु ब्रह्मात्मैक्यविज्ञानादेवेत्यपि निरस्तम् । एवं सति ज्ञानस्याज्ञाननिवर्तकतायां प्रमाणानुपलब्धेस्तन्निवृत्तिमूलमोक्षानाश्वासान्मा भूदुदाहरणोपालम्भः, श्रुतिः श्रुतार्थापत्तिश्चैतदर्थे प्रमाणतामवगाहेते एव । तत्र श्रुतिस्तावत्–"तमेव विदित्वाऽतिमृत्युमेति" मृत्युरविद्येति शास्त्रप्रसिद्धं, तथा "तत्त्वभावाद्भूयश्चान्ते विश्वमायानिवृत्तिः" स्मृतिश्च–"दैवी ह्येषा गुणमयी मम माया दुरत्यया । मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते ॥ १ ॥ ज्ञानेन तु तदज्ञानं येषां नाशितमात्मनः । तेषामादित्यवज्ज्ञानं प्रकाशयति तत्परम् ॥ २ ॥" इत्यादि । एवं "ब्रह्मविद् ब्रह्मैव भवति" "तरति शोकमात्मवित्", "तरत्यविद्यां वितता हृदि यस्मिन्निवेशिते । योगी मायाममेयाय तस्मै ज्ञानात्मने नमः ॥ १ ॥ इति" "अविद्यायाः परं पारं तारयसीत्यादिः" श्रुतार्थापत्तिश्च–"ब्रह्मज्ञानाद् ब्रह्मभावः श्रूयमाणस्तद्व्यवधायकाज्ञाननिवृत्तिमन्तरेण नोपपद्यत इति ज्ञानादज्ञाननिवृत्तिं गमयति"। "अनृतेन हि प्रत्यूढा नीहारेण प्रावृताः," "अन्यद्युष्माकमन्तरं," "अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः" इत्यादि श्रुतिस्मृतिशतेभ्योऽज्ञानमेव मोक्षव्यवधायकत्वेनावगतम्, एकस्यैव तत्त्वज्ञानेनाज्ञाननिवृत्त्यभ्युपगमाच्च, नान्यत्र, व्यभिचारदर्शनेन ज्ञानस्याज्ञाननिवर्तकत्वबाधोऽपीति चेन्न, एतस्यैकजीवमुक्तिवादस्य श्रद्धामात्रशरणत्वात्, अन्यथा जीवान्तरप्रतिभासस्य स्वाप्निकजीवान्तरप्रतिभासवद्विभ्रमत्वे जीवप्रतिभासमात्रस्यैव तथात्वं स्यादिति चार्वाकमतसाम्राज्यमेव वेदान्तिना प्राप्तं स्यात् । उक्तश्रुतयस्तु कर्मण एव व्यवधायकत्वं, क्षीणकर्मात्मन एव च ब्रह्मभूयं प्रतिपादयितुमुत्सहन्त इति किं शशशृंग-

१ ( पंडमूलेति )

 

सहोदराज्ञानादिकल्पनया तदभिप्रायविडंबनेन । निर्विकल्पकब्रह्मबोधोऽपि शुद्धद्रव्यनयादेशतामेवावलंबताम्, सर्वपर्यायनयविषयव्युत्क्रम एव तत्प्रवृत्तेः, न तु सर्वथा जगदभावपक्षपातितामिति सम्यग्दृशां वचनोच्चारः । शाब्द एव स इत्यत्र तु नाग्रहः, यावत्पर्यायोपरागासंभवविचारसहकृतेन मनसैव तद्ग्रहसंभवान्न केवलमात्मनि, किं तु सर्वत्रैव द्रव्ये पर्यायोपरागानुपपत्तिप्रसूतविचारे मनसा निर्विकल्पक एव प्रत्ययोऽनुभूयते । उक्तं च संमतौ–"पज्जवणयवुक्कंतं वत्थू दव्वट्ठियस्स वत्तव्वं । जाव दविओवओगो अपच्छिमवियप्पनिव्वयणो ॥ १ ॥ इति" । पर्यायनयेन व्युत्क्रान्तं गृहीत्वा विचारेण मुक्तं वस्तु द्रव्यार्थिकस्य वक्तव्यं, यथा घटो द्रव्यमित्यत्र घटत्वविशिष्टस्य परिच्छिन्नस्य द्रव्यत्वविशिष्टेनापरिच्छिन्नेन सहाभेदान्वयासंभव इति मृदेव द्रव्यमिति द्रव्यार्थिकप्रवृत्ति, तत्रापि सूक्ष्मेक्षिकायामपरापरद्रव्यार्थिकप्रवृत्तिर्यावद्द्रव्योपयोगो न विद्यते, पश्चिमे उत्तरे विकल्पनिर्वचने सविकल्पकधीव्यवहारौ यत्र स तथा शुद्धसंग्रहावसान इति यावत्, ततः परं विकल्पवचनाप्रवृत्तेः इत्येतस्या अर्थः । "तत्त्वमसि" इत्यादावप्यात्मनस्तत्तदन्यद्रव्यपर्यायोपरागासंभवविचारशतप्रवृत्तावेवशुद्धद्रव्यविषयं निर्विकल्पकमिति शुद्धदृष्टौ घटज्ञानाद्ब्रह्मज्ञानस्य को भेदः । एकत्र सदद्वैतमपरत्र च ज्ञानाद्वैतं विषय इत्येतावति भेदे त्वौत्तरकालिकं सविकल्पकमेव साक्षीति सविकल्पकाविकल्पकत्वयोरप्यनेकान्त एव श्रेयान् । तदुक्तम्–"सविअप्पणिव्विअप्पं इय पुरिसं जो भणेज्ज अविअप्पं । सविअप्पमेव वा णिच्छएण ण स णिच्छिओ समए ॥ १ ॥ इति" । 
न च निर्विकल्पको द्रव्योपयोगोऽवग्रह एवेति तत्र विचारसहकृतमनोजन्यत्वानुपपत्तिः, विचारस्येहात्मकत्वेनेहाजन्यस्य व्युपरताकांक्षस्य तस्य नैश्चयिकापायरूपस्यैवाभ्युपगमात्, अपायो नाम जात्यादि, योजनानियमस्तु शुद्धद्रव्यादेशरूप-

श्रुतनिश्चि(श्रि)तातिरिक्त एवेति विभावनीयम् स्वसमयनिष्णातैः। ब्रह्माकारबोधस्य मानसत्वे "नावेदविन्मनुते तं बृहंतं वेदेनैव तद्वेदितव्यं तं त्वौपनिषदं पुरुषं पृच्छामीत्यादिश्रुतिविरोध इति चेच्छाब्दत्वेऽपि "यद्वाचानभ्युदितं, न चक्षुषा गृह्यते, नापि वाचा, यतो वाचो निवर्तन्ते" इत्यादिश्रुतिविरोधस्तुल्य एव। अथ वागगम्यत्वनिषेधकश्रुतीनां मुख्यवृत्त्यविषयत्वावगाहित्वेनोपपत्तिर्जहदजहल्लक्षणयैव ब्रह्मणि महावाक्यगम्यत्वप्रतिपादनात्, मनसि तु मुख्यामुख्यभेदाभावात् "यन्मनसा न मनुते" इत्यादि विरोध एव "सर्वे वेदा यत्रैकं भवन्ति स मानसीन आत्मा मनसैवानुद्रष्टव्यः" इत्यादिश्रुतौ मानसीनत्वं तु मनस्युपाधावुपलभ्यमानत्वं, न तु मनोजन्यसाक्षात्कारत्वं, मनसैवेति तु कर्तरि तृतीया आत्मनोऽकर्तृत्वप्रतिपादनार्था मनसो दर्शनकर्तृत्वमाह, न करणतां, औपनिषदसमाख्याविरोधात्। "कामः संकल्पो विचिकित्सा श्रद्धाऽश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत्सर्वं मनस एवेति" श्रुतौ मृद्घट इतिवदुपादानकारणत्वेन मनःसामान्याधिकरण्यप्रतिपादनात्, तस्य निमित्तकारणत्वविरोधाच्चेति चेन्न, कामादीनां मनोधर्मत्वप्रतिपादिकायाः श्रुतेर्मनःपरिणतात्मलक्षणभावमनोविषयताया एव न्याय्यत्वात्, "मनसा ह्येव पश्यति मनसा शृणोति" इत्यादौ मनःकरणस्यापि श्रुतेर्दीर्घकालिकसंज्ञानरूपदर्शनग्रहणेन चक्षुरादिकरणसत्त्वेऽपि तत्रैवकारार्थान्वयोपपत्तेः, त्वन्मतेपि ब्रह्मणि मानसत्वविधिनिषेधयोर्वृत्तिविषयत्वतदुपरक्तचैतन्याविषयत्वाभ्यामुपपत्तेश्च। शब्दस्य त्वपरोक्षज्ञानजनकत्वे स्वभावभंगप्रसंग एव स्पष्टं दूषणम्। न च प्रथमं परोक्षज्ञानं जनयतोऽपि शब्दस्य विचारसहकारेण पश्चादपरोक्षज्ञानजनकत्वमिति न दोष इति वाच्यम्, अर्धजरतीयन्यायापातात्। न खलु शब्दस्य परोक्षज्ञानजननस्वाभाव्यं सहकारिसहस्रेणाप्यन्यथा कर्तुं शक्यं आगन्तुकस्य स्वभावत्वा-

नुपपत्तेः । न च संस्कारसहकारेण चक्षुषा प्रत्यभिज्ञानात्मकप्रत्यक्षजननवदुपपत्तिः, यदंशे संस्कारसापेक्षत्वं तदंशे स्मृतित्वापातो, यदंशे च चक्षुःसापेक्षत्वं तदंशे प्रत्यक्षापात इति भियैव प्रत्यभिज्ञानस्य प्रमाणान्तरत्वमिति जैनैः स्वीकारात् । स्वे स्वे विषये युगपज्ज्ञानं जनयतोश्चक्षुःसंस्कारयोरार्थसमाजेनैकज्ञानजनकत्वमेव पर्यवस्यति, अन्यथा रजतसंस्कारसहकारेणासन्निकृष्टेऽपि रजते चाक्षुषज्ञानापत्तेरन्यथाख्यात्यस्वीकारभंगप्रसंग इति वदंस्तपस्वी तूभयात्मकैकज्ञानाननुव्यवसायादेव निराकर्तव्यः, अन्यथा रजतभ्रमेऽप्युभयात्मकतापत्तेः, पर्वतो वह्निमानित्यनुमितावपि उभयसमाजादंशे प्रत्यक्षानुमित्यात्मकतापत्तेश्च । अथ मनस इव शब्दस्य परोक्षापरोक्षज्ञानजननस्वभावांगीकाराददोषः, मनस्त्वेन परोक्षज्ञानजनकता, इन्द्रियत्वेन चापरोक्षज्ञानजनकतेत्यस्ति मनस्यवच्छेदकभेद इति चेच्छब्दस्यापि विषयाजन्यज्ञानजनकत्वेन वा ज्ञानजनकत्वेन वा परोक्षज्ञानजनकतायोग्यपदार्थनिरूपितत्वं पदार्थाभेदपरशब्दत्वेन चापरोक्षज्ञानजनकतेति कथं नावच्छेदकभेदः । धार्मिकस्त्वमसीत्यादौ व्यभिचारवारणाय निरूपितान्तं विशेषणं, इतरव्यावर्त्यं तु स्पष्टमेव । एतच्च ‘दशमस्त्वमसि’ ‘राजा त्वमसी’त्यादिवाक्याद्दशमोऽहमस्मि राजाहमस्मीत्यादिसाक्षात्कारदर्शनात्कल्प्यते, नाहं दशम इत्यादि भ्रमनिवृत्तेः अत इत्थमेव संभवात् । साक्षात्कारिभ्रमे साक्षात्कारिविरोधिज्ञानत्वेनैव विरोधित्वकल्पनात् । न च तत्र वाक्यात्पदार्थमात्रोपस्थितौ मानसः संसर्गबोध इति वाच्यम्, सर्वत्र वाक्ये तथा वक्तुं शक्यत्वेन शब्दप्रमाणमात्रोच्छेदप्रसंगादिति चेन्मैवम्, दशमस्त्वमसीत्यादौ वाक्यात्परोक्षज्ञानानन्तरं मानसज्ञानान्तरस्यैव भ्रमनिवर्तकत्वकल्पनात्, धार्मिकस्त्वमसीत्यादौ विशेष्यांशस्य योग्यत्वादेव योग्यपदार्थनिरूपितेत्यत्र योग्यपदार्थतावच्छेदकविशिष्टेत्यस्यावश्यवाच्यत्वेन महावा-

॥ १५३ ॥

क्यादपि तत्पदार्थतावच्छेदकस्यायोग्यत्वेनापरोक्षज्ञानासंभवाच्च, अयोग्यांशत्यागयोग्यांशोपादानाभिमुखलक्षणावत्त्वमेव योग्यपदार्थत्वमित्युक्तौ च धार्मिकस्त्वमसीत्यादावपि शुद्धापरोक्षविषयत्वे तद्व्यावर्तकविशेषणदानानुपपत्तिः । तथा च योग्यलक्ष्यपरत्वग्रहे उदाहरणस्थानदौर्लभ्यं । अयं च विषयोऽस्माकं पर्यायविनिर्मोकेन शुद्धद्रव्यविषयतापर्यवसायकस्य द्रव्यनयस्येत्यलं ब्रह्मवादेन । किं च त्वंपदार्थाभेदपरशब्दत्वेनापरोक्षज्ञानजनकत्वोक्तौ यूयं राजान इत्यतोऽखिलसंबोध्यविशेष्यकराजत्वप्रकारकापरोक्षशाब्दापत्तिः, तत्र तादृशमानसाभ्युपगमे चान्यत्र कोऽपराधः । एतेनैकवचनान्तत्वपदार्थग्रहणेऽपि न निस्तार एकस्मिन्नेव यूयमिति प्रयोगेऽगतेश्चैकाभिप्रायकत्वं, पदग्रहणे च तत्तदभिप्रायकशब्दत्वेन तत्तच्छाब्दबोधहेतुत्वमेव युक्तम् । अत एव वाक्यादपि द्रव्यार्थादेशादखण्डः, पदादपि च पर्यायार्थादेशात् सखण्डः शाब्दबोध इति जैनी शास्त्रव्यवस्था । तस्मान्न शब्दस्यापरोक्षज्ञानजनकत्वम् । एतेनापरोक्षपदार्थाभेदपरशब्दत्वेनापरोक्षज्ञानजनकत्वं, अत एव शुक्तिरियमिति वाक्यादाहत्य रजतभ्रमनिवृत्तिः, एवं च चैतन्यस्य वास्तवापरोक्षत्वादपरोक्षज्ञानजनकत्वं महावाक्यस्येत्यपि निरस्तम्, वास्तवापरोक्षस्वरूपविषयत्वस्य त्वन्नीत्या तत्त्वमस्यादिवाक्ये संभवेऽपि दशमस्त्वमसीत्यादावसंभवान्निवृत्ताज्ञानविषयत्वस्य च शाब्दबोधात्पूर्वमभावात् यदा कदाचिन्निवृत्ताज्ञानत्वग्रहणे पर्वतो वह्निमानित्यादिवाक्यानामप्यपरोक्षस्वरूपविषयतयाऽपरोक्षज्ञानजनकत्वप्रसंगात् "यतो वा इमानि भूतानि जायन्ते" "सत्यं ज्ञानमनन्तं" इत्यादिवाक्यानामपरोक्षस्वरूपविषयतयाऽपरोक्षज्ञानजनकत्वे महावाक्यवैयर्थ्यापाताच्च । किं चैवं घटोऽस्तीतिशाब्दे चाक्षुषत्वमप्यापतेत्, अपरोक्षपदार्थाभेदपरशब्दादिवापरोक्षपक्षसाध्यकानुमितिसामग्रीतोऽपरोक्षानुमितिरपि च प्रसज्येत । एवं च भिन्नविषयत्वा-

 

द्यप्रवेशेनैवानुमितिसामग्र्या लाघवाद्बलवत्त्वमिति विशेषदर्शनकालीनभ्रमसंशयोत्तरप्रत्यक्षमात्रोच्छेद इति बहुतरं कुघटम्। एतेन प्रमातृभेदविषयत्वेनापरोक्षज्ञानजनकत्वमित्यपि निरस्तम्, सर्वज्ञत्वादिविशिष्टोऽसीत्यादिवाक्यादपि तथाप्रसंगात्, ईश्वरो मद्भिन्नश्चेतनत्वान्मद्वदिति अनुमानादपि तथाप्रसंगाच्चेति। महावाक्यजन्यमपरोक्षं शुद्धब्रह्मविषयमेव केवलज्ञानमिति वेदान्तिनां महानेव मिथ्यात्वाभिनिवेश इति विभावनीयं सूरिभिः।

इदमिदानीं निरूप्यते–केवलज्ञानं स्वसमानाधिकरणकेवलदर्शनसमानकालीनं न वा, केवलज्ञानक्षणत्वं स्वसमानाधिकरणदर्शनक्षणाव्यवहितोत्तरत्वव्याप्यं न वा? एवमाद्याः क्रमोपयोगवादिनां जिनभद्रगणिक्षमाश्रमणपूज्यपादानां, युगपदुपयोगवादिनां च मल्लवादिप्रभृतीनां, यदेव केवलज्ञानं, तदेव केवलदर्शनमिति वादिनां च महावादिश्रीसिद्धसेनदिवाकराणां, साधारण्यो विप्रतिपत्तयः। यत्तु युगपदुपयोगवादित्वं सिद्धसेनाचार्याणां नन्दिवृत्तावुक्तं तदभ्युपगमवादाभिप्रायेण, न तु स्वतंत्रसिद्धान्ताभिप्रायेण, क्रमाक्रमोपयोगद्वयपर्यनुयोगानन्तरमेव स्वपक्षस्य संमतावुद्भावितत्वादिति द्रष्टव्यम्। एतच्च तत्त्वं सयुक्तिकं संमतिगाथाभिरेव प्रदर्शयामः–"मणपज्जवनाणंतो नाणस्स य दरिसणस्स य विसेसो। केवलनाणं पुण दंसणंति नाणंति य समाणं ॥ १ ॥" युगपदुपयोगद्वयाभ्युपगमवादोऽयम्–मनःपर्यायज्ञानमन्तः पर्यवसानं यस्य स तथा, ज्ञानस्य दर्शनस्य च विश्लेषः पृथग्भाव इति साध्यम्। अत्र च छद्मस्थोपयोगत्वं हेतुर्द्रष्टव्यः, तथा च प्रयोगः–चक्षुरचक्षुरवधिज्ञानानि चक्षुरचक्षुरवधिदर्शनेभ्यः पृथक्कालानि, छद्मस्थोपयोगात्मकज्ञानत्वात्, श्रुतमनःपर्यायज्ञानवत्। वाक्यार्थविषये श्रुतज्ञाने, मनोद्रव्यविशेषालंबने मनःपर्यायज्ञाने चादर्शनस्वभावे मत्यवधिजाद्दर्शनोपयोगाद्भिन्नकालत्वं प्रसिद्धमे- 

वेति टीकाकृतः। दर्शनत्रयपृथक्कालत्वस्य कुत्राप्येकस्मिन्नसिसाधयिषितत्वात्, स्वदर्शनपृथक्कालत्वस्य च सिसाधयिषितस्यो-क्तदृष्टान्तयोरभावात्सावरणत्वं हेतुः, व्यतिरेकी च प्रयोगः, तज्जन्यत्वं वा हेतुः यद्यज्जन्यं तत्ततः पृथक्कालमिति सामान्य-व्याप्तौ यथा दण्डात् घट इति च दृष्टान्ते इति तु युक्तं, केवलज्ञानं पुनर्दर्शनं दर्शनोपयोग इति वा ज्ञानं ज्ञानोपयोग इति वा समानं तुल्यकालं तुल्यकालीनोपयोगद्वयात्मकमित्यर्थः, प्रयोगश्च—केवलिनो ज्ञानदर्शनोपयोगावेककालीनौ, युगपदावि-र्भूतस्वभावत्वात्, यावेवं तावेवं, यथा रवेः प्रकाशतापौ। अयमभिप्राय आगमविरोधीति केषांचिन्मतं, तानधिक्षिपन्नाह-"केई भणंति जइया जाणइ तइआ ण पासइ जिणो त्ति। सुत्तमवलंबमाणा तित्थयरासायणाभीरू ॥२॥" केचिज्जिनभद्रा-नुयायिनो भणन्ति–'यदा जानाति तदा न पश्यति जिन' इति। सूत्रं–"केवली णं भंते इमं रयणप्पभं पुढविं आयारेहिं पमा-णेहिं हेऊहिं संठाणेहिं परिवारेहिं जं समयं जाणइ णो तं समयं पासइ? हंता गोयमा! केवलीणमित्यादिकमवलंबमानाः। अस्य च सूत्रस्य किलायमर्थस्तेषामभिमतः–केवली संपूर्णबोधः णमिति वाक्यालंकारे। भंते इति भगवन्। इमां रत्नप्रभामन्वर्थाभि-धानां पृथ्वीमाकारैः समनिम्नोन्नतादिभिः, प्रमाणैर्दैर्घ्यादिभिर्हेतुभिरनन्तानन्तप्रदेशिकैः स्कन्धैः, संस्थानैः परिमण्डलादिभिः, परिवारैर्घनोदधिवलयादिभिः। "जं समयं णो तं समयमिति" च 'कालाध्वनोरत्यन्तसंयोगे' (पा.२.३.५.) इति द्वितीया सप्तमी-बाधिका, तेन यदा जानाति न तदा पश्यतीति भावः। विशेषोपयोगः सामान्योपयोगान्तरितः, सामान्योपयोगश्च विशेषोपयो-गान्तरितः, तत्स्वाभाव्यादिति प्रश्नार्थः। उत्तरं पुनः हंता गोयमेत्यादिकं प्रश्नानुमोदकं गौतमेति गोत्रेणामंत्रणं प्रश्नानुमो-दनार्थं। पुनस्तदेव सूत्रमुच्चारणीयं। हेतुप्रश्नस्य चात्र सूत्रे उत्तरं। "सागारे से नाणे हवइ अणागारेसे दंसणे" इति, साकारं

॥ १५५ ॥

विशेषावलंबि अस्य केवलिनो ज्ञानं भवति, अनाकारमतिक्रान्तविशेषं सामान्यालंबि दर्शनं । न चानेकप्रत्ययोत्पत्तिरेकदा निरावरणस्यापि तत्स्वाभाव्यात् । न हि चक्षुर्दर्शनकाले श्रोत्रज्ञानोत्पत्तिरुपलभ्यते । न चावृतत्वात्तदा तदनुत्पत्तिः, स्वसमयेऽप्यनुत्पत्तिप्रसंगात् । न चाणुना मनसा यदा यदिन्द्रियसंयोगस्तदा तज्ज्ञानमिति क्रमः परवाद्यभिमतोऽपि युक्तिमान्, सर्वांगीणसुखोपलंभाद्युपपत्तये मनोवर्गणापुद्गलानां शरीरव्यापकत्वकल्पनात्, सुषुप्तौ ज्ञानानुत्पत्तये त्वङ्मनोयोगस्य ज्ञानसामान्ये हेतुत्वेन रासनकाले त्वाचरासनोभयोत्पत्तिवारणस्येत्थमप्यसंभवाच्च । ततो युगपदनेकप्रत्ययानुत्पत्तौ स्वभाव एव कारणं नान्यत्, सन्निहितेऽपि च द्व्यात्मके विषये सर्वविशेषानेव केवलज्ञानं गृह्णाति, सर्वसामान्यानि च केवलदर्शनमिति स्वभाव एवानयोरिति । एते च व्याख्यातारस्तीर्थकराशातनाया अभीरवः, तीर्थकरमाशातयन्तो न बिभ्यतीति यावत् । एवं हि निःसामान्यस्य निर्विशेषस्य वा वस्तुनोऽभावेन न किंचिज्जानाति केवली न किंचित्पश्यतीत्यधिक्षेपस्यैव पर्यवसानात् । न चान्यतरमुख्योपसर्जनविषयतामपेक्ष्योभयग्राहित्वेऽप्युपयोगक्रमाविरोधः, मुख्योपसर्जनभावेनोभयग्रहणस्य क्षयोपशमविशेषप्रयोज्यत्वात्, केवलज्ञाने छद्मस्थज्ञानीययावद्विषयतोपगमेऽवग्रहादिसंकीर्णरूपप्रसंगादुक्तसूत्रस्य तु न भवदुक्त एवार्थः, किं त्वयं, केवलीमां रत्नप्रभां पृथिवीं यैराकारादिभिः समकं तुल्यं जानाति, न तैराकारादिभिस्तुल्यं पश्यतीति किमेवं ग्राह्यं ? एवमित्यनुमोदना, ततो हेतौ पृष्टे सति तत्प्रतिवचनं भिन्नालंबनप्रदर्शकं तज्ज्ञानं साकारं भवति यतो दर्शनं पुनरनाकारमित्यतो भिन्नालंबनावेतौ प्रत्ययाविति प्रत्यपादीति टीकाकृतः । अत्र यद्यपि जं समयं इत्यत्र जं इति अम्भावः प्राकृतलक्षणात्, यत्कृतमित्यत्र जं कयमिति प्रयोगस्य लोकेऽपि दर्शनादिति वक्तुं शक्यते, तथापि तृतीयान्त-

पदवाच्यैराकारादिभिर्लुप्ततृतीयान्तसमासस्य यत्पदार्थस्य समकपदार्थस्य चान्यूनानतिरिक्तधर्मविशिष्टस्य रत्नप्रभायां भिन्नलिंगत्वादन्वय इति यत् समकमित्यादिक्रियाविशेषणत्वेन व्याख्येयम् । रत्नप्रभाकर्मकाकारादिनिरूपितयावदन्यूनानतिरिक्तविषयताकज्ञानवान् न तादृशतावदन्यूनानतिरिक्तविषयताकदर्शनवान् केवलीति फलितोऽर्थः । यदि च तादृशस्य विशिष्टदर्शनस्य निषेध्यस्याप्रसिद्धेर्न तन्निषेधः "असतो णत्थि णिसेहो" इत्यादिवचनादिति सूक्ष्ममीक्ष्यते, तदा क्रियाप्रधानमाख्यातमिति वैयाकरणनयाश्रयणेन रत्नप्रभाकर्मकाकारादिनिरूपितयावदन्यूनानतिरिक्तविषयताकं ज्ञानं, न तादृशं केवलिकर्तृकं दर्शनमित्येव बोधः, सर्वनयात्मके भगवत्प्रवचने यथोपपन्नान्यतरनयग्रहणे दोषाभावादिति तु वयमालोचयामः । हेतुयौगपद्यादपि बलेनोपयोगयौगपद्यमापततीत्याह–"केवलनाणावरणक्खयजायं केवलं जहा नाणं । तह दंसणं पि जुज्जइ णियआवरणक्खयस्संते ॥ ३ ॥" स्पष्टा, नवरं निजावरणक्षयस्यान्त इति दर्शनावरणक्षयस्यानन्तरक्षण इत्यर्थः । न चैकदोभयावरणक्षयेऽपि स्वभावहेतुक एवोपयोगक्रम इत्युक्तमपि सांप्रतं, एवं सति स्वभावेनैव सर्वत्र निर्वाहे कारणान्तरोच्छेदप्रसंगात्, कार्योत्पत्तिस्वभावस्य कारणेनैव तत्क्रमस्वभावस्य तत्क्रमेणैव, निर्वाह्यत्वाच्च । एतेन सर्वव्यक्तिविषयकत्वसर्वजातिविषयकत्वयोः पृथगेवावरणक्षयकार्यतावच्छेदकत्वादर्थ(त)स्तदवच्छिन्नोपयोगद्वयसिद्धिरित्यप्यपास्तम् । तत्सिद्धावपि तत्क्रमासिद्धेरावरणद्वयक्षयकार्ययोः समप्राधान्येनार्थगतेरप्रसराच्च । न च मतिश्रुतज्ञानावरणयोरेकदा क्षयोपशमेऽपि यथा तदुपयोगक्रमस्तथा ज्ञानदर्शनावरणयोर्युगपत्क्षयेऽपि केवलिनामुपयोगक्रमः स्यादिति शंकनीयं, तत्र श्रुतोपयोगे मतिज्ञानस्य हेतुत्वेन, शाब्दादौ प्रत्यक्षादिसामग्र्याः प्रतिबन्धकत्वेन च तत्संभवात् । अत्र तु क्षीणावरणत्वेन परस्परकार्यकारणभावप्रति-

बध्यप्रतिबन्धकभावाद्यभावेन विशेषात्। एतदेवाह–"भण्णइ खीणावरणे, जह मइनाणं जिणे ण संभवइ। तह खीणावरणिज्जे, विसेसओ दंसणं णत्थि ॥ ४ ॥" भण्यते निश्चित्योच्यते क्षीणावरणे जिने यथा मतिज्ञानं मत्यादिज्ञानं अवग्रहादिचतुष्टयरूपं वा ज्ञानं न संभवति, तथा क्षीणावरणीये विश्लेषतो ज्ञानोपयोगकालान्यकाले दर्शनं नास्ति क्रमोपयोगत्वस्य मत्याद्यात्मकत्वव्याप्यत्वात्सामान्यविशेषोभयालंबनक्रमोपयोगत्वस्य चावग्रहाद्यात्मकत्वव्याप्यत्वात्केवलयोः क्रमोपयोगत्वे तत्त्वापत्तिरित्यापादनपरोऽयं ग्रन्थः। प्रमाणं तु–केवलदर्शनं केवलज्ञानतुल्यकालोत्पत्तिकं, तदेककालीनसामग्रीकत्वात्, तादृशकार्यान्तरवत्, इत्युक्ततर्कानुगृहीतमनुमानमेवेति द्रष्टव्यम्। न केवलं क्रमवादिनोऽनुमानविरोधः, अपि त्वागमविरोधोऽपीत्याह–"सुत्तंमि चेव साइअपज्जवसियं ति केवलं वुत्तं। सुत्तासायणभीरुहिं तं च दट्ठव्वयं होइ ॥ ५ ॥" साद्यपर्यवसिते केवलज्ञानदर्शने सूत्रे प्रोक्ते, क्रमोपयोगे तु द्वितीयसमये तयोः पर्यवसानमिति कुतोऽपर्यवसितता ? तेन सूत्राशातनाभीरुभिः क्रमोपयोगवादिभिस्तदपि द्रष्टव्यं। चोऽप्यर्थः। न केवलं "केवली णं भंते इमं रयणप्पभं पुढवि' इत्याद्युक्तसूत्रयथाश्रुतार्थानुपपत्तिमात्रमिति भावः। न च द्रव्यापेक्षयाऽपर्यवसितत्वं, द्रव्यविषयप्रश्नोत्तराश्रुतेः। न चार्पितानर्पितसिद्धेरिति तत्त्वार्थसूत्रानुरोधेन द्रव्यार्पणयोः (अ) श्रुतयोरपि तयोः कल्पनं युक्तं, अन्यथा पर्यायाणामुत्पादविगमात्मकत्वाद्भवतोऽपि कथं तयोरपर्यवसानतेति पर्यनुयोज्यं ? यद्धर्मावच्छिन्ने क्रमिकत्वप्रसिद्धिः, तद्धर्मावच्छिन्नेऽपर्यवसितत्वान्वयस्य निराकांक्षत्वात्, अन्यथा ऋजुत्ववक्रत्वे अपर्यवसिते इति प्रयोगस्यापि प्रसंगात्, मम तु रूपरसात्मकैकद्रव्यवदक्रमभाविभिन्नोपाधिकोत्पादविगमात्मकत्वेऽपि केवलिद्रव्यादव्यतिरेकतस्तयोरपर्यवसितत्वं नानुपपन्नम्। अथ पर्यायत्वावच्छेदकधर्मवि-

निर्मोकेण शुद्धद्रव्यार्थादेशप्रवृत्तेः क्रमैकान्तेऽपि केवलयोरपर्यवसितत्वमुपपत्स्यते, अत एव पर्यायद्रव्ययोरादिष्टद्रव्यपर्यायत्वं सिद्धान्ते गीयते। तत्तदवच्छेदकविनिर्मोकस्य विवक्षाधीनत्वादिति चेत्किमयमुक्तधर्मविनिर्मोकस्तत्तत्पदार्थावच्छेदकविशिष्टयोरभेदान्वयानुपपत्त्या शुद्धद्रव्यलक्षणया, उत उक्तधर्मस्य विशेषणत्वपरित्यागेनोपलक्षणत्वमात्रविवक्षया? । आद्ये आद्यपद एव लक्षणायां शुद्धद्रव्यं शुद्धात्मद्रव्यं वाऽपर्यवसितमित्येव बोधः स्यात्, सादित्वस्यापि तत्रान्वय(ये)प्रवेशे तु केवलिद्रव्यं साद्यपर्यवसितमित्याकारक एव, उभयपदलक्षणायां तु शुद्धद्रव्यविषयको निर्विकल्पक एव बोध इति केवलज्ञानदर्शने साद्यपर्यवसिते इति बोधस्य कथमप्यनुपपत्तिः। अन्त्ये च केवलत्वोपलक्षितात्मद्रव्यमात्रग्रहणे तत्र सादित्वान्वयानुपपत्तिः, केवलिपर्यायग्रहणे च नवविधोपचारमध्ये पर्याये पर्यायोपचार एवाश्रयणीयः स्यादिति समीचीनं द्रव्यार्थादेशसमर्थनं। नियतोपलक्ष्यतावच्छेदकरूपाभावेऽपि संमुग्धोपलक्ष्यविषयकतादृशबोधस्वीकारे च पर्यायोऽपर्यवसित इत्यादेरपि प्रसक्तिः। द्रव्यार्थतया केवलज्ञानकेवलदर्शनयोरपर्यवसितत्वाभ्युपगमे द्वितीयक्षणेऽपि तयोः सद्भावप्रसक्तिः, अन्यथा द्रव्यार्थत्वायोगात्। तदेवं क्रमाभ्युपगमे तयोरागमविरोध इत्युपसंहरन्नाह–"संतंमि केवले दंसणम्मि नाणस्स संभवो णत्थि। केवलनाणम्मि य दंसणस्स तम्हा अनिहणाइं ॥ ६ ॥" स्वरूपतो द्वयोः क्रमिकत्वेऽन्यतरकालेऽन्यतरभावप्रसंगः, तथा चोक्तवक्ष्यमाणदूषणगणोपनिपातः, तस्माद्द्वावप्युपयोगौ केवलिनः स्वरूपतोऽनिधनावित्यर्थः। इत्थं ग्रन्थकृदक्रमोपयोगद्वयाभ्युपगमेन क्रमोपयोगवादिनं पर्यनुयुज्य स्वपक्षं दर्शयितुमाह–"दंसणनाणावरणक्खए समाणम्मि कस्स पुव्वयरो। होज्ज व समउप्पाओ हंदि दुवे णत्थि उवओगा ॥ ७ ॥" सामान्यविशेषपरिच्छेदावरणापगमे कस्य प्रथमतरमुत्पादो भवेत्?

अन्यतरोत्पादे तदितरस्याप्युत्पादप्रसंगात्, अन्यतरसामग्र्या अन्यतरप्रतिबन्धकत्वे चोभयोरप्यभावप्रसंगात् "सव्वाउ लद्धीउ सागारोवउगोवउत्तस्सेति" वचनप्रामाण्यात्प्रथमं केवलज्ञानस्य पश्चात्केवलदर्शनस्योत्पाद इति चेन्न, एतद्वचनस्य लब्धियौगपद्य एव साक्षित्वादुपयोगक्रमाक्रमयोरौदासीन्यात्। यौगपद्येनापि निर्वाहेऽर्थादर्शनेऽनन्तरोत्पत्त्यसिद्धेः एकक्षणोत्पत्तिककेवलज्ञानयोरेकक्षणन्यूनाधिकायुष्कयोः केवलिनोः क्रमिकोपयोगद्वयधाराया निर्वाहयितुमशक्यत्वाच्च। अथ ज्ञानोपयोगसामान्ये दर्शनोपयोगत्वेन हेतुतेति निर्विकल्पकसमाधिरूपछद्मस्थकालीनदर्शनात् प्रथमं केवलज्ञानोत्पत्तिः केवलदर्शने केवलज्ञानत्वेन विशेषहेतुत्वाच्च द्वितीयक्षणे केवलदर्शनोत्पत्तिः, ततश्च क्रमिकसामग्रीद्वयसंपत्त्या क्रमिकोपयोगद्वयधारानिर्वाह इति, एकक्षणन्यूनाधिकायुष्कयोस्त्वेकक्षणे केवलज्ञानोत्पत्त्यस्वीकार एव गतिरिति चेन्न, "दंसणपुव्वं नाणं" इत्यादिना तथाहेतुत्वस्य प्रमाणाभावेन निरसनीयत्वात्, उत्पन्नस्य केवलज्ञानस्य क्षायिकभावत्वेन नाशायोगाच्च। न च मुक्तिसमये क्षायिकचारित्रनाशवदुपपत्तिः, क्षायिकत्वेऽपि तस्य योगस्थैर्यनिमित्तकत्वेन निमित्तनाशनाश्यत्वात्, केवलज्ञानस्य चानैमित्तिकत्वादुत्पत्तौ ज्ञप्तौ चावरणक्षयातिरिक्तनिमित्तानपेक्षत्वेनैव तस्य स्वतंत्रप्रमाणत्वव्यवस्थितेः, अन्यथा सापेक्षमसमर्थमिति न्यायात्तत्राप्रामाण्यप्रसंगात्। एतेन केवलदर्शनसामग्रीत्वेन स्वस्यैव स्वनाशकत्वमिति केवलज्ञान(स्य)क्षणिकत्वमित्यप्यपास्तम्, अनैमित्तिके क्षणिकत्वायोगात्, अन्यथा तत्क्षण एव तत्क्षणवृत्तिकार्ये नाशक इति सर्वत्रैव सूक्ष्मर्जुसूत्रनयसाम्राज्यस्य दुर्निवारत्वादिति किमतिपल्लवितेन?। नन्वियमनुपपत्तिः क्रमोपयोगपक्ष एवेत्यक्रमौ द्वावुपयोगौ स्तामित्याशंकते मल्लवादी, "भवेद्वा समयमेककालमुत्पादस्तयोरिति" तत्रैकोपयोगवादी ग्रन्थकृत् सिद्धा-

न्तयति हृदि ज्ञायतां द्वावुपयोगौ नैकदेति, सामान्यविशेषपरिच्छेदात्मकत्वात्केवलज्ञानस्य, यदेव ज्ञानं तदेव दर्शनमित्यत्रैव निर्भरः, उभयहेतुसमाजे समूहालंबनोत्पादस्यैवान्यत्र दृष्टत्वान्नात्रापरिदृष्टकल्पनाक्लेश इति भावः। अस्मिन्नेव वादे केवलिनः सर्वज्ञतासंभव इत्याह–"जइ सव्वं सायारं जाणइ एक्कसमएण सव्वण्णू। जुज्जइ सया वि एवं अहवा सव्वं न जाणाइ ॥८॥" यदि सर्वं सामान्यविशेषात्मकं जगत् साकारं तत्तज्जातिव्यक्तिवृत्तिधर्मविशिष्टं। साकारमिति क्रियाविशेषणं वा। निरवच्छिन्नतत्तज्जातिप्रकारतानिरूपिततत्तद्व्यक्तिविशेष्यतासहितं परस्परं यावद्द्रव्यपर्यायनिरूपितविषयतासहितं वा यथा स्यात्तथेत्यर्थः। जानात्येकसमयेन सर्वज्ञः पश्यतिचेति शेषः, तदा सदापि सर्वकालं युज्यते, एवं सर्वज्ञत्वं सर्वदर्शित्वं चेत्यर्थः। अथवेत्येतद्वैपरीत्ये सर्वं न जानाति सर्वं न जानीयादेकदेशोपयोगवर्तित्वान्मतिज्ञानवदित्यर्थः। तथा च केवलज्ञानमेव केवलदर्शनमिति स्थितम्। अव्यक्तत्वादपि पृथग्दर्शनं केवलिनि न संभवतीत्याह–"परिसुद्धं सायारं अवियत्तं दंसणं अणायारं। ण य खीणावरणिज्जे जुज्जइ सवियत्तमवियत्तं ॥ ९ ॥" ज्ञानस्य हि व्यक्ततारूपं, दर्शनस्य पुनरव्यक्तता। न च क्षीणावरणेऽर्हति व्यक्तताऽव्यक्तते युज्येते, ततः सामान्यविशेषज्ञेयसंस्पर्श्युभयैकस्वभाव एवायं केवलिप्रत्ययः, न च ग्राह्यद्वित्वाद्ग्राहकद्वित्वमिति संभावनापि युक्ता, केवलज्ञानस्य ग्राह्यानन्त्येनानन्ततापत्तेः, विषयभेदकृतो न ज्ञानभेद इत्यभ्युपगमे तु दर्शनपार्थक्ये का प्रत्याशावरणद्वयक्षयादुभयैकस्वभावस्यैव कार्यस्य संभवात्। न चैकस्वभावप्रत्ययस्य शीतोष्णस्पर्शवत्परस्परविभिन्नस्वभावद्वयविरोधः, दर्शनस्पर्शनशक्तिद्वयात्मकैकदेवदत्तवत्स्वभावद्वयात्मकैकप्रत्ययस्य केवलिन्यविरोधात्। ज्ञानत्वदर्शनत्वाभ्यां ज्ञानदर्शनयोर्भेदः, न तु धर्मिभेदेनेति परमार्थः। अत एव तदावरणभेदेऽपि

स्याद्वाद एव, तदुक्तं स्तुतौ ग्रन्थकृतैव–"चक्षुर्दर्शनविज्ञानं परमाणावौष्ण्यरौक्ष्यवत्। तदावरणमप्येकं न वा कार्यविशेषतः ॥ १ ॥" इति। परमाणावुष्णरूक्षस्पर्शद्वयसमावेशवच्चाक्षुषे ज्ञानत्वदर्शनत्वयोः समावेश इत्यर्थः। इत्थं च चाक्षुषज्ञानदर्शनावरणकर्मापि परमार्थत एकं कार्यविशेषत उपाधिभेदतो वा नैकमिति सिद्धम्। एवमवधिकेवलस्थलेऽपि द्रष्टव्यम्। तदाह–" चक्षुर्वद्विषयाख्यातिरवधिज्ञानकेवले। शेषवृत्तिविशेषात्तु ते मते ज्ञानदर्शने ॥ १ ॥ इति "। चक्षुर्वच्चाक्षुषवद्विषयाख्यातिः स्पृष्टज्ञानाभावः अस्पृष्टज्ञाने इति यावत्, भावाभावरूपे वस्तुन्यभावत्वाभिधानमपि दोषानावहं, शेषा वृत्तयोऽस्पृष्टज्ञानानि ताभ्यो विशेषः, स्पृष्टताविशेषेण वक्ष्यमाणरीत्या स्पृष्टाविषयवृत्तित्वव्यंग्येन, तस्मात्ते अवधिकेवले ज्ञानपदेन दर्शनपदेन च वाच्ये इत्येतदर्थः। क्रमाक्रमोपयोगद्वयपक्षे भगवतो यदापद्यते तदाह–" अदिट्ठं अण्णायं च केवली एव भासइ सया वि। एगसमयम्मि हंदी वयणविगप्पो ण संभवइ ॥ १० ॥" आद्यपक्षे ज्ञानकालेऽदृष्टं, दर्शनकाले चाज्ञातं, द्वितीयपक्षे च सामान्यांशेऽज्ञातं विशेषांशे चादृष्टं, एवमुक्तप्रकारेण केवली सदा भाषते, तत एकस्मिन् समये ज्ञातं दृष्टं च भगवान् भाषते, इत्येष वचनस्य विकल्पे विशेषो भवदर्शने न भवतीति गृह्यतां। न चान्यतरकालेऽन्यतरोपलक्षणादुपसर्जनतया विषयान्तरग्रहणाच्चोक्तवचनविकल्पोपपत्तिः, एवं सति भ्रान्तछद्मस्थेऽपि तथाप्रयोगप्रसंगात्। यदा कदाचित् शृंगग्राहिकया ज्ञानदर्शनविषयस्यैव पदार्थस्य तद्वक्ष्यावनुप्रवेशादिति स्मर्तव्यम्। तथा च सर्वज्ञत्वं न संभवतीत्याह--" अण्णायं पासंतो अदिट्ठं च अरहा वियाणंतो। किं जाणइ किं पासइ कह सव्वण्णू त्ति वा होइ ॥ ११ ॥" अज्ञातं पश्यन्नदृष्टं च जानानः किं जानाति किं वा पश्यति? न किंचिदित्यर्थः। कथं वा तस्य सर्वज्ञता

भवेत्? न कथमपीत्यर्थः। ज्ञानदर्शनयोर्विषयविधयैकसंख्याशालित्वादप्येकत्वमित्याह–" केवलनाणमणंतं जहेव तह दंसणं पि पण्णत्तं। सागारगाहणाहिय णियमपरित्तं अणागारं ॥ १२ ॥" यद्येकत्वं ज्ञानदर्शनयोर्न स्यात्तदाऽल्पविषयत्वाद्दर्शनमनन्तं न स्यादिति " अणंते केवलनाणे अणंते केवलदंसणे " इत्यागमविरोधः प्रसज्येत, दर्शनस्य हि ज्ञानाद्भेदे साकारग्रहणादनन्तविशेषवर्तिज्ञानादनाकारं सामान्यमात्रावलंबि केवलदर्शनं यतो नियमेनैकान्तेनैव परीतमल्पं भवतीति कुतो विषयाभावादनन्तता। न चोभयोस्तुल्यविषयत्वाविशेषेऽपि मुख्योपसर्जनभावकृतो विशेष इति वाच्यं, विशेषणविशेष्यभावेन तत्तन्नयजनितवैज्ञानिकसंबन्धावच्छिन्नविषयतया वा. तत्र कामचारात्। आपेक्षिकस्य च तस्यास्मदादिबुद्धावेवाधिरोहात्। एतच्च निरूपितं तत्त्वं " जं जं जे जे भावे " इत्यादिनिर्युक्तिगाथाया नयभेदेन व्याख्याद्वयेऽनेकान्तव्यवस्थायामस्माभिः। अक्रमोपयोगद्वयवादी तु प्रकृतगाथायां साकारे यद्ग्रहणं दर्शनं तस्य नियमोऽवश्यंभावो यावन्तो विशेषास्तावन्त्यखंडसखंडोपाधिरूपाणि जातिरूपाणि वा सामान्यानीति हेतोस्तेनापरीतमनन्तमित्यकारप्रश्लेषेण व्याचष्टे, क्रमवादे ज्ञानदर्शनयोरपर्यवसितत्वादिकं नोपपद्यत इति यदुक्तं तत्राक्षेपमुदंक्य समाधत्ते–" भण्णइ जह चउनाणी जुज्जइ णियमा तहेव एयं पि। भण्णइ ण पंचनाणी जहेव अरहा तहेयं पि ॥ १३ ॥" भण्यते आक्षिप्यते तथा क्रमोपयोगप्रवृत्तोऽपि मत्यादिचतुर्ज्ञानी तल्लब्धिसमन्वयादपर्यवसितचतुर्ज्ञानो ज्ञातदृष्टभाषी ज्ञाता द्रष्टा च नियमेन युज्यते। तथैतदप्येकत्ववादिना यदपर्यवसितत्वादिक्रमोपयोगे केवलिनि प्रेर्यते, तदपि सार्वदिककेवलज्ञानदर्शनशक्तिसमन्वयादुपपद्यत इत्यर्थः। भण्यतेऽत्रोत्तरं दीयते–यथैवार्हन्न पंचज्ञानी, तथैवैतदपि क्रमवादिना यदुच्यते, भेदतो ज्ञानवान् दर्शनवांश्च, तदपि न भवतीत्यर्थः।

मत्याद्यावरणक्षयेऽप्येकदेशग्राहिणो मतिज्ञानादेरिव, दर्शनावरणक्षयेऽपि तादृशदर्शनस्य केवलिनि भेदेनानुपपत्तेरिति भावः। इयांस्तु विशेषः–यद्भेदेनापि केवलज्ञाने दर्शनसंज्ञा सिद्धान्तसंमता, न तु मतिज्ञानादिसंज्ञेति, तत्र हेतू अन्वर्थोपपत्त्यनुपपत्ती एव द्रष्टव्ये। अयं च प्रौढिवादः, वस्तुतः क्रमवादे यदा जानाति तदा पश्यतीत्यादेरनुपपत्तिरेव, आश्रयत्वस्यैवाख्यातार्थत्वात्। लब्धेस्तदर्थत्वे तु घटादर्शनवेलायामपि घटं पश्यतीति प्रयोगप्रसंगात्, घटदर्शनलब्धेस्तदानीमपि विद्यमानत्वात्। चक्षुष्मान् सर्वं पश्यति, न त्वन्ध इत्यादौ त्वगत्या लब्धेर्योग्यताया आख्यातार्थत्वमभ्युपगम्यत एव, न तु सर्वत्राप्ययं न्यायः, अतिप्रसंगात्। न च सिद्धान्ते विना निक्षेपविशेषमप्रसिद्धार्थे पदवृत्तिरवधार्यते, षट्षष्टिसागरोपमस्थितिकत्वादिकमपि मतिज्ञानादेर्लब्ध्यपेक्षयैवेति दुर्वचं, एकस्या एव क्षयोपशमरूपलब्धेस्तावत्कालमनवस्थानात्, द्रव्याद्यपेक्षया विचित्रापरापरक्षयोपशमसन्तानस्यैव प्रवृत्त्युपगमात्। किं त्वेकजीवावच्छेदेनाज्ञानातिरिक्तविरोधिसामग्र्यसमवहितषट्षष्टिसागरोपमक्षणत्वव्याप्यस्वसजातीयोत्पत्तिकत्वे सति तदधिकक्षणानुत्पत्तिकस्वसजातीयत्वरूपं तत्पारिभाषिकमेव वक्तव्यं, एवमन्यदप्यूह्यम्। क्रमेण युगपद्वा परस्परनिरपेक्षस्वविषयपर्यवसितज्ञानदर्शनोपयोगौ केवलिन्यसर्वार्थत्वान्मत्यादिज्ञानचतुष्टयवन्न स्त इति दृष्टान्तभावनापूर्वमाह–“ पण्णवणिज्जा भावा समत्तसुअनाणदंसणाविसओ। ओहिमणपज्जवाण य अण्णोण्णविरकलणाविसओ ॥ १४ ॥ तम्हा चउव्विभागो जुज्जइ ण उ नाणदंसण जिणाणं। सयलमणावरणमणंतमरकयं केवलं जम्हा ॥ १५ ॥ ” प्रज्ञापनीयाः शब्दाभिलाप्या भावा द्रव्यादयः समस्तश्रुतज्ञानस्य द्वादशांगवाक्यात्मकस्य दर्शनाया दर्शनप्रयोजिकायास्तदुपजाताया बुद्धेः विषय आलंबनं, मतेरपि त एव शब्दावसिता विषया द्रष्टव्याः, शब्दपरिक-

र्मणाहितक्षयोपशमजनितस्य ज्ञानस्य यथोक्तभावविषयस्य मतित्वान्मतिश्रुतयोरसर्वपर्यायसर्वद्रव्यविषयतया तुल्यार्थत्वप्रतिपादनाच्च, अवधिमनःपर्याययोः पुनरन्योन्यविलक्षणा भावा विषयोऽवधे रूपिद्रव्यमात्रं, मनःपर्यायस्य च मन्यमानानि द्रव्यमनांसीत्यसर्वार्थान्येतानि। तस्माच्चतुर्णां मत्यादीनां विभागो युज्यते, तत्तत्क्षयोपशमप्रत्ययभेदात्, न तु जिनानां ज्ञानदर्शनयोः। 'नाणदंसण त्ति' अविभक्तिको निर्देशः सूत्रत्वात्। कुतः पुनरेतदित्यत आह–यस्मात् केवलं सकलं परिपूर्णं। तदपि कुतः? यतोऽनावरणं, न ह्यनावृतमसकलविषयं भवति। न च प्रदीपेन व्यभिचारः, यतोऽनन्तमनन्तार्थग्रहणप्रवृत्तं। तदपि कुतः? यतोऽक्षयं, क्षयो हि विरोधिसजातीयेन गुणेन स्यात्तदभावे तस्याक्षयत्वं, ततश्चानन्तत्वमनवद्यमिति भावः। तस्मादक्रमोपयोगद्वयात्मक एक एव केवलोपयोगः। तत्रैकत्वं व्यक्त्या, द्वयात्मकत्वं च नृसिंहत्ववदांशिकजात्यन्तररूपत्वमित्येके। माषे स्निग्धोष्णत्ववद्व्याप्यवृत्तिजातिद्वयशक्तिद्वयरूपमित्यपरे। केवलत्वमावरणक्षयात्, ज्ञानत्वं जातिविशेषो, दर्शनत्वं च विषयताविशेषो, दोषक्षयजन्यतावच्छेदक इति तु वयम्। ननु भवदुक्तपक्षे 'केवली णं' इत्यादिसूत्रे 'जं समयं' इत्यादौ यत्समकमित्याद्यर्थो न सर्वस्वरससिद्धः, तादृशप्रयोगान्तरे तथाविवरणाभावात्, तथा 'नाणदंसणठ्ठयाए दुवे अहं' इत्याद्यागमविरोधोऽपि, यद्धर्मविशिष्टविषयावच्छेदेन भेदनयार्पणं तद्धर्मविशिष्टापेक्षयैव द्वित्वादेः साकांक्षत्वात्, अन्यथाऽतिप्रसंगादित्याशंक्य युक्तिसिद्धः सूत्रार्थो ग्राह्यस्तेषां स्वसमयपरसमयादिविषयभेदेन विचित्रत्वादित्यभिप्रायवानाह–परवत्तव्वयपक्खा अविसुद्धा तेसु तेसु अत्थेसु। अत्थगइउ अ तेसिं विअंजणं जाणउ कुणइ ॥ १६ ॥ परेषां वैशेषिकादीनां यानि वक्तव्यानि तेषां पक्षा अविशुद्धास्तेषु तेष्वर्थेषु सूत्रे तन्नयपरिकर्मणादिहेतो-

निबद्धाः । अर्थगत्यैव सामर्थ्येनैव तेषामर्थानां व्यक्तिं सर्वप्रवादमूलद्वादशांगाविरोधेन ज्ञको ज्ञाता करोति । तथा च ‘ जं समयं ’ इत्यादेर्यथाश्रुतार्थे केवली श्रुतावधिमनःपर्यायकेवल्यन्यतरो ग्राह्यः, परमावधिकाधोवधिकछद्मस्थातिरिक्तविषये स्नातकादिविषये वा तादृशसूत्रप्रवृत्तौ, तत्र परतीर्थिकवक्तव्यताप्रतिबद्धत्वं वाच्यमेवमन्यत्रापीति दिक् । ‘ केवलनाणे केवलदंसणे ’ इत्यादिभेदेन सूत्रनिर्देशस्यैकार्थिकपरतैवेत्यभिप्रायेणोपक्रमते–“ जेण मणोविसयगयाण दंसणं णत्थि दव्वजादाणं । तो मणपज्जवनाणं नियमा नाणं तु णिद्दिट्ठं ॥ १७ ॥ ” यतो मनःपर्यायज्ञानविषयगतानां तद्विषयसमूहानुप्रविष्टानां परमनोद्रव्यविशेषाणां बाह्यचिन्त्यमानार्थगमकतौपयिकविशेषरूपस्यैव सद्भावाद्दर्शनं सामान्यरूपं नास्ति, तस्मान्मनःपर्यायज्ञानं ज्ञानमेवागमे निर्दिष्टं, ग्राह्यसामान्याभावे मुख्यतया तद्ग्रहणोन्मुखदर्शनाभावात् । केवलं तु सामान्यविशेषोभयोपयोगरूपत्वादुभयरूपैकमेवेति भावः । सूत्रे उभयरूपत्वेन परिपठितत्वादप्युभयरूपं केवलं, न तु क्रमयोगादित्याह–“ चक्खुअचक्खुअवधिकेवलाण समयम्मि दंसणविअप्पा । परिपठिआ केवलनाणदंसणा ते ण विय अण्णा ॥ १८ ॥ ” स्पष्टा । चक्षुरादिज्ञानवदेव केवलं ज्ञानमध्ये पाठात् ज्ञानमपि, दर्शनमध्ये पाठाच्च दर्शनमपीति परिभाषामात्रमेतदिति ग्रन्थकृतस्तात्पर्यम् । मतिज्ञानादेः क्रम इव केवलस्याक्रमेऽपि सामान्यविशेषाजहद्वृत्त्यैकोपयोगरूपतया ज्ञानदर्शनत्वमित्येकदेशिमतमुपन्यस्यति--“दंसणमुग्गहमेत्तं घडोत्ति निव्वन्नणा हवइ नाणं । जह इत्थ केवलाण वि विसेसणं इत्तियं चेव॥१९॥” अवग्रहमात्रं मतिरूपे बोधे दर्शनं, इदं तदित्यव्यपदेश्यं, घट इति निश्चयेन वर्णना तदाकाराभिलाप इतियावत् । कारणे कार्योपचाराच्च घटाकाराभिलापजनकं घटे मतिज्ञानमित्यर्थः । यथाऽत्रैवं तथा केवलयोरप्येतावन्मात्रेण विशेषः ।

एकमेव केवलं सामान्यांशे दर्शनं विशेषांशे च ज्ञानमित्यर्थः। एकदेश्येव क्रमिकभेदपक्षं दूषयति—" दंसणपुव्वं नाणं नाण-णिमित्तं तु दंसणं णत्थि। तेण सुविणिच्छयामो दंसणनाणा ण अण्णत्तं ॥ २० ॥" दर्शनपूर्वं ज्ञानमिति छद्मस्थोपयोगदशायां प्रसिद्धम्। सामान्यमुपलभ्य हि पश्चात्सर्वो विशेषमुपलभत इति, ज्ञाननिमित्तं तु दर्शनं नास्ति कुत्रापि, तथाऽप्रसिद्धेः। तेन सुविनिश्चिनुमः 'दंसणनाणा' इति दर्शनज्ञानेनान्यत्वं न क्रमापादितभेदं केवलिनि भजत इति शेषः। क्रमाभ्युपगमे हि केवलिनि नियमाज्ज्ञानोत्तरं दर्शनं वाच्यं, सर्वासां लब्धीनां साकारोपयोगप्राप्तत्वेन पूर्वं ज्ञानोत्पत्त्युपगमौचित्यात्। तथा च ज्ञानहेतुकमेव केवलिनि दर्शनमभ्युपगन्तव्यं, तच्चात्यन्तादर्शनव्याहतमिति भावः। यत्तु क्षयोपशमनिबन्धनकमस्य केवलिन्यभावेऽपि पूर्वं क्रमदर्शनात्तज्जातीयतया ज्ञानदर्शनयोरन्यत्वमिति टीकाकृद्व्याख्यानं, तत्स्वभावभेदतात्पर्येण संभवदपि दर्शने ज्ञाननिमित्तत्वनिषेधानतिप्रयोजनतया कथं शोभत इति विचारणीयम्। ननु यथा परेषां कल्पितः क्रमो वर्णनिष्ठो बुद्धिविशेषजनकतावच्छेदकोऽस्माकं च भिन्नाभिन्नपर्यायविशेषरूपः, तथा केवलिज्ञानदर्शननिष्ठस्तादृशः क्रम एवावरणक्षयजन्यतावच्छेदकः स्यादिति नोक्तानुपपत्तिरिति चेन्न, वर्णक्रमस्य क्रमवत्प्रयत्नप्रयोज्यस्य सुवचत्वेऽप्यक्रमिकावरणक्षयप्रयोज्यस्य केवल्युपयोगक्रमस्य दुर्वचत्वादनन्यगत्याऽक्रमिकादप्यावरणद्वयक्षयात् क्रमवदुपयोगोत्पत्त्यभ्युपगमे च तन्नाशकारणाभावादविकलकारणात्तादृशोपयोगान्तरधाराया अविच्छेदाच्च " जुगवं दो णत्थि उवओगा " इति वचनानुपपत्तिः। न च ज्ञानस्य दर्शनमेवार्थान्तरपरिणामलक्षणो ध्वंस इत्युपयोगायोगपद्यं सांप्रतं, साद्यनन्तपर्यायविशेषरूपध्वंसस्यैवावस्थितिविरोधित्वादर्थान्तरपरिणामलक्षणध्वंसस्यातथात्वात्। अन्यथा तत्तत्संयोगविभागादिमात्रेणानुभूयमानघटाव-

स्थित्युच्छेदापत्तेः। न च "जुगवं दो णत्थि उवओगा" इत्यस्योपयोगयोर्युगपदुत्पत्तिनिषेध एव तात्पर्यं, न तु युगपदवस्थानेऽपी-
त्युपयोगद्वयधाराणां नाशकारणाभावेन सहावस्थानेऽपि न दोष इति सांप्रतं, अक्रमवादिनाप्येवं क्रमावच्छिन्नोपयोगद्वययौ-
गपद्यनिषेधपरत्वस्य वक्तुं शक्यत्वात्, सूत्रासंकोचस्वारस्यादरे यदेव ज्ञानं तदेव दर्शनमित्यस्मदुक्तस्यैव युक्तत्वादिति दिक्।
मतिज्ञानमेवावग्रहात्मना दर्शनं,अपायात्मना च ज्ञानमिति यदुक्तं दृष्टान्तावष्टम्भार्थमेकदेशिना तद्दूषयन्नाह–"जइ उग्गहमित्तं
दंसणं ति मण्णसि विसेसिया नाणं। मइनाणमेव दंसणमेवं सइ होइ णिप्पन्नं ॥ २१ ॥" यदि मतिरेवावग्रहरूपा दर्शनं,
विशेषिता ज्ञानमिति मन्यसे, तदा मतिज्ञानमेव दर्शनमित्येवं सति प्राप्तं। न चैतद्युक्तं, "स द्विविधोऽष्टचतुर्भेद" इति
सूत्रविरोधान्मतिज्ञानस्याष्टाविंशतिभेदोक्तिविरोधाच्च--" एवं सेसिंदियदंसणंमि णियमेण होइ ण य जुत्तं। अह तत्थ नाण-
मित्तं घे(घि)प्पइ चक्खुंमि वि तहेव ॥२२॥" एवं शेषेन्द्रियदर्शनेष्वप्यवग्रह एव दर्शनमित्यभ्युपगमेन (गमे नियमेन) मतिज्ञानमेव
तदिति स्यात्, तच्च न युक्तं, पूर्वोक्तदोषानतिवृत्तेः। अथ तेषु श्रोत्रादिष्विन्द्रियेषु दर्शनमपि भवज्ज्ञानमेव गृह्यते,मात्रशब्दस्य
दर्शनव्यवच्छेदकत्वात्, तद्व्यवच्छेदश्च तथाव्यवहाराभावात्, श्रोत्रज्ञानं घ्राणज्ञानमित्यादिव्यपदेश एव हि तत्रोपलभ्यते, न
तु श्रोत्रदर्शनं घ्राणदर्शनमित्यादिव्यपदेशः क्वचिदागमे प्रसिद्धः, तर्हि चक्षुष्यपि तथैव गृह्यतां चक्षुर्ज्ञानमिति, अथ तत्र
दर्शनं, इतरत्रापि तथैव गृह्यतां, युक्तेस्तुल्यत्वात्। कथं तर्हि शास्त्रे चक्षुर्दर्शनादिप्रवाद इत्यत आह-"नाणमपुट्ठे (जो) अवि-
सए अ अत्थंमि दंसणं होइ। मुत्तूण लिंगओ जं अणागयाईं य विसएसु ॥२३॥ "अस्पृष्टेऽर्थे चक्षुषा य उदेति प्रत्ययः स
ज्ञानमेव सच्चक्षुर्दर्शनमित्युच्यते, इन्द्रियाणामविषये च परमाण्वादावर्थे मनसा य उदेति प्रत्ययः स ज्ञानमेव सदचक्षुर्दर्शन

मित्युच्यते। अनुमित्यादिरूपे मनोजन्यज्ञानेऽतिप्रसंगमाशंक्याह-अनागतातीतविषयेषु यल्लिंगज्ञानमुदेति अयं काल आसन्नभविष्यद्वृष्टिकस्तथाविधमेघोन्नतिमत्त्वात्, अयं प्रदेश आसन्नवृष्टमेघः पूरविशेषवत्त्वादि(त्यादि)रूपं तन्मुक्त्वा। इदमुपलक्षणं, भावनाजन्यज्ञानातिरिक्तपरोक्षज्ञानमात्रस्य तस्यास्पृष्टाविषयार्थस्यापि दर्शनत्वेनाव्यवहारात्। यद्यस्पृष्टाविषयार्थज्ञानं दर्शनमभिमतं, तर्हि मनःपर्यायज्ञानेऽतिप्रसंग इत्याशंक्य समाधत्ते-"मणपज्जवनाणं दंसणं ति तेणेह होइ ण य जुत्तं। भन्नइ नाणं णोइंदियंमि ण घडादओ जम्हा ॥ २४ ॥" एतेन लक्षणेन मनःपर्यायज्ञानमपि दर्शनं प्राप्तं, परकीयमनोगतानां घटादीनामालंब्यानां तत्रासत्त्वेनास्पृष्टेऽविषये च घटादावर्थे तस्य भानात्, न चैतद्युक्तं, आगमे तस्य दर्शनत्वेनापाठात्। भण्यतेऽत्रोत्तरम्-नोइन्द्रिये मनोवर्गणाख्ये मनोविशेषे प्रवर्तमानं मनःपर्यायबोधरूपं ज्ञानमेव, न दर्शनं, यस्मादस्पृष्टा घटादयो नास्य विषय इति शेषः। नित्यं तेषां लिंगानुमेयत्वात्। तथा चागमः-"जाणइ बज्झेणुमाणाओत्ति" मनोवर्गणास्तु परात्मगता अपि स्वाश्रयात्मस्पृष्टजातीया एवेति न तदंशेऽपि दर्शनत्वप्रसंगः। परकीयमनोगतार्थाकारविकल्प एवास्य ग्राह्यः, तस्य चोभयरूपत्वेऽपि छाद्मस्थिकोपयोगस्यापरिपूर्णार्थग्राहित्वान्न मनःपर्यायज्ञाने दर्शनसंभव इत्यप्याहुः। किं च-"मइसुअनाणणिमित्तो छउमत्थे होइ अत्थउवलंभो। एगयरंमि वि तेसिं ण दंसणं दंसणं कत्तो ॥२५॥" मतिश्रुतज्ञाननिमित्तः छद्मस्थानामर्थोपलंभ उक्त आगमे। तयोरेकतरस्मिन्नपि न दर्शनं संभवति। न चावग्रहो दर्शनं, तस्य ज्ञानात्मकत्वात्, ततः कुतो दर्शनं? नास्तीत्यर्थः। ननु श्रुतमस्पृष्टेऽर्थे किमिति दर्शनं न भवेत्तत्राह-"जं पच्चक्खग्गहणं ण इंति सुअनाण संमिया अत्था। तम्हा दंसणसद्दो ण होइ सयले वि सुअनाणे ॥ २६ ॥" यस्माच्छ्रुतज्ञानप्रमिता अर्थाः प्रत्यक्षग्रहणं न

यान्ति, अक्षजस्यैव व्यवहारतः प्रत्यक्षत्वात्। तस्मात्सकलेऽपि श्रुतज्ञाने दर्शनशब्दो न भवति। तथा च व्यंजनावग्र-
हाविषयार्थप्रत्यक्षत्वमेव दर्शनत्वमिति पर्यवसन्नं। प्रत्यक्षपदादेव श्रुतज्ञानवदनुमित्यादेर्व्यावृत्तौ परोक्षभिन्नत्वे सतीति
विशेषणं न देयं, "मुत्तूण लिंगओ जं" इत्युक्तस्याप्यत्रैव तात्पर्यं द्रष्टव्यम्। इत्थं चाचक्षुर्दर्शनमित्यत्र नञः पर्युदासार्थकत्वा-
दचक्षुर्दर्शनपदेन मानसदर्शनमेव ग्राह्यं, अप्राप्यकारित्वेन मनस एव चक्षुःसदृशत्वान्न घ्राणदर्शनादीति सर्वमुपपद्यते।
तथा चावधिदर्शनमपि कथं संगच्छते, तस्य व्यंजनावग्रहविषयार्थग्राहित्वेऽपि व्यवहारतः प्रत्यक्षत्वाभावादित्याशंकायाः
प्रत्यक्षपदस्य व्यवहारनिश्चयसाधारणप्रत्यक्षार्थत्वात्, अवधिज्ञानस्य च नैश्चयिकप्रत्यक्षत्वाव्याहतेः परिहारमभिप्रा(प्रे)यन्नाह-
"जं अप्पुट्ठा भावा ओहिनाणस्स होंति पच्चक्खा। तम्हा ओहिनाणे दंसणसद्दो वि उवउत्तो ॥ २७ ॥ स्पष्टा। उपयुक्तः
लब्धनिमित्तावकाशः केवलज्ञानेऽपीदं लक्षणमव्याहतमित्याह–"जं अप्पुट्ठे भावे जाणइ पासइ य केवली णियमा। तम्हा
तं नाणं दंसणं च अविसेसओ सिद्धं ॥ २८ ॥" यतोऽस्पृष्टान् भावान्नियमेनावश्यंतया केवली चक्षुष्मानिव पुरःस्थितं
जानाति पश्यति चोभयप्राधान्येन, तस्मात्तत्केवलज्ञानं दर्शनं चाविशेषत उभयाभिधाननिमित्तस्याविशेषात्सिद्धं। मनः-
पर्यायज्ञानस्य तु व्यंजनावग्रहाविषयार्थकप्रत्यक्षत्वेऽपि बाह्यविषये व्यभिचारेण स्वग्राह्यतावच्छेदकावच्छेदेन प्रत्यक्षत्वाभावान्न
दर्शनत्वमिति निष्कर्षः। अत्र यट्टीकाकृता प्रमाणप्रमेययोः सामान्यविशेषात्मकत्वेऽप्यपनीतावरणे युगपदुभयस्वभावो
बोधः, छद्मस्थावस्थायां त्वनपगतावरणत्वेन दर्शनोपयोगसमये ज्ञानोपयोगाभावादप्राप्यकारिनयनमनःप्रभवार्थावग्रहादि,
मतिज्ञानोपयोगप्राक्काले चक्षुरचक्षुर्दर्शने, अवधिज्ञानोपयोगप्राक्काले चावधिदर्शनमाविर्भवतीति व्याख्यातं तदर्धजरतीय-

॥ १६२ ॥

न्यायमनुहरति, प्राचीनप्रणयमात्रानुरोधे श्रोत्रादिज्ञानात् प्रागपि दर्शनाभ्युपगमस्यावर्जनीयत्वात्, व्यंजनावग्रहार्थावग्रहान्तराले दर्शनानुपलंभात्तदनिर्देशाच्च, असंख्येयसामयिकव्यंजनावग्रहान्त्यक्षणे "ताहे हुंतिकरे" इत्यागमेनार्थावग्रहोत्पत्तेरेव भणनात्, व्यंजनावग्रहप्राक्काले दर्शनपरिकल्पनस्य चात्यन्तानुचितत्वात्। तथा सति तस्येन्द्रियार्थसन्निकर्षादपि निकृष्टत्वेनानुपयोगप्रसंगाच्च,प्राप्यकारीन्द्रियजज्ञानस्थले दर्शनानुपगमे चान्यत्रापि भिन्नतत्कल्पने न किंचित्प्रमाणं,'नाणमपुट्ठे' इत्यादिना ज्ञानादभेदेनैव दर्शनस्वभावप्रतिपादना चक्षुर्वद्विषया ख्यातिरित्यादिश्रुतिग्रन्थैकवाक्यतयापि तथैव स्वारस्याच्च। छद्मस्थज्ञानोपयोगे दर्शनोपयोगत्वेन हेतुत्वे तु चक्षुष्येव दर्शनं नान्यत्रेति कथं श्रद्धेयं? तस्माच्छ्रीसिद्धसेनोपज्ञनव्यमते न कुत्रापि ज्ञानाद्दर्शनस्य कालभेदः, किं तु स्वग्राह्यतावच्छेदकावच्छेदेन व्यंजनावग्रहाविषयीकृतार्थप्रत्यक्षत्वमेव दर्शनत्वमिति फलितम्। यदि च चाक्षुषादावपि ज्ञानसामग्रीसामर्थ्यग्राह्यवर्तमानकालाद्यंशे मितिमात्राद्यंशे च न दर्शनत्वव्यवहारस्तदविषयताविशेष एव दर्शनत्वं, स च क्वचिदंशे योग्यताविशेषजन्यतावच्छेदकः,क्वचिच्च भावनाविशेषजन्यतावच्छेदकः, केवले च सर्वांशे आवरणक्षयजन्यतावच्छेदक इति प्रतिपत्तव्यं। न चार्थेनैव धियां विशेष इति न्यायादर्थाविशेषे ज्ञाने विषयताविशेषासिद्धिरिति शंकनीयं, अर्थेऽपि ज्ञानानुरूपस्वभावपरिकल्पनात्, अर्थाविशेषेऽपि परैः समूहालंबनाद्विशिष्टज्ञानस्य व्यावृत्तये प्रकारिताविशेषस्याभ्युपगमाच्च। न हि तस्य तत्र भासमानवैशिष्ट्यप्रतियोगिज्ञानत्वमेव निरूपकविशिष्टज्ञानत्वं वक्तुं शक्यं, दंडपुरुषसंयोगा इति समूहालंबनेऽतिप्रसंगात्। न च भासमानं यद्वैशिष्ट्यप्रतियोगित्वं तद्वत् ज्ञानत्वमेव, तथा दंडपुरुषसंयोगप्रतियोगित्वानुयोगित्वानीति ज्ञाने दंडविशिष्टज्ञानत्वापत्तेः। न च स्वरूपतो भासमानमित्या-

द्युक्तावपि निस्तारः, प्रतियोगित्वादेरतिरिक्तत्वे प्रकारित्वादेर्ज्ञाननिष्ठस्य कल्पनाया एव लघुत्वात् । अनतिरेके तु दंडदंड-
त्वादिनिर्विकल्पकेऽपि दंडादिविशिष्टज्ञानत्वापत्तेः । एतेन स्वरूपतो भासमानेन वैशिष्ट्येन गर्भितलक्षणमप्यपास्तम्,
संयुक्तसमवायादेः संबन्धत्वे स्वरूपत इत्यस्य दुर्वचत्वाच्च । तस्मात्पराभ्युपगतप्रकारिताविशेषवदाकारविशेषः स्याद्वादमुद्र-
याऽर्थानुरूपस्तदननुरूपो वा ज्ञाने दर्शनशब्दव्यपदेशहेतुरनाविलस्तत्समय एवार्थज्ञानयोरविनिगमेनाकाराकारिभावस्वभा-
वाविर्भावादित्येष पुनरस्माकं मनीषोन्मेषः । तस्माद्द्व्यात्मक एव केवलावबोध इति फलितं स्वमतमुपदर्शयति—" साईअ-
पज्जवसियं ति दोवि ते ससमयं हवइ एवं । परतित्थियवत्तव्वं च एगसमयंतरुप्पाओ ॥ २९ ॥" साद्यपर्यवसितं केवलमिति
हेतोर्द्वे अपि ज्ञानदर्शने ते उभयशब्दवाच्यं तदिति यावत् । अयं च स्वसमयः स्वसिद्धान्तः । यस्त्वेकसमयान्तरोत्पाद-
स्तयोर्भण्यते, तत्परतीर्थिकशास्त्रं, नार्हद्वचनं, नयाभिप्रायेण प्रवृत्तत्वादिति भावः । एवंभूतवस्तुतत्त्वश्रद्धानरूपं सम्यग्द-
र्शनमपि सम्यग्ज्ञानविशेष एव, सम्यग्दर्शनत्वस्यापि सम्यग्ज्ञानत्वव्याप्यजातिविशेषरूपत्वाद्विषयताविशेषरूपत्वाद्वेत्याह—
" एवं जिणपण्णत्ते सद्दहमाणस्स भावओ भावे । पुरिसस्साभिणिबोहे दंसणसद्दो हवइ जुत्तो ॥ ३० ॥" जिनप्रज्ञप्तभाव-
विषयं समूहालंबनं रुचिरूपं ज्ञानं मुख्यं सम्यग्दर्शनं तद्वासनोपनीतार्थविषयं घटादिज्ञानमपि भाक्तं तदिति तात्पर्यार्थः ।
ननु सम्यग्ज्ञाने सम्यग्दर्शननियमवद्दर्शनेऽपि सम्यग्ज्ञाननियमः कथं न स्यादित्यत्राह—"सम्मन्नाणे णियमेण दंसणं दंसणे
उ भयणिज्जं । सम्मन्नाणं च इमं ति अत्थओ होइ उववण्णं ॥ ३१ ॥" सम्यग्ज्ञाने नियमेन सम्यग्दर्शनं, सम्यग्दर्शने पुन-

भजनीयं विकल्पनीयं, सम्यग्ज्ञानं एकान्तरुचौ न संभवति, 'अनेकान्तरुचौ तु समस्तीति । अतः सम्यग्ज्ञानं चेदं सम्यग्दर्शनं चेत्यर्थः । सामर्थ्येनैवोपपन्नं भवति । तथा च सम्यक्त्वमिव दर्शनं ज्ञानविशेषरूपमेवेति निर्व्यूढम् ।

प्राचां वाचां विमुखविषयोन्मेषसूक्ष्मेक्षिकायां येऽरण्यानीभयमधिगता नव्यमार्गानभिज्ञाः ।
तेषामेषा समयवणिजां संमतिग्रन्थगाथा विश्वासाय स्वनयविपणिप्राज्यवाणिज्यवीथी ॥ १ ॥
भेदग्राही व्यवहृतिनयं संश्रितो मल्लवादी पूज्याः प्रायः करणफलयोः सीम्नि शुद्धर्जुसूत्रम् ।
भेदोच्छेदोन्मुखमधिगतः संग्रहं सिद्धसेनस्तस्मादेते न खलु विषमाः सूरिपक्षास्त्रयोऽपि ॥ २ ॥
चित्सामान्यं पुरुषपदभाक्केवलाख्ये विशेषे तद्रूपेण स्फुटमभिहितं साद्यनन्तं यदेव ।
सूक्ष्मैरंशैः क्रमवदिदमप्युच्यमानं न दुष्टं तत्सूरीणामियमभिमता मुख्यगौणव्यवस्था ॥ ३ ॥
तमोऽपगमचिज्जनुः क्षणभिदा निदानोद्भवाः श्रुता बहुतराः श्रुते नयविवादपक्षा यथा ।
तथा क इव विस्मयो भवतु सूरिपक्षत्रये प्रधानपदवी धियां क्व नु दवीयसी दृश्यते ॥ ४ ॥
प्रसह्य सदसत्त्वयोर्न हि विरोधनिर्णायकं विशेषणविशेष्ययोरपि नियामकं यत्र न ।
गुणागुणविभेदतो मतिरपेक्षया स्यात्पदा किमत्र भजनोर्जिते स्वसमये न संगच्छते ॥ ५ ॥
प्रमाणनयसंगता स्वसमयेऽप्यनेकान्तधीर्नयस्मयतटस्थतोल्लसदुपाधिकिर्मीरिता ।
कदाचन न बाधते सुगुरुसंप्रदायक्रमं समंजसपदं वदंत्युरुधियो हि सद्दर्शनम् ॥ ६ ॥

रहस्यं जानन्ते किमपि न नयानां हतधियो विरोधं भाषन्ते विविधबुधपक्षे बत खलाः ।
अमी चन्द्रादित्यप्रभृतिविकृतिव्यत्ययगिरा निरातंकाः कुत्राप्यहह न गुणान्वेषणपराः ॥ ७ ॥

स्याद्वादस्य ज्ञानबिन्दोरमन्दान्मन्दारद्रोः कः फलास्वादगर्वः ।
ज्ञानीसाक्षात्कारपीयूषधारादारादीनां को विलासश्च रम्यः ॥ ८ ॥

गच्छे श्रीविजयादिदेवसुगुरोः स्वच्छे गुणानां गणैः प्रौढिं प्रौढिमधाम्नि जीतविजयाः प्राज्ञाः परामैयरुः ।
तत्सातीर्थ्यभृतां नयादिवि[illegible]मानां शिशुस्तत्त्वं किंचिदिदं यशोविजय इत्याख्याभृदाख्यातवान् ॥ ९ ॥

॥ इति उपाध्यायश्रीयशोविजयगणिना रचितं ज्ञानबिन्दुप्रकरणम् ॥